तत्त्वचिन्तामण्यां प्रमाणसिद्धान्तः

('न्यायशास्त्रे प्रमाणसिद्धान्तः' इत्युपरि आधारितः)

प्रथमो भागः

This book is published with the financial aid
of Tirumal - Tirupati Devasthanams Tirupati (A. P.)

TATWACHINTAMANYAM PRAMANASIDDHANTAH

(based on Nyayashastre Pramanasiddhantah)

First Part

तत्त्वचिन्तामण्यां प्रमाणसिद्धान्तः

प्रथमो भागः

(सामान्य-विषय-विचार-विभागः)

संपादकीयम्

अयि न्यायशास्त्रविजिज्ञासवः । अस्मत्पितृव्यपादैः श्रीमद्भिः गुरुचरणैः वैकुण्ठनिवासिभिः आनन्दतीर्थाचार्य नरसिंहाचार्य वरखेडकर एम्. ए पीएच. डी. उस्मानिया विश्वविद्यालय हैद्राबाद इत्येतैः पीएच. डी. उपाधये लिखितः प्रबन्धः 'न्यायशास्त्रे प्रमाणसिद्धान्तः' (विशेषतो गङ्गेशोपाध्यायकृततत्त्वचिन्तामण्यनुसारी) इति नाम्ना परीक्षकैः सानन्दं स्वीकृत्य परिशील्य तत्राभिव्यक्तं तेषां विषयपाण्डित्यं, निरूपणकौशल्यं, गीर्वाणवाणीपदलालित्यं एवमादिकमवर्णनीयं गुणजातमध्यक्षीकृत्य विशेषसमारोहे सुवर्णपदकादिदानेन सम्मानितः ।

प्रबन्धोऽयं मुद्राप्य संशोधकानां कृते उपलब्धीकर्तव्य इति मनीषया तैः प्रयतितम्। परं नैककारणवशात् तत्र विलम्बो जातः। देहावसानात् कतिपयदिनपूर्वं तैः प्रबन्धोऽयं मुद्रापयितुं मह्यं दत्तः। तत्सार्धमेव मद्विचारानुसारेण प्रबन्धस्यास्य 'तत्त्वचिन्तामण्यां प्रमाणसिद्धान्तः' इति नामान्तरं कर्तुं तथा आवश्यकस्थले संशोधनादिकं कृत्वा यथायोग्यं संपाद्य मुद्राप्य प्रकाशयितुमधिकारोऽपि विलिख्य स्वीयया प्रबन्धप्रतिना सह वितीर्णः।

अस्मिन्कार्ये आर्थिकं साहाय्यं कर्तुं तिरुमल-तिरुपति-देवस्थान समितिः मया प्रार्थिता। तया च यथासंभवं भागशः आर्थिकं साहाय्यं दत्तमपि। तत्कृते तेषां धन्यवादाः।

अस्मिन् मुद्रणकार्ये च सहकार्यं कर्तॄणां चन्द्रिकामुद्रणालय रामंथापूर हैद्राबाद, तथा संस्कृतिमुद्रणालय पंढरपूर इत्येतयोः संचालकेभ्योऽपि धन्यवादाः।

अन्येच ये ये मुद्रितसंशोधनादिकार्ये सहकार्यं कृतवन्तः सज्जनाः तेषां चापि धन्यवादाः।

अन्ते कार्यमिदं लेखकानां इहलोकलोत्रायां पूरयितुमसमर्थः, मुद्रणपूर्वशोधनादौ च कार्यान्तरपातबाहुल्यवशात् असमर्थः अशुद्धिः, पंक्तिपातः अस्पष्टता इत्यादिमुद्रणदोषान् यथासंभवमत्रान्ते प्रकटितान् अप्रकटितांश्च कक्षीकृत्य बुधयः क्षमां कुर्युः, परलोकाच्च लेखकाः आशीराशीर्दद्युरित्याशासे।

अध्ययनादिसौकर्यार्थं समस्तग्रन्थोऽयं मया भागद्वये विभक्तः १) सामान्यविषयविचारविभागः तथा २) विशिष्टविषयविचारश्चेति।

तत्रादिमे विभागे समाविष्टानि प्रकरणोपप्रकरणानि अग्रिमप्रकारेण विद्यन्ते ।

विषयः	पृष्ठसङ्ख्या
१) लेखकस्य प्रतिज्ञापत्रम्	
२) मार्गदर्शकस्य प्रमाणपत्रम्	
३) लेखकस्य विज्ञप्तिः	
४) भूमिका	१–१२
५) उपोद्घातः	१–५०
६) 'प्रमाणसिद्धान्त'गतानां सामान्यविषयाणां परिचयः	५१–२५३

तत्र तत्र च प्रकरणे निरूपितानां विषयाणां विशेषेण सङ्ग्रहः तत्र तत्र प्रकरणारम्भे विषयावगाहनसौकर्यार्थमस्माभिः कृतः संगृह्यादावेव दीयते । आशास्महे च भवेत्स उपकारको जिज्ञासूनां कृत इति ।

शा. श. १९११ श्रावण कृ. ७ भीमाचार्य बाळाचार्य वरखेडकर.

श्रीकृष्णजयन्ती

बुधवासरः

दि. २३–८–१९८९.

Office of the Dean
Faculty of Arts, O U Hyd
Dt. 23 4 1988

No. 153 I DA I 88
Mr. Bhimasenacharya Varkhedkar
2300, Datt ghat
Po. PANDHARPUR 413304

Permission is hereby granted to Mr. Bhimacharya Varkhedkar to publish (late) Dr. A. N. Varkhedkar's Ph. D. thesis on 'Concept of Praman in Indian Logic' in Sanskrit

sd
Dean
Faculty of Arts
Osmaniya University,
HYDERABAD 500007

I ECLARATION

I declare that this thesis has been composed by me, and has not previously formed the basis for the award of any Degree, Associateship, Fellowship, or other similar title of any other University.

sd

Date 25 7 80 (A. N, VARKHEDKAR)

CE TIFICATE

Certified that this thesis entitled as "CONCEPT OF PRAMANA IN INDIAN LOGIC WITH SPECIAL REFERENCE TO GANGESOPADHYAYAS TATTVACINTAMANI" a bonafide work done by A. N. VARKHEDKAR, under my guidence.

sd

Date 25 7 80 (B.R. Shastri)

न्यायशास्त्रे प्रमाणसिद्धान्तः

प्रथमः भागः

NYAYASHASTRE PRAMANASIDDHANTAH

First Part

संकेतसूची

अ. ख.	अनुमानखण्डः
उप ख	उपमानखण्डः
का	कारिका
गौ सू वृ	गौतमसूत्रवृत्तिः
छा उ	छान्दोग्योपनिषत्
जै सू	जैमिनिसूत्रम्
टी	टीका
त चि	तत्त्वचिन्तामणिः
त ता	तर्कताण्डवम्
त सं	तत्त्वसंग्रहः
त सं दी	तर्कसंग्रहदीपिका
त सू	तत्त्वार्थाधिगमसूत्रम्
तुल	तुलनीयम्
तै उ	तैत्तिरीयोपनिषत्
द्र	द्रष्टव्यम्
न्या कु	न्यायकुसुमाञ्जलि
न्या को	न्यायकोशः
न्या बि	न्यायबिन्दुः
न्या बो	न्यायबोधिनी
न्या भा	न्यायभाष्यम्
न्या मं	न्यायमञ्जरी
न्या वा	न्यायवार्तिकम्
न्या वा ता	न्यायवार्तिकतात्पर्यटीका

न्या शि प	न्यायशिखामणिः
न्या सि मु	न्यायसिद्धान्तमुक्तावलि
न्या सु	न्यायसुधा
न्या सु परि	न्यायसुधापरिमळः
न्या सू	न्यायसूत्रम्
पा व्या प्र	पाणिनीयव्याकरणे प्रमाणसमीक्षा
पा सू	पाणिनीसूत्रम्
पृ	पृष्ठम् , पृष्ठानि
प्र ख	प्रत्यक्षखण्डः
प्र न त	प्रमाणनयतत्त्वालोकः
प्र पं	प्रकरणपञ्चिका
प्र प	प्रमाणपद्धतिः
प्र पा भा	प्रशस्तपादभाष्यम्
प्र प्र	प्रमाणप्रकरणम्
प्र वा	प्रमाणवार्तिकम्
ब्र सू	ब्रह्मसूत्रम्
भा द प्रा	भारतीयदर्शनमे प्रामाण्यवाद
भा प	भाषापरिच्छेदः
मा भा	माध्वभाष्यम्
वा भा	वात्स्यायनभाष्यम्
वे प	वेदान्तपरिभाषा
वै सू	वैशेषिकसूत्रम्
श ख	शब्दखण्डः
शा दी	शास्त्रदीपिका
शां भा	शाङ्करभाष्यम्
शा भा	शाबरभाष्यम्

श्लो	श्लोकः
श्लो वा	श्लोकवार्तिकम्
सां त कौ	सङ्ख्यतत्त्वकौमुदी
सां प्र सू	साङ्ख्यप्रवचनसूत्रम्
Ency I ph	Encyclopedia of Indian phylosophy
H I L	History of Indian Logic
I E P	Indian Epistemology of perception
I L M	Indian Logic and Metaphysies.
I T of Error	Indian theories of Error
P	Page
P P	Pages
सां का	साङ्ख्यकारिका
स सं	सर्वदर्शनसंग्रह:

विज्ञप्तिः

प्रथमं प्रकृतशोधप्रबन्धे येषां प्रत्नानां नूतनानां च प्रबन्धरत्नानामुपयोगो मया विहितस्तद्रचयितृभ्यः सादरं हार्दिकीं कृतज्ञतामावेदये । मह्यं न्यायविद्यामध्यापितवतां कीर्तिशेषतां गतानां मदग्रजचरणानां श्रीकृष्णाचार्याणां उपकारभरं न विस्मरामि ।

उस्मानिया विश्वविद्यालयसंस्कृतविभागप्राचार्याणां डॉ बी. आर. शास्त्रिमहोदयानां मार्गदर्शनेन प्रोत्साहनेन च परिपूर्णतामासादितोऽयं शोधप्रबन्ध इति तेषां साञ्जलिबन्धं कृतज्ञतां निवेदयामि ।

उस्मानिया विश्वविद्यालयाधिकारिभिः युनिव्हर्सिटी ग्रँटस्कमिशन्-संस्थाधिकारिभिश्च एकं संवत्सरं संशोधनकर्मसंपत्तये अध्यापकभृतिप्रदानेनाहमत्यन्तमुपकृतोऽस्मि । अतस्तेषां कृतज्ञोऽस्मि ।

किं च दुर्लभग्रन्थप्रदानेन मामनुगृहीतवतां हैद्राबादनगरस्थभारत गुणवर्धकसंस्थाधिकारिणां चाहमधमर्णोऽस्मि ।

अन्ते विविधाभी रीतिभिर्मह्यं साहाय्यं दत्तवद्भ्यो जनेभ्यो धन्यवादान् वितरामि च ।

इति निवेदयिता

आ. न. वरखेडकरः

'प्रमाणसिद्धान्त'गतानां सामान्यविषयाणां स्थूलमानेन स्थलनिर्देशसहितः

परिचय

भूमिका

भूमिका १-१२

१) प्रबन्धे सिंहावलोकनम् १-२

२) प्रबन्धविषयसारांशः ३-१२

अ) सामान्यतया न्यायशास्त्रस्य परिचयः ३-४

आ) विशिष्टविषयाणां संक्षिप्तः परिचयः ४-१२

१) प्रमालक्षणे अन्योन्याश्रयपरिहारः ५

२) निर्विकल्पकप्रमाभ्युपगमो न्यायसंमतः ५

३) स्मृतेः प्रमात्वमप्रमात्वं च ५-६

४) तर्कस्य अप्रमाणत्वमननुमानत्वं च ६

५) संशयस्य अप्रमात्वं, विभागः, लक्षणञ्च ६

६) विपर्ययः ६-७

७) ज्ञानसामान्यकारणादीनां प्रमाणसामान्यलक्षणान्तानां विषयाणां निर्देशः

८) प्रामाण्यवादपरिचयः ७-९

क. प्रामाण्यनिश्चयस्य प्रवृत्तिसंपादकत्वम् ७

ख. प्रामाण्यवादस्य बीजानि ७=८

ग. प्रामाण्याप्रामाण्ययोः ज्ञप्तावुत्पत्तौ च स्वतस्त्वपरतस्त्वविचारः ८=९

९) प्रमाणपरीक्षा ९

१०) प्रत्यक्षनिरूपणम् ९=१०

११) अनुमाननिरूपणम् १०-११

१२) उपमाननिरूपणम् ११

१३) शब्दनिरूपणम् ११-१२

१४) उपसंहारः १२

उपोद्घातः

१-५०

१) भारतीयदर्शनानि— उद्गमो विकासश्च १-३

२) दर्शनानां विभागः, सङ्ख्या च ३-

३) न्यायशास्त्रस्य समुल्लेखः ४=५

४) न्यायशास्त्रस्य मूलम् ५=१५

अ. विविधानि मतानि ६=८

१. सतीशचन्द्रविद्याभूषणमतम् ६-७

२. कीथमतम् ७-८

३. डॉ. राधाकृष्णमतम् ८

४. हिरियन्नामतम् ८

आ. समालोचना ९=१५

इ. निर्णयः १५

५) न्यायशास्त्रस्य विकासः १५

६) न्यायशास्त्रस्य दर्शनत्वप्राप्तिपूर्वकालीनो विकासः १७=२०

नान्तराभिसम्बन्धः २०=२०

८) न्यायशास्त्रस्य दर्शनत्वप्राप्त्यनन्तरकालीनो विकासः २२-२४

९) ऐतिहासिकदृशा कालविभागः २४=२७

अ. विविधानि मतानि २४-२५

क] बोडसमतम् २४

ख] विद्याभूषणमतम् २५

ग] धर्मेन्द्रनाथशास्त्रिमतम् २५

घ] बिजस्वान् मतम् २५

आ. समालोचना २६

इ. निर्णयः २७

१०) प्रधाननैयायिकानां परिचयः २७-५०

अ. प्राचीननैयायिकाः २७-३८

क] गौतममहर्षिः २८-३०

ख] वात्स्यायनमहर्षिः ३०-३२

ग) उद्योतकरः ३२-३३

घ] वाचस्पतिमिश्रः [प्रथमः] ३३-३५

च] उदयनाचार्यः ३५-३६

छ] जयन्तभट्टः ३७-३८

आ] नव्यनैयायिकाः ३८=५०

क] शिवादित्यः ३८

ख] दिवाकरः ३९

ग] तरणिमिश्र ३९

घ] सोन्दडोपाध्यायः ४०

च] मणिकण्ठमिश्रः ४०

छ] गङ्गेशोपाध्यायः ४१-५०

ट. सामान्यम् ४१-४३

२. वैदुष्यम् ४२-४३

वंशः ४३

ङ. समन्वः	४१–४४
ण. तत्त्वचिन्तामणिः	४४–५०
त. सामान्यम्	४४–४५
थ. विषयसंग्रहः	४५–४७
द. तत्त्वचिन्तामणेः व्याख्यानप्रत्याख्यानादिकम्	४७–५०
प. जयदेवकृताभिवृद्धिः	४८
फ. माध्वसंप्रदायिकृतं गङ्गेशमतनिराकरणम्	४८
ब. वर्धमानोपाध्यायादिकृतं परिष्कारादिकं	४८
भ. तत्त्वचिन्तामणेः टिकाःटिप्पणश्च	४९–५०

'प्रमाणसिद्धान्त'गतानां सामान्यविषयाणां
स्थलनिर्देशः

ज्ञानम्

) ज्ञानस्य सामान्यतो निरूपणम्	५१–८०
अ. ज्ञानस्य महत्त्वम्	५१–५३
क) मानवप्रवृत्तिमूलकत्वम्	५१–५३
क) शास्त्रविचारप्रवर्तकत्वम्	५३
ग) शाब्दव्यवहारसाधकत्वम्	५३
आ] ज्ञानस्वरूपम्	५४–७३
क. विषयोपक्षेपः	५४
ख. प्रकृत्यात्मकत्व(साङ्ख्य) वादः	५४–५७
ग. चैतन्य[आत्मरूपत्व]वादः	५७–५८

ञ. वेदान्तसंप्रदायेषु विद्य ।ना विप्रतिपत्तयः	५८–६०
च. गौडपादमतम्	५८
छ. शाङ्करमतम्	५८
ज. रामानुजमतम्	५९
झ. माध्वमतम्	६०
च क्रियारूपत्ववादः	६०–६३
क. भाट्टमतम्	६०
ख. भट्टमतानुयायिमतम्	६१
ग. प्राभाकरमतम्	६१
घ निष्कर्षः	६१
च. विषयसारांशः	६२८६३
छ. गुणत्ववादः	६३–६६
क. साङ्ख्याभिमतबुद्धित्वनिराकरणम्	६३–६४
ख. ज्ञानस्य आत्मगुणत्वसाधनम्	६५
ग. सम्बन्धरूपत्ववादः	६६
ज. उक्तमतविमर्षः (आलोचना)	६६७—
क. साङ्ख्यमत(द्रव्यरूपत्ववाद)प्रत्याख्यानम्	६६=६९
ख. वेदान्तिमत(आत्मस्वरूपत्ववाद)निराकरणम्	६९=७०
ग. मीमांसकमत(क्रियात्मकत्ववाद)निराकरणम्	७०–७२
झ. बौद्धन्यायजैनन्याययोः मतविमर्शः	७२–७३
. ज्ञानसामान्यलक्षम्	७३–७५
क. पर्यायपदानि	७३
ख. गुणलक्षणम् (ज्ञानलक्षणघटकत्वेन)	७३–७४
ग. ज्ञानादीनामनित्यत्वम्	७५
घ. ज्ञानसामान्य लक्षणानि	७५

ई. ज्ञानस्य विभागः ७६–८०
क. वेदवाक्ये ७६
ख. जैनमते ७६
ग. बौद्धमते ७८
घ. न्यायमते ७८
च. प्रमाऽप्रमयोर्विभागः ७८–८०
२) प्रमाया निरूपणम् ८१–१४६
अ. प्रमास्वरूपविचारः ८१–८९
क. विविधानि मतानि ८१–८८
ख. समालोचना ८८
ग. निर्णयः ८९
आ) अप्रमानिरूपणम् ८९–९६
१) अप्रमाप्रभेदपरीक्षणम् ८९–९०
ख. अप्रमास्वरूपम् ९०–९१
ग. अप्रमालक्षणम् ९१
घ. ख्यातिवादः ९१–९६
त. विज्ञान वैभाषिक-सौत्रान्तिक बौद्धमतम् ९२
थ. शून्यवादिबौद्धमतम् ९२
द. प्राभाकरमतम् ९३
ध. भाट्टमतम् ९३
न. अद्वैतमतम् ९४
प. सत्ख्यातिवादः ९४
फ. नैयायिकानामन्यथाख्यातिवादः ९४
ब. निर्णयः ९५–९६
इ. स्मृतिनिरूपणम् ९७–११०
क. प्रास्ताविकम् ९७

ख. स्मृतिप्रामाण्यविचारः ९७–१०६

च. न्यायवैशेषिकमतम् ९७–९८

छ. मीमांसकमतम् ९८

ज. मतान्तराणि ९८–१००

त] कन्दलीकारः ९८

थ] वाचस्पतिमिश्रः ९८

द] बौद्धाः ९८

ध] जैनाः ९८

न] अद्वैतवेदान्तिनः ९८

प] द्वैतवेदान्तिनः ९९–१००

झ. मणिकारमतम् १००–१०२

ञ. नव्यमतपरिष्कारः १०२–१०६

ग. स्मृतिप्रक्रिया १०६–१०७

घ. स्मृतिलक्षणम् १०८

च. कारणकलापः १०८

छ. कारणतावच्छेदकधर्मविचारः १०९–११०

ई. मनोनिरूपणम् ११०–११५

क. प्रास्ताविकम् ११०–१११

ख. मनःसिद्धिः १११–११४

ग. स्वरूपम् ११४–११५

घ. लक्षणम् ११५

उ. तर्कनिरूपणम् ११५–१२७

क] विषयोपक्षेपः ११५–११७

ख] तर्कस्योपयोगः ११७–११८

ग] तर्कस्वरूपम् ११९

च] सूत्रभाष्यमतम् ११९–१२०

[illegible] १२०

ज] मतान्तराणि	१२०-१२२
त] उदयनाचार्यादयः	१२०-१२१
थ] तर्कभाषा	१२१
द] न्यायविदो नव्याः	१२१
ध] जैनन्यायनयः	१२१
न] द्वैतवेदान्तिनः	१२१-१२२
झ] समालोचना	१२२-१२४
त] निर्णयः	१२४
ब] तर्कस्य प्रवृत्तिः	१२४-१२७
च] तर्ककारणानि	१२७
छ] तर्काङ्गपञ्चकम्	१२७
ज] तर्कविभागः	१२७
ऊ. संशयनिरूपणम्	१२८ १४६
त] विषयोपक्षेपः	१२८
थ] संशयोपयोगः	१२८
द] संशयस्य न्यायाङ्गत्वम्	१२९-१३०
ध] संशयप्रवृत्तिः	१३०-१३१
न] संशयस्वरूपम्	१३१-१३६
क) मतमतान्तराणि	१३१-१३४
त) गौतमसूत्रम्	१३१
थ) वार्तिककारः	१३२
द) दीधितिकारः	१३२
ध) गदाधरभट्टः	१३२
न) केचित्	१३२
प) केचित्	१३२ १३
फ) प्राचीनाः	१३३

ब) अन्नम्भट्ट १३३
भ) आठल्ये १३३
म) किन्नरादि १३३
य) प्राचीननैयायिकाः १३३–१३४
र) नव्याः १३४
ल) फणिभूषणतर्कवागीशः १३४
व) मीमांसकाः १३४
श) गोवर्धनभट्ट १३४
ख) समालोचना १३४–१३६
ग) निर्णयः १३६
घ) संशयप्रभेदाः १३७–१४६
त) प्रथमः १३७
थ) द्वितीयः १३७–१४०
द) तृतीयः १४०–१४२
ध) चतुर्थः १४२–१४३
न) पञ्चमः १४३–१४४
प) समालोचना १४४–१४६
३. ज्ञानकारणनिरूपणम्– १४७–१८४
अ. ज्ञानसामान्यकारणानि १४७–१४८
आ. मानननाशकारणविचारः १४९
इ. ज्ञानप्रक्रिया १५०
ई. प्रमात्रादिचतुर्वर्गः १५०–१५७
त. प्रमाता १५१

थ. प्रमेयम्	१५१-१५३
द. प्रमा	१५३
ध. प्रमाणम्	,,
न. चतुर्वर्गस्य महत्वम्	१५३-१५४
प. अर्थतत्त्वविचारः	१५४-१५६
फ. प्रमात्रादिचतुर्वर्गविषये निर्णयः	१५७
उ. तत्त्वज्ञानं प्रमा वा प्रवृत्तिमूलम्	१५७
ऊ. मिथ्याज्ञानस्य दौर्बल्यम्	१५७-१५८
ऋ. प्रमाणस्य प्राधान्यम्	१५८-१६३
त. विषयोपक्षेपः	१५८-१६०
थ. प्रमाणप्राधान्ये युक्तयः	१६०-१६३
ॠ. प्रमाणसामान्यलक्षणम्	१६३-१८४
त. न्यायवैशेषिकमतम्	१६३-१६४
थ. प्रमाणस्वरूपविचारः	१६४-१६६
द. करणपदार्थविचारः	१६६-१७०
क. नैयायिकेषु मतत्रयम्	१६६-१६७
ख. मञ्जरीकारमतम्	१६७-१६९
ग. जैनन्यायमतम्	१६९-१७०
घ. प्रमाप्रमाणयोः संबन्धः	१७०-१८४
क. प्रारंभः	१७०-१७१
ख. मतमतान्तराणि	१७१-१७९
त. न्यायप्रक्रिया	१७१
थ. जैनमतम्	,,

द. बौद्धन्यायमतम् १७१-१७४

ध. मीमांसकमतम् १७४-१७६

न. सांख्ययोगमतम् १७६-१७७

प. वेदान्तिमतम् १७७-१७९

ग. समालोचना १७९-१८०

घ. निर्णयः १८०-१८४

प्रामाण्यवादः १८५-२५०

१) सङ्गतिः १८५-१८९

२) प्रामाण्यस्य स्वतस्त्वपरतस्त्वविचारः १८९-३३०

अ) विषयोपक्षेपः १८९-१९५

आ) प्रामाण्यवादस्य स्वरूपम् १९६

इ) प्रामाण्यज्ञप्तौ स्वतस्त्वपरतस्त्वविचारः १९६-२०८

त. विविधमतविचारः १९६-२०७

क. सामान्येन विचारः १९६-१९७

ख. मीमांसकमतम् १९८

ग. भट्टमतम् १९८-१९९

घ. मुरारिमिश्रमतम् १९९

च. न्यायसिद्धान्तमञ्जरी १९९

छ. वेदान्तिमतम् १९९-२००

ज. परतस्त्ववादिनैयायिकमतम् २००-२०२

झ. जैनबौद्धयोरनियमवादः २०२-२०७

थ. स्वतस्त्वपरतस्त्वनिर्वचनम् २०७-२०८

द. तत्त्वचिन्तामणिग्रन्थे प्रामाण्यवादः २०८

ध. मण्युक्तविप्रतिपत्तिविचारः २०८-२१०

न. गङ्गेशोपाध्यायनिरूपिताः पञ्च विप्रतिपत्तयः २०९-२२१

क. सामान्येन निरूपणम् २०९-२११

ख. विशेषतः निरूपणम् २११-२२१

त. प्रथम विप्रतिपत्तिविचारः २१२-२१४

थ. द्वितीय २१४-२१८

द. तृतीय २१८-२१९

ध. चतुर्थ २१९-२२१

न. पञ्चम २२१-

प पक्षस्वरूपविचारः २२१-२२२

फ. पूर्वपक्षग्रन्थः २२२-२२४

ब सिद्धान्तः २२४-२२७

भ. स्वतस्त्वसाधकयुक्तिनिरासः २२७-२२८

म. समालोचना २२८-२३०

य. निर्णयः २३०-२३३

ई. प्रामाण्यस्योत्पत्तौ स्वतस्त्वपरतस्त्वविचारः २३३-२४७

त. सामान्यम् २३३-२३४

थ. नैयायिकमतम् २३४-२३६

द. मीमांसकमतम् २३६-२३८

ध. स्वतस्त्वपक्षसमर्थनम् २३८-२३९

न. पूर्वपक्ष्याक्षिप्तदोषप्रतिक्षेपः २३९-२४१

१. पूर्वपक्षानुमाने साध्यविचारः २३९-२४१

प. प्रकारान्तरेण परतस्त्वसाधकानुमान-
प्रयोगानुपपत्तिः २४१-

फ. सिद्धान्तः २४१-२४३

ब. मीमांसकमतनिरासः २४३-२४६

म. समालोचना २४६
म. निर्णयः २४७
उ. अप्रामाण्यस्य स्वतस्त्वपरतस्त्वविचारः २४७-२४९
त. सामान्यम् २४७
थ. बौद्धमतम् २४७-२४८
द. समालोचना निर्णयश्च २४८-२४९
ऊ. प्रामाण्यस्य स्वकार्यकरणे
स्वतस्त्वपरतस्त्वविचारः २४९=२५०

प्रमाणपरीक्षा

२५०-२५२
१) प्रमाणसङ्ख्याविचारः २५०=२५१
२) प्रमाणसंप्लवव्यवस्था २५१-२५२
३) प्रमाणसामर्थ्यविचारः २५२

अग्रे द्वितीये विभागे
प्राधान्येन
१) प्रत्यक्षम्, २) अनुमानम्, ३) उपमानम्, ४) शब्दः
इति चतुर्णां प्रमाणविभागानां विस्तरे विचारः कृतः ।
स विभागोऽपि यथावकाशं
शीघ्रमेव मुद्राप्येत ।

भूमिका

ज्ञानप्रक्रिया नाम मूलधारो दार्शनिकविचारधारायाः। अत एव सर्वाण्यपि भारतीयदर्शनानि स्वसिद्धान्तसमर्थनार्थं तदनुकूलान् ज्ञानप्रक्रियाघटक – प्रमाणादिविषयिणो विचारान् क्रोडीकुर्वन्ति। शास्त्रोपदेशोहि प्राधान्येन परप्रतिपत्तिजननायोपयुज्यते। विशेषतः प्रत्यक्षागमाभ्यामीक्षितस्यापि विषयस्य यत्प्रमाणान्तरैरपि परीक्षणं विधीयते तदेव शास्त्राणां शास्त्रत्वं सम्पादयति। एवं च तत्त्वनिर्णय एव शास्त्राणां परमं प्रयोजनमिति सिद्धं भवति। विषयेऽस्मिन् बहुप्राचीनकालमारभ्यैव न्यायशास्त्रं प्राधान्यं वहति। अत एव तत्सर्वशास्त्रोपकारकमित्युच्यते।

तत्तदनुसारेण प्रमाणप्रक्रियायाः ऐतिहासिकदृशा वैचारिकविकासं पर्यालोचयितुं न्यायशास्त्रमेव परिगृहीतम्। शास्त्रेऽपि प्राचीनपरंपराप्राप्ता एव प्रमाणादिविषयिणो विचाराः क्रमेण नैकविदुषां शेमुषीबलेन परिपोषमासाद्य गहनतामधिजग्मुः। केषुचिद्विषयेषु पुनः प्राचीनपरंपरा वैदिकवाङ्मयेऽपि सूचिता भवति। सर्वमेतदुपदर्शयितुं न्यायशास्त्रे प्राचीनतमं प्रथमतया च समुपलभ्यमानं गौतममहर्षिप्रणीतं सूत्रजालमवलम्ब्य तत्र निर्दिष्टानां ज्ञानप्रक्रियासिद्धान्तानां विद्वज्जनपर्यालोचनाजनितानि स्थित्यन्तराणि कानि कथं च तान्युदयमासादितानि? इत्यादयो विषयाः प्रकृतशोधप्रबन्धे सावधारणमालोचिताः।

प्रसंगानुसारं विभिन्नदर्शनेष्वभ्युपगता विचारभेदास्तदुक्तयुक्त्युपन्यासपूर्वकं विचार्य न्यायशास्त्रीयः पक्षः परीक्षितः। न्यायशास्त्रे सामान्यतया न केवलं गौतमविद्यामपि तु वैशेषिकदर्शन जैनन्याय-बौद्धन्यायौ च समावेश्य विचारभेदः पर्यालोचितः। विरोधितया च विशेषेण सांख्ययोगमीमांसकवेदान्तिनां मतान्युपन्यस्याभिनवदृशा विरोधमूलभूतायाः परिकल्पनाया विश्लेषणं विधाय केषुचित्प्रधानविषयेषु युक्तायुक्तचिन्ता प्रवर्तिता।

न्यायशास्त्रेऽपि विशेषतः ज्ञानप्रक्रियाया सैद्धान्तिकदृशा विचारो नव्यन्यायसम्प्रदायप्रवर्तकेन गङ्गेशोपाध्यायेन तत्त्वचिन्तामणौ विकासस्य चरमां दशां प्रापित इति सर्वसम्मतम्। अतः गंगेशोपाध्यायविरचितं तत्त्वचिन्तामणिं विशेषेणावलम्ब्य प्रमाणसिद्धान्तविचारः कृतः। अत एव तत्त्वचिन्तामणौ समुपलभ्यमानेष्वपि सूक्ष्मविचारप्रवर्तितेषु बहुषु परिष्कारेषु केवलं सैद्धान्तिकदशा महत्त्वपूर्णानामेव परिष्काराणां निर्देशोऽत्र विहितः। परिष्कारप्रक्रिया हि नूनं दर्शनविद्यायै न्यायसंप्रदायेन समर्पितमभिनवमुपायनम्। सा च द्विविधा मौलिकविचारप्रवर्तिका केवलं शब्दाडम्बरैर्मण्डिता चेति। तत्र प्रथमा नितान्तमुपादेया। द्वितीया तु शिष्यबुद्धिमुत्पादनार्थं वा विजयप्रयोजकतया वोपयुज्यते। सम्मतं चैतदधीतनव्यन्यायविद्यानां विद्वत्ताम्।

यथावकाशमाधुनिकविपश्चितां मतान्यपि तत्र तत्र सनिश्चयमालोचितानि।

केषुचिदाधुनिकप्रबन्धेषु ज्ञानप्रक्रियाविषयिणो न्यायशास्त्रसिद्धान्ताः पर्यालोचिता विलोक्यन्ते। तथापि तेषां नव्यन्यायपर्यन्तं क्रमिकविकासः कथमभूत् इति तत्र न विशेषतो विचार्यते। प्राधान्येन न्यायशास्त्रस्य दर्शनान्तरैः सह वर्तमानं सम्बन्धमवबुध्य विभिन्नसमये ज्ञानप्रक्रियाविचारः कथं प्रावर्तत इति विचारणीयम्। तच्च प्रकृतशोधप्रबन्धे निरूपयितुं प्रयतितम्।

प्रबन्धविषयसारांशः –

अ) प्रबन्धस्योपोद्घातरूपः प्रथमो भागः। अत्र सामान्यतया न्यायशास्त्रस्य परिचयः प्रस्तुतः।

न्यायशास्त्रस्य मूलं वैदिकवाङ्मयमेव। प्राचीनप्रबन्धेषु तस्य विविधानि नामधेयानि निर्दिश्यन्ते, आन्वीक्षिकी, हेतुविद्या, वाकोवाक्यम्, वादविद्या इत्यादीनि। तान्यवलम्ब्य विचार्यमाणे यज्ञीयसमारम्भेषु विद्वद्भिर्विधीयमानो वादविधिरेव मूलं न्यायशास्त्रस्येति निश्चिनुमः। न हि ज्ञानप्रक्रियाविश्लेषणमन्तरा वादविद्या स्थितिं लभते। न च प्रमाणप्रमेयादितत्त्वमजानता पुरुषेण निर्णयः शक्यो विधातुम्। तस्मादेवमनुमीयते न्यायशास्त्रं प्रारंभे ज्ञानप्रक्रियानिरूपणपरान् कतिपयनियमविशेषान् सिद्धान्तरूपेण क्रोडीचकार तदनन्तरं तानेव सिद्धान्तविशेषानादाय चर्चायामनुमानप्राधान्यमवबोधयन्ती या विदुषां विचारधारा, प्रससार सा वादविद्या, हेतुविद्या वाकोवाक्यमित्यादिव्यपदेशमासाद्य न्यायशास्त्रस्य द्वितीयामवस्थां प्रावर्तयत्। अत्र विषयमहिम्ना न्यायशास्त्रं वैदिकावैदिकसम्प्रदायानुसारिभिः स्वस्वमतपरिपोषाय समुपात्तं विभिन्नदर्शनाभिसम्बन्धमाससाद। औपनिषदविद्यया सम्बद्धमान्वीक्षिकीति पूर्वमीमांसयाऽनुस्यूतं च न्याय इति नामनी लेभे।

दर्शनान्तरेषु वैशेषिकेन सह न्यायशास्त्रस्य कोऽप्यनितरसाधारणः सम्बन्धो वर्तते। तत्राय हेतुः सम्भाव्यते। द्वितीयावस्थायामनुमानप्रधानतयावस्थितं न्यायशास्त्रं वेदानामेव प्रमाणमूर्धन्यत्वं स्वीकुर्वद्भ्यां पूर्वोत्तरमीमांसाभ्यां सह संबद्धमपि तत्र गुणीभूतमेवाभवत्। प्रत्यक्षप्रमाणमात्रमभ्युपगच्छता नास्तिकदर्शनेनाभिसम्बद्धं पुनर्लोकेऽनादरविषयीभूतमजायत। सति चैवं तद्वचनादाम्नायस्य प्रामाण्यम् इति वेदप्रामाण्यमनुमानद्वारा साधयता वैशेषिकदर्शनेन सह मैत्रीमलभत, तदाश्रयेण च दर्शनपदमधितष्ठौ। अत एव प्रमेयविषये पदार्थशास्त्रतया प्रसिद्धस्य वैशेषिकस्य प्रमाणविषये च न्यायशास्त्रस्योपादेयतया परस्परपूरकत्वात् तयोरभेदेन परिग्रहो न्यायवैशेषिकप्रदायसिद्धः।

दर्श ।पदवीप्राप्त्यनन्तरं न्यायशास्त्रस्य विकासश्चतुर्धा बभूव । वेदानुकूला ां न्यायविद्यायां गौतममुनिप्रणीतानि सूत्राणि तदनुसारीणि भाष्यवार्ति कादीनि च प्राचीनन्यायसंज्ञा लाभर । तत्त्वाचन्तामणि-प्रभृतीनि वतन्त्र विचारप्रवृत्तानि नूतनशैलीनिबद्धानि प्रकरणानि नव्यन्याय यपदेशमविजग्मुः । जैनबौद्धसम्प्रदायानुसारिभिरात्मसा-त्कृत्य स्व वसिद्धान्तानुसारमुपपादितं न्यायशास्त्रं जैनन्यायबौद्ध-न्यायरूपेण विचकास ।

यद्य पे नव्यन्यायसम्प्रदायस्य बीजानि गंगेशोपाध्यायपूर्व-कालीनेषु ासर्वज्ञादिरचितेषु न्यायसारप्रभृतिषु प्रबन्धेषु समुपलभ्यते तथापि त य परिनिष्ठितं रूपं तत्त्वचिंतामणावेव विलोक्यते । अत एव गंगेश नव्यन्यायप्रवर्तक इति विदुषां वचः ।

ऐ हासिकदृशा प्रबन्धानवलम्ब्य कालक्रममनुरुध्य चेति द्वेधा न्यायशास्त्र स्य विभागः कल्पयितुं शक्यः । तत्र प्राचीनन्यायः नवीन-न्यायः ज न्यायः बौद्धन्यायश्चेति चतुर्षु विभागेषु प्रबन्धानां वर्गीकरण संभवति । कालक्रममनुरुध्य विधीयमाने विभागे प्रथमं गौतमप्राक ालीनः गौतममारभ्य तदुत्तरकालीनश्चेति द्विविधः काल-खण्डः क पनीयः । द्वितीयः पुनः गंगेशोपाध्यायप्रादुर्भावमवलम्ब्य तत्पूर्वतन तमारभ्योत्तरश्चेति विभाजनीयः ।

न्यायनयजीवातुभूतस्य प्रमाणसिद्धान्तस्य पार्थक्येन परि-शीलन विधाय भारतीयदर्शनेषु न्यायशास्त्रस्य सर्वातिशायि विषय-वैशिष्ट्य निरूपयता मणिकारेण किमप्यपूर्वं यशः समासादितम् । तत्त्वचिन्तामणिग्रन्थनिर्माणकर्मणा विद्वज्जनसमाजे यद्वैचारिकमान्दो-लनं गंगेशेन प्रवर्तितं तत्तदीयप्रतिभाविलासस्य नव्यशैलीविकासस्य च निदर्शनमित्यत्र न विमतिः ।

अ) न्यायशास्त्रं प्रमाणसिद्धान्तः इति द्वितीयः प्रधानो भावः कृतःशोधप्रबन्धस्य । अत्र प्रथमं प्रमाणपरिकल्पनामुपपादयितुं ज्ञानसाय यप्रक्रिया निरूपिता ।

सर्वेषां त्वानां लौकिकालौकिकव्यवहारकारणीभूतं ज्ञानं सर्वा-तिशायि हत्त्वं धारयतीति तावदविवादम् । तच्च ज्ञानं क्रियात्मक-

मिति मीमांसकः द्रव्यमिति सांख्याः जीवनस्वरूपमिति वेदान्तिनः संबन्धविशेष एवेति सम्बन्धवादिन आत्मविशेषगुण इति च नैयायिकाः । विषयेऽस्मिन् मतमतान्तराणि समालोच्य नैयायिकाभिमतो ज्ञानस्यात्मगुणत्वपक्ष एव युक्तियुक्त इति निर्णीतम् । तदनन्तरं ज्ञानसामान्यलक्षणविभागादिविषये विभिन्नमतान्युपन्यस्य न्यायवैशेषिकमतमुपपादितम् ।

अस्मिन्सन्दर्भे प्रमया अप्रमायाः भेदानां च निरूपणावसरे निर्णीता निम्नलिखिता विषयाः सविशेषमवधानार्हाः ।

१) तद्वति तत्प्रकारकानुभवत्वं प्रमात्वमिति मणिकारेण सिद्धान्तितम् । तत्रायमाक्षेपः लक्षणघटकेन तत्पदेन घटत्वादीनां ग्रहणं कर्तव्यम् । तन्नोपपद्यते । ज्ञात एव घटे घटत्वज्ञ नसंभवात् । तथा च घटप्रमानन्तरं घट वज्ञानानन्तरं च तदघटितलक्षणद्वारा घटप्रमा इत्यन्योऽन्याश्रयात् घटत्वादिघर्मघटितं लक्षणमयुक्तमिति । अत्रेदं समाधानम् – घटघटत्वयोः निर्विकल्पकं प्रथममुत्पद्यते, तदनन्तरं च सविकल्पकम् । ततः प्रामाण्यसंशयः । तदनन्तरं च संवादादिना प्रामाण्यनिश्चयः इति प्रामाण्यस्य ज्ञप्तावुत्पत्तौ च परतस्त्वमभ्युपगच्छतां नैयायिकानां समयः । विशिष्टज्ञानस्य विशेषणज्ञानसापेक्षतया घटत्वनिर्विकल्पकानन्तरमेव घटज्ञानमिति नान्योऽन्याश्रयता ।

२) निर्विकल्पकप्रमेव नास्तीति केचित् । सिद्धान्तपरिरक्षणाय तत्स्वीकुर्वाणोऽपि मणिकारः निर्विकल्पकस्य प्रमाऽप्रमाबहिर्भूतत्वमेव निरूपयति । तदेवं 'विशिष्टबुद्धेर्विशेषणबुद्धिसापेक्षत्व'मिति नियमस्वीकारे समुद्भाव्यमानाया अनवस्थाया निवारणार्थं निर्विकल्पकाभ्युपगमो न्यायसंमत इत्यध्यवसीयते ।

३) स्मृतिरप्रमेति प्राचीनन्यायसमयः प्रमेति वैशेषिकाः । स्वजनकसंस्कारकारणीभूतानुभवप्रामाण्यपरतन्त्रत्वादप्रमेति नव्यनैयायिकाः अत्रायं निर्णयः– परप्रामाण्यपरतन्त्रत्वं नाप्रामाण्यप्रयोजकम् स्वतन्त्रं परतन्त्रं वा प्रामाण्यं प्रामाण्यमेव भवितुमर्हति न हि प्रयत्नशतेनापि तदन्यथयितुं शक्यम् । इयान्पुनरत्र विशेषः परामर्शादिप्रामाण्यपरत-

त्रमप्यनुमित्यादिप्रामाण्यं न स्मृतिप्रामाण्यवत्कदाचिद्व्यभिचरति । निश्चिते परामर्शादिप्रामाण्ये नियमेनानुमितिः प्रमात्मिकैव जायते । एवं सत्यपि प्रामाणिकेऽनुभवे कालादिजनितदोषवशात्कलुषितेन संस्कारेणाप्रामाणिकस्मरणोत्पत्तेरस्त्यवसरः इति ।

४) तर्कोऽप्रमाणमिति न्यायनयः । स हि विषयपरिशोधकतया व्याप्तिग्रहोपायतया चेति द्वेधा प्रवर्तते । स च ऊहात्मकः इति प्राचां मतम् । भ्रमात्मक इति केचित् । आहार्यभ्रमरूप इत्यपरे । अनिष्टप्रसंगात्मक इत्यन्ये । आपादनं चात्रांगीकार्यताज्ञापनमेव न त्वारोपः ।

व्याप्तिमूलकस्यापि तर्कस्य न प्रमाणत्वम् । कथमिति चेत्न्यायनये तर्कस्याभ्यनुज्ञैव फलम् । सा च प्रामाणिकविषयस्वीकारः न तु विषयनिश्चयः । निश्चयभिन्नत्वस्य प्रमात्वे तन्त्रत्वादभ्यनुज्ञा अप्रमा अप्रमाजनकत्वात्तज्जनको न प्रमाणमिति व्याप्त्यपेक्षत्वेऽपि तर्कस्य साध्यसाधनभावादिवैधुर्यान्नानुमानत्वम् ।

५) संशयस्याप्रमात्वं सर्वसंमतम् । न्यायशास्त्रदृष्ट्या तु न्यायांगतया संशयस्यानितरसाधारणं महत्त्वं वर्तते । संशयश्च पंचविध इति सूत्रभाष्यस्वारस्यादध्यवसीयते । वार्तिककारस्तु तस्य त्रैविध्यमेवोपपादयामास ।

तल्लक्षणं तु 'एकस्मिन् धर्मिणि विरुद्धनानाकोटिकज्ञानं संशयः इत्येवोचितम् । तत्रश्च कोटयो भावाभावरूपाः सुवचाः । प्राचीनमते संशयकोटीनां भावाभावात्मकत्वमिति न नियमः । नव्यमते तु भावात्मकानां धर्माणां स्वविरोध्यभावात्मकधर्मसामानाधिकरण्यसत्त्व एव संशयोदयः । वस्तुवस्तु विचार्यमाणे, क्वचित्केवलं भावात्मककोट्यवगाहित्वं संशयस्य संभवति ।

६) अप्रमापदस्यस्य विपर्ययार्थकतया प्रयोगो बहुलमुपलभ्यते । विपर्यये मिथ्यात्वं न खल्वधिष्ठानस्य, नापि प्रधानस्य, किन्तु प्रत्ययस्य । अत एव बाधज्ञानेन मिथ्याप्रत्ययस्य निवृत्तिः । किं च भ्रमो नाम धर्म्यंशे प्रमा प्रकारांशे चाप्रमा । तत एव सर्वं ज्ञानं धर्मिण्यभ्रान्त-

त्वमिति ख्यायते। विविधेषु ख्यातिवादेषु अन्यथाख्यातिवादो नैयायिकानाम्।

अत्रायं विशेषः। अन्यथापदस्य यद्यपि विषयेण सह सम्बन्धो विद्वदुपगृहीतस्तथापि सूत्रभाष्याद्यनुसारं मिथ्यात्वस्य प्रत्यये भासमानत्वात् 'अन्यथा' इतिपदं ख्यात्यैव विशेषभूतं युक्तमिति विभाव्यते।

एतदनन्तरं ज्ञानसामान्यकारणानि विचार्य, ज्ञानप्रक्रियायां प्रमा, प्रमाता, प्रमाणं, प्रमेयमिति चतुष्टयस्य महत्त्वं निरूपितम्। संक्षेपेण तेषां पारस्परिकसंबन्धं स्वरूपादिकं च विचारविषयीकृत्य प्रमाणसिद्धान्तनिरूपणाङ्गतया प्रमाणानां प्राधान्यं, विविधदर्शनेषु सत्सु न्यायदर्शनस्य तद्विषये सविशेषाभिनिवेशः प्रमाणसामान्यलक्षणं चेत्येते विषयाः प्रचिताः।

प्रमाणसिद्धान्तसारभूतो हि विषयः प्रामाण्यवादो नाम। विविधदर्शनकारैः सूक्ष्मेक्षिकया विषयममुं परिशील्य स्वस्वसंप्रदायानुसारं महनो विचारः प्रवर्तितो निबन्धेषु। ज्ञानगतं हि धर्मद्वयं प्रामाण्यमप्रामाण्यं चेति। तच्च कथं ज्ञायते? कथं चोत्पद्यते? इति विचार एव प्रामाण्यवादः।

मीमांसकवेदान्तिनौ माध्यमिकाश्च अर्थनिश्चयवत् प्रामाण्यनिश्चयस्यापि सर्वत्र प्रवृत्तिहेतुत्वमभ्युपगच्छन्ति। नैयायिकास्तु अदृष्टार्था वैदिकी प्रवृत्तिः प्रामाण्यसंशये सत्यभवन्ती प्रामाण्यावधारणसापेक्ष्यैवेति वदन्ति। दृष्टार्था प्रवृत्तिस्तु प्रामाण्यावधारणं विनाऽपि यथा तथा भवतीति तेषामाशयः। एवं च निःश्रेयसरूपादृष्टप्रयोजनका शास्त्रे प्रवृत्तिः प्रामाण्यावधारणं विना नोपपद्यते इति सिद्धं भवति। एवं चोभयथाऽपि शास्त्रे प्रवृत्तिसम्पादनार्थं प्रामाण्यनिश्चयः परमावश्यक इति सिद्धं भवति।

वेदवाङ्मय एव प्रामाण्यवादस्य बीजान्युपलभ्यन्ते। परं तस्य विकसितं स्वरूपं तु प्रथमं मीमांसादर्शन एव विलोक्यते। दार्शनिकानां पारस्परिको वादविवाद एव मूलं प्रामाण्यवादस्य इत्यपि केषांचिन्मतम् वस्तुतस्तु प्रामाण्यवादोऽपि वादविद्याया एवं विषयः संभाव्यते।

अत एव दश ाप्दप्राप्तेः पूर्वं कतिपयप्रमाणविषयकसिद्धान्तरूपेणाव-स्थित तर्कशा स्त्रमेव प्रामाण्यविचारेऽपि स्वमहि मानमावेदयत् मीमां-सादर्शनमुखेन प्रावर्तत इति वक्तुं सुशकम् । तदनुसारं ब्रम्हसूत्रेषु जैमिनिसूत्रे च प्रामाण्यस्वतस्त्वसाधकयुक्त्युपन्यासो दृश्यते ।

प्रामा ण्याप्रामाण्ययोर्ज्ञप्तावुत्पत्तौ च स्वतस्त्वपरतस्त्वविचारः प्रामाण्यरग कार्ये स्वतस्त्वपरतस्त्वविचार इत्याहत्य दशपक्षाणां विचारः प्रामाण्यवादेऽन्तर्भवति । दर्शनकारास्तु प्राधान्येन प्रामाण्यस्य ज्ञप्तावुत्पत्तौ च स्वतस्त्वपरतस्त्वविचारमेव कुर्वन्ति । तावतैव पक्षा-न्तराणां ग ता सम्पद्यते । अत्रैते विषयाः सविशेषमवधानार्हाः ।

१) प्रामाण्यं ज्ञानसामान्यग्राहकेणैव गृह्यत इति प्रामाण्यस्य ज्ञप्तौ स्वत म् ज्ञानसामान्यजनकसामग्रीमात्रजन्यमिति चोत्पत्तौ स्वतस्त्व तन्मीमांसकादीनां मतम् । अत्र प्रामाण्यवत इव ज्ञानस्य ग्रह इति भवति । तेन अनभ्यासदशापन्नज्ञाने संशयो नोप-पद्यते । ज्ञ हैव तत्प्रामाण्यस्यापि निश्चितत्वात् ।

२) ज्ञानसामान्यग्राहकातिरिक्तैरनुमानादिभिः प्रामाण्यग्रहणात् ज्ञानसामान्यजनकेन्द्रियार्थसन्निकर्षादिभिन्नगुणजन्यत्वात् च प्रामाण्य-स्य ज्ञप्तावुत्पत्तौ चपरतस्त्वमिति नैयायिकमतम् । अत्र प्रामाण्यग्राह-कानुमाने प्रामाण्यग्राहकमन्यदेवास्थेयमित्यनवस्था ।

३) अनवस्था दोषपरिहारार्थं च मणिकारः त्रिचतुरनुमानपर्य-न्तमेव प्रामा शंकायाः संभवेन तावत्पर्यन्तमेव प्रामाण्यग्राहकानुमा-नाद्यपेक्षा तदनन्तरं तु कोटिद्वयोपस्थित्यभावात् विषयान्तरसंचाराच्च न प्रामा काश इति समादधौ ।

यद्यपि त्रिचतुरनुमानपर्यन्तमेव प्रामाण्यशंकासंभवे नियाम-काभावा समाधानं युक्तं तथापि तन्मते यस्मिन् ज्ञाने प्रामा-ण्यशंका अभ्युपेयते तस्य प्रामाण्याप्रामाण्यान्यतरधर्माधिकरणत्वेन अग्रह इत्यत्रैव तात्पर्यमादाय वचनं योजनीयम् । ततश्च प्रामाण्य-शंकाभाववति ज्ञाने प्रामाण्यनिश्चयस्याप्यभावात् प्रामाण्यनिश्चयस्य स्वतस्त्वापत्तिरपि प्रयुक्ता भवति ।

ज्ञ प्रामाण्याप्रामाण्यान्यतरधर्माधिकरणत्वेनाग्रहः कथम् ?

इति चेदुच्यते ज्ञानसामग्री नियमेन गुणदोषान्यतरसहकारेण प्रमाम् प्रमां वा जनयति न तु तृतीयां कामपि ज्ञानसामान्यविधामिति सत्यम् । तथापि तद्गतं प्रामाण्यमप्रामाण्यं वा उत्पन्नं सदपि ज्ञायत एव इति न नियमः । अज्ञायमानप्रामाण्यस्यापि ज्ञानस्य प्रवर्तकत्वोपपत्तेः ।

अप्रामाण्यस्य बाधद्वारा ज्ञायमानत्वात् तस्य ज्ञप्तौ परतस्त्वं प्रायः सर्वसम्मतम्। उत्पत्तावपि दोषजन्यत्वात् दोषाणां च ज्ञानसामान्यकारणत्वाभावात् परतस्त्वमेव सर्वेषामभिमतम् । तथाच यथा दोषाणामप्रमाकारणत्वं तथा गुणानां प्रमाकारणत्वमिति नैयायिकाः ।

प्रामाण्यवादानन्तरं प्रत्यक्षादिप्रमाणचतुष्टयपरीक्षा निरूपिता । तत्रादौ प्रमाणसंख्याविषये मतभेदानुपन्यस्य प्रमाणानां प्रवृत्तिरालोचिता । चतुर्षु प्रमाणेषु परमप्रधानत्वात्प्रत्यक्षविचारः सर्वैरपि शास्त्रकारैः प्रथममुपादीयते । तदनुसारं गौतममारभ्य गङ्गेशोपाध्यायं यावत प्रत्यक्षस्वरूपलक्षणादिविषये नैयायिकानां विचाराः पर्यालोचिताः । तत्र प्रत्यक्षं निर्विकल्पकबोधात्मकमिति इन्द्रियकरणतावादिनः प्राचीनाः सन्निकर्षकरणतावादिनश्च नवीना आहुः बोधाबोधात्मकमिति तदुभयसमन्वयवादिनः कन्दलीकारप्रभृतयः प्रतिपादयन्ति । तन्मते नेन्द्रियसन्निकर्षयोरिव निर्विकल्पकज्ञानस्यापि सविकल्पकज्ञानव्यापारद्वारा हानादिबुद्धिजनकत्वेन करणत्वात् प्रत्यक्षत्वम् ।

प्रत्यक्षलक्षणपरं सूत्रं बहुभिर्बहुधा व्याख्यायते । केचिन्निर्विकल्पकप्रत्यक्षप्रमापरमेव सूत्रमित्याहुः अन्ये यतः पदमध्याहृत्य इन्द्रियपरतया सन्निकर्षपरतया वा योजयन्ति । तात्पर्याचार्यस्तु सविकल्पकनिर्विकल्पकत्वेन द्विविधमपि प्रत्यक्षमिह सूत्रे लक्ष्यमिति लक्षणद्वयपरतया सूत्रं व्याचख्यौ । सति चैव इन्द्रियार्थसन्निकर्षोत्पन्नमिति कथनात् । जन्यलौकिकप्रत्यक्षमात्र विषयीकुर्वदव्याप्तमिदं लक्षणमिति विचार्य ज्ञानाकरणकं ज्ञानं प्रत्यक्षसामान्यलक्षणं सिद्धान्तयामास मणिकारः ।

अत्रायमाक्षेपः इन्द्रियजन्यत्वमिति वा इन्द्रियार्थसन्निकर्षजन्यत्वमिति वा यज्जन्यप्रत्यक्षमात्रस्य लक्षणमुच्यते, यच्च ज्ञानाकरणकं ज्ञानमिति प्रत्यक्षसामान्यलक्षणमुच्यते, तन्नोपपद्यते । हानादिबुद्धेः प्रत्यक्षत्वापत्तेः । न हि सा इन्द्रियजन्या, नापि तत्सन्निकर्षजन्या, न च ज्ञानाकरणका, निर्विकल्पकज्ञानकरणकत्वात् । इति ।

अयमाक्षेपो द्वेधा समाधीयते । ज्ञानकरणकज्ञानत्वमित्यस्य ज्ञानकरणकत्वाव्यभिचारिजातिशून्यज्ञानत्वमित्यर्थः । तेन हानादिबुद्धेर्ज्ञानकरणकत्वेऽपि ज्ञानकरणकत्वाव्यभिचारिणी याऽनुमितित्वादिरूपा जातिस्तच्छून्यज्ञानत्वाभावान्नातिव्याप्तिः । वस्तुतस्तु हानादिबुद्धेरप्रत्यक्षत्वपक्ष एव नवीननैयायिकानामिष्ट इति न काऽपि दोषः ।

ततः प्रत्यक्षकारणविचारे सन्निकर्षाणां निरूपणं विधाय नव्यन्यायसंमतयोः सामान्यलक्षणज्ञानलक्षणप्रत्यासत्त्योः पर्यालोचना विहिता । तत्र सकलधूमादिविषयकसामान्यव्याप्तिग्रहार्थं सामान्यलक्षणायाः, सुरभि चन्दनमित्यादेः प्रत्यक्षत्वोपपादनार्थं, शुक्ताविद रजतमित्यादिभ्रमस्थले रजतप्रत्यक्षोपपादनार्थं च ज्ञानलक्षणायाः प्रत्यासत्तेरभ्युपगमो नैयायिकैर्विधीयत इत्यादि निरूप्य समालोचितम् ।

सविकल्पकयोर्निरूपणं विषयविश्लेषणपूर्वकं विधायानुव्यवसायस्य न्यायनये वैशिष्ट्यं विवृतम् ।

तदनु मूलत एव न्यायशास्त्रे प्रधानतया विस्तरेण च प्रतिपाद्यमानमनुमानं विचारगोचरीकृतम् तस्य स्वरूपलक्षणादिकं निरूप्य सर्वेष्वपि विषयविभागेषु सूत्रकारमारभ्य गंगेशोपाध्यायकाल यावत विचारः कथं वृद्धिमाप इत्याद्यैतिहासिकदृशा च परीक्षितम् प्रत्यक्षपूरकमनुमानमिति सूत्रकार आह । तच्च प्रत्यक्षं लिङ्गलिङ्गिसंबन्धदर्शनलिङ्गदर्शनरूपेण द्विविधमिति भाष्यकारः । वार्तिककारस्तु लिङ्गपरामर्शरूपं तृतीयमपि प्रत्यक्षं कारणतया संयोजयामास पक्षधर्मताऽप्यनुमितिकारणमिति प्रतिपाद्य गंगेशादयः व्याप्तिविशिष्ट यात्तस्याः परामर्शत्वमुपपादयामासुः । तदेवं ज्ञायमानं लिङ्गं लिङ्गज्ञानं व्याप्तिज्ञानं, परामर्शो वाऽनुमानमिति मतचतुष्टयं सिद्धं भवति ।

परामर्श एवानुमानमिति नवीनमतं वार्तिककारेणाप्यनुमोदितमुपलभ्यते

ततः साध्यहेत्वाद्यनुमानाङ्गानां पर्यालोचनं विधाय व्याप्तिग्रहे विशेषतो विविधविषयीभूतायाः व्याप्तिपरिकल्पनायाः मूलं च विचार्य तस्याः सिद्धान्तरूपेण विकासः समालोचितः। तदुत्तरं परामर्शस्वरूप-मुपपाद्य न्यायतन्त्रावयवानां हेत्वाभासानां च निरुपणमुपात्तम् ।

उपमानप्रकरणे उपमानप्रामाण्यं व्यवस्थाप्य, तत्स्वरूपलक्षणा-दिकं च विचार्य प्राचीनकालमारभ्य गंगेशोपाध्यायकालं यावत् उपमित्यादिविषये विचारः पर्यालोचितः ।

अत्रेदं सविशेषमवधेयम् । सादृश्यज्ञानमुपमानमिति वार्तिकका-रानुवर्तिनः अतिदेशवाक्यार्थज्ञानं तदिति भाष्यानुसारिणः । मंजरीका-रमतेऽपि उपमानप्रक्रियायां प्राचीनमते अतिदेशवाक्यं प्रधानम् सादृश्यं-चाप्रधानम्, नव्यमते तु तद्विपरीतम् । परंपरामनादृत्य मणिकारः पुन-र्निरणैषीत् यत्, प्रवृत्तिनिमित्तजिज्ञासाप्रयुक्त एवातिदेशवाक्ये देशः प्रवृत्तिनिमित्तोपलक्षकं च सादृश्यवैसादृश्यादिकमुपश्रुत्य वाधर्वादिकक सहकृतादतिदेशवाक्यार्थस्मरणात् प्रवृत्तिनिमित्तविशेषपरिच्छित्तिरुपमान-फलम् इति ।

किं च शाब्दव्यवहारमात्रप्रयोजनकमुपमानं न मोक्षोपयोगितत्त्व-ज्ञानसाधनमिति न्यायनयः । श्रवणमननदर्शनानामेव मोक्षोपयोगित्व-श्रवणात् ।

ततः शब्दप्रमाणचिन्ता विहिता। शब्दस्य प्रमाणत्वं तावदवश्य-मभ्युपेयम् । तच्च प्रत्यक्षमूलकमिति नैयायिकाः, वेदानां प्रत्यक्षाद्यनपे-क्षणात् विषयव्यवस्थया दृष्टार्थे प्रत्यक्षमूलकमदृष्टार्थे धर्माधर्मादौ तु स्वतन्त्रमिति वेदान्तिप्रभृतयः । लौकिकशब्दस्यानुवादकत्वादप्रामाण्यमे-वेति मीमांसकाः । सर्वविधप्रत्ययानां शब्दमूलकत्वात् प्रत्यक्षादिषु तदेव प्रधानमिति वैयाकरणाः ।

वैशेषिकादयः शब्दस्यानुमान एवान्तर्भावमभिप्रयन्ति । तन्न युक्तम् । अर्थव्यभिचारदर्शनात्, अन्वयव्यतिरेकाभ्यां शब्दप्रमयोः कार्य-कारणभावावधारणाच्च ।

अत्रायं विशेषः - एतानि पदानि स्मारितार्थसंसर्गज्ञानपूर्वकाणि आकांक्षादिमत्पदकदम्बत्वादिति, वैशेषिकोक्तपदपक्षकानुमानेन जाय-मानायामनुमितौ स्मारितपदार्थसंसर्गस्य ... या मानम् । शाब्दबोधे

तु रजतत्वस्य प्रकारतया भानम् । ततश्चैकविषयत्वाभावेन नानुवादकत्वं शब्दस्य । एते पदार्थाः तात्पर्यविषयमिथः संसर्गवन्तः आकांक्षादिमत्पदस्मारितत्वात्' इति पदार्थपक्षकानुमानमपि न विचारसहम्, योग्यतायाः बाधकप्रमाणमात्रविरहरूपायाः सर्वत्र निश्चेतुमशक्यत्वेन लिङ्गविशेषणत्वासम्भवात् । अनिश्चितविशेषणकस्य लिङ्गस्याप्यनिश्चितत्वेन ततोऽनुमित्यनुदयात् । योग्यतासंशयदशायामपि शाब्दबोधानुभावात् व्यभिचारोऽपि बोध्यः ।

एवं शब्दप्रामाण्यं व्यवस्थाप्य शाब्दबोधप्रक्रिया प्रपञ्चिता । तस्यां पदार्थवाक्यार्थयोर्विचारे पदवृत्तेः अन्विताभिधानाभिहितान्वयवादयोश्च समालोचना विहिता । 'सामायिकत्वाच्छब्दार्थसंप्रत्ययस्येति गौतमसूत्रे समयपदेन संकेतो बोध्यते । एष समय ईश्वरप्रणीत इति भाष्ये वार्तिके वा नोपवर्ण्यते । तात्पर्यकारस्तु ईश्वरसङ्केतः शक्तिरिति प्रतिपादयति । अर्थस्मृत्यनुकूलः पदपदार्थसम्बन्धः शक्तिरिति नवीननैयायिकमतम् । लक्षणाख्यवृत्तिनिरूपणं सूत्रभाष्यादौ स्पष्टतया नोपलभ्यते ।

एतदनन्तरं आकाङ्क्षादीनां निरूपणं विधाय विषयोपसंहारः कृतः । उपसंहारे च संक्षेपेण प्रमाणचातुर्विध्यसमर्थनाय अर्थापत्त्यादीनामुक्तप्रमाणेष्वन्तर्भावो दर्शितः ।

उपोद्घातः

भारतीयदर्शनानि – उद्गमः विकासश्च ।

मनु अवबोधने इति धातोर्निष्पन्नो हि मानवशब्दः मननशीलस्य मानवस्य प्रथमावतार एव ज्ञानस्याप्याविर्भावसमय आसीदिति सम्यगवगमयति । ज्ञानं हि मूलं सर्वविद्यानाम्, आचारविचाराणाम्, मानवप्रवृत्तेश्च । ज्ञानशक्तिरेव प्राणिमात्रेषु मानवानां महिमातिशयमभिव्यनक्ति । तयैव किल निर्माय दिगन्तरालेषु विद्योतितो विविधविद्याप्रदीपो निरवद्यमद्यापि विदुषां हृदयपद्मायां स्थितिं संपाद्य प्रतिदिनमधिकाधिकमेधमानो विराजते । संसारे विद्यमानानां विविधवस्तूनां वैचित्र्यं लोचनगोचरीकृत्य चकितचेतसां मानवानां जिज्ञासैव हि नानाविधाः विद्याः प्रसूते ।

भारतीयपरम्परानुसारं वेदा एव मूलं विविधविद्यास्थानानां विशेषतो दर्शनानाम् । विद् धातोर्निष्पन्नो हि वेदशब्दो वेदानां ज्ञानसाधनतामभिव्यनक्ति । दर्शनस्य च तत्त्वावलोकनमर्थः । ऋषिर्दर्शनादिति निरुक्त(१)व्याख्यामवलम्ब्य सनिश्चयमवधारयामो यन्मन्त्रद्रष्टॄणां महर्षीणां निरन्तरचिन्तनैकफलीभूतं तत्त्वज्ञानमेव दर्शनपदव्यपदेश्यमिति ।

---

१. निरुक्तम् – २ – ११

किञ्च विविधविद्यानां विकासो हि संसारे मननशीलानां मानवानां मनोऽभिनिवेशमपेक्षते । तथा हि 'पिण्डे पिण्डे मतिर्भिन्ना' इति न्यायेन केचन यथाकथमपि सुखमासादयितव्यमिति मन्यमानाः कर्णीसुतविनिर्मितां विद्यामप्यवलम्बमानाः दृश्यन्ते । इतरे तु क्रमिकविकासभाजां मनुजानां स्वर्गापवर्गादिरूपाः प्राचीनपरिकल्पनाः केवलमविवेकविजृम्भितमेवेति कथयन्तो नृत्यगीतादिकलाकलापं भौतिकविद्यां च सुखसाधनं मन्वाना मनो मोहयन्ति । अपरे पुनः प्राचां सदाचारविचारप्रवणचेतसाम् अनुसरणमेव परमानन्दनिदानमित्यभिप्रयन्तो यागादिप्रक्रियामेव सादरमूरीकुर्वन्तो विलोक्यन्ते । अन्ये तु आपातरमणीयायाः परिणामे दुरन्तदुःखानुबन्धिन्याः सांसारिकविषयभोगलालसायाः करावलम्बं दूरत एवापहाय वेदान्तनिरूपितया अध्यात्मविद्याचिन्तयैव शान्तिमभिलषन्ति ।

अध्यात्मविद्यानिरूपणपराः दार्शनिकप्रबन्धाः पुनः प्राचीनभारतीयसभ्यतायाः संस्कृतेश्च परमोदारमुदात्तं स्वरूपमवगमयन्तीत्यत्र न काऽपि विप्रतिपत्तिः । 'प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्तते '(२) इतिन्यायेन प्रवृत्तिनिमित्तभूतानां विविधविद्यानां सत्स्वपि बहुषु प्रयोजनेषु निरन्तरनिरवद्यसुखानुभूतिं कामयमानानां भारतीयमनीषिणां मनो मोक्षाख्यपरमपुरुषार्थप्राप्त्युपायभूतायामध्यात्मविद्यायां यथा अरमत न तथाऽन्यासु विद्यासु इति बहवो मन्यन्ते । यत एवं परां काष्ठामधिरूढो वेदान्तविद्याविकासो विविधतामावहन् प्राचां तत्त्वचिन्तकानां निरन्तरचिन्तनं विविधेषु दार्शनिकसम्प्रदायेषु प्रतिबिम्बितं स्फुटमवभासयति ।

दार्शनिकविचारधारा पुनरादित एव वैदिकी तद्भिन्ना-चेति द्वेधा प्रवर्तमाना दृग्गोचरी भवति । विशेषतो वैदिक-

---

२) श्लोकवार्तिकम्, सम्बन्धाक्षेपपरिहारप्रकरणम्, श्लो. ५५

साहित्यं संसारे प्रथमतया प्रथमानं प्राचीनतममानवीयसंस्कृति-सभ्यतयोर्निदर्शकं सत् किमपि महिमातिशयमावहतीति तत्प्राधान्यमवलम्ब्य वैदिकावैदिकरूपेण द्वेधा विधीयमानोऽयं दार्शनिकविचारधाराविभागो न कथमप्यसंगतिकोटिमाटीकते ।

एष पुनर्विषयो विदुषां विशेषमवधानमर्हति यत् प्राचां भारतीयमुधियामुदारा बुद्धिरन्वमन्यत विचारस्वातन्त्र्यं येन वेदविरोधीन्यपि चार्वाकबौद्धजैनादीनि दर्शनानि न केवलमुत्पद्य प्रसृतानीत्येव परं वैदिकदर्शनैः सह अध्ययनविषयाण्यप्यभूवन् । (३)

दर्शनानां विभागः –

भारतीयदर्शनानांविभागो हि प्राधान्येन द्वेधा विधीयते सुधीभिः आस्तिकदर्शनानि नास्तिकदर्शनानि चेति । परलोकाद्यभ्युपगन्तृत्वेन, वेदप्रामाण्यवादित्वेन च दर्शनानि कानिचिदास्तिकानीति, तद्विरोधीनि च नास्तिकानीति भारतीयविद्वत्परम्परायां परिगण्यन्ते (४) । तदेवं परलोकाद्यनभ्युपगन्तृतया, वेदप्रामाण्यविरोधितया च चार्वाकदर्शनस्य नास्तिकत्वम् ; जैनबौद्धदर्शनयोस्तु केवलं वेदविरोधितया तथात्वमिति सुविलोकम् ।

भारतीयदर्शनेषु कानिचिज्जीवेश्वरयोर्भेदवादीनि, कानिचिद्भेदाभेदवादीनि, कानिचन पुनरभेदवादीनीति विद्वज्जनसंमतो विभागः ।

दर्शनानां संख्या –

काचन विद्वत्परंपरा भारतीयदर्शनानां षट्संख्याकत्वमभ्युपगच्छन्ती तत्र पूर्वोत्तरमीमांसयोः, सांख्ययोगयोः, न्यायवैशे-

---

3) द्र. Indian Philosophy Vol. I Intro. पृ. 27.

४) मनुस्मृतिः २–२ 'प्रामाण्यबुद्धिर्वेदेषु', 'नास्तिको वेदनिन्दकः'

षिकयोश्च परिगणनं करोति । अपरा तु षट्संख्याकत्वे मतैक्यं दधानाऽपि पूर्वोत्तरमीमांसयोः मीमांसापदेन, सांख्ययोगयोः सांख्यपदेन, तथा समानतन्त्रयोर्न्यायवैशेषिकयोर्न्यायपदेन परिगणनं कुर्वाणा ; वेदविरोधिनां जैनबौद्धचार्वाकाणां त्रीणि दर्शनानि स्वीकरोति । अन्या तु प्रथमं निर्दिष्टानि षड्दर्शनान्यंगीकुर्वाणा सौत्रान्तिकवैभाषिकयोगाचारमाध्यमिकभेदेन चतुर्विधं बौद्धदर्शनं, जैनदर्शनं, चार्वाकदर्शनं चेत्याहृत्य द्वादशविधं दर्शनमभ्युपैति । इतरा पुनः चार्वाक-बौद्ध-जैन-रामानुज-पूर्णप्रज्ञ- नकुलीशपाशुपत-शैव- प्रत्यभिज्ञा-रसेश्वर- वैशेषिक-न्याय-सांख्य-योग-मीमांसा-वेदान्त-व्याकरणप्रभेदेन षोडशदर्शनानि समूरीकरोति । (५)

याज्ञवल्क्यस्मृतिस्तु विद्यास्थानानां चतुर्दशत्वं निरूपयति । (६)

न्यायशास्त्रस्य समुल्लेखः –

एवं च प्राचीनविद्वत्परंपरासु सर्वासु न्यायवैशेषिकयोरुभयोरन्यतरस्य वा विद्यास्थानत्वेन परिगणनं नियमेन विधीयते इति सुविलोकम् ।

किं च तदीयनामान्तराण्यप्युपलभ्यन्ते । तथाच मनुसंहितायां गौतमधर्मसूत्रे, रामायणे, महाभारते, अमरकोशे च आन्वीक्षिकीति पदं तर्कविद्यापरपर्यायतया प्रयुज्यते (७) । प्रागैशवीये चतुर्थशतके कृतावस्थानः कौटिल्योऽप्यान्वीक्षिकीं

---

५) सर्वदर्शनसंग्रहः उपोद्घातः पृ· १

६) याज्ञवल्क्यस्मृतिः, १–३ 'पुराणन्यायमीमांसा धर्मशास्त्राङ्गमिश्रिताः।
वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दश ।।

७) मनुस्मृतिः, ७–४३, गौ. ध. सू. अध्याय 11 रामायणे, अयोध्याकाण्डे, १००–३६, महाभारतम् शान्तिपर्व, २१०–२२, अमरकोशः 1–६–५ समुधृतानि H. I. L. पृ. ४–८

विद्यां परमोपयोगिनीमुपवर्णयन् तस्या हेतुविद्यारूपत्वं स्पष्टं सूचयति। (८)

सेयमान्वीक्षिकी हेतुविद्या हेतुशास्त्रमिति पदाभ्यामपि व्यपदिश्यते। प्राचीनकाले विद्वत्परिषदि, वादविवादे, कथायां वा परमोपयोगितया न्यायशास्त्रं तर्कविद्या, वादविद्या इति पदाभ्यामपि व्यवह्रियमाणं दृश्यते।

छान्दोग्योपनिषदि शास्त्रमेकं वाकोवाक्यमितिनाम्ना निर्दिश्यते (९)। तच्च तर्कशास्त्रमिति शंकराचार्याः स्वभाष्ये निरूपयन्ति। (१०)

निरूप्यविषयप्राधान्यमवलम्ब्य प्रमाणशास्त्रं (प्रमाण-विद्या) इत्यपि नामान्तरमस्य शास्त्रस्योपलभ्यते।

न्यायशास्त्रस्य मूलम् –

विषयानुगुण्येन वैदिकवाङ्मयं त्रिधा विभज्यते उपासना-काण्डं, कर्मकाण्डं, ज्ञानकाण्डं चेति। विविधवैदिकदेवतावर्णन-परं मन्त्रमयं संहिताभागम् उपासनाकाण्डं क्रोडीकरोति। याग-निरूपणपरो वेदभागः, ब्राह्मणग्रन्थाश्च कर्मकाण्डेऽन्तर्भवन्ति। अध्यात्मविद्याप्रतिपादनपरा उपनिषदः, विविधान्यारण्यकानि च ज्ञानकाण्डमित्युच्यन्ते।

व्याकरणादीनां विविधविद्यानां विकासो हि वैदिकवाङ्-मयमेवाधारतयोपकल्प्य समभूदिति विदितमेव सर्वेषाम्। प्राधा-न्यतया प्रसिद्धिमधिगतेषु षट्सु दर्शनेषु पूर्वोत्तरमीमांसयोः प्रभवो वैदिकवाङ्मयादेवेति निर्विवादम्। पूर्वमीमांसायाः कर्मकाण्डेन, उत्तरमीमांसायाश्च ज्ञानकाण्डेन सह सम्बन्ध इति तद्विषयपर्या-

---

८) अर्थशास्त्रम् - 1-२ समुद्धृतं तत्रैव पृ. ७

९) छान्दोग्योपनिषत्- ७-१-२ द्र. मनुस्मृतिः २-11, ६-५०, ८-२६८, आवयः समुद्धृताः H. I. L. P.8.

1०) शांकरभाष्यम् छां. उ. समुद्धृतम् H. I. L. P. 5.

लोचनयाऽध्यवसीयते । उर्वरितेषु दर्शनेषु (११) प्रकृतोपयोगितया न्यायशास्त्रस्य मूलं तावद्विचारविषयीक्रियते ।

वात्स्यायनोद्योतकरजयन्तभट्टप्रभृतयो नैयायिकधुरन्धराः, सावधारणमिदमूरीकुर्वन्ति यत् न खलु गौतममहर्षिः न्यायशास्त्रस्य प्रथमः प्रणेता, किन्तु प्रधानो मनीषी यः प्राग् विद्यमानमेव न्यायशास्त्रं निजप्रतिभया विषयान् विविच्य सूत्ररूपतामापादयामास इति । तदेवं न्यायशास्त्रस्य मूलमन्वेषयन्तो मनीषिणः कमपि निश्चायकं प्रमाणमनासादयन्तः समुपलभ्यमानप्रमाणबलाद्विषयममुं निर्णेतुं प्रायतिषत ।

सतीशचन्द्रविद्याभूषणमतम् –

डॉ. सतीशचन्द्रविद्याभूषणमते न्यायशास्त्रवाचकेषु बहुषु पर्यायपदेषु सम्प्रति केवलं न्यायशास्त्रवाचकतया प्रयुज्यमानमान्वीक्षिकीतिपदं शास्त्रस्यास्य प्राचीनतमं स्वरूपं निरूपयति ।

'आन्वीक्षिकीं चात्मविद्याम्' इतिमनुवचन (१२) 'त्रयीविशेषो ह्यान्वीक्षिकी'ति कौटिल्यवचनं (१३) च आन्वीक्षिक्यात्मविद्ययोरभेदं सूचयतः । आत्मविद्या चोपनिषद्रूपा । तथा चेदमवसीयते, यदुपनिषद्रूपिण्यध्यात्मविद्यैव प्रथमं विविधानाध्यात्मिकसिद्धान्तान् वचोनिचयैः प्रतिपादयन्ती, परस्तात् तदनुकूलयुक्त्युपन्यासद्वारा समर्थयन्ती आन्वीक्षिकीत्यभिधानं लेभे इति । अत एव चात्मनो मन्तव्यत्वमपि प्रतिपादयति श्रुतिः (१४)।

---

११) द्र. Indian philosophpy, Intro पृ. The Sankhya is not a theism. The yoga is practically independent of Veda. The Vaisesika and Nyaya accept god as the result of inference.

१२) मनुस्मृतिः ७-४३ 'त्रैविद्येभ्यस्त्रयीं विद्यात् दंडनीतिं च शाश्वतीम् । आन्वीक्षिकीं चात्मविद्यां वार्तारम्भांश्च लोकतः॥

१३) अर्थशास्त्रम्- १-२ 'त्रयी वार्ता दण्डनीतिश्चेति मानवाः । त्रयीविशेषो ह्यान्वीक्षिकीति । १४) बृ.उ. ४-४५ आत्मा वाऽरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः ।

प्रथमत आत्मविद्यारूपिण्यपीयमान्वीक्षिकी क्रमेण स्वविषयमहिम्ना पृथगवस्थानमासाद्य, हेतुविद्या, न्यायविद्या, तर्कशास्त्रं इत्यादिनामान्तराणि लेभे । उपपादितं चास्याः विषयवैशिष्ट्यं न्यायभाष्यकारेणापि । यथा– 'इमास्तु चतस्रो विद्याः पृथक्प्रस्थानाः प्राणभृतामनुग्रहायोपदिश्यन्ते यासां चतुर्थीयमान्वीक्षिकी न्यायविद्या । तस्याः पृथक्प्रस्थानाः संशयादयः पदार्थाः, तेषां पृथग्वचनमन्तरेण अध्यात्मविद्यामात्रमियं स्यात्, यथोपनिषदः' इति (१५) । भाष्यकृतमन्वीक्षापदस्यानुमानपरतया व्याख्यानमपि न्यायशास्त्रस्यानुमानप्राधान्यं निरूपयति ।

अनुमानप्रधानतया चोत्तरकाले केचित् सांख्ययोगयोः लोकायतस्य संग्रहमान्वीक्षिकीपदेनैव व्यदधुरिति सूचयति कौटिल्यः (१६) । तथाचान्वीक्षिकी विषयद्वयमहिम्ना एकतो वेदान्तादिदर्शनरूपेण, परतो न्यायविद्यारूपेण च विकासमासादयामास । इति विद्याभूषणमतसारसंक्षेपः (१७) ।

कीथमतम् –

कीथमहाशयस्तु ; यथा किल निरुक्तादीनि वेदांगानि वेदवाङ्मयीन कर्मकाण्डमवलम्ब्य प्रसृतानि तथैव न्यायशास्त्रमपि यज्ञादिवैदिककर्मानुष्ठाननिरूपणपरस्य वेदवाङ्मयस्य कर्मानुकूलार्थनिर्णायकत्वेन परमोपयोगिनीं कामपि हेतुगर्भां युक्तिप्रतिपादनपरामर्थनिर्णयप्रणालीमुपयुञ्जतो मीमांसादर्शनादुद्भूतमिति समवधारणमभिप्रैति (१८) ।

आदौ पूर्वमीमांसापरतया प्रयुज्यमानस्य न्यायपदस्य न्यायशास्त्रे पंचावयववाक्यपरतया प्रयोगः, बौद्धसंप्रदाये पुनरनुमानार्थकतया प्रयोगः, मतमिदं समर्थयति । प्रो. बूह्लर-

---

१५) न्या. भा. 1-1-1 पृ २०
१६) अर्थशास्त्रम् 1-२, समुद्धृतम् H. I. L. पृ ५
१७) द्र. H. I. L. पृ. 1–८
१८) Indian logic and atomism पृ 1०

महोदयः आपस्तम्बसूत्रे (१९) पूर्वमीमांसामात्रवाचकं न्यायपदप्रयोगं समुल्लिख्य पूर्वमीमांसापरपर्यायितया न्यायपदप्रयोगस्य प्राचीनतां व्यवास्थापयत् (२०) । किञ्च पूर्वमीमांसामधिकृत्य निबद्धानां बहूनां प्रबन्धानां नामधेयेषु न्यायपदसन्निवेशोऽपि विषयममुं द्रढयति (२१) ।

डॉ. राधाकृष्णमतम् –

डॉ. राधाकृष्णन् महोदयोऽपि किञ्चिदन्यविधया पूर्वमीमांसैव प्रभवो न्यायविद्याया इत्यभिप्रैति । निरूपयति च यत् युक्तिपुरःसरं परिनिष्ठितसिद्धान्ततया सुव्यवस्थितां वेदान्तविद्यां बोधयदान्वीक्षिकीतिपदं गौतमीयतर्कविद्यापरपर्यायतया प्रथितिमधिजगाम, यदा पूर्वमीमांसायां हेतुगर्भामर्थनिर्णयप्रणालीं तर्कविद्यारूपेण विकसितामपि तद्विषयविवेचनपुरःसरं प्रथममेव प्रतिपादयामास गौतममहर्षिः (२२) ।

हिरियन्नामतम् –

हिरियन्नामहाशयस्य पुनरयमाशयः । यत् वैशेषिकदर्शनं मूलतो वेदविरोधितया प्रवृत्तं कालान्तरे वेदप्रामाण्यवादिषु दर्शनेष्वन्यतमं बभूव । न्यायदर्शनं मूलतः सिद्धान्तरूपेण स्वतन्त्रं नैवावास्थिषत परं वैशेषिकदर्शनेन सहैव प्रससार । तदेवं न्यायवैशेषिकसम्प्रदायस्य मूलं वेदविरोधितत्त्वमेवेति । केवलन्यायस्य मूलं किमु वेदा उत स्वतन्त्रमेव किमपि तत्त्वमिति तु चिन्तनीयमेव (२३) । इति ।

कौटिलीयार्थशास्त्रे आन्वीक्षिकीतिपदेन विधीयमानं लोकायतमतग्रहणं न्यायशास्त्रस्य चार्वाकमतमूलकत्वं प्रतिपादयतीत्यपि सुवचम् ।

---

२०) निर्दिष्टम् Indian logic and atomism प 10

२1) न्यायमालाविस्तरः [माधवः], न्यायरत्नाकरः [पार्थसारथिमिश्रः], न्यायप्रकाशः [आपोदेवः], Journal of the Dipartment of letters, Calcutta Univercity Vol.XVI. इत्यादीनि ग्रन्थनामधेयान्यनुसन्धेयानि । २२) द्र. Indian Philosophy प. ३३

२३) द्र. Essentials of Indian phylosopy. chap.IV प. ८४

समालोचना –

न्यायशास्त्रस्य मूलमवधारयितुं प्रयतमाना समुल्लिखित-मतचतुष्टयी कतिपयप्रमाणपरिपुष्टाऽपि न खलु तुष्टिं कलयितुमीष्टे ।

तत्रादौ क्रमप्राप्तं विद्याभूषणमतं तावदालोच्यते । मत-मिदं प्राधान्येनान्वीक्षिकीति पदप्रयोगमवलम्बते ।

इदं पुनरत्रावधेयम्– । आन्वीक्षिकीति पदव्यपदेशः स्प-ष्टतया न कुत्रापि ब्रह्मविद्यापरपर्यायतया प्रयुज्यमान उपल-भ्यते । प्रत्युत आन्वीक्षिकीतिपदप्रतिपाद्यं पृथगेव विद्यास्थानं अध्यात्मविद्यायां सहायकतया परिगृहीतमासीदिति सम्भाव्यते । यदा खलु वेदेषु सिद्धान्तरूपेण विद्यमानं भारतीयदर्शनानां मूल-रूपं बौद्धादिवेदविरोधिनां धिया सधिक्कारमवधीर्यमाणं विशि-थिलमूलं समजनि, तदा प्राचीनपरम्पराभिमानिनां भारतीय-विदुषां कृते वैदिकसिद्धान्तपरिरक्षणाय परमतनिराकरणचातु-रीहेतुरान्वीक्षिकी विद्यैव सविशेषमाश्रयणीयाऽभवत् । तदेवमा-न्वीक्षिकी विद्या स्वविषयमहिम्ना ब्रह्मविद्यातो निर्गतानां दर्श-नानां परिपोषाय समादृता, न तु तदुद्भूतेति युक्तं प्रतिभाति ।

अध्यात्मविद्यैव विषयानुगुणमान्वीक्षिकीरूपेण, दर्शन-रूपेण च विचकास इति सतीशचन्द्रविद्याभूषणमतं पुनरध्यात्म-विद्यातः पूर्वमान्वीक्षिक्या अवस्थानं सर्वात्मना निषेधति ।

यत्पुनरुदितं 'मनुसंहितायां, कौटिलीयार्थशास्त्रे च आ-न्वीक्षिक्या अध्यात्मपरत्वं प्रतिपाद्यते' इति तत्रेदं समाधानम्– मनुवचनं आन्वीक्ष्यध्यात्मविद्ययोः परस्परावलम्बित्वं स्पष्ट-मवगमयति । आन्वीक्षिकीतिपदस्य पृथगुपादानमेव सूचयति यत् प्राग्विद्यमानैवान्वीक्षिकी यदा औपनिषदिकसिद्धान्तानां समर्थनाय, वैदिकसम्प्रदायविरोधिनां मुखमुद्रणाय चोपयुज्य-माना प्राधान्यमाससाद, तदा सम्बन्धविशेषमहिम्ना सा अध्या-त्मविद्याङ्गतया परिगणिता बभूवेति ।

किञ्च भारतीयविद्वत्परम्पराप्रसिद्धोऽयं प्रवादो यदान्वीक्षिकीति न्यायशास्त्रस्य नामान्तरमिति। असति विशेषकारणे न खल्वयमपलपनीयः।

यत्पुनराह कौटिल्यः त्रयीविशेषो ह्यान्वीक्षिकीति तत्रेदमवधानार्हम् – अत्र त्रयी नाम न केवलमध्यात्मविद्या, येन तत्परत्वमान्वीक्षिक्याः प्रतिपाद्यत इति वक्तुं शक्येत, अपि तु मन्त्रब्राह्मणादिरूपः सकलोऽपि वेदः। ऋग्यजुःसाम्नां वाचकमपि त्रयीतिपदम् उपलक्षणया सकलस्यापि वेदवाङ्मयस्य बोधकं भवतीति विदितमेव। तदेवमन्यत्र आन्वीक्षिक्यास्तर्कविद्यापरत्वं स्वाभिमतमुपवर्णयन् इह वेदमूलकत्वाद्वैदिकवाङ्मयान्तर्भूतामान्वीक्षिकीं भावयतां मानवानां मतमुपन्यस्यति कौटिल्यः। उचितं च प्राचीनमतमप्यालोच्य स्वसमकालीनप्रचलितमतप्रतिपादनम् इति विभाव्य स्वयं कौटिल्य एव अन्यत्र चतुर्षु विद्यासु तर्कविद्यारूपिणीम् आन्वीक्षिकीमपि परिगणय्य आन्वीक्षिकीपदेन सांख्ययोगयोर्लोकायतमतस्य च सग्रहं करोति।

एतेनैतदप्युक्तं भवति यदान्वीक्षिकी मूलतो वैदिकवाङ्मयोद्भूताऽपि कालान्तरे विविधदर्शनैः सह संसर्गमासाद्य विचकासेति॥

डॉ॰ कीथमहाशयो वेदवाङ्मयस्य कर्मकाण्डरूपं भागमवलम्ब्य प्रसृतायाः पूर्वमीमांसायाः न्यायशास्त्राविर्भावकत्वमभिप्रैति। मतमिदं प्राधान्येन न्यायपदमवलम्बते। न्यायपदस्य पूर्वमीमांसापरतया तद्ग्रन्थनामसु बहुलमुपलम्भो मतमिदमुपोद्बलयति।

न्यायपदस्य प्राचीनतमः प्रयोगो नानाविधेष्वर्थेषु समुपलभ्यते। न्यायपदेनानुमानप्रधाना काचन पूर्वमीमांसयाऽनुस्यूता वेदार्थनिर्णयप्रणालिः प्रतिपाद्यत इति कीथमहाशयः कल्पयति। केवलमनुमानपरतयापि न्यायपदप्रयोग उपलभ्यते। नैयायिकपरिभाषायां तु न्यायशब्दस्य पञ्चावयववाक्यमर्थः। 'अध्याय-

न्यायोद्यावसंहारश्च' इति सूत्रे (२४) न्यायपदस्य आधिकरणिकनिर्णयार्थकतां द्योतयन्नपि पाणिनिः 'संमाननोत्सञ्जनाचार्यकरणज्ञानभृतिविगणनव्ययेषु नियः' इत्यस्मिन्सूत्रे (२५) निधातोर्ज्ञानार्थकतामपि प्रतिपादयन् तत्त्वं नयत इति व्युत्पत्त्या 'प्रमाणैरर्थपरीक्षणं न्यायः' इतिन्यायभाष्यकाराभिमतं न्यायदार्थमपि स्वसंमतमिति सूचयति। तदेवं न्यायशास्त्रे समुपलभ्यमानो न्यायपदार्थो न पूर्वमीमांसया संबद्ध इति सुविलोकम्।

किञ्च न्यायमीमांसयोः पौर्वापर्यमादौ विचारणीयं येन तयोः पारस्परिकः सम्बन्धः स्फुटमवधार्येत। संगीतगणितज्योतिषादीनि विद्यास्थानानि, पूर्वमीमांसादीनि दर्शनानि च विशेषतो वैदिकयज्ञप्रक्रियातः समुद्भूतानीत्यत्र न विदुषां विमतिः। तथापि तेषां प्रथमाविर्भावः किमाधार इति समालोचनीयम्।

यज्ञियविधासु समुपस्थितानां संदेहानां, विप्रतिपत्तीनां च परिहाराय वाक्यसन्दर्भाद्यनुगुणमर्थनिर्णयाय वादविवाद बिदधता ब्रह्मणा (ऋत्विग्विशेषेण) विधीयमाना सिद्धान्तव्यवस्थैव मूलं पूर्वमीमांसाया इति श्रीमान् बोडसमहाशयः समभिप्रैति (२७)।

वस्तुतस्तु यज्ञप्रक्रियायां ब्रह्मणा सह सदस्यैर्विधीयमाना प्रश्नोत्तररूपिणी चर्चैव (२८) मूलं तर्कविद्यायाः। अत एव वाकोवाक्यमिति (२९) प्राचीनतमं नामधेयं तस्याः। सूक्ष्मेक्षिकया निरीक्ष्यमाणे तदुत्तरकालीनत्वमेव पूर्वमीमांसायाः सिद्धं भवति॥ विषयममुं किंचिदिव विविच्य विचारयामः। तथाहि

२४) पा. सू. (अष्टाध्यायी) ३–३–१२२
२५) ,, १–३–३६
२६) न्या. भा. 1-1-1 पृ. २३
२७) तर्कसंग्रहः Englishtranslation Introduction P. 35
२८) महाभारतम् -अश्वमेधपर्व अ. ८५ [एतदेव ब्राह्मणग्रंथानां मूलं]
'तस्मिन्यज्ञे प्रवृत्ते तु वाग्मिनो हेतुवादिनः।
हेतुवादान्बहूनाहुः परस्परजिगीषवः॥'
२९) छान्दोग्योपनिषत् ७-1-२

यज्ञियप्रक्रियासु स्वं स्वं कार्यमवधार्य समुपस्थितानामधीतविविधविद्यास्थानानां विद्यावतां द्विविधा खलु चर्चा प्राचीनकाले संभाव्यते। यज्ञियविधिषु वेदविवक्षितो विशिष्टः क्रियाणां पूर्वापरीभावः प्रकारश्च,कुतः, कथंकारश्चेत्यादिरूपां जिज्ञासां समाधातुमुपयुज्यमाना, श्रुतिवचोनिचयनिरपेक्षं प्रवर्तमाना, सार्वजनीनानुभवविषयाभिर्युक्तिभिः संवलिता चर्चा प्रथमा । निर्विवादमभ्युपगते वेदप्रामाण्ये तत्रत्यसंभावितवचनविरोधादीनां परिहाराय सुपरिनिष्ठितं शब्दप्रामाण्यमधिष्ठाय निष्ठावद्भिरनुष्ठीयमाना चर्चा च द्वितीया ॥ ऐतिहासिकदृशा विषयानुगुणमालोच्यमाने प्रथमा चर्चा निश्चितमेव प्राचीना भवितुमर्हति यस्यां विशिष्टकोटिक्रमाणां सार्वजनीनानुभवसिद्धाभिर्युक्तिभिः प्रतिपाद्यमानानामवस्थानमवधार्यते । इयमेव च मूलं तर्कविद्यायाः ॥ श्रुतेः प्रबलप्रामाण्यमभ्युपेत्य तद्वचोनिचयपर्यालोचनमात्रपर्यवसायिनी द्वितीया चर्चा तु तदुत्तरकालीनैव ॥ तदेव शब्दनिष्ठं प्रामाण्यमधिष्ठाय प्रतिष्ठिता पूर्वमीमांसाया वेदार्थनिर्णयप्रणालिस्तर्कविद्यातोऽनन्तरकालीनैव भवितुमर्हति ।

किंच 'मीमांसा मेयशोधनम्' (३०) इत्युक्तादिशा मीमांसायाः प्रमेयतत्त्वनिर्णयानुकूलपरीक्षापरत्वे प्रमाणपरीक्षाप्रधानाया न्यायविद्याया लौकिकालौकिकसकलशास्त्रसाधारणत्वात् वेदार्थनिर्णयमात्रपरपूर्वमीमांसापेक्षया प्राचीनत्व वक्तुं सुशकम् ।

अपि च 'मानाधीना मेयसिद्धिः' इतिवचनात् मेयशोधनपरमीमांसापेक्षया मेयसाधकप्रमाणपरीक्षारूपिण्यान्वीक्षिक्येव प्रथमापेक्षितत्वात् प्राचीनेति सुविलोकम् । अतः पूर्वमीमांसात समुद्भूतेयमान्वीक्षिकी न्यायविद्येति कथनं न कथमपि युक्तियुक्तं प्रतिभाति ।

अन्यच्च वात्स्यायनव्याख्यानेन स्पष्टमिदं यदान्वीक्षिकीतिपदं, न्याय इति पदं च न्यायशास्त्रस्य प्रमाणपरीक्षाप्रधा-

३०) अनुव्याख्यानम् 1-1-1 प. १९ द्र. श्रीमन्न्यायसुधा प. २७१

नत्वं सूचयतीति । अस्तु कामं न्यायशास्त्रापरपर्यायितया प्रमाणशास्त्रपदव्यवहारः सुतरामर्वाचीनः परं विषयसन्निवेशदृशा न्यायशास्त्रस्य प्रमाणपरीक्षाप्रधानत्वं नितरां प्राचीनमेव ।

वेदमूलकत्वादान्वीक्षिक्याः नास्तिकमतमूलकत्वं न सिध्यति । प्रत्यक्षविषयपृथिव्यादिपदार्थनिरूपणपरतया न्यायशास्त्रस्य नास्तिकमतमूलकत्वं तु न शङ्क्यम् । सांख्यादीनामपि तथात्वापत्तेर्दुर्वारत्वात् ।

किंच मानवानां मते त्रयीविशेषोह्यान्वीक्षिकीति प्रतिपादयन् कौटिल्यः सूचयति मूलतो वेदमूलकत्वमान्वीक्षिक्याः । कालक्रमेण च वेदनिरपेक्षमान्वीक्षिक्यास्तर्कविद्यापक्षं कक्षीकृत्य प्रसृतानां सांख्ययोगलोकायतमतानां संग्रहमान्वीक्षिकीपदेनान्यत्र स्वीकुर्वन् लोकायतमतस्य न्यायशास्त्रापेक्षयोत्तरकालीनत्वं स्फुटमवधारयति ।

अपि च यदुक्तं हिरियन्नामहोदयेन न्यायवैशेषिकसम्प्रदायस्य मूलं वेदविरोधितत्त्वमेवेति, तत्रेदं विचार्यते– । किं केवलस्य न्यायस्य वेदाविरोधितत्त्वमूलकत्वमुत वैशेषिकसिद्धान्तसंवलितस्य? अत्र प्रथमपक्षो विनिगमकाभाववादनवधारणीय इति स्वयमभ्युपेत्य द्वितीयपक्षः स्वीकारक्षम इति सूचितम् । तदनुसारं वैशेषिकदर्शनमपि मूलतो वेदविरोधितया प्रवृत्तं न वेति विचारणीयम् । तस्य वेदविरोधित्वे कश्चन हेतुरुपस्थापयितव्यः । स च न तावत् बाह्यपदार्थनिरूणपरत्वं, तस्य कथमपि वेदविरोधित्वासंभवात् । नापि वेदाप्रामाण्यवादित्वं तत्र वेदप्रामाण्यस्य कुत्राप्यनिराकृतत्वात् । शब्दस्य स्वतन्त्रप्रमाणत्वानभ्युपगमेऽपि ईश्वरप्रणीतत्वेन वेदप्रामाण्याभ्युपगमात् । विशेषकारणाभावात् संप्रदायसंमतं वैशेषिकदर्शनस्य वैदिकत्वं न केवलं कल्पनया निषेद्धुं शक्यम ।

किंच वेदप्रतिपाद्यालौकिकपदार्थानामिव प्रत्यक्षादिभिरवगम्यमानानां लौकिकपदार्थानां निरूपणमपि आत्मादीनामलौ-

किकत्वसाधनायावश्यकमेव । तदनुसारं धर्माधर्माद्यलौकिकपदार्थनिरूपणाय यथा मीमांसाशास्त्रं वैदिकत्वेनोदियाय तथैव पृथिव्यादिलौकिकपदार्थतत्त्वपरिशीलनाय प्रवृत्तं वैशेषिकदर्शनमपीति युक्तियुक्तम् । अत एव पदार्थशास्त्रमिति वैशेषिकदर्शनस्य विद्वदुपगृहीतं नामान्तरम् ।

इदमत्रानुसन्धेयम् । प्रमाणानि, प्रमेयम्, वादविधिश्चेति प्राधान्येन त्रिविधो हि विषयविभागो न्यायविद्याया भवितुमर्हति । तत्र प्रमेयनिरूपणं भारतीयविद्वत्परंपरानुसारं न कमपि न्यायशास्त्रीयं विशेषमवगमयतीति गौणतयैवोपादेयम् । अत एव मीमांसावैशेषिकयोः प्रमेयनिरूपणपरतया न्यायविद्याऽभिषङ्गः प्रागुपदर्शितः । उर्वरितं विषयद्वयं तु निर्विवादं वहति वैशिष्टचं न्यायविद्यायाः । प्रागुपदर्शितदिशा वाकोवाक्यमित्यादिप्राचीनतमनामसमुल्लेखादध्यवसीयते यन्न्यायविद्या वादविद्यारूपेण प्राचीनकाले विकसिता बभूवेति । परमतनिराकरणपूर्वकस्वमतस्थापनार्थमुपयुज्यमानो वादविधिः महाभारतादिवचनसन्दर्भानुसारं यज्ञियसमारंभेषु विद्वत्परिषत्सु बहुलं प्रचारमाससाद इति विज्ञायते । गौतमविद्येति नाम्ना सुविदिते न्यायदर्शने विधीयमानं वादजल्पवितण्डादीनां वादविधीनां तदुपयोगिनां संशयादीनां च निरूपणं वादविद्यारूपत्वं तदीयमवितथमिति सूचयति ।

किं च वादविद्या हि प्राधान्येन पक्षद्वयमवलम्ब्य प्रवृत्ता भवति । वादविवादे च पक्षप्रतिपक्षतयाऽवस्थितयोरुभयोरपि पक्षयोरभिमतेन केनापि प्रमाणेन भवितव्यम् इति प्रमाणपरीक्षामन्तरा वादविधेरवस्थानमेव विशिथिलमूलं भवति । अत एव वाकोवाक्यादिपदव्यपदेश्यवादविद्यापेक्षया पूर्वमवश्यंभावित्वात् प्रमाणपरीक्षारूपो विषय एव मूलं न्यायविद्याया इति प्रतीयते ।

प्राथमिकावस्थायां विद्यमाना प्रमाणपरीक्षा किंरूपिणी

बभूवेति कथयितुं न प्रभवामः । अथापि प्रत्यक्षानुमानागमरूपं प्रमाणत्रयमवलम्ब्य सा प्रावर्तत इति ब्राह्मणारण्यकादिप्राचीन-ग्रन्थवचनपर्यालोचनतो निश्चीयते । (३१)

निर्णयः —

तदेवं यागादिवैदिकसमारम्भेषु विधीयमानायां चर्चायां वेदार्थनिर्णयायोपयुज्यमानाः प्रमाणपरीक्षारूपज्ञानप्रक्रियासम्बन्धिनो नियमाः समुदायरूपेण एकस्यां विचारधारायामनुस्यूताः सन्तो मूलं न्यायविद्यायाः । उत्तरत्र च सा विषयमहिम्ना वैदिकावैदिकसम्प्रदायसाधारणी कालक्रमेण दर्शनेषु तर्कप्रधानतया सिद्धान्तपरिष्कारायोपयुज्यमाना वेदविरोधिनी वेदाविरोधिनी चेति द्वेधा प्रसारमासादयन्ती वादविद्यारूपेण परिणता, वेदबोधितकर्तव्यताकानां यागादीनामनुष्ठानविषये श्रुतिप्रतिपादितसिद्धान्तानां याथार्थ्यविषये स्वर्गापवर्गादीनामस्तित्वविषये च मतिमतामपि मतिं सन्देहदोलामधिरोपयन्ती लोकायतमतपरिपोषाय कारणीभूता तर्कविद्यापरपर्याया तत्र तत्र रामायणमहाभारतादिग्रन्थेषु निन्दाविषयिणी बभूव (३२) । रूपान्तरेण पुनर्वेदप्रामाण्यव्यवस्थापनाय श्रुतिसिद्धान्तप्रतिष्ठापनाय चोपयुज्यमाना वेदानुकूला सती भूरिशः प्रशंसामाससाद (३३) इति ।

न्यायशास्त्रस्य विकासः —

गौतमसूत्रेषु प्रतिबिम्बितं न्यायदर्शनस्य परिनिष्ठितं रूपं विलोक्यैव निश्चीयते यत्ततः पूर्वमेव पूर्णरूपेण विकसितं न्याय-

---

३१) द्र. न्यायसुधामण्डनम् – पृ. २२७

३२) मनुस्मृतिः, २–11, ब्रह्मसूत्रम् २–२–1७, महाभारत शान्तिपर्व अध्याय 1८०, श्लो. ४७,४८,४९. समुद्धृतम् H. I. L. पृ.३६.

३३) मनुस्मृतिः, 1२-1०६, ७-४३, 1२-111, अर्थशास्त्रम् – 1-२, समुद्धृतम्- H. I. L. पृ. ७, न्या. भा. 1-1-1 पृ, ३८, 'प्रदीपः सर्वविद्यानामुपायः सर्वकर्मणाम् । आश्रयः सर्वधर्माणाम्, विद्योद्देशे प्रकीर्तिता ॥

दर्शनं भारतीयदर्शनेषु पृथगवस्थानं लेभे इति । तदनुसारं गौतमपूर्वकाले न्यायशास्त्रस्य दर्शनत्वप्राप्तेः पूर्वं तदुत्तरं चेति द्विविधमवस्थानं परिकल्प्यते । तत्रादौ सामान्यतो भारतीयदर्शनानां दर्शनत्वप्राप्तिपर्यन्तं कानि स्थित्यन्तराणि इति सक्षेपेणोपवर्ण्य क्रमेण न्यायदर्शनस्य विकासं परिशीलयामः ।

सामान्यतो भारतीयदर्शनानां विकासो हि वैदिकावैदिक–रूपेण समभूदित्यत्र नास्ति केषामपि विमतिः । तेषां पौर्वापर्य–विषये पुनरस्ति विप्रतिपत्तिः । सुनिपुणं परीक्ष्यमाणे दर्शनानां विकासक्रमस्य तिस्रोऽवस्थाः कल्पयितुं शक्यन्ते– प्रक्रियारूपा, विचारधारारूपा, सम्प्रदायरूपा चेति ।

(१) तथाहि प्राचीनकाले विदुषां परिषदि केषाञ्चित् प्रक्रियाविशेषाणामाविर्भावः सम्भाव्यते, येषां प्रतिष्ठापना परिनिष्ठितकल्पनापरिष्काराय नितान्तमुपयोगिनी बभूव । सन्ति किल कियन्त्यपि प्राचीनोपनिषद्वचनानि येषु सिद्धान्तविशेषाणां सामान्यकल्पनामवलम्ब्य प्रतिपादनं विधीयते । ते च सिद्धान्ताः सत्कार्यवादः, असत्कार्यवादः, समवायः, विशेषः, इत्यादिरूपेण परिणताः सन्तो दर्शनानां विकासस्य प्रथमावस्था परिकल्पयन्ति।

(२) केचन विपश्चिद्वराः पुनः परिनिष्ठितानां सिद्धा–न्तानां निरूपणाय सन्नद्धाः कामप्येकां विचारधारां प्रसारयामासुः या खलु द्वितीयाऽवस्था दार्शनिकविकासस्य ।

(३) सा च विचारधारा कालक्रमेण विभिन्नाभिर्विविध-सिद्धान्तप्रक्रियानुसारिणीभिर्विचारधाराभिः सम्भूय बहुभिःसुधी-भिरभ्युपगता सम्प्रदायविशेषरूपेण परिणता दार्शनिकविकासस्य-तृतीयावस्थां सम्पादयामास ।

औडुलोमिः, काशकृत्स्नः, बादरिः, इत्येवमादयो विद्वांसः सूत्रग्रन्थेषु निर्दिष्टनामानः विशिष्टविचारधाराणां प्रवर्तका इति सम्भाव्यते (३४) ।

३४] द्र. Tarkasamgraha Eng.Tra. Intro. pp. 21, 22.

एवं विकसितानि दर्शनानि स्वस्वरूपप्रतिष्ठायै प्रामाणिकप्रबन्धानां प्रणयनाय तत्तत्सम्प्रदायप्रधानविदुषः प्रेरयामासुः, येन न्यायवैशेषिकसांख्ययोगमीमांसादिदर्शनानां सूत्राणि गौतमादयो मुनयः प्रणिन्युः ।

तदेवं सम्प्रदायविशेषरूपेण विकसितानां दर्शनानां कालक्रमो दार्शनिकसूत्रप्रबन्धानां कालक्रमेण बिसंवदतीत्यत्र न कोऽपि विरोधः शंकनीयः । उभयोर्भिन्नकालीनत्वात्, दर्शनानां सूत्रग्रंथनिरपेक्षमवस्थानाच्च । अत एव जयन्तभट्टः, अन्ये च शास्त्रकाराः गौतमादिमुनीनां तत्तच्छास्त्रोद्भावकत्वमनभ्युपगच्छन्तः प्रवक्तृत्वमेव स्वीकुर्वन्ति (३५) ।

इदं पुनरवधेयं यत् दर्शनानां विकासक्रमे पर्यालोच्यमाने दर्शनत्वप्राप्तिपूर्वकालीनो विकास एव निर्दिष्टमवस्थात्रयमनुबध्नाति । तदुत्तरकालीनस्तु यथायथं विभिन्नमेवावस्थान सूचयतीति ।

न्यायशास्त्रस्य दर्शनत्वप्राप्तिपूर्वकालीनो विकासः—

प्रकृते शोधप्रबन्धस्य न्यायदर्शनसम्बद्धतया बिशेषतो न्यायदर्शनस्य दर्शनत्वप्राप्तिपूर्वकालीनस्तदुत्तरकालीनश्चेति द्विविधोऽपि विकासः पर्यालोच्यते । तत्रादौ प्रथमो विकासो यथा —

मूलतो न्यायदर्शन हि प्रमाणपरीक्षारूपमिति प्रागुपपादितमेव । लौकिकालौकिकव्यवहारे समुपस्थितसन्देहादिव्युदासाय मननशीलेन मानवेन प्रथमं केचन नियमाः समुद्भाविताः स्यु. ये सिद्धान्तरूपेण परिणताः सन्तो विकसिष्यमाणवादविद्यायाः मूलमभवन् । त एव च नियमा. ज्ञानप्रक्रियानिरूपणपराः प्रमाणविद्यात्वेन विद्वज्जनपरिगृहीताः सन्तो न्यायदर्शनस्य प्राथमिकं विकासमवगमयन्ति ।

ज्ञानं नाम नूनमाधारशिलास्तम्भो वेदवाङ्मयस्य विशेषतश्चोपनिषदाम् । ज्ञानप्रक्रियायां प्राधान्येन निरूपणीयस्य इन्द्रियार्थ-

३५) न्या. मं. प्रमाणप्रकरणम् पृ. ५

सन्निकर्षस्य, प्रत्यक्षादीनां च प्रतिपादनं तत्र तत्रोपनिषत्सु समुपलभ्यत एव (३६)। काश्चनार्वाचीनत्वेनाभिमता उपनिषदः प्रमाणपदं पारिभाषिकतया प्रयुञ्जते (३७)। तैत्तिरीयारण्यके 'स्मृतिः प्रत्यक्षमैतिह्यमनुमानचतुष्टयम्' इति प्रमाणचतुष्टयमुल्लिख्यते (३८)। कौषीतक्युपनिषदि प्रतर्दनप्रतिपादितो ज्ञानोत्पत्तिप्रकारो दर्शनेषु विकसितां ज्ञानप्रक्रियागतप्रमात्रादितत्त्वचतुष्टयपरिकल्पनां विशिनष्टि (३९)।

एवं रीत्या प्रथमतो ज्ञानप्रक्रियासन्निविष्टान्विविधसिद्धान्तान् क्रोडीकुर्वाणा प्रमाणविद्या क्रमेण अनुमानप्रधानतया हेतुविद्येति, प्रमाणावलम्बेन विधीयमानायां चर्चायां परमोपयोगितया वादविद्येति वाकोवाक्यमिति च नामनी लेभे। तस्याश्च मूलसिद्धान्ताः विदुषां सविशेषमभिनिवेशमासाद्य एकस्यां विचारधारायां ग्रथिताः परस्परमनुस्यूताः सन्तस्तत्त्वनिर्णयानुकूलतया स्वोत्तरं विकासमासादयन्तां दार्शनिकसिद्धान्तानां परीक्षणाय परिष्काराय च नितान्तमपयोगिनः विशिष्टविचारधारारूपेण परिणताः सन्तो न्यायदर्शनविकासस्य द्वितीयावस्थां परामृशन्ति।

अस्यामवस्थायां तर्कविद्या ब्रह्मतर्केत्यभिधानं लेभे इति संभाव्यते। निरुक्तकारो निरुक्तस्य ऊहब्रह्मेति नामान्तरं साधयन् वेदानुकूलतर्कस्य परमोपादेयत्वं सप्रमाणं निरूपयति (४०)। तेन च वेदार्थनिर्णयाय प्रवृत्ता तर्कविद्यैव विकसिता ब्रह्मतर्को बभूवेति सूचितं भवति। अत एव गौतमीयन्यायदर्शनस्य मूलं ब्रह्मतर्क एव इत्यप्यस्ति प्रवादः (४१)।

---

३६) 'परांचि खानि व्यतृणत्स्वयम्भूः' कठोपनिषत् २-१

३७) मैत्री. ६-६-२४, नृसिंहोत्तरतापनी ८, सर्वोपनिषत्सारः ४, कालाग्निरुद्रोपनिषत् ७, मुक्तिकोपनिषत् २

३८) समुद्धृतम् Indian Philosophy. P. 35

३९) history of pre-Buddhistis, Indian philosophy Cha. VII P. 121, 122. कौषीतकी उपनिषत् २-१४, ३-८

४०) निरुक्तम् अध्याय१३ पृ ५९४, ५९५

४१) अनुव्याख्यानम् 1-1-1 पृ. १९ द्र. श्रीमन्न्यायसुधा पृ २७1

स्वयं बादरायण एव श्रुत्यर्थनिर्णयानुकूलानि ब्रह्मसूत्राणि विरच्य तदुपयोगितया कमपि स्वरचितमेव बृहदाकारं तर्कविद्याप्रतिपादनपरं प्रबन्धं ब्रह्मतर्करूपेण संचिक्षेप इत्यत्र अनुव्याख्यानगतं श्रीमध्वाचार्यवचनमस्ति प्रमाणम् (४२)। वेदांगेष्वन्यतमत्वेन परिगण्यमानं तर्कशास्त्रं च न काणादं, नापि गौतमीयमपितु ब्रह्मतर्कप्रतिपाद्यमेवेति अनुव्याख्यानव्याख्यातारः सावधारणमभिप्रयन्ति (४३)।

वि. आर्. कृष्णरावमहाशया विषयममुं सविस्तरं विविच्य निरणैषुः। तेषामयमाशयः— अधुनाऽनुपलभ्यमानस्य ब्रह्मतर्कस्य विषयान् संक्षेपेण संगृह्य मध्वाचार्यः प्रमाणलक्षणकथालक्षणनाम्नोः प्रकरणग्रन्थयोः प्रणयनं चक्रुः। विष्णुतत्त्वविनिर्णये बृहद्भाष्ये च ब्रह्मतर्कवचनान्येव कथाप्रमाणयोर्निरूपणाय प्रमाणतयोपन्यासयन्।

प्रमाणानां परीक्षा, स्वरूपनिरूपणं चेति द्वयं प्रयोजनं तर्कविद्यायाः। परं ब्रह्मतर्के विषयान्तराणामपि विचारः समवर्तत इति विज्ञायते। विशेषतः जीवपरमात्मनोः जडजीवयोश्च पारस्परिकसम्बन्धविचारः प्राधान्यमभजतेत्यत्र ब्रह्मेतिपदमेव प्रमाणम्।

एकादशसु ग्रन्थेष्वाहत्य पंचाशदधिकैकशतमितानि ब्रह्मतर्कवचनानि मध्वाचार्यैरुद्धृतान्युपलभ्यन्ते (४४)।

मध्वाचार्यशिष्येष्वपि केचन ब्रह्मतर्केण साक्षात्परिचिता आसन्निति त्रिविक्रमभट्टैरुद्धृतानां ब्रह्मतर्कवचनानां पर्यालोचनया निश्चीयते (४५)।

४२] तत्रैव - 'एतत्सर्वं तर्कशास्त्रं ब्रह्मतर्के हि विस्तरात्। - - -
ब्रह्मतर्कं च भगवान् स एव कृतवान् प्रभुः॥
स प्रभुः यो मीमांसाकृत्' इतिश्रीमन्न्यायसुधा पृ २७२

४३] श्रीमन्न्यायसुधा पृ. २७२

४४] Madhva and brahmatarka Ch. VIII P. 89

४५] तत्रैव पृ १६

सत्यप्येवं ब्रह्मतर्कनामकस्य ग्रन्थस्याधुनाऽनुपलम्भात् तस्य ग्रन्थान्तरेषु प्रचुरोल्लेखाभावाच्च विषयेऽस्मिन् निश्चयेन किमपि वक्तुं न शक्यते। अथापि विषयोऽसौ न्यायशास्त्रस्य वेदमूलकत्वमुपोद्बलयतीति विभावनीयम्।

एतदनन्तरं ज्ञानप्रक्रिया घटकसिद्धान्तविशेषमहिम्ना तर्कविद्याया दर्शनान्तरैः सह सम्बन्धो दाढर्यमापन्नो विविधतामुवाह। विशेषतो वैशेषिकदर्शनाभिसम्बन्धो न्यायदर्शनविकासस्य तृतीयावस्थां समकल्पयत्। तदुत्तरमेव वादविद्या तर्कविद्या वा न्यायदर्षनं वेत्यमुं व्यपदेशं लेभे।

दर्शनान्तराभिसंबन्धः —

इदन्त्ववधेयम्। दर्शनान्तरैः सह सम्बन्धमासादयन्ती हेतुविद्या किल चतुर्धा प्रससार। तथाहि - वेदान्तेष्वध्यात्मविद्यया समनुगृहीतेयमान्वीक्षिकीति प्रसिद्धिमाप। सा च परमोपादेयतया सकललौकिकालौकिकशास्त्रोपस्कारकतया चापवर्ण्यते प्राचीनप्रबन्धेषु। प्रागुपदर्शितदिशा चेमामेव न्यायदर्शनस्य मूलत्वेन जग्राह सतीशचन्द्रविद्याभूषणमहोदयः।

प्रकारान्तरेण पुनः पूर्वमीमांसायां वेदार्थनिर्णयानुकूलतयोपयुज्यमाना सैव न्यायपदव्यपदेश्या बभूव। पूर्वमीमांसा हि वाक्यशास्त्रत्वेन समाद्रियते सुधीभिः। हेतुविद्यामवलम्ब्य प्रवर्तमाना वाक्यार्थनिर्णयप्रक्रियाऽत्र न्यायपदप्रतिपाद्या सती उत्तरत्र न्यायदर्शने पंचावयववाक्यापरपर्यायतया न्यायपदप्रयोगस्य मूलमभिव्यनक्ति। एष मीमांसाहेतुविद्ययोः पारस्परिकः सम्बन्धः कीथप्रभृतीनां केषाचिद्विदुषां न्यायदर्शनस्य पूर्वमीमांसामूलकत्वभ्रमं जनयामास।

किंच स्वविषयमहिम्ना सकलाभिरपि विद्याभिः संबन्धमवगाहमाना तर्कविद्या चार्वाकादिनास्तिकदर्शनैः साकमपि ववृधे। परं भारतीयमनीषिभिरनादरपरवशया दृशा विलोक्यमाना न ततो रमणीयां दशामाप। अथाप्युत्तरकाले जैनन्यायबौद्धन्यायरूपेण तस्या अवस्थानम्, तदीयनास्तिकदर्शनानुबन्धं बोधयति।

तदेवमेकतः पूर्वोत्तरमीमांसयोः सम्बन्धमधिगम्याऽपि प्रबलतमवेदप्रामाण्येनाभिभूता हेतुविद्या गुणीभूय तत्रैव विलीना न दर्शनपदवीं प्राप। परतो नास्तिकदर्शनानुगृहीताऽपि लोकनिन्दामेवाविन्दत न तु पृथग्विद्यास्थानम्। अस्यामवस्थायां वैशेषिकदर्शनं हेतुबलादेव वेदप्रामाण्यमभ्युपगच्छत् हेतुविद्यां कतिपयदार्शनिकसिद्धान्तसापेक्षां स्वसिद्धान्तैः परिपोष्य तदीयविषयवैशिष्ट्यं च परस्परपूरकतयोपपाद्य न्यायदर्शनेति पदवीं प्रापयत्।

इदं त्ववधेयम्। वैशेषिकदर्शनं दर्शनत्वेन रूपेण न्यायदर्शनापेक्षया प्राचीनम्। प्रागुपदर्शितदिशा कदाचित् कतिपयसिद्धान्तसग्रहरूपेणावस्थीयमानं वाकोवाक्यं (हेतुविद्या वा) न न्यायदर्शनपदव्यपदेश्यमभवत्। तस्यामवस्थायां वेदानां ईश्वरप्रणीतत्वेन प्रामाण्यमभ्युपेत्य तेषां प्रमाणमूर्धन्यत्वपक्षं प्रतिक्षिपन्तः कणादपक्षीया आस्तिकनास्तिकदर्शनयोरन्तरा प्रसारमासादयन्तो वैशेषिकदर्शनं तया तर्कविद्यया सह संयोज्य वादार्थमुपयोजयामासुः। सा च तर्कविद्या दर्शनान्तरैः सह सम्बन्धं भजमानाऽपि काणादपक्षकक्षीकारेण तदीयदार्शनिकसिद्धान्तान् स्वविषयव्यतिषिक्तान् यथावदभ्युपेत्य क्रमेण न्यायदर्शनेत्याख्यां लेभे। तदेवं गौतममहर्षिः न्यायस्य दर्शनत्वप्राप्त्यनन्तरमेव सूत्राणि रचयामासेति युक्तं प्रतिभाति।

न्यायशास्त्ररूपेण वादविद्याया विकासो विशेषतः केषां विदुषां धिषणाव्यापारेण समजायतेत्यत्र विनिगमकाभावात् न किमपि निश्चेतुं शक्यम्। तथाऽपि विविधवैदिकविद्यासम्प्रदायप्रवर्तकस्य वेदव्यासमुनेः ब्रह्मतर्करचयितृत्वश्रवणात्, (४६) कपिलदत्तात्रेयप्रमुखानामान्वीक्षिक्युपदेष्टृत्वेन निर्देशोपलम्भात् (४७), महाभारते च नारदमुनेः न्यायसिद्धान्तविशारदत्वेनोल्लेखात् (४८) सर्व एव एते न्यायशास्त्रविकासे भागभाजो बभूवु-

४६] अनुव्याख्यानम् 1-1-1 प. १९

४७] श्रीमद्भागवतम् 'आन्वीक्षिकीमलर्काय प्रह्लादादिभ्य ऊचिवान्' मार्कंडेयपुराणम् १६-१२ द्र. H.I.L. P. 9-16

४८] महाभा. शांतिपर्व अ. ५ श्लो. २,३,४ समुद्धृ. म् H.I.L. P.43

रिति सुवचम् । चरकसंहितायां न्यायदर्शनसिद्धान्तानां प्राचीनं रूपमुपवर्ण्यमानं लभ्यते । न्यायमंजरीकारश्च निग्रहस्थानभूतां प्रतिज्ञाहानिं निरूपयन् नारदवचनमुद्धरति । अय च न्यायाव- द्याविशारदो नारदः, काल्पनिकः, प्रसिद्धनारदवंशीयो वा यः कश्चिदिति सतीशचन्द्रविद्याभूषणमतम् (४९) ।

न्यायदर्शनस्य दर्शनत्वप्राप्त्यनन्तरकालीनो विकासः —

वैशेषिकदर्शनाभिसम्बद्धा हेतुविद्या न्यायदर्शनमिति समा- ख्यां प्राप । न्यायदर्शनस्य विस्तरेण विषयनिरूपणं विधाय दर्शनान्तराणामिव तस्यापि प्रामाणिकं सूत्रग्रन्थं प्रणीय दर्शनत्व- प्राप्त्यनन्तरकालीनस्य न्यायशास्त्रविकासस्य प्रथमसोपानं सम- कल्पयद्भगवानक्षपादः । वेदप्रामाण्याभ्युपगमेन आस्तिकदर्शनेषु परिगण्यमानं गौतमीयन्यायदर्शनं सकलशास्त्रोपकारकतया सु- धीभिराद्रियमाणं निरन्तरमभ्यवर्धत । गौतमीन्ययायदर्शनस्य प्राधान्येनावस्थाद्वयमुपलभ्यते । तत्र वात्स्यायनविरचितं न्याय- भाष्यं, तदुपरि विषयोपपादनार्थं उद्योतकरप्रभृतिभिर्विरचिता वार्तिकादिप्रबन्धाः च मूलसूत्रानुसारिणः प्राचीनन्यायसम्प्रदाये स्थानमलभन्त । भासर्वज्ञविरचितो न्यायसारः, गंगेशोपाध्याय- प्रभृतिभिर्निजप्रतिभाप्रभावेणाभिनवविषयान् संयोज्य मूलसि- द्धान्ताविरोधेन प्राचीनसम्प्रदायसिद्धं मतं यथावकाशं परिवर्त्य पुरस्कुर्वद्भिः प्रणीताः प्रकरणग्रन्थाश्च नव्यन्यायसम्प्रदायं परि- कल्पयामासुः ।। प्रकारान्तरेण जैनबौद्धदर्शनाभ्यां सह सम्बद्धा- हेतुविद्या तदनुसारिभिः स्वसिद्धान्तस्थापनायोपयुज्यमाना जैन- न्यायबौद्धन्यायरूपेण विचकास ।। कणभक्षप्रणीतवैशेषिकसूत्राणां क्रमविच्छेदवशात् दुरवबोधानां अर्थानुकूलं संयोजनं विधाय प्रकरणानुसारमुपादेयानां सूत्राणामर्थमुपपादयामास प्रशस्तपा- दाचार्यः । वैशेषिकदर्शनस्य तत्त्वनिरूपणं यथा प्रशस्तपादमुनि- विरचिते पदार्थतत्त्वसंग्रहे विशदमवभासते न तथा ग्रन्थान्तरेषु । अत एव समुपलभ्यमानकणादसूत्रक्रममुल्लंघ्य विरचितोऽपि स

४९] H.I.L. P. 44, 45.

ग्रन्थो भाष्यमित्याभाष्यते मनीषिभिः। व्योमशिवाचार्यप्रभृतिभिर्विरचिताश्च तट्टीकोपटीका वैशेषिकदर्शनस्य मूलरूपं निरूपयन्ति। अथापि पदार्थशास्त्रतया वैशेषिकस्य, प्रमाणशास्त्रतया च न्यायस्य परस्परपूरकत्वं न व्यस्मार्यत सुधीभिः। अत एवोत्तरकाले उभयोर्मिलितयोरेव दर्शनत्वेन व्यवहारो दृश्यते। परस्परपूरकत्वेन प्रमेयांशे वैशेषिकसिद्धान्ताः; प्रमाणांशे, वाद–जल्पवितण्डाद्यंशे च गौतमीयन्यायसिद्धान्ताः नैयायिकैरभ्युपगताः समुपलभ्यन्ते। एतदनुसारं न्यायशास्त्रेतिहासः, वैशेषिकदर्शनस्य न्यायशास्त्राभेदेन परिगणनात्प्राक्कालीनः, तदुत्तरकालीनश्चेति द्वेधा समुपवर्णितो विपश्चिद्भिः (५०)।

तदेवं भारतीयन्यायशास्त्रस्य दर्शनत्वप्राप्त्यनन्तरं चातु–र्विध्यमुपवर्णितं भवति। गौतमीयन्यायविद्यायाः प्राचीननवीन-त्वेन द्वैविध्यम्। जैनबौद्धसम्प्रदायाभ्यामनुगृहीतस्य च न्यायशा–स्त्रस्य जैनन्यायबौद्धन्यायत्वेन द्वैविध्यमिति।

न्यायवैशेषिकयोरेकीकरणात्प्राक्कालीनः, तदुत्तरकाली–नश्चेति गौतमीयन्यायविद्याविकासस्य द्विविधः कालखण्डः कल्प-नीयः। एकीकरणमन्यत्, परस्परपूरकत्वं चान्यदिति तु निपुण-मवधेयम्।

इदमत्र विचारणीयम्–। प्रागुपदर्शितदिशा न्यायपदप्र–योगः प्रथमं पूर्वमीमांसायामेवोपलभ्यते इति हेतोरनुमीयते यत् न्यायदर्शनेन सह पूर्वमीमांसाया अपि समुल्लसति कोऽपि घनतरः सम्बन्धः। तदनुसारं केचन विद्वांसः, पूर्वमीमांसाया अपि न्याय-न्यायशास्त्रान्तर्भावमभिलषन्ति (५१)।

किं च सामान्यतः सर्वैरपि भारतीयदर्शनैः, विशेषतः सांख्येन यथावदभ्युपगतं योगदर्शनं न्यायशास्त्रेण सह कमपि

५०) H. I. L. Chapter III P. 386

५१) I. L. M. Translators Introduction of the philosophical notes by Krisnakumar Dixit. P. 30.
द्र. Ing. Intro. to प्रमाणवार्तिक by राहुल सांकृत्यायन. 1943
किताबमहल प्रकाशन अलाहाबाद.

सम्बन्धातिशयमभिव्यनक्ति । स च सुतरां प्राचीन इति गोपीनाथकविराजमहाशयः समभिप्रैति(५२)। योगस्य नतन्त्रत्वेनाभ्युपगतं सांख्यं हि ज्ञानमेव साक्षान्मोक्षकारणत्वेन स्वीकरोति, न्यायदर्शनं तु योगमेव तथात्वेनेति न्याययोगयोरनितरसाधारणं एकविषयानुबन्धित्वं सिद्धं भवति । वैशेषिकदर्शन तु विषयेस्मिन् भिद्यते(५३)। विषयोऽयं मालोचकविपश्चितामवधानमर्हति ।

उदयनप्रभृतीनां पाशुपताचार्येत्यादिबिरुदैः प्रमाणान्तरैश्च न्यायदर्शनं शैवसम्प्रदायमात्मसाच्चकारेति ज्ञायते । तथापीतरदेवतानमस्कारादिरूपं मंगलाचरण केषु चिन्न्यायग्रन्थेषूपलभ्यत इत्यन्यदेतत् । एतदपि शैवसम्प्रदायेषु विद्यमानं योगशास्त्रस्य प्राभवं क्रमेण न्यायशास्त्रे शैवसम्प्रदायाभिसंबन्धमाविश्चकार इति सूचयति ।

ऐतिहासिकदृशा कालविभागः —

विकासक्रमपरिशीलनार्थमवश्यविचारणस्य ऐतिहासिककालखण्डस्य विभागस्तावदालोच्यते ।

बोडसमतम् —

बोडसमते न्यायशास्त्रेतिहासकालस्य त्रिधा विभागः- सूत्रकालः, टीकाकालः, प्रकरणग्रन्थकालश्चेति । सूत्रकाले गौतमसूत्राणां न्यायभाष्यस्य च समावेशः, टीकाकाले वात्स्यायनादनन्तरं त्रयोदशतमैशवीयशतकं यावत् भाष्योपरि लिखितानां टीकोपटीकानां संग्रहः, प्रकरणग्रन्थकाले च न्यायवैशेषिकयोर्विषयानधिकृत्य स्वतन्त्रतया विरचितानां प्रकरणग्रन्थानां अन्तर्भावो भवतीति स्वयमुपपाद्य, दोषममुमूरीकरोति यदेतादृशभागे क्रियमाणे केषांचित्प्रकरणग्रन्थानां टीकाकाले, कासांचित् टीकानां पुनः प्रकरणग्रन्थकाले प्रणयनोपलम्भाद्व्यभिचारो दुर्निवार (५४) इति ।

---

५२) द्र. Gleanings from the Histori of Nyaya Vaisesika Literature. P. 4. ५३) तत्रैव

५४) तर्कसंग्रहः, English Translation, Introduction P. 18,19

विद्याभूषणमतम् –

सतीषचंद्रविद्याभूषणमहोदयोऽपि प्राचीनमध्यनवीनरूपेण त्रिधा न्यायदर्शनकालस्य विभागमभ्युपगच्छति । तत्र प्राचीनकाले सूत्राणां, भाष्यस्य, तट्टीकोपटीकानां च संग्रहं विधाय; मध्यकाले पुनः केवलं बौद्धजैनन्यायौ सन्निवेश्य; नवीनकाले ऐशवीयैकादशशतकानन्तरं रचितानां प्रकरणग्रन्थानां समावेशो विहितः (५५) ।

शास्त्रिमतम् –

धर्मेंद्रनाथशास्त्रिमहाशयस्तु प्रारम्भकालः (प्राचीनकालमारभ्यैशवीयपंचमशतकं यावत्), विवादकालः (पंचमशतकमारभ्यैकादशतमशतकं यावत्), ह्रासकालः (द्वादशतमशतकमारभ्योतरं) चेति त्रेधा कालविभागं कल्पयामास । तन्मते बौद्धनैयायिकस्य दिङ्नागस्य नवाविर्भावः कमपि महिमातिशयमावहन् न्यायदर्शनस्य, मीमांसायाः, किमधिकं सर्वेषामपि भारतीयदर्शनानां विकासस्य हेतुः । तदनुसारं दिङ्नागात्पूर्वं प्रारंभकालः, तमारभ्योत्तरं विवादकालः, बौद्धानां भारतदेशपरित्यागानन्तरं ऐशवीयद्वादशतमशतके गंगेशोपाध्यायमारभ्य ह्रासकाल इति विवेकः (५६) ।

बिजल्वान्महोदयमतम् –

बिजल्वान्महोदयमते चत्वारः कालखण्डाः- प्राचीनकालः, मध्यकालः, नव्यन्यायकालः, नव्यन्यायानन्तरकालश्चेति । तत्र आद्यो वेदवाङ्मयमारभ्य गौतमं यावत्, द्वितीयो वात्स्यायनमारभ्य बौद्धजैनन्यायशास्त्रकारानप्यन्तर्भाव्य जयन्तभट्टं यावत्, तृतीयो गंगेशोपाध्यायमारभ्य गदाधरभट्टाचार्यपर्यंतम्, चरमश्च सप्तदशशतकस्योत्तरार्धमारभ्य अद्ययावत् प्रसरीसरीतीति तन्मतम् (५७) ।

---

55) H.I.L. Intro. XIII – XV. 56) Critique of Indian Realism PP. 12 – 13. 57) Indian Thiory of Knowledge Ch. I Origin and Developmant PP. 5, 6.

समालोचना –

प्रबन्धप्राधान्यमवलम्ब्य प्रवर्तमानं प्रथममतं व्यभिचारदोषकलुषितमिति स्वयं बोडसमहाशय एव स्वीकरोति। तथापि 'प्राधान्येन खलु निर्देशा भवन्ति' इति न्यायेन प्रबन्धप्राधान्यात् तथा निर्देशो नासंगत इति वक्तुं शक्यम्।

द्वितीयमतं तु सुतरामनादरणीयम्। तत्र प्राचीनन्यायशास्त्रेण सहैव विकासमासादयतोः बौद्धजैनन्याययोः मध्यकालिकतास्वीकारप्रसंगः। किंच नवमशतकोत्तरं रचितानां न्यायमंजर्यादीनां भाष्यटीकोपटीकारूपत्वेन प्राचीनकाले समावेशो दुष्परिहरं दोषमापादयति।

तृतीयं मतं वैचारिकविकासक्रमं प्राधान्येनावलम्बते। तथाऽपि परमतनिराकरणपूर्वकस्वमतस्थापनाय आदित एव प्रवृत्तानां नैयायिकानां शास्त्रविस्तारः केवलं दिङ्नागप्रवर्तितेन खण्डनमण्डनादिप्रवाहेणैव बभूवेति कथनं न कथमपि युक्तियुक्तं प्रतिभाति। विविधविद्यासंप्रदायानुवर्तिभिः प्रवर्तितो वादविवादः शास्त्रविस्तारे सामान्यतया कथंचिदुपचकारेति तु सर्वसंमतमेव।

किंच दर्शनान्तरेष्वपि स्वप्रभावमभिव्यंजयन्ती गंगेशोपाध्यायप्रभृतिभिरुपात्ता सूक्ष्मतमविचाराभिव्यंजनक्षमा परिष्कारबहुला शैली कथं ह्रासकारणीभूतेति न ज्ञायते। न हि केवलं शब्दाडंबरमंडितानां परिष्काराणां प्रयोगो मण्यादिग्रंथेषूपलभ्यते येन तेषामनुपादेयत्वं स्यात्।

चतुर्थमते नव्यन्यायकालत्वेनाभिमते कालखंडेपि केषांचित् प्राचीनन्यायसंप्रदायानुसारिणां गौतमसूत्रवृत्त्यादिग्रंथानां नवीनैरपि रचितत्वाद्व्यभिचारः। यदि नव्यन्यायप्रबन्धप्राधान्यात्प्राचीनन्यायानुसारिग्रंथवैरल्याच्च तथा निर्देश इत्युच्यते तदा न विप्रतिपत्तिः।

निर्णयः –

वस्तुतस्तु भारतीयन्यायशास्त्रस्य विकासं पर्यालोचयन्तो विपश्चितः सावधारणमिदमूरीकुर्वन्ति यत् प्रबन्धप्राधान्यमव–

लम्ब्य, विचारभेदानुविधायिनं कालक्रममनुरुध्य चेतिद्वेधा विकासक्रमः कल्पयितुं शक्यः। तत्र प्रबंधप्राधान्यमवलंब्य विधीयमाने विभागे प्राचीनन्यायः, नवीनन्यायः, बौद्धन्यायः, जैनन्यायश्चेति चतुर्धा न्यायशास्त्रीयप्रबन्धानां वर्गीकरणं संभवति। तेषु वेदानुसारिनैयायिकसंप्रदायसिद्धं प्राचीननवीनतया विधीयमानं द्वैविध्यं बाधकाभावादभ्युपगन्तव्यं भवति। तदनुसारेण यथासंप्रदाय सूत्रभाष्यादिगतविषयनिरूपणपराणां प्रबंधानां कालविशेषनिरपेक्षं प्राचीनन्यायेऽन्तर्भावः, स्वातन्त्र्येण विरचितानां तत्त्वचिंतामण्यादीनां प्रकरणग्रंथानां पुनर्नवीनन्याये समावेश इति स्थूलदृशा सिध्यति। अवच्छेदकावच्छिन्नादिपदप्रयोगप्राचुर्यं नव्यन्यायलक्षणमिति मतं तु भ्रममूलकमेव, तात्पर्यादावपि तत्प्रयोगोपलम्भादिति द्रष्टव्यम्।

कालक्रममनुरुध्य विधीयमाने विभागे तु प्रथमतया समुपलभ्यमानं गौतममुनिप्रणीतं सूत्रजालमवलंब्य तत्प्राक्कालीनः, तदनन्तरकालीनश्चेति द्विविधः कालखंडः कल्पनीयः। ततः सूत्रप्रणयनानंतरभावी कालः नव्यन्यायसंप्रदायप्रवर्तकतया प्रसिद्धस्य गंगेशोपाध्यायस्य प्रादुर्भावमाधारतयोपकल्प्य तत्पूर्वतनः, तदनंतरश्चेति द्वेधा विभजनीयः। अस्मिन्कालक्रमकृते विभागे प्राचीननवीनजैनबौद्धेतिचतुर्विधन्यायसंप्रदायानुसारिप्रबंधानां यथायथं संनिवेशो भवति। सर्वेषु भारतीयन्यायसंप्रदायेषु निर्विवादं विभिन्नकाले प्रधानपदमधितिष्ठतोगौतमगंगेशयोराविर्भावमवलंब्य विहितोऽयं कालविभागः प्रकृतन्यायसिद्धांतविकासक्रमपर्यालोचने नितान्तमुपकरोतीत्यपि द्रष्टव्यम्।

प्रधाननैयायिकानां परिचयः –

प्रकृते न्यायसूत्ररचयितारं गौतममहामुनिं तत्त्वचिंतामणिकारं गंगेशोपाध्यायं च क्रमेण प्राचीनन्यायनव्यन्याययोर्विकासे प्रधानतया हेतुभूतत्वान्न्यायदर्शनेतिहासविषये मानदण्डत्वेन तयोरुपादानं विधाय कतिपयप्रधानविदुषां परिचयःप्रस्तूयते। तत्र प्राचीनन्यायसंप्रदाये ; गौतममहर्षिः, वात्स्यायनः, उद्योतकरः, वाचस्पतिमिश्रः, जयंतभट्टः, उदयनाचार्यश्चेत्येते विशेषेणोल्लेखनीयाः।

गौतममहर्षिः –

दर्शनत्वप्राप्त्यनंतरं प्रथममेव न्यायदर्शनस्य सिद्धांतानां सुचारुरूपेण सूत्रेषु ग्रथनं विधाय नैयायिकेषु प्रधानं पदमधिष्ठीयते गौतममुनिना । तद्रचितानि न्यायसूत्राणि नाम उत्तरकाले नैकविदुषां धिषणाव्यापारेण विकसिष्यमाणाया न्यायविद्याया मूलाधारः । पंचस्वध्यायेषु विभक्तानि न्यायसूत्राणि मोक्षाख्यपरमपुरुषार्थसाधनीभूतं प्रमाणादिषोडशपदार्थतत्त्वज्ञानं जनयितुं तन्निरूपणं कुर्वंति । उद्देशलक्षणविभागपरीक्षात्मकं च तन्निरूपणं तत्त्वज्ञानजननायेष्टे ।

सूत्रकारस्य नामधेयं विविधं निर्दिश्यते प्राचीनप्रबन्धेषु । तथाहि कालिदासपूर्वकालीनो महाकविर्भासो 'मेधातिथेर्न्यायशास्त्रम्' इति समुल्लिखति (५८) । पद्मपुराणे, नैषधीयचरिते, गौतमसूत्रवृत्त्यादिग्रंथेषु च गोतमो गौतमो वा न्यायशास्त्रप्रणेतृतया निर्दिश्यते (५९) । न्यायभाष्ये, न्यायवर्तिके, तात्पर्ये, न्यायमंजर्यां, अन्येषु च केषुचित्प्रबन्धेषु केवलमक्षपाद एव न्यायशास्त्ररचयितृतया निरूप्यते (६०) ।

मेधातिथिर्गोतमवंशीयः ऐशवीयवर्षारम्भात्प्राक् पंचाशदधिकपंचशतमिते संवत्सरे कृतावस्थानः आन्वीक्षिक्याः प्रवर्तकः । अक्षपादश्च तद्भिन्नः पंचाशदधिकैकशततमैशवीयसंवत्सरे प्रादुर्भूतः मेधातिथिप्रणीतामान्वीक्षिकीं न्यायनिरूपणपरेण भागेन संयोज्य न्यायसूत्रतामापादयामासेति सतीशचंद्रमतम् (६१) ।

बोडसमते कश्चिदज्ञातस्वरूपो व्यक्तिविशेषः सूत्रकारो गौतमो न वेदपुराणादिप्रसिद्धगौतमाभिन्नो भवितुमर्हति (६२) ।

---

५८) प्रतिमानाटकम् अंकः ५.   ६1) H.I.L. P. 50, 497, 498.

५९) पद्मपुराणम् उत्तरखंडः अ. २६८ समुद्धृतम् H.I.L. पृ. ४८, नैषधीयचरितम् १७.७४, गौ. सू. वृ. 'एषा मुनिप्रवरगौतमसूत्रवृत्तिः'

६०) न्या. भा. अन्त्यश्लोकः- 'योऽक्षपादमृषिं न्यायः' पृ. ९१९
न्या. वा. प्रारंभश्लोकः- 'यदक्षपादः प्रवरो मुनीनां' पृ. १
न्या. वा. ता. पृ. १ न्या. मं. प्र. प्र. पृ. 1 मंगलाचरणश्लोकः ५

६२) तर्कसंग्रहः English translation. Introduction P. XXX.

अक्षपाद एव न्यायसूत्रप्रणेता न पुनर्गौतमो मेधातिथिर्वा इति दासगुप्तमहाशयः प्रतिपादयति (६३)।

केचित्तु अक्षपादपदेन जन्मान्धो दीर्घतमा गौतम एव निर्दिश्यत इति प्रतिपादयन्ति (६४)।

विन्ध्येश्वरीप्रसादास्तु वेदकालीनो गौतममहर्षिरेव न्यायसूत्रकार इत्यध्यवस्यन्ति (६५)।

नन्दलालसिन्हामहोदयः (६६) फणिभूषणतर्कवागीशश्च (६७) अक्षपादगौतमयोरेकव्यक्तिकत्वं प्रतिपादयामासतुः।

इदमत्र तत्त्वम्। गोतम इति अक्षपादस्य गोत्रनाम भवितुमर्हति। तद्गोत्रभवत्वाच्च गौतम इति नामान्तरं सभाव्यते। प्रसिद्धपुरुषाणां गोत्राभिधानेनापि समुल्लेखो भारतीयप्राचीनपरम्परासिद्ध एव। यथा वार्तिककृदुद्योतकरस्य भारद्वाज इति नामनिर्देशः। किंच देवीपुराणेऽप्युक्तम्– 'गोतमान्वयजन्मेति गौतमोऽपि स चाक्षपात्।' (६८) इति। मेधातिथेश्च गौतमत्वेन निर्देशो महाभारते समुपलभ्यते। स एव च अहल्यापतित्वेनोपवर्ण्यते। तदेवं गोतमो गौतमो मेधातिथिश्चेति त्रीण्यपि नामान्येकव्यक्तिवाचकानीति सिद्धं भवति।

एवमेव स्कन्दपुराणे, पुराणान्तरेषु च अक्षपादस्यापि अहल्यापतिगौतमाभिन्नत्वमुपवर्ण्यते (६९)। अक्षपाद इति नामप्राप्तिस्तु पुराणकथाविशेषमूलेति विभावनीयम्। अत एवं चत्वार्यपि नामधेयानि एकव्यक्तेरेव वाचकानि। स एव च न्यायसूत्राणि रचयामासेति युक्तं प्रतिभाति।

---

६३) Histori of Indian Philosopy. Vol. II PP. 393-394.

६४) न्यायपरिचय भूमिका पृ. ४०. ६५) न्या.वा.भूमिका पृ २२,२३.

६६) The Nyayasutras of Gautama Vol. VIII Forward section III P. VII.

६७) न्यायपरिचय भूमिका पृ ४१

६८) समुद्धुतं तत्रैव पृ ४० द्र. महाभारतं शांतिपर्व २६५ · ४५ समुद्धृतम् H.I.L. P. 18

६९) द्र. न्या.वा. भूमिका पृ २४

प्राचीनवचनपर्यालोचनया न्यायसूत्रप्रणेतुर्गौतमस्य मिथिलादेशवास्तव्यमवधार्यते (७०)। मिथिलायामधुना गौतमस्थानमिति प्रथिते जनपदे गौतमो वासमकल्पयदिति लोकप्रवादोऽपि विषयममुं द्रढयति (७१)।

समयनिर्णयस्तु प्रमाणाभावात् न कर्तुं शक्यते। तथाऽपि प्रागैशवीयपंचमशतकादर्वाचीनत्वं गौतममनेर्न संभवतीति निश्चप्रचम् (७२)।

वात्स्यायनमहर्षिः –

गौतमप्रणीतन्यायसूत्राणां विवरणार्थं सत्स्वपि बहुषु व्याख्यानेषु प्राचीनतया समुपलभ्यमानं वात्स्यायनमहर्षिप्रणीतं भाष्यं सर्वाण्यप्यतिशेते। न्यायसूत्रानन्तरं न्यायभाष्यमेव प्रामाणिकतया उपादीयते नैयायिकविद्वद्वरैः। दिङ्नागप्रभृतिभिरधिक्षिप्यमाणे न्यायभाष्ये तदपमानमसहमानानां उद्योतकरादीनां ग्रन्थरचनायां प्रवृत्तिर्बभूवेत्यस्मिन्विषये इतिहास एव प्रमाणम्। तदेव दर्शनान्तराणामिव न्यायशास्त्रस्यापि भाष्यमावश्यकं बभूव। तच्च वात्स्यायनमुनेरतिगभीरवचोनिचयरूपेण सुधियां मनः सम धातुमुदियाय।

वात्स्यानमुनेर्जीवनचरित्रादिकमपि प्रमणाभावाद्दुरवगाहमेव। वार्तिककारः सबहुमानं वात्स्यायनस्य महर्षित्वमूरीकरोति (७३)। स्वयं वात्स्यायनोपि भाष्यान्ते (७४) स्वनाम सकीर्तयति। पक्षिलस्वामी इत्यपि तस्य नामान्तरं श्रूयते (७५)। मत्स्यपुराणेपि तन्नामनिर्देशः समुपलभ्यते। पद्मपुराणीयरामाश्वमेधेपि तस्य समुल्लेखः प्राचीनतां प्रमाणयति (७६)।

---

७०) न्या. वा. भूमिका पृ. १८–२०. द्र. रघुवंशः ११.३३.
७१) H.I.L. P. 19. ७२) तु. न्या. भा. भूमिका ढुंढिराज.कृता पृ. ४.
७३) न्या.वा. पृ. ५६०- 'यदक्षपादप्रतिभः... भाष्यं वात्स्यायनो जगौ।'
७४) न्या.भा. पृ. ९१९- 'तस्य वात्स्यायन इदं भाष्यजातमवर्तयत्।'
७५) सर्वदर्शनसंग्रहः पृ. १०९.
७६) मत्स्यपुराणे अ. ५२, पद्मपुराणे रामाश्वमेधे अ. १
समुद्धृतम् न्या. वा. भूमिकायां, पृ. ७४, ७५.

कामसूत्ररचयिता कश्चिदन्य एव वात्स्यायनो मल्लिनाग इत्याख्य. प्रसिद्धः। पक्षिलस्वामिनामा वात्स्यायनस्तु न्यायभाष्यकारस्तस्माद्भिद्यते। अर्थशास्त्रप्रणेता चाणक्योपि न्यायभाष्यकाराद्भिन्न एव। वस्तुतस्तु चाणक्यस्य वात्स्यायनत्वमेव नास्ति। अतो वात्स्यायनचाणक्ययोरभेदशङ्कैव नोदेति। तथाप्यभिधानचिंतामणौ त्रिकाण्डकोशे च चाणक्यस्य वात्स्यायनादिनामान्तराणि श्रूयन्ते। तदनुसारं वात्स्यायनापरनामधेयः चाणक्य एव न्यायभाष्यकार इति केचिदूचुः। परं प्रमाणाभावात् कोशवचनं बुधमनोहराख्यटीकानुसारं व्याख्यातव्यम्। तद्यथा- विष्णुगुप्तः- कौटिल्य., चाणक्यः, द्रामिलः, अंशुलः इति पंच नामानि चाणक्यस्य। वात्स्यायनः, मल्लिनागः, पक्षिलस्वामी इति त्रीणि नामानि वात्स्यायनमुनेरिति। किंच आन्वीक्षिकीतिपदेन न्यायविद्यामसंगृह्णश्चाणक्य. न्यायापरपर्यायामान्वीक्षिकी स्वीकुर्वतो वात्स्यायनाद्भिन्न एव भवितुमर्हतीत्यनुसन्धेयम्। निर्णीतं चैतदेव विन्ध्येश्वरीप्रसादमहोदयेन (७७)।

निवासस्थानम्— पक्षिलमुनेरावासविषयेपि वर्तते विदुषां विमति। तथाहि केचित् स्वमीत्युपाधेः तस्य द्रविडत्वं निश्चित्य संप्रति कञ्जीवरमिति प्रसिद्धे काञ्चीनगरे वात्स्यायनस्य स्थितिरासीदिति कल्पयन्ति। विन्ध्येश्वरीप्रसादमहोदयस्तु वैदिकवचनान्युपन्यस्य पद्मपुराणीयरामाश्वमेधप्रकरणे अयोध्याया. समीप सरयूनद्याः उत्तरतीरे वर्तमानो देशो वात्स्यायनस्यातिप्रिय इति वर्णनोपलम्भाच्च मिथिलादेशसमीपवर्तिप्रदेशवासित्वमस्य सूचयामास (७८)।

समयः— अज्ञातसमयः प्राचीनोयं महर्षिरिति विन्ध्येश्वरीप्रसादमहोदयो निरणैषीत् (७९)। सतीशचन्द्रविद्याभूषणस्तु ऐशवीयतृतीयशतके माध्यमिककारिकासु लंकावतारसूत्रेषु च निरूपितानां बौद्धसिद्धान्तानां वात्स्यायनमुनेः पूर्वं तदवस्थानसमये वा

७७] न्या.वा. भूमिका पृ ८०-८५, ११४

७८] " " १२३-१२७. ७९] तत्रैव पृ. ७४ ७९.

न्यायसूत्रेषु प्रक्षेपो बभूव इति प्रतिपादयन् वसुबन्धोः अशीत्य-धिकचतुःशतमिते वर्षे, दिङ्नागस्य च पंचमशतके समुद्भूतत्वात् तदुभयापेक्षया प्राचीनस्य, स्वपूर्वभाविनागार्जुनमतप्रत्याख्यातुश्च वात्स्यायनमुनेः समयः ऐशवीयचतुर्थशतकस्य समीपे कदाचित् परिकल्पनीय इति सिद्धान्तयति(८०)।

उद्योतकरः –

कालक्रमानुसारं, नैयायिकविद्वत्परम्परायां च वात्स्याय-नादनन्तरं उद्योतकरस्य स्थानमुपवर्ण्यते। वात्स्यायनानन्तरं नैके नैयायिकविद्वद्वराः बौद्धमतनिराकरणाय, प्राचीनन्यायसप्रदाय-संरक्षणाय च प्रवृत्ताः प्रबन्धनिर्माणेन न्यायशास्त्रमभिवर्धया-मासुः। तेषु प्रथम उद्योतकरः। नागार्जुनवसुबन्धुदिङ्नागप्रभृ-तिभिर्बौद्धैः सूत्रभाष्ययोरुद्भावितानामाक्षेपाणां प्रतिक्षेपाय कु-तार्किकाज्ञाननिवृत्तिहेतुः न्यायवार्तिकनामा निबन्धो(८१)भार-द्वाजगोत्रीयेण श्रीमदुद्योतकराचार्येण व्यरचि।

वार्तिककारो भारद्वाज इति स्वनामधेयं निर्दिशति(८२)। तत्तु भारद्वाजगोत्रीयत्वप्रयुक्तमेव न तु सांस्कारिकम्। न्याय-वार्तिकपुष्पिकायां परमर्षिभारद्वाजपाशुपताचार्यश्रीमदुद्योतक-कृताविति बिरुदभूषितमुद्योतकर इति नामधेयमुल्लिख्यते(८३)। तदपि न सांस्कारिकं किन्तु वार्तिकापरपर्यायोद्योतनामकप्रबन्ध-प्रणेतृत्वप्रयुक्तमिति तात्पर्यटीकायां उद्योतनाम्ना वार्तिकनिर्दे-शोपलम्भात् कैश्चिदध्यवसीयते(८४)। तन्न समीचीनम्। सांस्कारिकनाम्नां डित्थडवित्थादीनां संकेतमात्रप्रयोजनकत्वेन निरर्थकत्वेऽपि, वाचस्पतिप्रभृतीनां केषांचिदन्वर्थकत्वदर्शनात् न तावतैव तेषां बिरुदत्वेन परिग्रहो युक्तः। तथा सति जयन्तोदयन-कालिदासादिनाम्नामपि बिरुदवदुपग्रहः कर्तव्यः स्यात्। किंच

८०] H.I.L. P. 116. ८१] न्या.वा. पृ. १
'कुतार्किकाज्ञाननिवृत्तिहेतुः करिष्यते तस्य मया निबन्धः।'
८२] तत्रैव पृ. ५६० 'अकारि महतस्तस्य भारद्वाजेन वार्तिकम्।'
८३] तत्रैव. ८४] Indian Logic and Atomism, by A.B.kieth P. 28. उद्योतकरका न्यायवार्तिक एक अध्ययन प्राक्कथन पृ. ७

मुबंधुकृतवासवदत्तायां उद्योतकर इति नामनिर्देशात्तदेव(८५) सास्कारिकमिति कथनं न कोपि प्रमाणविरोधः ।

स्थानम्– उद्योतकस्यावासः स्थानविषयेपि वर्तते विप्रतिपत्तिः। विद्याभूषणमते स्रुघ्नदेशं नयता पथा संवद्धे स्थाण्वीश्वर एवास्य वास. समभूत् । तत्रत्यसभायां चासावसामान्य पांडित्यं प्रदर्श्य आस्थानपंडितपदवीमधितष्ठौ(८६)। विध्येश्वरीप्रसाद–महोदयमते तु स मैथिलो ब्राह्मणः संभाव्यते(८७)। भारतीयपरं–परानुसार पद्मावतीपुरं जन्मस्थानमुद्योतकरस्य, यदधुना मालवदेशे नरवारनाम्ना प्रसिद्धम् । कीथमते उद्योतकराविर्भावानंतरमतीत्य वर्षशत पद्मावती न्यायदर्शनस्य प्रधानं केंद्रमासीत्(८८)। वस्तुतस्तु वार्तिके तक्षशिलादीनामपि नामनिर्देशात्, प्रबलप्रमा–णाभावाच्च तदीयनिवासस्थानविषये निश्चेतु न शक्यते ।

समयः– सुबंधुकृतवासवदत्तायामुद्योतकरनामनिर्देशोपलभात् सुबंधोश्च सप्तमशतकपूर्वार्धभवबाणभट्टापेक्षया पूर्वकालीनत्वात् षष्ठशतकपूर्वार्धे कृतावस्थानो वार्तिककार इतिसिद्ध भवति। विद्याभूषणमते पंचत्रिंशदधिकषट्शततमैशवीयसवत्सरस्य-६३५ A.D. समीपे तदाविर्भावसमयः(८९)। फणिभूषणतर्कवागीशस्तु ऐशवीयपंचमशतकभव उद्योतकर इति समभिप्रैति(९०)। तदेवं धर्मकीर्तेः प्राक् ऐशवीयपंचमशतकस्यान्ते षष्ठशतकस्य पूर्वार्धे वा क्वचन वार्तिककारो भुवमलंचकार इति निश्चीयते ।

वाचस्पतिमिश्रः (प्रथमः) –

उद्योतकरानन्तरं ऐशवीयदशमशतक यावत् न्यायदर्शनस्य विकासक्रमे महानन्तरायः समवर्तत इति विज्ञायते । विविधविद्या-संप्रदायानुसारिणां मीमांसकजैनबौद्धादीनां पारस्परिकविचार–संघर्षे निरंतरमुपचीयमाने कुमारिलभट्टमंडनमिश्रप्रभृतयो वैदिकमतसंरक्षणाय, धर्मकीर्तिधर्मोत्तरप्रभृतयश्च बौद्धास्तद्विरोधाय

८५)वासवदत्ता पृ.२३६(Holls edition)समुद्धृतम् H.I.L. P.123
८६)H.I.L. p. 124 ८७) न्या.वा. भूमिका पृ. १३६
८८)Indian logic and Atomism P. 28. ८९) H.I.L· P. 124
९०)न्यायपरिचय भूमिका पृ. १

बद्धपरिकरा बभूवुः। बौद्धैः साधिक्षेपमभिहन्यमाने न्यायवैशेशिक-संप्रदाये तदुद्धाराय नवमशतकानंतरं प्रादुर्भूतेषु श्रीधराचार्य-व्योमशिवाचार्य-त्रिलोचनप्रभृतिषु नैयायिकविद्वद्वरेषु अतिजरतीनां उद्योतकरगवीनां समुद्धरणाय तात्पर्याख्यां टीकां विरचय्य पुनरपि न्यायदर्शनं पूर्ववदवद्योत्य महतीं प्रतिष्ठां प्रापयन् षड्दर्शनाचार्यो वाचस्पतिमिश्रो विद्वत्परंपरायां किमप्यनितरसाधारणं स्थानमधिनष्ठौ। सांख्ययोगन्यायवेदान्तमीमांसादिशास्त्रेषु टीकाः प्रणीय निजनिरुपमपांडित्यप्रभावेण सर्वतंत्रस्वतंत्र इत्यभिख्यां च लेभे।

एकाकिनी न्यायवार्तिकतात्पर्यटीकैव वाचस्पतेस्तात्पर्याचार्यत्वेन टीकाकारत्वेन च नैयायिकेषु प्रसिद्धि जनयामास। तत्प्रभावात् भाष्यवार्किकयोरुपरि लिखिताः त्रिलोचनप्रभृतीनां टीकोपटीकाः करालकालकवलिताः समभूवन् (९१)। तत्र माध्यमिकविज्ञानवादि-सौत्रांतिक-वैभाषिकभेदेन चतुर्विधस्यापि खंडनं तात्पर्ये विधीयते। विशेषतो दिङ्नागस्य धर्मकीर्तेश्च मतं पर्यालोच्य खंडयतो वाचस्पतिमिश्रस्य कृतिः न्यायविद्यां पुनरुज्जीवयामास।

स्थानम्— लोकप्रवादानुसारं वाचस्पतिमिश्रो मिथिलाभिजन इति सनिश्चयमवधार्यते। स हि मिथिलायां मकरंदनाम्नि ग्रामे, दरभंगासमीपे वटग्रामे वा स्वभार्यया भामत्या सह निवासमकल्पयदिति श्रूयते। शांकरभाष्यटीकायां भामत्यां हडिपदप्रयोगोऽपि मतमिदमुपोद्बलयति। हडिशब्दः काष्ठयंत्रणार्थकतया अधुनापि मिथिलायां प्रयुज्यते (९२)।

किंच भामत्युल्लेखमनुसृत्य नृगनाम्नो राज्ञः समाश्रयो वाचस्पतिमिश्रेण समासादित इति निश्चीयते। मैथिलसंप्रदायानुसारं गुप्तवंशीयोयं राजा आदिशूरेत्युपनामधेयेनापि प्रसिद्धः (९३)।

समयः— विद्याभूषणमतानुसारमसौ नवमशतके प्रादुर्बभूव। वस्वंकवसु-८९८-वत्सरे न्यायसूचीनिबन्धप्रणयनस्य निर्दे-(९४) शात् एकचत्वारिंशदधिकाष्टशततमेशवीयसंवत्सरे (८४१ A.D.)

---

९१) Histori of Nvyanyaya in Mithila P. 23. ९२) तत्रैव P. 24.
९३) Histori of Navyanyaya in mithila P. 25
९४) न्यायसूचीनिबन्धः प. २० [न्या. भा.]

तदवस्थानं सूच्यते। दशतमशतकभवो बौद्धनैयायिको रत्नकीर्तिरपि वाचस्पतिनाम समुल्लिखति (९५)।

दिनेशचंद्रभट्टाचार्यस्तु तात्पर्यटीकाया: परिशिष्टरूपो न्यायसूचीनिबंध: अष्टानवत्यधिकाष्टशततमे (८९८) शकसंवत्सरे रचितो न तु विक्रमाब्दे इति निश्चित्य तत्समसामयिके षट्सप्तत्यधिकनवशततमैशवीयवर्षे वाचस्पते: प्रादुर्भाव इति सिद्धान्तयति (९६)।

उदयनाचार्य: –

द्वादशतमशतकानंतरं प्रतिकूलपरिस्थितिपरवशा बौद्धा: भारतदेशं परित्यज्य देशांतरं जग्मुरिति पाश्चात्यविदुषां कथनं यदि यथार्थमिति स्वीक्रियते तर्हि उदयनाचार्य एव चरमो बौद्धमतविध्वंसनाय बद्धदीक्षो मेधावीत्यपि स्वीकरणीयं भवति। परपक्षीयै: प्राधान्येन बौद्धनैयायिकै: साक्षेपमधिक्षिप्ते वाचस्पतिमते तदुद्धाराय बौद्धमतप्रत्याख्यानाय च नैयायिकाग्रणी मैथिलविद्वानुदयनाचार्य: न्यायवार्तिकतात्पर्यटीकापरिशुद्धिनामानं ग्रंथं प्रणिनाय। कुसुमांजलि:, आत्मतत्त्वविवेक:, किरणावलि:, न्यायपरिशिष्टम्, लक्षणावली चेति ग्रंथांतराण्यपि तद्विरचितान्युपलभ्यन्ते। बोधसिद्धि:, बोधशुद्धिरिति च न्यायपरिशिष्टस्य नामांतरे अपि निर्दिश्येते (९७)।

नव्यन्यायप्रवर्तकतया यद्यपि गंगेशोपाध्यायस्य नाम निर्दिश्यते तथापि वस्तुतो नवग्रंथनिर्माणेन प्राचीनन्यायमर्यादामतिक्रम्य नव्यन्यायस्य द्वारदेशमधितिष्ठन्नुदयनाचार्य एव नव्यन्यायसंप्रदायस्य प्रवर्तक इति दिनेशचंद्रभट्टाचार्य: (९८)। गंगेशोपि मणौ तत्र तत्र सबहुमानमुदयनाचार्यस्य मतमुपन्यस्यति (९९)

भविष्यपुराणपरिशिष्टे (१००) उदयनाचार्यस्य चरित्रमुपलभ्यते। ऐतिहासिकदृशा निष्प्रयोजनकमपि तद् बौद्धनैयायिकै:

95) H.I.L. P. 133 97) H.I.L. P. 141

९६) Histori of Navyanyaya in mithila PP. 27-30

९८) ,, पृ. १ ९९) त. चि. प्र. खं. पृ. २१०, ८७७, ८८८

१००) भविष्यपु. परिशिष्ट अ. २० । समुधृत न्या. वा. भू. पृ. १५२-१५९

सहोदयनाचार्यस्य प्रचलितं महांतं सघर्षं प्रमाणयति । तिब्बतीय-लोकप्रवादानुसारिणी किंचिदन्यादृशी कथा विद्याभूषणेन निर्दिश्यते । तदनुसारं ईश्वरविषयकवादे जयमासादयन्नपि गिरिशिखरादधःपातनेन श्रमणमरण प्रति कारणभूतः स्वप्ने तुषानलप्रवेशरूपप्रायश्चित्तग्रहणार्थं भगवता जगन्नाथेन समादिष्टः सन्नुदयनाचार्यस्तथा कुर्वाणः जगन्नाथमुपालेभे इति श्रूयते । यथा– (१)

ऐश्वर्यमदमत्तः सन्नाम्मानमवमन्यसे ।
पुनर्बौद्धे समायाते मदधीना तव स्थितिः ।। इति ।

स्थानम्– मिथिलादेशे दरभंगातः उत्तरस्यां दिशि दशक्रोश यावद्विदूरे कमलानद्याः पश्चिमतीरे मगरोणिनाम्नि ग्रामे उदयनाचार्यो जनिं जग्राह इति विद्याभूषणमहोदयः प्राह (२)। दिनेशचंद्रभट्टाचार्यस्तु कामतौलस्थानकादनतिदूरे करिभोनाग्रामे स न्यवसत्, तद्वंशीयाश्चाचार्योपनामधेया अधुनापि तत्र निवसन्तीति पत्रीषु समुपलभ्यमानानुल्लेखान् लोकप्रवादांश्चावलम्ब्य निरणैषीत् (३)।

समयः– लक्षणावल्यामारंभे षडधिकनवशततमं (९०६) शकवर्ष ग्रंथप्रणयनकालतया समुल्लिखन्नुदयनाचार्यः (४), चतुरशीत्यधिकनवशततमैशवीयसंमत्सरात्- ९८४A.D. पूर्वभावित्वं स्वस्य सूचयति ।

दिनेशचंद्रभट्टाचार्यस्तु श्रीहीरोदयनयोर्विवादवृत्तं प्रमाणतयोपादाय आत्मतत्त्वविवेके ज्ञानश्रीनाम्नो बौद्धविदुषो मतस्य निरस्यमानत्वात्पंचाशदधिकैकसहस्रतमैशवीयवर्षे- १०५०A.D. जीवतो ज्ञानश्रीनाम्नो विदुषः समकालीनोयमिति निरचिन्वत् (५) । ततश्च तन्मते पंचविंशत्यधिकैकसहस्रतमैशवीयवर्ष-१०२५A.D.-समीपे श्रीमदुदयनाचार्यस्य समुदयः ।

1,2) H.I.L. P. 142
3) Historti of Navyanyaya in mithila P. 5.
5) ,, PP. 51-53
४) लक्षणावली– तर्कांबरांकप्रमितेष्वतीतेषु शकांततः ।
वर्षेषूदयनश्चक्रे सुबोधां लक्षणावलीम् ॥ समुद्धृतं H.I.L. P. 142.

जयन्तभट्टः –

न केवलं बौद्धानां किंतु वेदान्तिमीमांसकवैयाकरणादीनां सर्वेषामेव प्रतिपक्षिणां मतमालोच्य न्यायसिद्धांतान्प्रतिष्ठापयितु कश्मीरदेशीयो विद्वान् जयंतभट्ट न्यायसूत्रवृत्तिरूपं न्यायमंजरी-ग्रंथ प्रणिनाय। सामान्यतोन्यायदर्शनस्य विकासो मूलत एव मिथिलायां समजनि। गंगेशोपाध्यायादनंतरं च स वंगदेशेपि प्रसारमासमाद। सत्यप्येवं कश्मीरदेशीयेन जयंतभट्टेन न्यायमंजरीप्रणयन-द्वारा मैथिलभिन्नानामपि न्यायविद्यावेत्तृत्व प्रमाणीकृत्य नैयायिकविद्वत्परंपरायामसामान्यं पदमविष्ठितम्। तद्विरचितः संक्षेपेण गौनमाभिमतपदार्थनिरूपणपरः न्यायकलिकानामा अपरोपि ग्रंथ-समुपलभ्यते (६)। मणिकारः जरन्नैयायिकत्वेन जयंतभट्टं समुल्लिखति (७)। परं ततःपूर्वं मैथिलविद्वत्परंपरायां बौद्धग्रंथेषु तन्नामनिर्देशानुपलंभात् कियंतमपि कालमज्ञात एवासौ मैथिलविदुषामासीदिति विज्ञायते। एतदीया विषयनिरूपणशैली नितरामभिनवा, साटोपवचनविन्यासबहुला भाषा च नितांतं मनोहरेति विद्वदनुभवः।

न्यायमंजरीगतोपान्त्यश्लोकेन जयंतभट्टस्य पितुश्चंद्र इतिनामधेयं विज्ञायते (८)। तस्य प्रपितामहस्तु शक्तिस्वामी इति तत्पुत्रेणाभिनंदेन कादंबरीकथासारे समुपवर्ण्यते (९)। शक्तिस्वामी चैशत्रीयाष्टमशतकभवस्य राज्ञो ललितादित्यस्य मन्त्री बभूव (१०)।

वाचस्पतिमिश्रो न्यायकणिकायां न्यायमंजरीकर्तुर्गुरोरुल्लेखं करोति। स चोल्लेखो जयन्तभट्टमेव परामृशतीति न निश्चेतुं शक्य। तथापि फणिभूषणतर्कवागीशः वाचस्पतिगुरोस्त्रिलोचनस्य जयंतभट्टस्य चैकव्यक्तित्वं स्वीकरोति (११)। उभावपि भिन्नाविति विद्याभूषणो निरूपयति (१२)। दिनेशचंद्रस्तु त्रिलोचनविरचिता न्यायभाष्यटीका न्यायमंजरीत्याख्यया ज्ञानश्रीनाम्ना बौद्धविदुषा

६] न्या.मं. भू. पृ. ६. ७] त.चि. उपमानखंडः पृ. ६१.

८) न्या.मं. द्वि.भा. पृ.२०८ 'सूनुर्व्याप्तदिगन्तरस्य यशसा चन्द्रस्य चन्द्रत्विषा'

९) समुधृतं न्या. मं. भूमिका पृ.१. १०) न्यायपरिचय भूमिका पृ.४९

११) न्यायपरिचय भूमिका पृ. ५०,५१ १२) H.I.L. P. 134

स्पष्टमुल्लिख्यत इतिहेतोः वाचस्पतिमिश्रवचनं न्यायमंजरीकार-वचनं त्रिलोचनं परामृशति नतु जयन्तभट्टमिति निर्णीतवान् (१३)।

समयः— त्र्यशीत्यधिकाष्टशततमैशवीयवर्ष-८८३A.D. आरभ्य द्व्यधिकनवशततमवर्ष-९०२A.D. यावत् कश्मीरदेशं प्रशासितवतो राज्ञः शंकरवर्मणः सविशेषोल्लेखात्तत्समकालीनो जयतभट्ट इति निर्णीयते। किंच स्वयं जयंतभट्टोपि कारागृहे प्रक्षिप्तेन सता तेन न्यायमंजरी रचितेति कथयति (१४)।

विद्याभूषणमते न्यायमंजर्यां वाचस्पतेर्माघस्य चोल्लिख्यमानत्वाज्जयंतभट्टो निश्चयेन नवमशतकोत्तरकालीनः। देवसूरिविरचिते स्याद्वादरत्नाकरे च जयंतनामनिर्देशात् एकादशशतक-पूर्वकालीनत्वं तस्य निश्चीयते (१५)। तदेव दशमशतके तदीयमवस्थानं सिद्धं भवति।

तदीयं निवासस्थानं तु कश्मीरदेश इति सर्वसंमतम्।

नव्यनैयायिकाः —

नव्यन्यायसंप्रदायस्य परिनिष्ठितं रूपं यद्यपि गंगेशोपाध्यायविरचिते तत्त्वचिंतामणिग्रन्थे समुपलभ्यते तथापि स्वपूर्वभाविनां नव्यनैयायिकविदुषां मतानि समालोचयन् गंगेशस्तेषामपि नव्यन्यायविकासे सहयोगो बभूवेति सूचयति।

वस्तुतो यद्यपि न्यायसार एव नव्यन्यायसंप्रदायस्य बीजान्युपलभ्यन्ते तथापि प्रकृते मणिकारो येषां नव्यनैयायिकानामाधमर्ण्यं विषयविवेचनदृशा स्फुट व्यनक्ति तेषां नामनिर्देशादिक संक्षेपेणोपन्यस्यते।

शिवादित्यः —

निर्विकल्पकप्रत्यक्षनिरूपणावसरे गंगेशोपाध्यायः शिवादित्यस्य सनामग्राहं मतमनूद्य खंडयति (१६)। विशेषणोपलक्षणयोर्लक्षणं निरूपयन् शिवादित्यमतमुपन्यस्य, उदयनाचार्यमतं सि-

13) Histori of Navyanyaya in mithila P. 53

१४) राज्ञा तु गह्वरेस्मिन्नशद्बके बन्धने विनिहितोहम्। ग्रंथरचनाविनोदादिह हि मया वासरा गमिताः॥ समुधृतम् न्यायपरिचय भूमिका पृ ४९

15) H.I.L. P.147. १६) त.चि. प्र.ख. पृ.८७३ (तिरुपति प्रकाशनम्)

द्धान्तनया परिष्करोति (१७)। मणौ प्रत्यक्षखंडे सखंडाखंडत्वेन विधीश्रम नमुपावेद्वैविध्यं शिवादित्यमतमनुसरति (१८)। प्रथमतया शिवादित्य एव उपाधिरूपसामान्यस्य सखंडाखंडत्वेन द्वैविध्यमुपपादयामास इति तद्रचितसप्तपदार्थीविचनपर्यालोचनया (१९) निश्चीयते।

शिवादित्यविरचित: न्यायवैशेषिकसिद्धांतप्रतिपादनपर: सप्तपदार्थीनामा ग्रंथ एव केवलमधुना समुपलभ्यते। लक्षणमालाहेतुखंडनादय: प्रबंधास्तद्रचितत्वेन समुल्लिख्यमाना अपि नोपलभ्यंते।

अस्य मैथिलविदुष: समय: द्वादशतमैशवीयशतकमिति निरणैषीद् दिनेशचन्द्रभट्टाचार्य: (२०)।

दिवाकर: –

त्रयोदशतमैशवीयशतकभवो दिवाकरो मैथिलविद्वान् उदयनाचार्यविरचितान ग्रंथान् व्याख्याय यश:समासादयामास। उपसर्गाणां द्योतकत्वमित्युदयनाचार्यमतं परिष्कुर्वाणो गंगेश: धात्वर्थविरुद्धार्थप्रतिपादकत्वे प्रादीनां द्योतकत्वम् अन्यत्र च वाचकत्वमिति दिवाकरमतमुपन्यस्य खंडयामास (२१)।

तरणिमिश्र: –

त्रयोदशतमशतकसमीपवर्ती तरणिमिश्रोपि मैथिलो विद्वान् रत्नकोषकार इति तत्र तत्र निर्दिश्यते। गंगेशो बहुषु स्थलेषु तन्मतमुपन्यस्यति (२२)। किंच रत्नकोषकाराभिमतमुपाधिलक्षणमेव मणौ सिद्धांतितमुपलभ्यते (२३)।

---

२०) द्र. Histori of navyanyaye in mithila P. P. 63, 64.

१९) „ पृ६३ १७) तत्रैव पृ. ८७७ १८) तत्रैव पृ. ८८४

तु. न्यायसिद्धांतमंजरी- 'शिवादित्यमिश्रास्तु करणाद्याकारानुगतमते: करणत्वादिकमखंडोपाधिरूपसामान्यमंगीचक्रु:' पृ. ९. समुद्धृतं तत्रैव.

२१) त.चि. शब्दखंड: पृ. ८५६ [कलकत्ताप्रकाशनम् B.I.]

२२) तत्रैव अनुमानखंड: पृ. ८८५-८८८ „

प्रत्यक्षखंड:, सत्रामवाद: पृ. ६६५ [तिरुपतिप्रकाशनम्]

२३) तत्रैव अनुमानखंड:, उपाधिविचार: पृ. ३३६

सोंदडोपाध्यायः –

सोंदडः,मणिकठः,गंगेशश्चेति त्रयो मैथिलविद्वांसः कालत परस्परमनतिदूरवर्तिनः नव्यन्यायसप्रदाये प्राधान्येन निर्देशमर्हति।

व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकाभावस्य प्रथमोद्भावकः सोंदडोपाध्यायः परवर्तिभिर्नैयायिकैः सबहुमानमुल्लिख्यते। व्याप्तिवादे सोंदडीयामभावकल्पनामुपन्यस्य सक्षेपेण प्रतिचिक्षेप गंगेशः। रघुनाथशिरोमणिस्तु सोंदडाभिमतमभावमभ्युपेत्य तद्घटितव्याप्तिलक्षणं विविधरीत्या परिश्चकार(२४)। गदाधरभट्टादयो गंगेशोपन्यस्तं सोंदडमतं तत्र तत्र समुट्टंकयति। गंगेशादनतिपूर्ववर्ती सोंदडः त्रयोदशतमशतकस्यान्ते प्रादुर्बभूवेति दिनेशचद्र भट्टाचार्यो निश्चिनोति(२५)।

मणिकण्ठमिश्रः –

न्यायरत्नरचयिता मैथिलविद्वान् मणिकठमिश्र. गंगेशापेक्षया किंचित्पूर्वकालीनः नव्यन्याये स्वकीयमनितरसाधारणं प्रभावमभिव्यजयति। मणिकारेण समुल्लिखितानां मणिकंठविचाराणां मणिकंठीयत्वं वासुदेवसार्वभौमः स्वरचितायां मणिटीकायां साधु समुट्टंकयति(२६)। मणिकंठविरचितो न्यायचितामणिनामा अपरोपि ग्रंथः न्यायरत्ने समुल्लिख्यते। परं तत्त्वचितामणिप्रकाशर्धर्षितोसौ कालकवलितो बभूवेति विज्ञायते।

सिद्धांतव्याप्तिः,उपाध्याभासः,अवयवाः,हेत्वाभासा ,इत्यादिषु विषयेषु गंगेशः मणिकंठस्य विचारधारया सुतरां प्रभावित इति समवधार्यते। क्वचिदनयोर्मतभेदोपि लक्ष्यते। यथा मणिकंठः सामान्यलक्षणाप्रत्यासत्तिं न स्वीकरोति। किंचानुपसंहारिणं व्याप्यत्वासिद्धेतर्भावयति। गंगेशस्तु न तथा। तन्मते सामान्यलक्षणाप्रत्यासत्तेः सत्त्वात्, अनुपसंहारिणश्च सव्यभिचारप्रभेदत्वात्।

---

२४) द्र. अनुमानगादाधरी, चतुर्दशलक्षणी- पृ. १४५–३०५,
न्या.को. च. पृ८३५–३८

२५) History of Navyanyaya in mithila. P. 85

२६) सार्वभौमटीका[हस्तलिखितप्रतिः] समुद्धृता- तत्रैव पृ. ८६.

अन्येपि शशधर-रवीश्वर-हरिनाथप्रभृतयो बहवो नव्यनैयायिका: गंगेशपूर्वकालीना: आसन्निति निश्चीयते। परं तेषु केषांचिद्विषये प्रमाणाभावान्न किमपि विज्ञायते इतीतिहासविद:(२७)।

न्यायसिद्धांतदीपस्य रचयिता शशधराचार्य: गंगेशेन मणौ बहुषु स्थलेषु समालोच्यते। सिंहव्याघ्रलक्षणं मैथिलसंप्रदायानुसारं शशधरमणिधरयोर्भवितुमर्हति। आनंदसूरिअमरसूरिनामानौ जैनविद्वांसौ सिंहव्याघ्रपदव्यपदेश्याविति विद्याभूषणमतं तु(२८) प्रमाणाभावादनादरणीयमिति दिनेशचंद्रभट्टाचार्य:(२९)।

गङ्गेशोपाध्याय: –

सुविशाले दार्शनिकवाङ्मयेतिहासे केवलं तत्त्वचिंतामणिनामानमेकमेव ग्रंथं प्रणीय दिगंतविश्रांतं यशो वितन्वानो मिथिलाभिजनो गंगेशोपाध्याय: सामान्यतो दर्शनकारेषु विशेषतो नैयायिकेषु महत्वपूर्णं पदमधितिष्ठति। उदयनोदयानंतरं निरंतरमुपचीयमानेपि नैयायिकप्रपंचे अस्पष्टतया कष्टावगमं प्रमाणशास्त्रं प्रतिभाबलात् विशदीकर्तुं प्रयतमानेषु नैयायिकविद्वद्वरेषु गंगेशोपाध्याय एव तत्त्वचिंतामणिग्रंथरचनया प्रमाणशास्त्रप्रतिपादनप्रयत्नेसाफल्यमाप। तत:पूर्वं मणिकंठशशधरौ नव्यप्रणालीमनुसृत्य प्रमाणनिरूपणपरौ (न्यायरत्न-न्यायसिद्धांतदीप इति) प्रकरणग्रंथौ व्यरचयतां, परं न गंगेशोपाध्यायस्येव साफल्यं प्रापतु:। सत्यप्येवं गंगेशोपाध्यायस्य विचारधारायै प्रागुपदर्शितदिशा समुचितं स्थानं कल्पयामासतुरिति तु निश्चप्रचं। विषयसंगत्या सुसंबद्धा, संक्षिप्ता, सारगर्भिता च गंगेशोपाध्यायस्य भाषाशैली स्वपूर्वभाविनो नैयायिकानत्यशेत इति तत्पूर्वकालीनप्रबंधविलोपादेवावधार्यते।

परिष्कारप्रधाना नव्यन्यायशैली गंगेशोपाध्यायस्य करावलंबेन परमं विकासमासादयामास। अत एव गंगेशस्य नव्यन्यायसंप्रदायप्रवर्तकतया समुल्लेखो विद्वद्भिर्विधीयते(३०)।

---

२७) History of Navyanyaya in mithila PP. 93-95
28) H.I.L. P. 406 २९) " P. 89
30) Navyanyaya Priface P.IX. Also Material for the study of Navyanyaya, Section I. P. 5

गंगेशोपाध्यायस्तदनुयायिनश्च विचारणीयविषयाणां अन्यूना-तिप्रसक्तया लक्षणान्युपन्यस्तुं प्रायतिषत। तथा प्रयतमानाश्च त्वनिर्णयैकदृशा प्राचीनपरंपरामनादृत्य क्वचित्प्रकारांतरेण विधानुपपादयामासुः। अत एव ते नव्यनैयायिकतया प्रसिद्धिमापुः। दनुसारं सूक्ष्मतमविषयविवेचनद्वारा धर्मधर्मिज्ञानपूर्वकं युक्तायुक्तचिंताप्रवर्तनाय नवीनैव परिष्कारप्रधाना शैली न्यायनये क्रमेण मुदियाय'३१',या स्वमहिम्ना न केवलं दर्शनानि, किंतु साहित्यालंलितकाव्यकलाविश्लेषणपराणि शास्त्राण्यपि प्रविवेश'३२'।

गंगेशस्य वैदुष्यम्– तत्त्वचिंतामणिग्रंथप्रारंभे गंगेशः सिद्धांतदीक्षागुरुत्वमात्मीयं प्रतिपादयति (३३) यत्र तदीयवैदुष्यमेवाविकलं प्रमाणम्। श्रूयते किल लोकप्रवादानुसारं यत् कदाचित्केनापि मंत्रविद्याविशारदेन साधिक्षेपमनुयुक्तः गंगेशः समाचचक्षे–

नास्वाद्य गौडीमनाराध्य गौरीं विनातन्त्रमंत्रैर्विना शब्दचौर्यात्।
सिद्धप्रबुद्धप्रबन्धप्रवक्ता विरिंचिप्रपंचे मदन्यःकविःकः'इति'३४'
देतच्चिंतामणिग्रंथस्य निरतिशयां प्रसिद्धिं सूचयति।

न्यायशास्त्रस्य प्रभाकरमतस्य च विशेषतोऽध्ययनं विधाय प्रभाकरमतनिराकरणाय प्राधान्येन गंगेशोपाध्यायस्य प्रवृत्तिरिति मण्युल्लेखादध्यवसीयते'३५'। परं प्राभाकरेषु श्रीकरनामानमेकमेव प्रतिपक्षीयं गंगेशः स्मरति (३६)। मणावुल्लिखितेषु विद्वत्सु काश्मीरदेशीयो जयन्तभट्टः सविशेषनिर्देशमर्हति,यो मैथिलविदुषां समाजे यशसा समादरणीयं स्थानमाप्नुवानः प्रथम एव कश्मीरदेशीयो मनीषी। स हि जरन्नैयायिक इति गंगेशेन निर्दिश्यते (३७)।

इदं त्ववधेयम्। प्रबलबौद्धसुधीभिर्वादयुद्धे बद्धपरिकरतया उदयनाचार्यस्य पांडित्यप्रतिभोदयःप्रचकाशे। गंगेशस्य बुद्धिचातुर्यं तु प्रभाकरविरोधात्प्राधान्येनाभ्यवर्धत (३८)

31) द्र. Navyanyaya Sistim of logic. Intro. P. 15
32) Navyanyaya Priface P.IX   33) त.चिं. प्र.खं. पृ. ५
34) Histori of Navyanyaya in mithila Cha.III P.96
35) तचिं. प्रखं. पृ. ४   38) तु.   ,,   P.97
36) तचिं. ईश्वरानुमानखण्ड पृ.१८६ (B.I.Edi) 37) तत्रैव उपमानखंड:पृ ६१

वंश:– दरभंगापुस्तकालयस्थान् मैथिलपंजीग्रंथान् समालोच्य दिनेशचंद्रभट्टाचार्यमहोदय. गंगेशस्य वंशविषय एवं निरणैषीत्– यन्मिथिलायामधुनाप्यनभिज्ञाते छादननाम्नि जनपदे मूलतो निवसतां काश्यपगोत्रीयाणां वंशे गंगेशो जनिं जग्राह। स च वंश: सामाजिकदृशा गौरवार्हो न बभूव। गंगेशस्य दौहित्रत्वेन समुल्लिख्यमानो रत्नाकर: प्रसिद्धवंशीयत्वेन पंजीषु प्राधान्येनोपवर्ण्यते। गंगेशविषये तु सपूर्णं वंशेतिवृत्तं तत्र नोपलभ्यते, किमधिकं गंगेशस्य पितुरपि नाम नोल्लिख्यते ।

शांडिल्यगोत्रीयजजिवालवंशीयं भवेश्वरं समुपवर्णयन् पुरुषोत्तम: समुल्लिलेख यत् 'छादनसं(भव)तत्त्वचिंतामणिकारक-जगद्गुरु म.म.गंगेशसुतसूपनदौ(हित्र)'...। अनेन,अन्यैश्च पंजीवचनैर्वर्धमान:,सूपन:,हरिशर्मा चेति त्रयो गंगेशतनया अभूवन्निति विज्ञायते। गंगेशविषये पंजीषु प्रयुज्यमानं परमगुरु:,जगद्गुरुरिति च बिरुदद्वयं तस्य स्वदेशे महानादरो बभूवेति सूचयति । केवलं द्वितीयो वाचस्पतिमिश्र: पंजीषु परमगुरुपदं व्यतीयत ।

किंच पंजीषु गंगेशादनंतरं तदीयवंशनिर्देशानुपलंभात् तत्तनयमरणादनंतरं तस्य वंशो नि:शेषतां जगामेति निश्चीयते तस्य जीवनेतिवृत्तविषये यथार्थतो न किमप्यधिकमवगम्यते वंगदेशीयेषु प्रचलिता: प्रवादास्तु प्रणाणविरोधादैतिहासिकदृशा तत्त्वविदूरत्वाच्च न स्वीकारार्हा:(३९)।

समय:– गंगेशसमयविषये वर्तते विदुषां विमति:। ऐशवीय द्वादशशतके गंगेश: समुदभूदिति वेबरमहोदय: समभिप्रैति(४०)। सार्धैकादशशतकाद्द्वादशशतकं यावत्तस्य जीवनकाल इति कीथ महाशयमतम्'४१'। विद्याभूषणमहोदयस्तु तस्य शिष्यपरंपरामाधारतयोपकल्प्य षट्सप्तत्यधिकत्रयोदशशततमैशवीयसंवत्सरसमीपे-१३७६AD-कदाचिदवस्थानमासीदिति कल्पयति(४२)।

३९) History of navyanyaya in mithila Cha.III. PP.97-98
40) History of indian literature P. 246
41) Indian logic and atomism P.33
42) H.I.L. PP.406-407

हरप्रसादशास्त्रिस्तु विंशत्यधिकचतुर्दशशततमैशवीयसंवत्सरीयं- १४२०AD कुसुमांजलिप्रकाशस्य ताटपत्रपुस्तकमवलंब्य तत्रत्यं त्रिसंख्याबोधकं चिह्नविशेषं चतुर्दशतमैशवीयशतकपूर्वार्धकाले प्रयुज्यमानं प्रमाणतया निर्दिश्य, त्रयोदशशतकपूर्वकालभवो गंगेशः संभाव्यत इति समसूचयत् (४३)। प्रो. इंगाल्समहोदयोऽप्येवमेव निरणैषीत् (४४)।

परं तादृशचिह्नविशेषस्य उत्तरकालीनेषु लिखितपुस्तकेष्वपि बहुलमुपलंभान्नेदं समयनिर्धारणे प्रमाणं भवितुमर्हतीति मतमिदं निराकुर्वाणो दिनेशचंद्रभट्टाचार्यः कतिपयप्रमाणोपन्यासेन त्रयोदशशततमसंवत्सरानंतरं सार्धत्रयोदशशततमैशवीयवर्षयावत् गंगेशस्य ग्रंथरचनाकालः, पांडित्यप्रदर्शनकालश्चेति निरणैषीत् '४५'।

विंध्येश्वरीप्रसादमहोदयस्तु– मणौ खंडनकारनिर्देशोपलंभात् तदुत्तरकालीनो गंगेशः, चतुर्दशशततमैशवीयसंवत्सरभवस्य मण्यालोकरचयितुर्जयदेवमिश्रस्य पितृव्यात् हरिमिश्राद्विद्यामधीयानस्त्रयोदशशतकस्य चरमपादे कदाचिदाविर्बभूवेति निरूपयति (४६)। (४६ न्या वा भू पृ १६७-१७०)

उमेशमिश्रमते कुसुमांजलिप्रकाशकृता वर्धमानोपाध्यायेन स्वपितुः गंगेश्वर इति नाम्ना निर्दिश्यमानत्वात् गंगेशस्य गंगेश्वरेति नामान्तरमप्यासीत् (४७)।

तत्त्वचिन्तामणिः –

द्वादशसहस्रग्रंथपरिमितः सर्वातिशायी तत्त्वचिंतामणिनामा प्रबंधः प्रमाणतत्त्वविवेचनार्थमुपनिबद्धो गंगेशोपाध्यायेन। प्रतिज्ञातं च तथा 'प्रमाणतत्त्वमत्र विविच्यते' इति। प्रमाणतत्त्वसंबद्धानेके वादाः संकलय्य संगमय्य चैकस्मिन्नेव प्रबंधे तेन परिकल्पिताः पंडितपरिषदस्तोषाय बभूवुरित्यत्रोत्तरकाले गंगेशवचसां टीकोपटीकाप्रचय एव परिचायकः। तथाहि व्याप्तिपंचकादिकतिपयवचनानि व्याख्योपव्याख्यादिभिरुपचितानि पृथगेव पंचलक्षणी, चतु-

४३) समुल्लिखितं *History of navyanyaya in mithila Cha. III, P. 100*
44) Materials for the study of navyanyay logic. section I PP. 4-5
45) History of navyanyaya in mithila Chap. III PP 100-104
47) History of Indian philosophy. Vol. II p. 240

देशलक्षणी, सिद्धांतलक्षणीत्यादिरूपेण ग्रंथांतरत्वमापादितानि विद्वद्भिरध्ययनाध्यापनपरिपाटीसंनिविष्टानि विलसंति ।

प्रधानतया षट्चत्वारिंशद्विभागेषु विभक्तं विषयं क्रोडीकुर्वाणो मणिग्रंथ:प्राय:प्रमाणतत्त्वषट्कं सकलमपि विषयजातं प्रतिपादयति । अत एव प्रमाणतत्त्वपरिशीलनपरे अस्मिन्शोधप्रबंधे मणिग्रंथस्य विषयनिरूपणार्थमाधारतया ग्रहणं कृतम् । सति चैवं संक्षेपेण मणौ निरूपितानां प्रमाणशास्त्रविषयाणां संकलनं प्रकृतविषयपरिशीलनोपयोगितया न कथमप्यप्रस्तुतमिति विचार्य प्रस्तूयते ।

तत्रादौ पंडितमंडनार्थं प्रचंडपाषंडतमोनिराकरणार्थं च तत्त्वचिंतामणिप्रणयनमुपवर्ण्य, विपक्षपक्षीयं विचारचातुर्यं सर्वात्मना प्रतिरुध्य, न्यायसिद्धांतव्यवस्थापनाय समर्था, विपुला चेयं रचनेति स्वीयरचनाया:परिचयं ददाति गंगेश:(४८)। तदनुसारं विपक्षप्रतिक्षेप, स्वसिद्धांतव्यवस्थापनं चेत्युभयमपि निजप्रतिभासंचयेन प्रगल्भवचोनिचयेन आऽन्तं निर्वहति ।

तत्त्वचिन्तामणिस्थविषयसंग्रह: –

न्यायनये प्रमाणचतुष्टयाभ्युपगमात् चिंतामणिग्रन्थोऽपि चतुर्षु खंडेषु विभक्त: । तत्र प्रथमे प्रत्यक्षखंडे पूर्वं मंगलवाद:, तदनंतरं गौतमीयषोडशपदार्थेषु प्रथमोपात्तस्य प्रमाणस्य तत्त्वं विवेचयितुमारभते गंगेश: । तथाच ज्ञप्तिरुत्पत्ति: प्रमाणलक्षणं चेति विषयत्रयं क्रोडीकुर्वाण:प्रामाण्यवादो मणिग्रंथमधीयानानां विषयप्रवेशं संपादयति । तदनंतरं भ्रमात्मकं ज्ञानमेव नास्तीति ब्रुवतां प्राभाकराणां मतं निराकृत्य स्वमतसिद्धांतमन्यथाख्यातिं निरूपयति । अस्मिश्चान्यथाख्यातिवादे पंच प्राभाकरकारिका: प्रथममेवोधृता: समुपलभ्यन्ते ।

प्रमाणचातुर्विध्यं, प्रत्यक्षलक्षणं, सन्निकर्षांश्च विचारयितुं प्रवृत्त: सन्निकर्षवादस्तदुत्तरमुपात्तो गंगेशेन । मुक्तावल्यादिषु

४८) तचि. प्रख.आरंभे श्लो.३'यतो मणे: पंडितमंडनक्रिया प्रचंडपाषंडतमस्तिरस्क्रिया विपक्षपक्षे न विचारचातुरी नच स्वसिद्धांतवचोदरिद्रता।

न्यायमतप्रवेशार्थं रचितेषु ग्रंथेषु प्रचुरप्रचारमासाद्य गतार्थतया नायं विषयः प्रगल्भपांडित्यमपेक्षत इति विचार्य शिरोमणिः ग्रंथभागममुं न व्याख्यौ ।

षट्सु सन्निकर्षेषु त्रयाणां समवायसंबंधघटितत्वेन तस्य साधनार्थं प्रक्रांतःसमवायवादः,प्रमाणांतरत्वेन पराभिमताया अनुपलब्धेः स्वरूपनिरूपणपरेणानुपलब्धिवादेनानुगतः । अभावस्यानुपलब्धिग्राह्यत्वं तिरस्य प्रत्यक्षग्राह्यत्वं चोपपाद्य तत्स्वरूपमुपपादितमभाववादे । शब्दखंडे अभाववादनामकं ग्रंथविशेषं निर्दिशतीति पुनरवधानार्हं, येन तत्पूर्वमप्यभावविषये प्रचलितविचारधाराया वैविध्यं,विद्वद्विवादविषयत्वं च सूचितं भवति । अभावस्य पदार्थांतरत्वमेव निराकुर्वतांज्ञानश्रीप्रभृतीनां मतमप्यत्र निरस्यते ।

तदुत्तरं प्रत्यक्षकारणवादे सुवर्णस्य तैजसत्वसिद्धिः, अंतःकरणस्य मनसोऽणुत्वं, अनुव्यवसायः, सविकल्पकनिर्विकल्पकत्वेन प्रत्यक्षद्वैविध्यमित्यादयो विषया निरूपिताः ।

प्रबंधप्रमाणभूतो द्वितीयोऽनुमानखंडः पंडितमंडलीषु प्रसिद्धतमो निरतिशयविषयगांभीर्यं बिभर्ति । व्याप्तिकांडज्ञानकांडरूपेण द्वेधा विभक्तोसौ खंडःप्रचुरं पठनपाठनपरिपाटीसन्निविष्टो बभूव । तत्र व्याप्तिकांडे प्राधान्येन अनुमितिलक्षणं,व्याप्तिवादः,व्याप्तिग्रहोपायः, सामान्यलक्षणाप्रत्यासत्तिश्चेत्येते विषया निरूप्यंते । व्याप्तिवादः सप्तसु विषयेषु विभक्तः । यथा व्याप्तिपंचकं, सिंहव्याघ्रौ,व्यधिकरणधर्मावच्छिन्नाभावः, पूर्वपक्षलक्षणानि,सिद्धांतलक्षणं,सामान्याभावः,विशेषव्याप्तिश्चेति । व्याप्तिग्रहोपायविचारोपि तर्कः,व्याप्त्यनुगमश्चेति विषयद्वयं परामृशति ।

अनुमानखंडस्य द्वितीयार्धस्तु सुधीभिरुपेक्षाविषयीकृतेनोपाधिवादेनारभ्यते । तदुत्तरं तु विद्यमाना विषयाः सिद्धांतदीक्षागुरोर्गंगेशस्य गौरवमभिव्यंजयंति । ते च यथा पक्षता,परामर्शः,केवलान्वयिकेवलव्यतिरेकित्वेनानुमानद्वैविध्यं, अर्थापत्तेरनुमानांतर्भावः,अवयवाः,हेत्वाभासाश्चेति । परोक्तयुक्तीनां निरासाय हेत्वाभासनिरूपणस्योपादेयत्वं च तत्रोपपादितमुपलभ्यते । ईश्वरवाद-

नाम अनुमानखंडस्यांतिमभागस्तु कुसुमांजलिगतोदयनाचार्यवचोनिचयमनुसरन् तेनैवाभिभूतो न विद्वद्वधानाकर्षणे समर्थो बभूव।

अनुमानखंडगतानां गंगेशवचसां महीयान्प्रभावस्तद्‌उत्तरकालीनेषु नव्यनैयायिकेषु दृश्यते। तदीयमेकैकं वाक्यं नैयायिकसुधियां विचारधाराभिराप्यायितं ग्रंथरूपेण विचकास। महानेष ग्रंथराशिः गंगेशानन्तरं शतकद्वयं यावन्निरंतरमभिवर्धमानो नैयायिकविदुषामनितरसाधारणं धीवैभवं प्रमाणयति । तच्च तत्र कृतधियामेव बुद्धिवैशद्यं संपादयति न पुनरन्येषाम्। अत एव नव्यन्यायविस्तारो नाम उन्मार्गगामिनां विदुषां सुविशालःकल्पनाजाल इति न्यायशास्त्रस्य ह्रासहेतुरिति च केचिद्वदंति(४९)। वस्तुतस्तु विस्मयकारी गदाधरादिभिरनन्यस्तोयं न्यायविस्तारःप्रपंचेतिहासे निरुपम इति दिनेशचंद्रभट्टाचार्यः प्राह(५०)।

तृतीय उपमानखंडोपि ईश्वरवादादेरिव न विद्वज्जनमनो जहार। केवलं रुचिदत्तविरचिता टीकैव भागममुं विवृणोति । नान्यस्य कस्यापि मैथिलविदुषो व्याख्या तदुपर्यद्ययावदुपलब्धा ।

शब्दप्रमाणनिरूपणपरश्चतुर्थो भागःशब्दखंड इति व्यपदिश्यते। तत्र च प्राधान्येन निरूपिता विषयाः-शब्दलक्षणं,शाब्दबोधः शब्दप्रामाण्यवादः,आकांक्षादिनिरूपणं,शब्दानित्यत्ववादः,उच्छन्नप्रच्छन्नवादः,शक्तिवादः,लक्षणा,समासार्थविचारः,आख्यातार्थविचारः,धात्वर्थविचारः,उपसर्गविचारश्चेत्यादयःसंति। अतऐतिह्यादीनां प्रमाणत्वं निरस्य चत्वार्येव प्रमाणानीति सिद्धांतितम् ।

अनुमानखंड इव शब्दखंडोपि नितरां प्रसिद्धिमाप। अनेकानि व्याख्यानान्युभयोरुपरि विरचितान्युपलभ्यंते। मैथिलेषु,वंगीयेषु च नैयायिकेषु उभयोर्महत्त्वं समानमेवासीदिति विज्ञायते(५१)।

एवं तत्त्वचिंतामणिग्रंथो नचिरादेव विविधेषु विद्याकेंद्रेषु प्रचुरप्रचारमासाद्य विद्वद्भिर्बहुधाव्याख्यायमानो विषयमहिम्ना न केवलं न्यायशास्त्रीयप्राचीनप्रबंधानपितु स्वपूर्वकालीनान्नव्यन्याय

---

49) Indian logic and Atomism P.35

50) History of Navyanyaya in mithila Chaptet III P.108

51) " PP. 104-9

प्रबंधानपि व्यस्मारयत्। वर्धमानोपाध्याय-द्वितीयवाचस्पतिमिश्र-शंकरमिश्रप्रभृतयो गौतमीयन्यायविद्याया प्राचीनपथपरिष्कारे प्रयतमाना अपि न समीहितं साफल्यमन्वविन्दन्त ।

गंगेशेन तत्पूर्वकालीनैश्च कैश्चिन्नैयायिकैः प्रवर्तितो नव्य-न्यायसंप्रदायः परस्ताद्विशेषतः पक्षधरमिश्रापरनामधेयेन जयदेवेनाभिवर्धितो विदुषां तोषाय समजनि। समयेस्मिन्परिष्कारप्रक्रिया प्रबंधप्रमाणतामापादिता। मूलसिद्धांता, मूलग्रंथाश्च उपेक्षिता बभूवुः। गंगेशमारभ्य जयदेवमंतराकृत्य शिरोमणेरप्रतिमप्रभया पूर्णरूपतामापादिता परिष्कारप्रक्रिया नखलु प्राचीनरचनाः, तद्रचयितृन्वा नामतो निर्दिशति, किंतु केचित्तु, अन्येतु, यत्तु इत्यादिभि पदैः। अत एवैतिहासिकदृशा तत्तद्विचारपरंपरायाः पर्यालोचनं दुःशक भवति (५२)।

इदं त्ववधेयम्। वंगदेशं विहाय दक्षिणदेशे केवलं माध्वसंप्रदायिन एव नव्यन्याये कृतभूरिपरिश्रमास्तेषामेव परिष्कारप्रधानां शैलीमवलंब्य गंगेशमतं निराकुर्वन्। तेषु प्रथमो मनीषो षष्टयधिकचतुर्दशशततमैशवीयसंवत्सरकालीनो व्यासतीर्थः नव्यन्यायमत-प्रत्याख्यानाय तर्कतांडवनामानमपूर्वं ग्रंथं जग्रथ । व्यासतीर्थात्पूर्वं माध्वविद्वांसोऽपि मिथिलायां गंगेशेन प्रवर्तितं न्यायविद्याविस्तारं न पर्यचिन्वन् ।

किंच 'पक्षधरप्रतिपक्षो न लक्ष्यते क्वापि लोकेस्मिन्' इति लोकोक्तिसिद्धं निरुपमं जयदेवयशः, कर्नाटकदेशभवेन व्यासतीर्थेन वादाहवे जयदेवं निर्जित्य निष्प्रभतामापादितमिति मैथिलेतिहासप्रसिद्धम्। तथाचोच्यते-

यदधीतं तदधीतं यदनधीतं तदप्यधीतम् ।
पक्षधरप्रतिपक्षो नावेक्षि विनाभिनवव्यासेन ।। इति (५३)

गंगेशोपाध्यायानंतरं नव्यन्यायसंप्रदाया मिथिलायां, नवद्वीपे च विस्तारं लेभे। मैथिलेषु गंगेशपुत्रो वर्धमानोपाध्यायः, ततो यज्ञपत्युपाध्यायः, जयदेवमिश्रः, रुचिदत्तोपाध्यायः इत्यादयो गगेशो-

52,53) History of Navyanyaya in mithila P. 125, 100-4

पदर्शिनां मणिं परिष्कृतवंतः। अस्मिन्नेव समये वंगेप्यपरो नव्यन्यायसंप्रदायो विचकास यस्मिन्दीधितिकारो रघुनाथशिरोमणिः प्राधान्येनोल्लेखमर्हति ।

नवद्वीपवासिनो वासुदेवसार्वभौमस्य शिष्यो रघुनाथो नव्यन्याये स्वोपज्ञां विचारधारां स्वशिष्यपरंपरां च प्रवर्तयामास। मिथिलायां च जयदेवमिश्रस्तत्पूर्वमेव स्वसंप्रदायानुयायिनां भगीरथ-ठक्कुर-रुचिदत्तप्रभृतीनां परंपरां स्थिरीचकार। तथापि रघुनाथशिरोमणिविरचिता दीधितिः मणिटीकांतरापेक्षया अल्पाकारापि विवेचनचातुरीमहिम्ना परिष्कारप्रचुरशैलीबलेन च विद्वद्भिर्व्याख्योपव्याख्यादिरचनया संमानिता बभूव। जयदेवस्य शैलीमेवानुसरन् रघुनाथशिरोमणिस्तमपि निष्प्रभं चकार। उपेक्षाविषयीकृतं प्राचीनन्यायसंप्रदायंपुनरवद्योतयितुं उदयनविरचितमात्मतत्त्वविवेकं, श्रीवल्लभाचार्यनिबद्धां लीलावतीं, वर्धमानप्रणीतं किरणावलीप्रकाशं च स व्याचख्यौ। तस्य समयः षष्टयधिकचतुर्दशशततमवर्षमारभ्य विंशत्यधिकपंचदशशततमवर्षपर्यंतं बभूव ।

क्रमेण दीधितिर्निखिलेपि भारतदेशे विद्वज्जनमानिता सती नैकैः संख्यावद्भिर्व्याख्याता बभूव। कृष्णदाससार्वभौम(१५००--१५६०AD)विरचिता प्रसारिणी,भवानंदसिद्धांतवागीश'१५२० -१५८०AD'निबद्धःप्रकाशश्चेति व्याख्यानद्वयं प्राचीनं सत् सुलभतया मूलार्थो यथा स्पष्टःस्यात्तथा विषयान्प्रतिपादयति। परमुत्तरकालीनानि जगदीश(१५५०-१६१०AD)मथुरानाथ(१५४० --१६००AD)गदाधर(१६१०-१७१०AD)प्रभृतिभिर्विरचितानि व्याख्यानानि दुरवबोधानि नवीनविषयचर्चादिभिर्मूलग्रंथमुपेक्षाविषयीकृत्य प्रवर्तन्ते ॥ जगद्गुरुरितिबिरुदभूषितो जगदीशतर्कालंकारः तत्त्वचिंतामण्यादीनामुपरि टीकाः विरच्य तर्कामृतन्यायादर्शशब्दशक्तिप्रकाशिकाभिधान् ग्रंथान् जग्रंथ। तेषु ग्रंथेषु शब्दशक्तिप्रकाशिका स्वपूर्वकालीनान् शब्दप्रमाणनिरूपणपरान् प्रबन्धानतिशय्य विद्वदादरभाजनं बभूव ।

जगदीशानंतरं नव्यन्यायविद्याविशारदो गदाधरभट्टाचार्यो

यायशास्त्रविस्तारस्य धुरं दधार। गादाधरीतिनाम्ना प्रसिद्धा त-
ीया तत्त्वचिंतामणिदीधितिटीका विषयदृशा प्रायःस्वपूर्वकाली-
ाःसर्वा अपि विचारधाराःपरामृशंती बृहदाकारा नव्यन्यायशास्त्रे
मुपात्तायाःपरिष्कारप्रक्रियायाश्चरमां विकासावस्थां स्फुटंप्रका-
यति। न केवलं टीकाग्रंथानपितु कांश्चन स्वतंत्रान्वादग्रंथानप्यसौ
णिनाय। तेषु विषयतावादो जगदीशमतनिरासपूर्वकं विषयतास्व-
पं निरूपयन्नव्यनैयायिकेषु परां प्रसिद्धिमाप । शाब्दबोधप्रक्रिया-
श्लेषणपरो व्युत्पत्तिवादस्तु सर्वातिशायी वैयाकरणादिभिःसर्वै-
पि शास्त्रकारैःसमादरणीयतां नीतो विराजते(५४)।

अष्टादशशतकमारभ्य नवीनैव नव्यन्यायशैली समुदि-
ाय । तस्यामुपनिबद्धानां प्रकीर्णग्रंथानां क्रोडपत्राणीत्याख्यया प्र-
सिद्धिरुपलभ्यते।तानि प्राधान्येन जगदीशमथुरानाथगदाधरादीनां
चारविरोधमधिकृत्य प्रवृत्तानां विद्वद्विवादानां कोटिक्रमान् क्रो-
कुर्वन्ति ॥ तत्त्वचिंतामण्युपरि लिखितानांचतुर्दशटीक नामु-
ेखः सतीशचन्द्रविद्याभूषणमहोदयेनैवं विहितः(५५)-

मणिव्याख्या-कणादतर्कवागीशभट्टाचार्यः, दीधितिः-रघुनाथ-
र्किकशिरोमणिः, प्रकाशः-हरिदास न्यायालंकारभट्टाचार्यः,
नुमानखण्डः-वाचस्पतिमिश्रः(द्वितीयः), मयूखः शंकरमिश्रः
त्वचिंतामणिप्रकाशः-वर्धमानोपाध्यायः, आलोक -पक्षधरमिश्रः,
काशः-रुचिदत्तमिश्रः,मयूखः-जगदीशतर्कालंकारः,आलोकविवेक-
धरामन्यायालंकारः,मणिटीका-भवानन्दसिद्धान्तवागीशः,गूढार्थ-
ीपिका-रघुदेवविद्यालंकारः, मणिव्याख्या-गदाधरभट्टाचार्यः।

एतेषु टीकाग्रंथेषु दीधितिरालोकश्चेति द्वयमेव परां प्रसिद्धि-
ाप । अत एव तयोरुपरि नवाधिकटीकाग्रंथाः समुपलभ्यन्ते।

अत्रायं विशेषोऽनुसंधेयः। निर्देशानुपलंभात् वर्धमानरचितो
णिप्रकाशो नास्त्येवेति दिनेशचन्द्रभट्टाचार्यः(५६)। वासुदेवसार्व-
ौमविरचितापि मणिग्रन्थटीका समुपलभ्यते।परं सा न समग्रा।
नुमानखण्डमात्रस्य परीक्षाया उपलभ्यमानत्वात् (५७)।

54)Navyanyaya Chapter I PP. I.II. 55)H.I.L. at the end, table No. I
') ,, section I P. 4. 56) History of Navyanyaya in Mithila P.III

ज्ञानम्

ज्ञानस्य महत्त्वम्

१) मानवप्रवृत्तिमूलकत्वम्

आत्मधर्मविशेषतया परिगणितस्य ज्ञानस्य महिमा खलु निर्वि वादमभ्युपगंतव्यः। श्रुतिस्मृतीतिहासपुराणेषु मोक्षाख्यपरमपुरुषा र्थप्राप्त्युपायमावेदयत्सु पुनः परमावश्यकतया प्रतिपाद्यते ज्ञान प्राप्तिः। 'सत्यं ज्ञानमनंतं ब्रह्म' (१) इति ब्रह्मस्वरूपघटकतया ज्ञान स्वीकरोति श्रुतिः। विविधवेदांतसंप्रदायाश्च विषयांतरेषु विप्रति पद्यमाना अपि ज्ञानस्य साक्षाद्वा परंपरया वा मोक्षसाधनत्वे न का मपि विमतिमुपस्थापयंति। किंच भगवद्गीतायां (२) वारंवारमुप वर्ण्यमानं ज्ञानमाहात्म्यं सूचयत्यनितरसाधारणं स्थानं ज्ञानस्य।

मानवीया प्रवृत्तिः – किंच विविधानां मानवप्रयत्नान मूलमपि ज्ञानमेव। तथाहि– द्विविधा खलु प्राणिमात्रस्य प्रवृत्तिरु च्यते शास्त्रकारैः। हानरूपा उपादानरूपा चेति। तत्र प्रवृत्तिपदार्थ स्त्रेधा विव्रीयते–

१) ईप्साप्रयुक्तस्य पुरुषस्य प्रयत्नः प्रवृत्तिरिति (३)।

२) ईप्साजिहासाप्रयुक्तस्य पुरुषस्य समीहा प्रवृत्तिरिति (४)।

३) कायिको, वाचिको, मानसश्च व्यापारः प्रवृत्तिरिति (५)।

प्रथमपक्षे केवलमुपादानरूपः प्रयत्न एव प्रवृत्तिपदार्थः। हान रूपप्रयत्नश्च निवृत्तिपदप्रतिपद्यो भवति। द्वितीयपक्षे प्रवृत्तिनि वृत्तिसाधारणःप्रयत्नःप्रवृत्तिपदार्थः। तृतीयपक्षे च कायसमवेता कंठताल्वाद्यभिघातजन्या शब्दरूपा, आत्मनिष्ठत्वान्मानसी चेति त्रिविधा क्रिया प्रवृत्तिपदव्यपदेश्या भवति।

---

१) तैत्तिरीयोपनिषत् २) न हि ज्ञानेन सदृशं पवित्रमिह विद्यते। भ.गी.४ ज्ञानयज्ञेन तेनाहमिष्टःस्यामिति मे मतिः।, सर्वं ज्ञानप्लवेनैव वृजिनं संतरि ष्यति।, ज्ञानी प्रियतमोऽतो मे। इ. ३) 'ईप्साप्रयुक्तस्य प्रयत्नः प्रवृत्ति जिहासाप्रयुक्तस्य प्रयत्नो निवृत्तिः' भाष्यटीका खद्योत पृ.५. ४) वात्स्य यनभाष्य १-१-१ पृ.५. ५) प्रवृत्तिर्वाग्बुद्धिशरीरारंभ इति न्यायसू १-१-१७ पृ.१०४

तृतीयपक्षे स्वीकृत: त्रिविधक्रियारूप: प्रयत्न: प्रकारान्तरेण पुनर्द्वेधा विभज्यते- बाह्य आभ्यंतरश्चेति। तत्र करचरणादिशरीरावयवजन्या आकुंचनप्रसारणादिरूपा '६' क्रिया कंठताल्वाद्यभिघातजन्या (भेरीदंडसंयोगजन्या) शब्दरूपा क्रिया बाह्यप्रयत्न इत्युच्यते। आत्मगुणरूपो मानसप्रयत्नश्चाभ्यतर इति '७'। तदेवं प्रवृत्तिपदस्याभिधानशक्तिर्मानसप्रयत्न एव, कायिकादौ तु लक्षणा '८'।

तथाहि विषयममुं वैशद्यार्थं किंचिदिव विविच्य विचारयाम:। पथि निपतितं कमपि कांचनशकलमवलोक्यैव तदुपादातुं दूरतोपि धावति पुरुष:। स एव पुन: सफूत्कारमुद्वर्तितफणामंडलं कुंडलिनं मध्ये पथि समवलोक्य ससाध्वसं परिहरति। अकिंचित्करं तृणजालं पुनरुपेक्षमाणो न जिहासति न वा उपदित्सति। तदेवं त्रिविधा खलु बुद्धिरुत्पद्यते मानवानां— उपादानबद्धिर्हानिबुद्धिरुपेक्षाबुद्धिश्चेति। तत्र हानोपादानावेव प्रवृत्तिं जनयतो न पुनरुपेक्षा, तस्या व्यापारनिरपेक्षत्वात्।

जानाति इच्छति यतते इति हि सर्वशास्त्रसंमत: प्रवृत्तिक्रम:। औत्सर्गिकी खलु प्राणभृतां प्रवृत्तिर्निवृत्तिस्त्वपवादादितनियमानुसारं ज्ञाते पदार्थे, जाते चेष्टसाधनत्वप्रकारके ज्ञाने पुरुष: प्रवृत्तो भवति। अत एव पदार्थविशेषविषयीकरणात् ज्ञानेच्छाकृतीनां सविषयत्वमुद्घोष्यते समयकारै:।

इदं पुनरत्रावधेयम्। ज्ञानं, इच्छा, मानसव्यापाररूप: प्रयत्नश्चेति त्रितयमात्मनिष्ठम्। शरीरव्यापाररूपो बाह्प्रयत्नस्तु मनसव्यापारजन्यत्वाद्गौण:, अत एव प्रवृत्तिपदस्य तत्र लक्षणेति प्रागवोचाम। तदेवं मानसप्रयत्न एव प्रवृत्तिपदवाच्य इति फलितं भवति। 'प्रयोजनमनुद्दिश्य न मंदोपि प्रवर्तते' इतिन्यायेनानुभवबलेन च निर्णीयते यत्प्रवृत्ति: प्रयोजनं, तत्साधनं चेति विषयद्वयमवलंबते। तत्र ज्ञानेच्छाकृतिषु केषां प्रवृत्तिपदार्थत्वमिति विचारणीयम्। फलगोचरस्य साधनगोचरस्य वा ज्ञानस्य, फलगोचरेच्छायाश्च न प्रवृ-

---

६) उत्क्षेपणावक्षेपणाकुंचनप्रसारणगमनानि पंच कर्माणि। तर्कसंग्रहे
७) खद्योतभाष्यटीकायां पृ. ३. ८) न्यायसुधायां पृ. ९

त्तिघटकत्वमपि तु साधनगोचरेच्छाप्रयत्नयोरेव प्रवृत्तिपदवाच्यत्वं (९)। तथाहि जलपानप्रवृत्तौ पिपासानिवृत्तिः प्रयोजनं, जलं च तत्साधनं। चक्षुःसंनिकर्षानंतरं जलज्ञाने जातेपि कथंचिज्जलेच्छाया अभावे प्रवृत्त्यनुपलंभात् साधनीभूतजलविषयकेच्छाप्रयत्नयोरेव प्रवृत्तिपदार्थत्वं कल्प्यं। जलविषयकःप्रयत्नश्च जलोपादानरूपः। साधनविषयकेच्छासंवलितश्च स प्रवृत्तिरित्युच्यत इति सारः।

प्रवृत्तिकारणानि कानीति विचारयंतःकेचित् अर्थनिश्चयं विनेच्छाप्रयत्नौ नोपजायेते इत्यर्थनिश्चयात्मकज्ञानस्यैव प्रवर्तकत्वमित्याहुः।अर्थनिश्चयद्वारापुनःप्रामाण्यनिश्चयस्यापि प्रवर्तकत्वमिति नैयायिकाःकथयंति'१०'।सत्यप्यर्थनिश्चये बहुवित्तव्ययायाससाध्ये यागादौ निःशंकप्रवृत्त्यदर्शनात्, सति प्रामाण्यनिश्चये तद्दर्शनात् प्रामाण्यनिश्चयस्यापि प्रवर्तकत्वमिति केचित्'११'। विषय एष प्रामाण्यविचारे पुनरुपादीयेतेति नात्र प्रतन्यते।

उभयथापि अर्थनिश्चयात्मकज्ञानस्य प्रवृत्तावावश्यकत्वमभ्युपगतं भवति। तदेवं ज्ञानस्य सकललौकिकालौकिकव्यवहारकारणत्वं न कथमपि विवादपदवीमधिरोहति।

२) शास्त्रविचारप्रवर्तकत्वम्–

किंच ज्ञानस्यास्तित्वमभ्युपेत्यैव विविधशास्त्राणां विद्यास्थानानां च प्रवृत्तिःसंघटते। ज्ञानमेवानभ्युपगच्छतो वादिनो वादप्रवृत्तिरेव नोपपद्यते। अत एव लौकिकेष्वलौकिकेषु च भारतीयविद्यासंप्रदायेषु प्रमाणशास्त्रविचारः प्राथम्येन विधीयते।

३) शाब्दव्यवहारसाधकत्वम् –

अथ च शाब्दज्योतिषा रहितं भुवनत्रयमंधंतम एव जायेतेत्याह शब्दविद्याविदाचार्यो दंडी'१२'। परं शाब्दव्यवहारप्रवर्तकं,किमधिकं सकलं मानवजीवनमेवाभिव्याप्य वर्तमानं ज्ञानमेव यदि नाभविष्यत्तदा का दशा भुवनत्रयस्याभविष्यदिति न कोपि वक्तुं पार्येत। तस्मात् सिद्धं सर्वातिशायि महत्त्वं ज्ञानस्य इति।

---

९) न्यायसुधा पृ.११ त्रिविधा हि पुंसां चित्तवृत्तिः अनुभव इच्छा प्रयत्नश्चेति।तत्र साधनगोचराविच्छाप्रयत्नौ प्रवृत्तिरित्युच्येते न त्वनुभवो नापि फलगोचरेच्छा।
१०) तत्त्वचिंतामणिः। ११) तर्कतांडवे। १२) इदमंधंतमः कृत्स्नं जायेत भुवनत्रयं। यदि शब्दाह्वयं ज्योतिरासंसारं न दीप्यते। काव्यादर्शः प्र.प.१

ज्ञानस्वरूपम्

विषयोपक्षेप:–

तदिदं ज्ञानमीदृगिति निर्दिश्य कथयितुं न प्रभवाम:। यथा खलु चक्षुष्मांल्लोक: कोयमालोक इति न कदाचिदपि संदेग्धि,तथैव व्यवहारे प्रवृत्त: पुरुष: सार्वजनीनानुभवसिद्धं ज्ञान कीदृगिति न संशते। अथापि विषय एष विचारणीयो यत् किमिद ज्ञानं नाम? कथमुत्पद्यते? कथं चानुभूयते? इति ।

तत्र विषयावभासकस्य ज्ञानस्य बाह्यांतरभेदेन द्वैविध्यं सर्वसंमतम् । इंद्रियादिबाह्यसाधनापेक्षस्य ज्ञानस्य बाह्यत्वम्, अन्त:करणमनोजन्यस्य पुनरान्तरत्वमिति विवेक: ।

आत्मना मनसा इंद्रियेणार्थेन च संबद्धं हि ज्ञानमुत्पद्यते'१'।एतेषु प्रथममात्मना सह ज्ञानस्य क:संबंध इतिविचार्यते,तदनंतरंचेंद्रियादीनां विचार:प्रस्तूयते। यतो हि विविधशास्त्रकाराणां ज्ञानात्मनो: संबंधस्य परिकल्पनामाधारतयोपकल्प्य ज्ञानस्वरूपं सूपपादम् ।

तत्र जीवजडात्मके प्रपंचे जीव एव हि चेतन इत्युच्यते । तस्य च चैतन्यं किंरूपमित्यत्र वर्तते विदुषां विमति: ।

प्रकृत्यात्मकत्ववाद: –

तथाहि सांख्यमते प्रकृतिविकृतिभिन्न:पुरुषो'२'निर्गुणो विवेकी अविषय: असाधारण: चेतन: अप्रसवधर्मी(३)च ।

वस्तुत:सांख्यनये परिणामिपदार्थेष्वेव धर्मधर्मिभावो घटते, इति चैतन्यस्य पुरुषधर्मत्वेन परिगणनमसंगतम्'४'।एकधर्मनिवृत्तौ धर्मांतरोत्पत्तिर्हि परिणाम:,स च गुणेष्वेव नतु पुरुषेषु,तेषां निर्गुणत्वात् । असति च परिणामे धर्मधर्मिभावो न संघटत इति चैतन्यादिकं पुरुषस्वरूपमेव ।

---

१)वात्स्यायनभाष्यम् ३-२-१८ पृ.५६८. २)न प्रकृतिर्न विकृति: पुरुष: -सांख्यकारिका ३. ३)तस्माच्च विपर्यासात्सिद्धं साक्षित्वमस्य पुरुषस्य । कैवल्यं माध्यस्थ्यं द्रष्टृत्वमकर्तृभावश्च ।। सांख्यकारिका श्लो.१९ तस्मात्त्रिगुणादेर्यो विपर्यास:स पुरुषस्य त्रिगुणत्वं,विवेकित्वं,अविषयित्वं ,असाधारणत्वं,चेतनत्वं,अप्रसवधर्मित्वं च । इति सांख्यतत्त्वकौमुदी ।
४)निर्गुणत्वान्न चिद्धर्मा।सां.प्र.सू.१/१४६।। चितिशक्तिरपरिणामिनी,अप्रतिसंक्रमा,दर्शितविषया,शुद्धा चानन्ता चेति (व्यासभा.१/२,सांप्रसू १-१६०

तत्र चैतन्यं नाम द्रष्टृत्वं, विज्ञातृत्वं वा। पुरुषाकारायां हि बुद्धौ सर्वे विषया दृश्यत्वेनोपस्थिता भवंति। बुद्धिप्रतिसंवेदी च पुरुषो दर्शितविषयो भवति'५'। न ह्यचेतनो विषयो विषयदर्शनाय प्रभवति। अत एव पुरुषःसाक्षीत्युच्यते'६'। उक्तं च वाचस्पतिमिश्रैः 'चेतनो हि द्रष्टा भवति, नाचेतनः'। साक्षी च दर्शितविषयो भवति। यस्मै प्रदर्श्यते विषयः स साक्षी। यथा हि लोकेऽर्थिप्रत्यर्थिनौ विवादविषयं साक्षिणे दर्शयतः। एवं प्रकृतिरपि स्वरचितं विषयं पुरुषाय दर्शयतीति पुरुषःसाक्षी। न ह्यचेतनो विषयो वा शक्तो विषयं दर्शयितुमिति चैतन्यादविषयत्वाच्च भवति साक्षी। अत एव द्रष्टापि भवति(७)।

अनादिसिद्धात्पुरुषप्रकृतिसंबंधादादौ बुद्धिर्जायते, ततश्चाहंकारादिः। महान्, अहंकारः, मनश्चेत्यंतःकरणत्रयं'८' पंचज्ञानेंद्रियपंचकर्मेंद्रियपंचप्राणरूपपंचदशबाह्यकरणैःसह लिंगमित्युच्यते। पंचतन्मात्रारूपबाह्यविषयसंबंधमधिगम्य बहुरूपयुक्तं लिंगं संसरणसमर्थं भवति। लिंगे च बुद्धिरेव प्रधाना। प्रतिबिंबितपुरुषाकारा च सैव चेतनवदवस्थिता जीवपदव्यवहारयोग्या भवति। सति चैवं चित्सन्निधानवशाद्बुद्धौ चैतन्यभ्रमः, चेतने च बुद्धिगतगुणत्रयप्रयुक्तकर्तृत्वभ्रमो जायते। तस्माद्विकारात्मकं ज्ञानभोगादिकं वस्तुतो बुद्धावेव न तु कूटस्थनित्ये पुरुषे(९)।

चैतन्यं हि विज्ञातृत्वम्। तदनुसारं ज्ञातृत्वं, भोक्तृत्वं, अधिष्ठातृत्वं चेति त्रितयमपि निर्विकारस्वरूपं विज्ञातृत्वविशेष एव। तथा हि बुद्धौ प्रख्या(ज्ञानं), प्रवृत्तिः, संस्कारः(धृतिः) च जायते। तत्र पुरुषः प्रख्यां पश्यन् ज्ञाता, प्रवृत्तिं पश्यन् भोक्ता, संस्कारं पश्यन्नधिष्ठाता इति च व्यवहियते।

---

५) यथा ईश्वरस्तथायमपि बुद्धेःप्रतिसंवेदी पुरुषः। व्यासभाष्यं १-२९

६) साक्षी चेता केवलो निर्गुणश्च। भगवद्गीता

७) सांख्यकारिका १९। सांख्यतत्त्वकौमुदी पृ.९०

८) तस्मात्तत्संयोगादचेतनं चेतनावदिव लिंगम्।
गुणकर्तृत्वे च तथा कर्तेव भवत्युदासीनः॥ सांख्यकारिका २०

बुद्धिपुरुषयो संबंधः पुनरेवमुपपाद्यते । यथा प्रकृतिपुरुषयोर्देशकालातीतत्व त्तयोःसंविधानरूप संयोगो न घटभूतलादीनामिव देशकालाभ्यां परिच्छेत्तुं शक्यः । अहंपदवेद्यो लिंगशरीरावच्छिन्नो जीवो हि दृश्यत्वद्रष्टृत्वविशिष्टः चेतनाचेतनयोर्मिश्रीभाव इति ज्ञायते। अचेतनानां चित्तेंद्रियाणां परिणामरूपं यत्किमपि ज्ञानमुत्पद्यते। तत्प्रतिसंवेद्यं भवतीति बुद्धेःकेनापि प्रतिसंवेत्रा सह संयोगः सिध्यति । स च संयोग एकप्रत्ययगतःसन्निकर्ष एव (१०)।

एतेनेदमुदितं भवति । ज्ञानं नाम नात्मधर्मः। चित्तेंद्रियाणां परिणामरूपं तज्जडप्रकृतिरेव । प्रतिसंवेत्तृतया बुध्या संबद्ध पुरुषः ज्ञानद्रष्टृतया ज्ञाता इत्युच्यते । एवंच अहं जानामीत्यादिरूपःपौरुषेयबोधो महता सह स्वभेदमध्यवस्यतो,महति सन्निधानवशात् प्रतिबिंबितस्यपुरुषस्याभिमानिक एव इति ।

तदेवं ज्ञानं नाम त्रिगुणात्मकं प्रकृतिपरिणामभूतं द्रव्यमिति सांख्यमतमवतिष्ठते ।

इदमत्रावधेयम् । द्विविधो हि बोधःसांख्यनये प्रसिद्धः अपौरुषेयबोधः, पौरुषेयबोधश्चेति। तत्र बुद्धिर्नाम जडप्रकृतेःपरिणामविशेषः।सा च इंद्रियार्थसन्निकर्षाद्यनंतरं तमःप्रभावमभिभूय सत्त्वस्वभावा तत्तद्विषयाकारेण परिणता भवति। इयमेव स्थितिःसत्त्वसमुद्रेकरूपा अध्यवसाय इति,चित्तवृत्तिरिति,ज्ञानमिति चाख्यायते '११'। अननुभूयमानत्वात्तु गौणप्रमा,अपौरुषेयबोध इत्यपि। परं निरतिशयसान्निध्यवशाद्बुद्धौ प्रतिबिंबितःपुरुषस्तत्तद्विषयाकारेण परिणतया बुद्धया स्वाभेदमध्यवस्यन्नविवेकवशात्स्वस्मिन्निव वर्तमानं विषयमवधार्य ज्ञानवानहमिति मन्यते । सोयं पौरुषेयबोध इति व्यवह्रियते ।

वस्तुतस्तु जडप्रकृतेःपरिणाम इति बुद्धिर्न ज्ञात्री भवितुमर्हति,नापि चेतनःपुरुषो ज्ञानवांस्तस्य परिणामाभावात्। प्रकृतिपुरु-

१०]द्रष्टा दृशिमात्रःशुद्धोपि प्रत्ययानुपश्यः। योगसूत्र२-२०. ११)उपात्तविषयाणामिंद्रियाणां वृत्तौ सत्यां बुद्धेस्तमोभिभवे सति यः सत्त्वसमुद्रेकः सोऽध्यवसाय इति,वृत्तिरिति,ज्ञानमिति चाख्यायते। सांतको.,सांका.पृ५,५३

षयोरनादिसंबंधमाधारीकृत्य प्रवर्तमानोयं ज्ञातृत्वादिव्यवहारो विवेकज्ञानानंतरमुपजायते,कैवल्ये निवृत्तो भवतीति सांख्यमतसार:।

चैतन्यवाद:(आत्मरूपत्ववाद:) –

ज्ञानसामान्यद्वैविध्यम्– औपनिषदास्तु चित्तेंद्रियादिजन्यं वृत्यात्मकं ज्ञानमभ्युपगच्छंतोपि चेतनस्वरूपभूतं साक्षिज्ञानमपि स्वीकुर्वंति। तथाहि सुषुप्तिकाले सर्वेंद्रियोपरमात् तदुत्तरकालजन्या 'एतावंतं कालं सुखमहमस्वाप्समि'त्याद्याकारिका'१२' पूर्वानुभूतसुखविषयिका स्मृति:साक्षिज्ञानानभ्युपगमे नोपपद्यते। तदानीमिंद्रियार्थसन्निकर्षजन्यज्ञानाभावान्मानसव्यारस्याप्यननुभवाज्जीवस्वरूभूतेनेंद्रियविशेषेण सुखानुभवो जायत इति स्वीकरणीयम्। एवमेव अतींद्रियाणां कालादीनां ज्ञानमपि साक्षिणैव जायत इति तन्मतम्॥ तदनुसारं ज्ञानसामान्यमेव द्विविधं भवति स्वरूपं मनोवृत्तिरूपं चेति। तत्र स्वरूभूतेन चेतनेंद्रियेण साक्षिणा जायमानंज्ञानं स्वरूपमित्युच्यते,तस्य जीवस्वरूपत्वात्। इदं च अनादिनित्यत्वादुत्पत्तिविनाशरहितम्।अनाद्यविद्यावृतत्वाच्च तदीयो विषयविषयिभाव:प्रतिबध्यते'१३'। अर्थविषयीकरणं च स्वरुपज्ञानस्य व्यक्तिरुच्यते। सा च अविद्यानिवृत्तावेव जायते। इयं चाविद्या नाभावरूपा अपितु भावरूपाज्ञानमेव। ग्राह्यविषयै: सुखादिभि:सह साक्षिरूपेन्द्रियस्य सम्बन्धस्तु स्वरूपमेव(१४)।

विज्ञानं ब्रह्म,सत्यंज्ञानमनंतं ब्रह्मेत्याद्युपनिषद्वचनानुसारं च ज्ञानं नाम ब्रह्मस्वरूपमेवेति स्फुटमवभासते'१५'।तदेवं स्वरूपज्ञानं न कथमपि इंद्रियादिसाधनांतरमपेक्षत इति कथितं भवति। इंद्रियजन्यं च ज्ञानं मनोवृत्तिरूपमुच्यते। मनो हि पंचज्ञानेंद्रियाणामधि-

१२)सुप्तौ भक्ति विना सुखाद्यभिव्यक्तिदर्शनात्।इतितत्त्वप्रकाशिकायांच प्रमाणपद्धति: वि.१०५. १३)ज्ञानस्य स्वरूपत्वेनानादित्वेप्यविद्यया विषयविषयीभाव: प्रतिबध्यते।इतिप्रमाणपद्धति: वि.१०५. १४)संबंधश्चक्षुरादौ संयोगादि:।साक्षिणि तु स्वरूपमेवेत्यवधेयम्। प्रमाणपद्धति: वि.१२७. १५) यत्तु ब्रह्मणो विज्ञानं तत्सवितृप्रकाशवदग्न्युष्णत्ववच्च ब्रह्मस्वरूपाव्यतिरिक्तं स्वरूपमेव तत्। शां.भा. तै.उ. २-१

ज्ञातृभूतं ग्राह्यविषयाकारेण परिणतं सद्विषयानात्मानं ग्राहयति। इदं च ग्रहण मनोव्यापाररूपमिति मनोवृत्तित्वेन व्यपदिश्यते। मनःपरिणामरूपमिदं वृत्त्यात्मकं ज्ञानं मनःस्वामिनो जीवस्येत्युच्यते इति।

वेदान्तसम्प्रदायेषु विद्यमाना विप्रतिपत्तयः

विषयेस्मिन् विविधवेदांतसंप्रदायेषु विद्यमानाःसूक्ष्मप्रभेदास्तु तत्तद्ग्रंथपर्यालोचनयैवावसेया इत्यप्रस्तुतत्वान्नेह विस्तरेण विचार्यन्ते। परं विषयप्रवेशदृशा संक्षेपेण विविधसंप्रदायगतसिद्धांतपर्यवेक्षणं आवश्यकमिति कृत्वा वेदांतसंप्रदायेषु ज्ञानविषये विद्यमानाः विप्रतिपत्तयो दिङ्मात्रं प्रदर्श्यंते यथा–

गौडपादमतम्– गौडपादकारिकायां माध्यमिकयोगाचारयोर्मतं किंचिदिवानुसरन्गौडपादाचार्यः,'ब्रह्मातिरिक्तस्य सर्वस्यापि प्रपंचस्य मिथ्यात्वाद्विभिन्नविषयाणां तद्विषयकज्ञानानां चासत्त्वमेव, अविद्यावशात् अन्यथाभासमानं ब्रह्म तत्त्वज्ञानानंतरं नित्यशुद्धबुद्धमुक्तस्वभावमवतिष्ठते।'इति कथयन् जाग्रदवस्थायामनुभूयमानं विषयजातं स्वप्नवन्मिथ्या भ्रमात्मकं च। विषया अनुभवान्न भिद्यंते। सर्वोप्यनुभवो मिथ्या चेति'१६'स्वीकरोति। एतेन स्वाप्नपदार्थानुभववत् जाग्रदवस्थायां विधीयमानोऽनुभवोपि मिथ्येति प्रतिपादितं भवति।

शाङ्करमतम्– गौडपादस्य मतं परिष्कृत्य पुरस्कुर्वंतःशंकराचार्याः प्रपंचस्य व्यावहारिकीं सत्तां,तुरीयब्रह्मणश्च पारमार्थिकी सत्तां क्रमेण मायया तत्त्वज्ञानेन च योजयंतः कामप्यस्मादृशीं सार्वजनीनानुभवस्य व्यवस्थां परिकल्पयंति। तन्मते माया नाम भावरूपमनिर्वचनीयं किमपि तत्त्वं।तदपि परमार्थतो नास्त्येवेति तज्जन्यप्रपंचघटको तत्तत्पदार्थानुभवोपि परमार्थतो नास्ति। अत एव शांकरभाष्ये सत्तैवबोधः,बोधएव सत्ता,नानयोःपरस्परव्यावृत्ति'१७'-

---

१६)Indian Ephistomology by Jwalaprasad P.307 'असज्जागरिते दृष्ट्वा स्वप्ने पश्यति तन्मयः। असत्स्वप्नेपि दृष्ट्वा च प्रतिबुद्धो न पश्यति।। नास्त्यसद्धेतुकंसत् सदसद्धेतुकं तथा। सच्च सद्धेतुकं नास्ति सद्धेतुकमसत्कुतः।।' ४०,४१ गौडपादकारिका। १७)शां.भा. ब्र.सू. ३-२-२१

रस्तीति ब्रह्मणः स्वरूपमेव सत्तारूपो बोध इति प्रतिपादितम्।

किंच व्यावहारिकसत्त्वं विशिष्टे प्रपंचे अनुभूयमानः ज्ञातृज्ञेयादिव्यवहारः शांकरमतेपि प्रधानतःसांख्यसिद्धांतमनुसरति '१८'। इयान्पुनर्भेदः यदसौ आत्मानात्मनोरविद्याकल्पिताध्यासवशात् प्रवर्तते '१९' न त्वनादिसिद्धप्रकृतिपुरुषसंबंधवशादिति

रामानुजमतम् – रामानुजास्तु ब्रह्मणः सविशेषत्वमंगीकृत्य चिदचिद्वस्तुविशिष्टस्य तस्य कार्यत्वं कारणत्वं चाभ्युपगच्छंति '२०'।तथाहि जीवजडात्मकःप्रपंच स्थूलसूक्ष्मभेदेन द्वेधा विभज्यते। चिदचिद्वस्तुरूपःप्रपंचो हि परमात्मनःशरीरम् । तत्र सूक्ष्मप्रपंचशरीरः परमात्मा जगत्कारणं भवति, स्थूलप्रपंचशरीरश्च कार्यरूपः जीवजडात्मकप्रपंचरूपेणावतिष्ठते ।। यदेवं ब्रह्मस्वरूपोयं प्रपंचो न कथमपि मिथ्याभवितुमर्हति।अतो ज्ञानानि तद्विषयाश्च संत एव, प्रागुपदर्शितदिशा वृत्त्यात्मकं, साक्षिसिद्धं चेति ज्ञानस्य द्वैविध्यं स्वीकुर्वंतो रामानुजीयाः सर्वस्यापि ज्ञानस्य विशेषविशिष्टविषयग्राहकत्वमेव उपवर्णयंति'२१'।साक्षिज्ञानस्य स्वप्रकाशत्वात् स्वमिव स्वविषयवस्तुजातमपि तत्प्रकाशयति(२२)।

किंच निर्विकल्पकज्ञानमपि यत्किंचिद्विशेषरहितस्य वस्तुनः ग्रहणं न तु सकलविशेषविधुरस्य'२३'।निर्विशेषस्य वस्तुनो ग्रहणासंभवात्,तथाविधानुभवाभावाच्च।। विशेषणविशेष्ययोश्च परस्परमत्यंतं भेदस्तद्विषयकानुभवादेव सिध्यति(२४) ।

ज्ञानविषयाणां शंकराचार्योक्तं अध्यासकल्पितत्त्वं न कथ-

१८]आत्मबोधः २५,२७,२८,३३तथा३४श्लोकाः। १९]सर्वे प्रमाणप्रमेयव्यवहारा लौकिकाः प्रवृत्ताः। ब्र.सू. शां.भा. भूमिकायाम् । २०]सूक्ष्मचिदचिद्वस्तुशारीरःपरमात्मा कारणं, स एव परमात्मा स्थूलचिदचिद्वस्तुशारीरः कार्यमिति श्रीभाष्यटीका वेदांतदीपः पृ.४,५. २१]सविशेषवस्तुविषयत्वात्सर्वप्रमाणामिति श्रीभाष्ये पृ.२८. २२]तत्रैव- धियो हि धीत्वे स्वयंप्रकाशता च। ज्ञातुर्विषयप्रकाशनस्वभावतयोपलब्धेः। २३]निर्विकल्पकं नाम केनचिद्विशेषेण वियुक्तस्य ग्रहणं, न सर्वविशेषरहितस्य, तथाविधस्य कदाचिदपि ग्रहणादर्शनात्, अनुपपत्तेश्चेति तत्रैव पृ.२९. २४]तत्रैवपृ.३० सर्वत्र विशेषणविशेष्यप्रतिपत्तौ तयोरत्यंतभेदः प्रतीत्यैव सुव्यक्तः ।

मपि संभवति,तेषां बाध्यत्वाभावात्‘२५’। बाध्यबाधकभावो हि यत्रैवोपपद्यते, यत्र तत्तद्देशकालसंबद्धत्वेन परस्परंविरुद्धयो:पदार्थयो:सत्ता ज्ञानेन विषयीक्रियते। अथवा भिन्नयोरेकरूपेणावस्थानमसंभाव्यं सत् प्रतीतिविरोधं कल्पयति ।घटादिविषयकज्ञाने च न तथा किमप्यस्ति । अतो घटादिवस्तु प्रतीतिसदेव । इति ।

माध्वमतम् – द्वैतिनस्तु नैयायिकमते योयमनुव्यवसाय इति मानसो व्यापार: समुपवर्ण्यते तदेवास्मन्मते साक्षिज्ञानमिति कथयंत:‘२६’, आत्मन: स्वरूपभूतेंद्रियविशेष: साक्षीत्युपवर्णयन्ति । साक्षी च घ्राणादिभेदेन षड्विध:सूक्ष्मस्थूलतयोभयविधैस्तत्तद्बाह्येंद्रियै:सह नीरक्षीरवत्संमिश्र एवावतिष्ठते‘२७’। मुक्तात्मनस्तु केवलं स्वरूपभूतं साक्षींद्रियमेव भवतीति तेषामाशय: । वृत्तिज्ञानविषये प्राय: सांख्यप्रक्रियैव समाद्रियते ।

क्रियारूपत्ववाद: –

भाट्टमतम्– मीमांसकमते ज्ञानं क्रियाविशेष एव।मीमांसकाश्च प्रभाकरानुयायिन:,कुमारिलभट्टानुयायिनश्चेति द्वेधा प्रसिद्धा:।तेषु भाट्टा एव सिद्धांतित्वेन तत्र तत्र मानमेयोदयादिग्रंथेषु निर्दिष्टा: समुपलभ्यंते। प्राभाकरादयस्तु मीमांसकैकदेशित्वेनोल्लिख्यमाना: गौणत्वमेव वहन्तीति सुविलोकम् ।

तत्र भाट्टानां मते ज्ञानं आत्मनिष्ठ:क्रियाविशेष:।स च फलहेतुकोऽनुमानैकगम्य:‘२८’। घटमहं जानामीत्यादौ घटादीनां कर्मतया,अहंपदवाच्यस्यात्मनश्च कर्तृतया धात्वर्थान्वयित्वात्(२९) ज्ञानस्य क्रियारूपत्वमुपपद्यते । न च क्रिया नाम शारीरो व्यापार इति वाच्यम्। धात्वर्थस्यैव क्रियात्वात्।तथा चोक्तं काशिकायां– अस्ति कश्चिदात्मसमवायी ज्ञानसंवेदनादिपदपर्यायवाच्यो जाना-

---

२५]तत्रैव- तदनालोचितबाध्यबाधकभावव्यावृत्त्यनुवृत्तिविशेषस्य भ्रांतिकल्पितम्। २६]तर्कतांडवे प्र.प. प्रामाण्यवाद: । २७ प्रमाणपद्धति: श्रीनिवासतीर्थी पृ.१२७ स्वरूपेंद्रियमपि घ्राणादिभेदेन षड्विधम्। २८]न ह्यज्ञातेर्थे कश्चिद्बुद्धिमुपलभते,ज्ञातेत्वनुमानादवगच्छति। शा.भा.१-१-११ श्लोकवार्तिकेप्येवमेव १७८ नान्यथोह्यर्थसद्भावो दृष्ट:सन्नुपपद्यते। ज्ञानं चेन्नेत्यत:पश्चात्प्रमाणमुपकल्प्यते। २९]श्लोकवार्तिके आत्मप्रकरणे७४,७५

विधानुपादान: क्रियाभेदो यस्मिन्नर्थानां प्राप्तिकर्मता इति (३०)। 'बुध्याने' इत्यादिशब्देभ्यश्च क्रियाप्रत्यय एवोपजायमानो दृश्यते। तस्मात्सिद्धं ज्ञानस्यात्मकर्तृकक्रियारूपत्वम् ।

भाट्टमतानुयायिमतम्- भाट्टमतानुयायिषु केचन चिदानंदनारायणप्रभृतयो ज्ञानस्यात्मगुणत्वमेवाभिप्रयन्तो बुद्धिं गुणेष्वन्यतमां परिकल्पयन्ति (३१)।। स्वयं कुमारिलभट्टोपि ज्ञानस्यात्मधर्मत्वं अस्पष्टमूरीचकारेत्यस्ति प्रवाद: (३२)।। पार्थसारथिमिश्रास्तु शास्त्रदीपिकायां '३३' 'ज्ञानक्रिया हि सकर्मिके' त्यादिग्रंथेन ज्ञानस्य क्रियारूपतां साग्रहं प्रतिपाद्य उत्तरत्रात्मनो नव विशेषधर्मान्निरूपयन्तो ज्ञानमपि तदन्यतमत्वेन परिगणयन्ति ।

प्राभाकरमतम् – प्राभाकरास्तु सर्वासां क्रियाणामतींद्रियत्वेनानुमानगम्यत्वाज्ज्ञानमप्यनुमानगम्यमेवेति कथयंति। परं ज्ञानपदेन ते आत्मन:संयोगमभिप्रयंति। वस्तुतत्त्वाविष्कारकं सर्वसंमतं ज्ञानस्वरूपं तु संविदित्युच्यते तै:। सा त्वात्मनो गुण एव। न्यायवैशेषिकै: प्राभाकरा: केवलं संविदोपि मानसप्रत्यक्षविषयत्व एव विप्रतिपद्यन्ते। प्राभाकरमते संवित् स्वप्रकाशा (३४)।

निष्कर्ष:– इदमत्रावधेयम्। भाट्टेषु प्रागुपदर्शितदिशा केचन ज्ञानमात्मगुणत्वेन, अपरे पुनरात्मकर्तृकक्रियात्वेन परिगणयन्ति ततश्च कुमारिलाभिमतं वास्तविकं ज्ञानस्वरूपं किमिति विचारे सनिश्चयमिदमवधारयामो यत् ज्ञानपदेन ज्ञानशक्तिरेवाभिमता भाट्टानामिति। तस्यां हि शक्तौ विषयग्रहणादिरूपा आत्मनिष्ठा क्रिया उत्पद्यते ।। तथाच भाट्टमते ज्ञातृत्वं नाम आत्मनो धर्मविशेषो येन विना तस्य चैतन्यमेव व्याहन्येत। ज्ञानं च विषयसापेक्षत्वादागमापायित्वाच्चानित्यम्।सति चैवं मुक्तावस्थायां,सुषुप्त्यवस्थायां वा विषयेंद्रियसंबंधाभावात् ज्ञानरहितस्यतस्य कथं ज्ञातृत्व चैतन्यं वोपपद्येत इति तु न शङ्क्यम्।भाट्टनये तदानीं विषयनिवृत्ते:

---

३०)काशिका द्वि.भा.पृ.१२३ (त्रिवेंद्रसंस्करणं) ३१)'बुद्धिसुखदु:खेच्छाद्वेषप्रयत्ना आत्मविशेषगुणा:' इति नारायणीये मानमेयोदये, एवं चिदानंदस्य नीतितत्त्वाविर्भावे पृ. २१२. ३२) श्लोकवार्तिके निरालंबनवादे-४७ ३३)शास्त्रदीपिका पृ.५६. ३४)प्रकरणपंचिका [शालिकनाथवि.] १४९

इंद्रियोपरमाद्वा विषयाञ्ज्ञातुमकामयन् ज्ञानशक्तिस्वभावोयमात्मा ज्ञानरहितो भवति। न पुनर्ज्ञानशक्तिरहित:(३५)

पार्थसारथिमिश्राणामाशय:पुनरेवं यत् सुषुप्तौ सत्यामपि ज्ञानशक्तौ इंद्रियादिज्ञानकरणवैकल्यात् आत्मा न विषयान् ज्ञातुं प्रभवति। तथैव मुक्तावस्थायां मनसा सह वियोगमासाद्य चक्षुरादिसाधनविलयाच्चात्मा न बाह्यान्विषयान् नाप्यात्मानं ज्ञातुं प्रभवति। एवंच ज्ञानशक्तिस्वभावोप्यात्मा मुक्तावस्थायांमन:संबंधाभावात न ज्ञानं नाप्यानंदमनुभवतीति'३६' तन्न कुमारिलभट्टमतमनुसरति '३७'।यतो हि ज्ञानशक्तिस्वभावेतिपदेनात्मा सत्यामादर्शयकतायां ज्ञातुं प्रभवत्येव इत्यमुमभिप्रायमाविष्करोति कुमारिलभट्ट:।

सुचरितमिश्रास्तु भट्टमतमन्यविधया परिश्चक्रु:।तदनुसारं ज्ञानं नाम स्वभाव एवात्मन:। चितिशक्तिरात्मना नित्यसंबद्धा बाह्यार्थसंसर्गाभावे विषयांतराभावादात्मानमेव विषयीकरोति। मुक्तावस्थायामपि ज्ञानसाधनं मनो न निवर्तते परं बाह्येंद्रियाभावात बाह्यपदार्थविषयीकरणाक्षमं स्वसंबद्धमात्मानमेव विषयीकरोति। एवंरीत्या ज्ञानंनामात्ममन:संयोगजन्यो नित्योधर्मविशेषइति'३८'।

विषयसारांश:-

भाट्टमते- वस्तुतस्तु भाट्टमते ज्ञानं क्रियैव परं तदपेक्षया तदनुकूलाया आत्मनिष्ठशक्ते:प्राधान्यं मनसि निधाय भाट्टसंप्रदायिन: क्वचित्क्रियात्वं, क्वचिद्गुणत्वं ज्ञानस्योपवर्णयन्ति।

मीमांसकेषु सुचरितमिश्रादय: शक्तेरतिरिक्तपदार्थत्वं स्वीकुर्वंति,मानमेयोदयकारादयस्तु गुणत्वमिति विवेकोपि भाट्टमतीयेष विद्यमानं मतभेदं निरूपयति। गुणत्ववादी मानमेयोदयकार: 'शक्तेर्गुणत्वस्वीकारपक्षो लाघवाज्ज्यायानि'त्युपवर्ण्य 'शक्ते: पदार्थांतरत्वमपि कौमारिलानामिष्टमेव'इति'३९'स्वसंमतिं सूचयति।

तदेवं कौमारिलमते ज्ञानपदेन ज्ञानशक्तिरभिप्रेतेति गोवर्धनभट्टमहोदया अपि निरणैषु:(४०)।

३५)श्लोकवार्तिके आत्मवादे श्लो-२६। ३६)शास्त्रदीपिका पृ.१२८,१३०
37)Epistemology of Bhatta School of poorva Mimansa by Govardhan p. Bhatt: Book I Chapter II P. 10 40) There also Page 21 'Cognition as a permanant and unique possission of soul is a potendy.'
३८)श्लो-वा-शून्यवादे काशिका श्लो-७०।३९)मानमेयोदय:गुणनिरूपणम

प्राभाकरमते– त्रिपुटीप्रत्यक्षवादिनस्तु प्राभाकराः मितिमातृमेयविषयकमेव संविद्रूपं ज्ञानं सर्वदा उत्पद्यते इति केवलमात्मविषयकं ज्ञानं न संभवति। मुक्तावस्थायां आत्मनो बाह्येन्द्रियमनोभिः संबन्धाभावात् बाह्यपदार्थविषयकं ज्ञानं नोत्पद्यते, नापि स्वविषयकम्। ततश्च सत्तामात्रं मुक्तात्मनः सिध्यति। इति प्रतिपादयन्ति।

गुणत्ववादः –

सांख्याभिमतबुद्धितत्त्वनिराकरणम्– बुद्धेरात्मगुणत्वं नैयायिकैः स्वीक्रियते। तथाहि सांख्यमते बुद्धिपदेन ज्ञानाधारस्य ग्रहणं, न पुनर्ज्ञानस्य, परं न्यायनये 'बुद्धिरुपलब्धिर्ज्ञानमित्यनर्थान्तरं' (४१) इत्युक्तदिशा उभयोः पर्यायपदत्वम्। भेदममुं मनसि निधाय यदि विचारयामस्तदा विशदमिदमवगम्यते यत् सिद्धायां पुरुषान्तःकरणरूपायां नित्यबुद्धौ सांख्याभिमतं ज्ञानस्य बुद्धिधर्मत्वं सिद्धं भवति। अत एव तृतीयाध्याय द्वितीयाह्निके बुद्धिनित्यत्वं निराक्रियते गौतममहर्षिणा। सुखादिवदुत्पत्तिस्थितिविनाशशालित्वेन अनुभूयमानत्वात् बुद्धेरनित्यत्वम् इति प्रथमः कल्पः (४२)।

विषयप्रत्यभिज्ञानबलात्किल सांख्यैः कूटस्थनित्यस्य चेतनस्य परिणामाभावात् वृत्तिमत्त्वं न संभवतीति संकल्प्य परिणामिनित्यायाः बुद्धेर्वृत्तिमत्त्वं साध्यते (४३)। तच्च न संभवति।

तथाहि 'स एवायं देवदत्तः' इत्यादिप्रत्यभिज्ञास्थले विभिन्नकालिकयोर्ज्ञानयोरेकपदार्थाभिसंधिरुदीयते। सा चानुगतं नित्यं प्रत्यभिज्ञातारं साधयति। स च प्रत्यभिज्ञाता आत्मैव भवितुमर्हति न तु बुद्धिः। वृत्तिरूपस्य ज्ञानस्य, वृत्तिमतश्चात्मनो भेदान्नात्मनः कौटस्थ्यं व्याहन्यते (४४)॥ किंच चेतयते जानीते इत्यादीनामेकार्थत्वात् बुद्धिपुरुषयोर्ज्ञानचेतनाभ्यां सह पृथक्संबन्धकल्पना सुतरामयुक्ता। यदि पुनर्बुद्धिर्ज्ञापयतीत्युच्यते तदा ज्ञानज्ञापनयोर्भिन्न–

४१) न्यायसूत्रं १.१.१५. ४२) ततश्च त्रैकाल्यव्यक्तेरनित्या बुद्धिरित्येतत्सिद्धं
४३) परिणामिनित्यायातु बुद्धेरुदयव्ययवदनेकवृत्तिमत्ता युज्यते। खद्योते ५४३
४४) तत्रैव ५४४ तथा च प्रत्यभिज्ञानात् प्रत्यभिज्ञाता आत्मैव नित्यः स्यान्न त्वन्तःकरणं बुद्धिसंज्ञकम्।

त्वान्न बुद्धेर्ज्ञानधर्मकत्वं सिद्धं भवति (४५)।। बुद्धेर्ज्ञानकरणत्वाभ्युपगमे तु सिद्धं न समीहितं, अंतःकरणस्य मनसो नैयायिकमतेनापि नित्यत्वात्। परं नैतत्प्रत्यभिज्ञाबलादनुमेयं, करणभेदेपि ज्ञातुरेकत्वात्प्रत्यभिज्ञानोपपत्तेः '४६'। अतः प्रत्यभिज्ञानं ज्ञातुरात्मनो नित्यत्वं साधयति न तु बुद्धेरिति।

वृत्तिवृत्तिमतोर्भेदे खलु आत्मनःकौटस्थ्यानपायात् ज्ञानाधिकरणत्वमात्मनः संभवति। तदेव नास्ति। सत्कार्यवादिनां सांख्यानां मते वृत्तिवृत्तिमतोरभेदात् परिणामिनित्याया बुद्धेरेव ज्ञानाश्रयत्वं घटते इतिपक्षं निराकर्तुं निम्नलिखिता युक्तय उपस्थाप्यन्ते —

१) उभयोरन्यत्वे वृत्तिमतोवस्थानात् वृत्त्यवस्थानप्रसंगः। एतेन युगपद्विषयाणां ग्रहणं प्रसज्यते '४७'। २) वृत्तीनामपगमे वृत्तिमतोप्यपगमः स्यात्। वृत्तीनां नाशेपि वृत्तिमदंतःकरणमवतिष्ठत एवेत्युक्तेउभयोर्भेदप्रसंगः '४८'। ३) किंच प्रादुर्भावतिरोभावशालिनीभिर्वृत्तिभिरभिन्नाया बुद्धेरपि जन्मविनाशशालितया अनित्यत्वापत्तिः '४९'। ४) वृत्तिवृत्तिमतोरेकत्वे चक्षुर्विज्ञानादिरूपेण वृत्तीनां नानात्वं नोपपद्यते '५०'। नानात्वं वस्तुतो नास्त्येव, विषयरूपोपाधिवशादेव वृत्तौ नानात्वाभिमान इति चेन्न तथा वक्तुं शक्यते।

द्रव्यांतरोपधानाद् नीलादिरूपेण प्रतीयमानो हि स्फाटिकोत्र दृष्टांतत्वेनोपादीयते। तत्रैकस्मिन्नेव स्फटिके नानात्वाभिमानो हि उपधानभेदादिति वक्तव्यम्। उपधानभेदश्च प्रत्ययभेदादिति हेतुः प्रतिपादनीयः। स च नोपपद्यते, व्याघातात्। नहि प्रत्ययपर्याया वृत्तेरभेदं वदता स्फटिके नीलादिप्रत्ययभेदो वक्तुं युक्तः। अत एव हेत्वभावात् वृत्तौ नानात्वभ्रम इति पक्षो न युक्तियुक्तः '५१'।

---

४५) अद्धा जानीते पुरुषो बुद्धिर्ज्ञापयतीति सत्यमेतत्। एवं चाभ्युपगमे ज्ञानं पुरुषस्येति सिद्धं भवति। न बुद्धेरंतःकरणस्येति वा.भा. ३.२.३ पृ.५४५
४६) तत्रैव पृ.५४७-४८ अस्त्येतदेवं न तु मनसो विषप्रत्यभिज्ञानान्नित्य दृष्टं हि करणभेदे ज्ञातुरेकत्वात् प्रत्यभिज्ञानं चक्षुर्वत् प्रदीपवच्च।
४७) न युगपद्ग्रहणात्-न्यायदर्शनं ३.२.४. ४८) अप्रत्यभिज्ञाते च विनाशप्रसंगः ३.२.५. ४९) एकत्वे च प्रादुर्भावतिरोभावयोरभाव इति वा.भा. ३.२.६ पृ५५०. ५०) एकं चांतःकरणं, नाना चैता ज्ञानात्मिका वृत्तयः। एतच्च वृत्तिवृतिमतोरेकत्वेनुपपन्नमिति। वा.भा.३.२.८ पृ५५२. ५१) न हेत्वभावात् वा.भा.३.२.९.पृ.५५४

ज्ञानस्यात्मगुणत्वसाधनम् – एवंच नित्यस्य बुद्धितत्त्वस्याभावात् ज्ञानं नाम आत्मधर्मविशेष एवेति सिद्धं भवति।

अथापीदं शंक्यम्- ज्ञानं हि आत्मनः,मनसः,इंद्रियस्य,अर्थस्य च सन्निकर्षमपेक्षते'५२'।आत्मा मनसा संयुज्यते,मन इंद्रियेण,इंद्रियमर्थेन; ततो ज्ञानमुत्पद्यत इति स्वीकारात्। एतेषु चतुर्षु ज्ञानं किं आत्मगुणः,इंद्रियगुणः,मनोगुणः,उत अर्थगुणः इति संदेहः समुल्लसति। तत्र नैयायिकाभिमतं ज्ञानस्यात्मगुणत्वं साधयितुं गौतमादिभिरुपन्यस्ता हेतवः संगृह्यंते ।

१)ज्ञानं हि द्विविधं भवति- इंद्रियार्थसन्निकर्षादिजन्यं, तद्भिन्नं स्मृतिरूपं च। तत्र अयं घट इत्यादिरूपं ज्ञानं इंद्रियार्थयोरभावेऽनुत्पद्यमानमपिघटमद्राक्षमित्यादिरूपंप्राक्कालीनज्ञानविषयविषयकं स्मरणं इंद्रियार्थयोर्नाशेपि जायते। तथाच चक्षुरिंद्रियेण पूर्वं घटपदार्थे ज्ञाते, उत्तरकाले चक्षुरिंद्रयार्थयोर्नाशे जातेपि पूर्वकालीनायाः घटविषयकोपलब्धेः स्मरणं जायते।इदं च स्मरणं इंद्रियार्थभिन्नस्य कस्यापि ज्ञानरूपगुणाश्रयत्वाभ्युपगम एवोपपद्यते। नष्टे इंद्रियरूपे विज्ञातरि तदन्येन तदीयोपलब्धिःस्मर्यते इतिकथनस्यायुक्तत्वात् '५३'।किंच स्मरणरूपज्ञानज्ञातृत्वे इंद्रियभिन्नस्य कस्याप्यभ्युपगते सति प्रत्यक्षादिस्थले पुनरिंद्रियार्थयोः विज्ञातृत्वं प्रतिपादयितुमवकाशो नावशिष्यते,तत्रापि स्मर्तुरेव ज्ञातृत्वाभ्युपगमसंभवात्'५४'। अतः इंद्रियार्थयोर्नाशेपि ज्ञानोपलंभात् न तयोर्ज्ञानरूपगुणाश्रयत्वं संभवतीति सिद्धम्।

२)ज्ञानस्य मनोगुणत्वमपि नोपपद्यते। ज्ञातुःस्वातंत्र्यस्य प्रसिद्धत्वात्'५५'। करणतया परतंत्रस्य मनसः ज्ञानगुणत्वं न संभवति। यद्यस्तीति महानाग्रहः तर्हि सुखादिसाक्षात्कारे साधनतया प्रसिद्धस्य मनोरूपांतःकरणस्य करणत्वं नोपपद्यते'५६'।

तदेवं सिद्धमात्मगुणत्वं ज्ञानस्य ।

---

५२)इदं तु चिंत्यते- कस्येयं बुद्धिरात्ममनोऽर्थानां गुण इति। वात्स्या. भा. ३-२-१८ पृ ५६८ ५३) तत्रैव पृ ५७० न चान्यदृष्टमन्यःस्मरति। ५४) तत्रैव। न च मनसि ज्ञातर्यभ्युपगम्यमाने शक्यमिंद्रियार्थयोर्ज्ञातृत्वं प्रतिपादयितुम्। ५५)तत्रैव। ज्ञस्य वशित्वात्। ५६)तत्रैव। ज्ञातगुणत्वे वा करणभावनिवृत्तिः।

संबंधरूपत्ववाद: –

मतमतांतराणि– आधुनिकदर्शनकारा: पुनरन्यादृशीमेव परिकल्पनां ज्ञानविषये समुपस्थापयंति । यथार्थवादिनां मते ज्ञानं नाम त्रयाणां विषयाधिकरणधियां संबंधविशेष:।सी.डी.ब्रॉडमहोदयानां जी,ई.मूरमहाभागानां च मते ज्ञातृज्ञेययोर्बुद्धिविषययो: पारस्परिक:संबंध एव ज्ञानम्। बुद्धिक्रियाया विषयेण सह वर्तमान: समानावस्थानरूप:(compresence)संबंध एव ज्ञानमिति अलेक्झांडरमहाशय:समभिप्रैति । अमेरिकादेशीयानां नवीनानां वास्तववादिदर्शनकाराणां मते ज्ञानं नाम न ज्ञातृज्ञेययो: संबंधविशेष: अपितु द्वयोर्विषययोरेव'५७'।

निराकरणम्- इदमत्रावधेयम्। ज्ञातृज्ञेयादीनां संबंधो हि ज्ञानोत्पत्त्यनंतरं समुल्लसति। अत एव ज्ञानकार्यभूत:स संबंधो नकथमपि ज्ञानस्वरूपो भवितुमर्हति । तदेवमुपरिनिर्दिष्टानि मतमतांतराणि न ज्ञानस्वरूपमुपपादयितुं प्रभवंतीति नितरामनादरणीयानि ।

कुमारिलमते सर्वविधस्यापि संबंधस्य क्रियाकर्तृसंबंधमूलकत्वात्'५८'ज्ञातृज्ञेयादीनां संबंधो ज्ञानक्रियामूलक:। न्यायमते गुणादीनां गुण्यादिभि: सह विद्यमानस्य समवायसंबंधस्य नित्यस्य क्रियाजन्यत्वाभावात्, तादात्म्यादिसबंधानां चातथाभूतत्वात् न संबंधानां क्रियामूलकत्वमेवेति नियम: ।

उक्तमतविमर्श:– अधुना उक्तप्रकारेण ज्ञानस्वरूपे निर्धारणीये संबंधवादस्य विचारासहत्वात् ज्ञानंनाम किं द्रव्यरूपं,चेतनरूपमुत, क्रियारूपं, आहोस्वित् गुणरूपमिति समालोचयाम: ।

सांख्यमतप्रत्याख्यानम्– तत्र प्रकृतिपरिणामविशेषो ज्ञानमिति-कथयतां द्रव्यरूपत्ववादिनां सांख्यानां मतं प्रत्याख्यातुं नैयायिकमीमांसका: प्राधान्येन अधोनिर्दिष्टा युक्तीरुपस्थापयंति।–

१)प्रकृतिपरिणामरूपं हि द्रव्यं द्रव्यांतरजनकं सत् गुणाधारमाकृतिमच्च भवितुमर्हति । ज्ञानं च न तथाभूतमिति न तस्य द्रव्यत्वं

57)Epistemology of the B.S. of P.M. by Govardhan P. Bhatt. 1-1-19

५८)न क्रियाकर्तृसंबंधादृते संबंधनं क्वचित्। श्लो. वा. शब्दप्रकरणे ६९

युज्यते । न हि घटादिवदाकारविशेषो ज्ञानस्यानुभूयते, नापि परिमिति:'५९'।

२) प्रत्यभिज्ञानादिकार्यकर्तृतया नित्यस्य आत्मन एव सिद्धिसंभवे ज्ञानाश्रयत्वेन नित्यस्य बुद्धितत्त्वस्य कल्पनमसमंजसम्'६०'।

३) ज्ञानादियोगितया बुद्धेश्चेतनत्वापत्ति:। सांख्यमते ज्ञातृत्वकर्तृत्वभोक्तृत्वादिकं वस्तुत: परिणामिनित्याया बुद्धेरेव, न तु कूटस्थनित्यस्य पुरुषस्य। अत एव बुद्धिरध्यवस्यति पुरुषस्तु पश्यतीति कथनं न युक्तियुक्तम्। उभयमपि पुरुषकर्तृकमेवेत्यनुभवात्'६१'।

४) किंच द्रष्टृत्वमिति यदुच्यते पुरुषस्य तद्दुरुपपादम्। तद्धि प्रतिबिंबनमिति, पुरुषस्वभाव इति वा वक्तव्यम्। प्रथमपक्षे किं पुरुषस्य बुद्धौ संक्रमणं उत बुद्धे: पुरुषे ? नाद्य: 'चितिशक्तिरपरिणामिन्यप्रतिसंक्रमे' ति स्वीकारात्। न द्वितीय: बुद्धिसंक्रमणेपि पुरुषस्य विकारित्वासंभवाद्यत्किंचिद्विशेषजननानुपपत्तेर्द्रष्टृत्वं नोपपद्यते६२।

प्रतिबिंबनं नाम न संक्रमणमपि तु तादात्म्यापत्तिरितिस्वीकारेपि न निस्तार:। अत्यंतविविक्तयो: प्रकृतिपुरुषयोस्तादात्म्यापत्तौ केनापि कारणेन भवितव्यम्। तच्च कारणं न संक्रमणं, प्रागुक्तदोषप्रसंगात्। नापि निरतिशयसान्निध्यं कैवल्यप्राप्त्यनंतरमपि तदापत्ते:। अत: चितिचित्तयोरभेदग्रहं विना सा नोपपद्यत इति वक्तव्यम्। स चाभेदग्रह: पुरुषस्य बुद्धेर्वा वक्तव्य:। ज्ञानरूपत्वात् बुद्धिपरिणामभूत: स पुरुषस्य न संभवति। बुद्धिवृत्त्यनुकारित्वंच तस्याभेग्रहानंतरमेव सिद्ध्यतीति नाभेदग्रहसिद्धि: ।

अथ यदि प्रकृतिपुरुषान्यताख्यातिरूपस्य भेदग्रहस्याभावस्तादात्म्यापत्तिकारणत्वेनोपादीयते, तथापि नोक्तदोषप्रमोष:। तथाविधभेदग्रहस्यापि ज्ञानविशेषरूपत्वेनाभेदाग्रहं विनानुपपत्ते:। किंच भेदग्रहाभावस्य कैवल्यप्राप्ते: प्राक् संसारदशायां प्रतियोग्यप्रसिद्ध्या दुरुपपादत्वमपि विभावनीयम् ।

प्रतिबिंबनं नाम'६३'बुद्धिच्छायापत्तिरितिकथनेपि उपदर्शितदिशैव नोक्तदोषनिरास: ।

---

59) Epitemology of the B:S. of P.M. by Govardhan P. Bhatt 1-1-13,14

६०,६१,६२) न्या.मं उ.भा. पृ६१

६३] बुद्धौ पुरुषस्य प्रतिबिंबनं नाम बुद्धिच्छायापत्ति: । तथाचोक्तम्–

५) किंच प्रतिबिंबपक्षे पुरुषस्य बुद्धिच्छायापत्तेरिव बुद्धेरपि पुरुषच्छायायापत्तिः शक्यशंक्या। अनादिकालात् परस्परतादात्म्यापन्नयोर्बुद्धिपुरुषयोःपार्थक्येन कदाप्यनवधारितस्वरूपयोः कथं धर्मविशेषनिश्चयःकर्तुं शक्यः । न च नत्र किमपि विनिगमकमस्ति येन तदीयविशेषधर्माणां निर्धारणं विधीयेत'६४' ।

६) ज्ञानादियोगित्वं बुद्धेरचेतनत्वं चेति परस्परमत्यंतंविरुद्धयोर्धर्मयोः एकत्रावस्थानस्वीकारात् असंगतम्'६५'। इति ।

तदेवं नैकदोषकलुषितत्वात् ज्ञानस्य द्रव्यस्वरूदत्ववादः परास्तो वेदितव्यः ।

'अपरिणामिनी हि भोक्तृशक्तिः अप्रतिसंक्रमा च परिणामिन्यर्थे प्रतिसंक्रांतेव तद्वृत्तिमनुपतति। तस्याश्च प्राप्तचैतन्योपग्रहरूपाया बुद्धिवृत्तेरनुकारमात्रतया बुद्धिवृत्त्यविशिष्टा हि ज्ञानवृत्तिरित्याख्यायते' इति व्यासभाष्ये समुदाहृतं पंचशिखाचार्यवचनम् २-२० तथा ८-२२ वाक्यपदीये२-३१ भर्तृहरिरपि प्रतिबिंबभावमेवं व्याचख्यौ— संक्रांतविषयरूपाया बुद्धेरात्मनि समवायात् बुद्धिरूपनिवेशेन तद्रूपतामिवापन्ने बोधात्मके पुरुषे पुरुषार्थस्य प्रसिद्धि मन्यंते। प्राकाशस्वभावया बुद्ध्या चितिस्वरूपस्यार्थस्य प्रतिबिंबयोगेन उपग्रहे संभवति प्राप्तविषयरूपविपर्यासायां उपगृहीतरूपायां बुद्धौ भोग्यभोक्तृशक्त्योः अत्यंतविविक्तयोः अत्यंतासंकीर्णयोः अविभाग–प्राप्ताविव सत्यां भोगः प्रकल्प्यते । इति । कंदलीकारोप्याह— प्रधानस्य विकारो महदाख्यमंतःकरणं चित्तापरपर्यायं बुद्धिः । बुद्धींद्रियप्रणालिकया बाह्यविषयोपरक्तायाः तदाकारोपग्रहवती सत्त्वगुणाश्रया वृत्तिर्ज्ञानम् । प्राप्तविषयाकारोपग्रहायां बुद्धौ प्रतिबिंबितायाः चेतनशक्तेः तद्वृत्त्यनुकार उपलब्धिः । इति न्यायकंदली पृ.२,४११,४१२ व्यासभाष्येपि निरूपितं यथा— शुद्धोप्यसौ(पुरुषः)प्रत्ययानुपश्यः,यतः प्रत्ययं बौद्धमनुपश्यति, तमनुपश्यन्नतदात्मापि तदात्मक इव प्रत्यवभासते।इति व्यासभाष्ये २-२०

६४)प्रतिबिंबपक्षे च परस्परानुरागस्य तुल्यत्वादवियोगाच्च कथमिदं निर्धार्यताममी पुंधर्मा इति । न हि तयोः पार्थग्भ्येन कदाचित्स्वरूपावधारणं वृत्तम्। इति न्यायमंजरी द्वितीयो भागः पृ.६२

६५)ज्ञानादियोगित्वं च बुद्धेरचेतनत्वं चेति चित्रम्। इति तत्रैव ।

आत्मस्वरूपत्ववादनिराकरणम्—चित्तवृत्त्यात्मकज्ञानस्वीकारेण सांख्यपक्षमंशतःकक्षीकृत्य स्वपक्षे पुनरपरं जीवस्वरूपभूत साक्षिज्ञानं स्वीकुर्वतां वेदांतिनां मतं सांख्यमतप्रत्याख्यानेनांशतो निराकृतमपि ज्ञानस्य आत्मस्वरूपत्वविषये विचारमपेक्षते ।

ज्ञानस्यात्मस्वरूपत्वं च द्वेधा समुपवर्ण्यमानमुपलभ्यतेवेदांतिभिः। तत्र प्रपंचसत्यत्ववादिनां वेदांतिनां मते बाह्यार्थविषयकस्य वृत्त्यात्मकज्ञानस्य,आत्मस्वरूपभूतस्य साक्षिज्ञानस्यच पारमार्थिकसत्त्वमभ्युपगतं भवति। मायावादिमते तु ब्रह्मण्यध्यासवशात् भासमानस्य सर्वस्यापिवस्तुजातस्यमिथ्यात्वाद्व्यावहारिकसत्तया प्रतीयमानं वृत्तिज्ञानं परमार्थतो नास्त्येव। यत्पुनरुच्यते साक्षिज्ञानमिति तत्तु नित्यशुद्धबुद्धमुक्तस्वभावं तुरीयचैतन्यं चिदिति विषयीकुर्वन्न सत्तातो भिद्यते,नापि परब्रह्मणः।तुरीयावस्थायां ब्रह्मभिन्नस्य कस्याप्यभावान्न ज्ञातृज्ञेयादिभावःसंभवति। अत एव व्यवहारे भाट्टनय इति तेषां मतम् ।

१)तत्र साक्षिज्ञानमुपगच्छतां वेदांतिनां मतं सर्वतंत्रसिद्धांतसिद्धेन मनसैव'६६'ज्ञानसुखादीनामात्मधर्माणामपि ग्रहणसंभवेन साक्षिरूपजीवस्वरूपभूतेंद्रियांतरकल्पने कल्पनागौरवान्न युक्तियुक्तमित्याक्षेपः। २)घटादिविषयकज्ञानवानहमित्याद्यनुभवबलाच्च ज्ञानाधिकरणत्वेन सिद्धस्यात्मनःस्वरूपमेवज्ञानमितिकथनं न युज्यते। ३)किंच एकस्यैव कर्तृत्वं करणत्वं च न संभवति। परतंत्रस्यैव करणत्वं,स्वतंत्रस्य च कर्तृत्वमितिनियमात्।अतो ज्ञातुरात्मनो ज्ञानकरणत्वासंभवात् न तदभिन्नसाक्षिनामकेंद्रियसिद्धिः।

ये पुनः प्रमातृभिन्नविषयाणामभावाद्विषयविषयीकरणाक्षमं ज्ञानं परमार्थतःप्रमातृस्वरूपमेवेतिकथयंति तेषांमतं पुनरेवं प्रत्याख्यायते— १)शांकरमते- ज्ञानमेव सत्ता, सत्तैव च ज्ञानमिति यदुच्यते तदनुभवविरुद्धम्। यतो ज्ञानेन सत्ताया उपलब्धिर्भवति यो विषयप्रकाश इति व्यवह्रीयते। पदार्थानां सत्ता हि ज्ञानं नापेक्षते। नापि सत्तात्सकलमपि ज्ञानविषयं भवति'६७'।

---

६६)वै.सू.३-२-१,न्या.सू.१-१-१६,ब्र.सू.४-२-१,३अन्ये च समुल्लेखा द्र.

६७)न धीविषयभावः सत्ता किंतु सामान्यमुत्तरभावि तद्वताम्।

श्लोकवार्तिके काशिकायां शून्यवादः सुचरितमिश्राणां ६४

२) आत्मा ज्ञानस्वरूपः इति कथनमपि न युक्तियुक्तम्। –
(१) अनुभवविरोधात्। ज्ञानज्ञेयज्ञातृभेदरहितं परमार्थतत्त्वदर्शनं '६८' हि सुतरामसंभवि। यतो ज्ञातृज्ञेययोर्भेदमवलम्ब्यैव ज्ञानं प्रवर्तते '६९'। अनुभवबलाच्चैतदवसीयते यत् मितिमातृमेयमानानां परस्परं विविक्तानां विषयग्रहणे नियतमवस्थानमिति।
(२) किंच ज्ञानं नामागमापायित्वादनित्यं, आत्मा तु नित्यः। अतो नित्यत्वानित्यत्वरूपपरस्परविरुद्धधर्माधिकरणयोरात्मज्ञानयोरभेदो दुरुपपादः। (३) अपिच सुषुप्त्यवस्थायां सत्यप्यात्मनि ज्ञानानुदयदर्शनात् ज्ञानात्मनोर्भेद एव पर्यवस्यति '७०'। (४) अन्यच्च ज्ञानं हि नियमेनार्थं प्रकाशयति न पुनरात्मा '७१'। (५) अथ च ज्ञानं नाम न खलु परमार्थतत्त्वमपि तु परमार्थतत्त्वाविष्कारः। अत एव आत्मस्वरूपभूतं ज्ञानं, तच्चाविषयमिति कल्पनैव दुरापास्ता वेदितव्या '७२'। अंततः पुनरेतदेव निर्णीयते यत् ज्ञानं हि सर्वदा स्वेतरं कमपि परामृशति। अत एव न स्वतन्त्रावस्थानसमर्थेन केनापि पदार्थेन सह तदात्म्य भवितुमर्हति '७३'।

क्रियात्मकत्ववादनिराकरणम्– मीमांसकमते क्रियामंतरा फलानिष्पत्तेः, सिद्धवस्तूनां कारकत्वानुपपत्तेश्च घटादीनां कर्मत्वान्यथानुपपत्त्या ज्ञानस्य क्रियात्मकत्वसिद्धिः।

१) अत्रायमाक्षेपः। उत्क्षेपणावक्षेपणाकुंचनप्रसारणगमनाख्यपंचविधपरिस्पंदात्मकक्रियाभिन्नमन्यादृशमेव किमपि सूक्ष्मं स्वरूपं ज्ञानाख्यक्रियाया इति वक्तव्यम्। आत्मेंद्रियमनोऽर्थसन्निकर्षादुत्पद्यमाना ज्ञानक्रिया ज्ञाततारूपप्राकट्यापरपर्यायं विषयप्रकाशं जन-

---

६८) ज्ञानज्ञेयज्ञातृभेदरहितं परमार्थतत्त्वदर्शनं- शां.भा. मां.उ. ४.१
६९) भेदाश्रयत्वाद्ग्राह्यग्राहकभावस्य। श्लो. वा. कशिकायां शून्यवादः सुचरितमिश्राः ६३. ७०) शास्त्रदीपिकायां पार्थसारथिमिश्राः पृ. १२९.
७१) यस्मिंस्तु सति प्रकाशत एवार्थांतरं तज्ज्ञानशब्दवाच्यं ज्ञायत इत्यर्थकरणात्। नचात्मनि सति किंचित्प्रकाशते, अतो न ज्ञानरूपत्वमात्मनः। इति रामकृष्ण-सिद्धांतचंद्रिका पृ १२९, चिदानंद-नीतितत्त्वाविर्भावः पृ. २१३
७२) नचार्थावगतेरन्यद्रूपं ज्ञानस्य युज्यते। श्लो.वा. आत्मवादः श्लो. ६६
73) Epistemology of B.S. of PM. Book I Chapter II Page 15

यंती,आत्मनिष्ठा च सती नित्येतिकथिते सुषुप्तिकालेपि विषयप्रकाशरूपफलनिष्पत्तिप्रसंगः । न चेंद्रियार्थसन्निकर्षाभावान्न तथेति वाच्यम्, नित्याया ज्ञानक्रियायाः सर्वदा विद्यमानत्वेन कारणसत्त्वे कार्यावश्यंभावनियमात्। किंच इंद्रियार्थसन्निकर्षाद्विना ज्ञानोत्पत्तेरनित्यत्वमेव तस्या इतिपक्षोपि न स्वीकारक्षमः। तथात्वे तस्या अपि फलरूपत्वेन क्रियाजन्यत्वलक्षणकार्यत्वविशिष्टत्वात् क्रियांतरसापेक्षत्वमापद्येत। इत्येवंरीत्या सर्वासामपि कार्यभूतानां क्रियाणां क्रियांतरसापेक्षत्वादनवस्थातादवस्थ्यं। यदि पुनःक्रिया क्रियांतरनिरपेक्षैरेव कारकैर्निष्पाद्यत इति प्रतिपाद्यते तदा तथाविधकारकैरेव विषयप्रकाशरूपफलं निष्पद्यत इति किं ज्ञानक्रियया७४।

२) किंचान्मनःप्रत्यक्षत्वं स्वीकुर्वाणा भाट्टास्तन्निष्ठां ज्ञानक्रियामतींद्रियत्वादनुमेयांप्रतिपादयंति।तदेनःप्रमाणाभावादप्रामाणिकमेव'७५'। ३) यत्पुनरुच्यते मीमांसकैः 'क्रियासंबंधिकारकमितिन्यायेन ज्ञातृज्ञेयभावमापादयंती ज्ञानक्रिया सिद्धयति'इति तत्रायं समाधिः- क्रियया कारकभावो जायते इति सत्यं, परं अतींद्रियक्रियया जायमानः कारकभावः तत्तत्पदार्थाविष्टक्रियानवगमात् अनवधार्यमाणःसन् कथं फलार्थिभिरुपादीयेत'७६' अतःपरिस्पंदभिन्नः कश्चिदतींद्रियो व्यापारो नाभ्युपगंतव्यः'७७'।तदनुसारं समुदितदेवदत्तादिसकलकारकनिकरपरिस्पंद एव विशिष्टफलावच्छिन्नः पाक इत्युच्यते ।। किंच फलमपेक्ष्यैव कारकाणां परस्परसंसर्गः,नतु क्रियाम्'७८'। तथाहि न खलु ज्वलनादिक्रियासंबंधात् काष्ठादयः कारकतां यांति अपि तु ओदनरूपफलसंबंधादेव। ओदनरूपफलमेव व्यापार इति तु निःसारं वचः, फलस्य क्रियात्वानुपपत्तेः। यदि पुनः क्रियेति नामांतरं तदा न विवादः'७९'।

अत्रेदमवधेयम्।पूर्वं प्रवृत्तिविचारे प्रतिपादितः प्रयत्नो नैयायिकमते आत्मनिष्ठगुणविशेष एव। स च मूलं भौतिकव्यापारस्य८०।

४) क्रियाबोधकत्वं धातूनामित्यपि न नियमः'८१'।

अतःसकलदोषविधुरत्वात् प्रमाणपरिपुष्टो नैयायिकाभिमतो ज्ञानस्यात्मविशेषगुणत्वपक्ष एव साधीयानिति सिद्धम्।

७४...८१) न्या.मं. प्र.प्र. पृ. १६...१९

इदमत्रावधेयम् । एतावता विचारेण निर्णीतापि ज्ञानस्य गुणता गुणगुणिनो: संबंधविषये विचारसापेक्षैवावतिष्ठते। तथाहि न्यायनये इहप्रत्ययस्य सर्वत्र संबंधसापेक्षत्वात् 'घटे रूपमि'त्यादिव्यवहारस्य संयोगादिसर्वसमयसिद्धसंबंधैरुपपादयितुमशक्यत्वान्नित्यस्यैकस्यायुतसिद्धपदार्थद्वयसंबंधरूपस्य समवायस्याभ्युपगम:।वेदांतिनां मते समवायाख्यसंसर्गस्यैवाभावात् गुणगुण्यादीनां स्वरूपसंबंधेनैव निर्वाह:। अतो ज्ञानस्य गुणत्वस्वीकारोऽद्वैतवेदांतिमतं विहायान्येषां वेदांतिनामविरुद्ध एव। गुणत्वस्वीकारेपि आत्मना सह तदभेदस्य तन्मते सुवचत्वात्। वृत्त्यात्मकज्ञानस्य तु विचार: प्रागेव विहित: । समवायवादस्तु पृथगेव विचारणीयो विषय:। बहूनां न्यायवैशेषिकसिद्धांतानां मूलाधारभूता समवायसबंधपरिकल्पना इत्यत्र तु न विवाद: ।

बौद्धन्यायजैनन्याययोर्मतविमर्श:— वेदप्रामाण्यवादिना गौतमीयन्यायदर्शनेन सहैव बौद्धजैनसंप्रदायावपि स्वस्वसिद्धांतानुकूलं न्यायशास्त्रं विस्तारयामासु: यत् बौद्धन्याय इति जैनन्याय इति च नाम लेभे । तदनुसारं ज्ञानस्वरूपं किमिति विचार्य विदितसमालोचनयैव तस्य गतार्थतां तावदुपवर्णयाम:। तत्र बौद्धेषु शून्यवादिनो माध्यमिका: अनुभवसिद्धं ज्ञातृज्ञेयादिभावं पदार्थानामेवानंगीकारेण'८२'सुतरामपलपंतीति न विचारणीया:।विज्ञानवादिनस्तु विज्ञानमेव क्षणिकवस्तुरूपेणावभासते'८३'इति स्वयं विज्ञानमेव स्वस्य विषय:। तच्च प्रवृत्तिविज्ञानमिति व्यपदिश्यते। विज्ञातापि न तद्भिन्न:।आलयविज्ञानसंतान एवात्मेति विज्ञान एव सकलमंतर्भावयंति'८४' । तदेतदद्वैतमतप्रत्याख्यानप्रक्रियया निरस्तं भवतीति वेदितव्यं।यत्पुन:क्षणिकत्वं सर्ववस्तूनामुच्यते तदपि ग्राह्यग्राहक-

---

८२)अतस्तत्त्वं सदसदुभयात्मकचतुष्कोटिविनिर्मुक्तं शून्यमेव। स.स.पृ.१२
८३)तस्माद्बुद्धिरेवानादिवासनावशादनेकाकारावभासत इति सिद्धम् । तत्रैव पृ.१५. ८४)तत्र आलयविज्ञानं नामाहमास्पदं विज्ञानं। नीलाद्युल्लेखि च विज्ञानं प्रवृत्तिविज्ञानं। यथोक्तं- तत्स्यादालयविज्ञानं यद्भवेदहमास्पदं। तत्स्यात्प्रवृत्तिविज्ञानं यन्नीलादिकमुल्लिखेत्। तत्रैव पृ.१७

भावानुपपत्त्या लौकिकव्यवहारव्याहृतिपराहतं भवति '८५' । साकारज्ञानवादे क्षणिकस्य ज्ञानस्य तत्तद्विषयाकारेण परिणतिर्दुरुपपादा, निराकारज्ञानवादे च प्रतिविषयव्यवस्था नोपपद्यत इति विभावनीयं। प्रत्यभिज्ञातृत्वेन च स्थिर: कश्चिदात्मा सिद्धयतीति क्षणिकविज्ञानात्मवादिनां मतं सुतरामसमीचीनम्'८६'।

बोधात्मको जीव इति ज्ञानस्य जीवस्वरूपतामभ्युपगच्छंतो जैना:'८७'प्रागुपदर्शितदिशा कर्तुरात्मनो ज्ञानाधारतयानुऽभूयमानस्य आधेयेन ज्ञानेन सह तादात्म्यानुपपत्त्या प्रत्याख्येया:। तस्मात् ज्ञानाधिकरणमात्मेतिमतमेव युक्तियुक्तमिति सिद्धं भवति ।

साक्षिविषयको विशेषविचार:साक्षिप्रत्यक्षरूपप्रत्यक्षप्रभेदनिरूपणावसरे विधीयेत ।

ज्ञानसामान्यलक्षणम्

पर्यायपदानि– बुद्धिरुपलब्धिर्ज्ञानमिति त्रीणि पर्यायपदानि निर्दिशन्नपि सूत्रकारो न कुत्रापि ज्ञानलक्षणं निरूपयति'१' । मंजरीकारस्तु पर्यायपदप्रयोगस्यैव लक्षणबोधकत्वं स्वीकृत्य लक्षेतरव्यावृत्तिसंपादकस्यास्य सूत्रस्य लक्षणपरतामप्युपवर्णयति'२' । वैशेषिकसूत्रे निर्दिष्टेषु सप्तदशगुणेष्वन्यतमत्वेन बुद्धिरपि परिगण्यते'३'। प्रशस्पपादभाष्ये पर्यायपदेषु प्रत्ययस्याप्यंतर्भाव:'४' ।

गुणलक्षणम्– सति चैवं आत्मविशेषगुणत्वेन न्यायवैशेषिकाभिमतं ज्ञानं किंरूपमिति तल्लक्षणाभिधानादनिरूपितमवतिष्ठते। विषयममुं प्रकाशयितुमादौ नैयायिकविदुषां मते गुणसामान्यस्य लक्षणं किमिति विचारयाम:। तत्र कणादसूत्रानुसारं द्रव्या-

---

८५) किंच क्षणिकत्वपक्षे ज्ञानकाले ज्ञेयस्यासत्त्वेन,ज्ञेयकाले ज्ञानस्यासत्त्वेन ग्राह्यग्राहकभावानुपपत्तौ सकललोकयात्राऽस्तमियात् । स.सं. पृ.२४

८६) आत्मतत्त्वविवेके उदयनाचार्यै: सविस्तरमुपन्यस्तोयं विषय: ।

८७) तदुक्तं स्वरूपसंबोधने- ज्ञानाद्भिन्नो न चाभिन्नो भिन्नाभिन्न:कथंचन। ज्ञानं पूर्वापरीभूतं सोयमात्मेति कीर्तित: । स. सं. पृ. ३२
तत्रबोधात्मको जीव: । अबोधात्मकस्त्वजीव: । „ ३१

१) न्या.सू. १-१-१५ । २) न्या.मं. उ.भा. पृ ५८ ।
३) वै.सू. १-१-६ ४) प्र.पा.भा. पृ.१३६

श्रयत्वं,गुणानाश्रयत्वं,स्वातंत्र्येण संयोगविभागयोरकारणत्वं चेति विशेषणत्रयं गुणलक्षणे सन्निवेश्यते‘५’।

दीपिकायां ‘द्रव्यकर्मभिन्नत्वे सति सामान्यवान्, गुणत्वजातिमान्वा इति लक्षणद्वयमुपन्यस्तम्‘६’।द्वितीयलक्षणं तु न तत्स्वरूपावबोधकमिति चिंत्यम्। प्रथमलक्षणं तु द्रव्यगुणकर्मसु विद्यमानं सामान्यं द्रव्यकर्मभिन्ने गुणे विशिनष्टि। इदमपि सैद्धांतिकमेव न गुणानां स्वभावमभिव्यनक्ति ।

भाषापरिच्छेदकृता विश्वनाथेन कणादसूत्रमवलंब्य किंचिदिव परिवर्त्य समुपन्यस्तं गुणलक्षणं स्वरूपनिरूपणदृशा विचारार्हम् । तथा हि गुणकर्मानाश्रयत्वे सति द्रव्याश्रितत्वं गुणलक्षणमिति तन्मतमवतिष्ठते ‘७’ ।

लक्षणावल्यामुदयनाचार्यैस्तु ‘द्रव्यावृत्तिनित्यवृत्तिजातिमान्’ इति निरूपितम् ‘८’ ।

‘सामान्यवानसमवायिकारणमस्पंदात्मा गुणः’इति यदुक्तं तर्कभाषायां‘९’ तन्न्यायनये आत्मविशेषगुणानां बुद्धयादीनामसमवायिकारणत्वानभ्युपगमादव्याप्तमिति न विचारसहम् ।

गुणगुणिनोश्चायुतसिद्धत्वात्समवायः संबंध इति न्यायनयः ‘१०’। समवायविचारश्च यद्यपि न्यायवैशेषिकसंप्रदायस्यानन्यसामान्यो विषयः, तथाप्यप्रस्तुतत्वान्नेह निरूप्यते ।

अत्रेदमनुसंधेयम् । सामान्यविशेषतया द्विविधेषु गुणेषु बुद्धयादीनां विशेषगुणेष्वंतर्भावः‘११’। किंच बुद्धयाद्यष्टकं,भावना,शब्दश्चेति गुणा अकारणगुणोत्पन्ना इत्युच्यंते‘१२’।यथा पटरूपस्य पटकारणीभूततंतुरूपजन्यत्वं, नहि तथात्र । विभूनामात्मादीनां जन्यत्वाभावात्तज्जनकाप्रसिद्धेः । अत एव बुद्धयादयो विभुविशेषगुणा इत्युच्यन्ते ।

५]वै.सू.१-१-१६। ६]त.सं.दी. पृ.५

७]अथ द्रव्याश्रिता ज्ञेया निर्गुणा निष्क्रिया गुणाः।भा.प. कारिका१३ पृ.८५

८]लक्षणावली ९]तर्कभाषा १०]न्या.को. पृ. ९६०

११]प्रशस्तपादभाष्यम् पृ.६१ १२]तत्रैव पृ. ६३

ज्ञानादीनामनित्यत्वम्– तदेवमुक्तगुणलक्षितं ज्ञानमात्म-विशेषगुण इति सिद्धं भवति। परमिदमत्रावधेयं यत् बुद्धिसुखदुःखे-च्छाद्वेषप्रयत्नधर्माधर्मसंस्काराणां नवानाम् आत्मगुणानां मुक्ता-वस्थायां निर्मूलोच्छेदस्य'१३' नैयायिकसिद्धांतसंमतत्वेन मुक्ता-त्मनःस्वरूपैकप्रतिष्ठानस्य'१४'आत्यंतिकदुःखनिवृत्तिसंपादकत्वेन गुणनवकपरित्यागः तदानीं नैयायिकानामिष्टः।

मनःषष्ठानांज्ञानेंद्रियाणां,बाह्यविषयाणां चाभावादपि मुक्ता-वस्थायां ज्ञानाद्यनुत्पादः सिद्धो भवति। परमात्मनिष्ठास्तु गुण-नित्या एव।

ज्ञानं हि सर्वव्यापिन्यात्मनि शरीरावच्छेदेन मनःसंयोगवशात् जायत इति अव्याप्यवृत्तिविशेषगुण इत्युच्यते। तच्च मनोमात्रा गम्यम्। अत एव ज्ञानं विषयीकुर्वाणस्य मानसज्ञानस्यानुव्यव-साय इति व्यपदेशो नैयायिकप्रसिद्धः।

ज्ञानसामान्यलक्षणानि– अस्याश्च ज्ञानापरपर्याया बुद्धेर्नै-कानि लक्षणान्युपन्यस्तानि विद्वद्भिः। यथा- बुद्धित्वसामान्यवती १५,बुद्ध्यादिपदवाच्यत्वं १६,जानामीत्याद्यनुव्यवसायगम्यज्ञानत्व '१७', संबंधावच्छिन्नप्रकारतानिरूपितप्रकारितासमानाधिकरण-गुणत्वव्याप्यजातिमत्त्वं'१८'इत्यादीनि। एतेषु कानिचन आत्मा-श्रयःप्रकाशः'१९', आत्मगुणत्वेसत्यर्थप्रकाशः'२०', सर्वव्यवहार-हेतुर्ज्ञानं'२१'मित्यादीनि बुद्धेर्यथार्थं स्वरूपमवगमयंति। गौतम-कृतो बुद्धेरुपलब्धिरिति पर्यायपदप्रयोगः, आत्मगुणत्वेसत्यर्थ-प्रकाश इत्यमुं बुद्धिलक्षणं समर्थयति।

१३,१४]न्यायमंजरी द्वितीयो भागः पृ.७७
१५]त.कौमुदी १ पृ ६ उद्धृतं न्यायकोशे पृ ६०४
१६]गौ. वृ. सू. १-१-15   1७]त.सं.दी.
१८]लक्षणावली   1९]न्यायकोशः पृ.६०४
२०]तर्कभाषा द्र. न्यायकोशः पृ ६०४   २1]तर्कसंग्रहः

ज्ञानस्य विभागः

वेदवाङ्मये– सार्वजनीनानुभवसिद्धस्य सकललौकिकालौकिकव्यवहारमूलस्य ज्ञानस्य विभागो नैकधा विधीयमानःसमुपलभ्यते। यथाहि प्रत्यक्षपरोक्षत्वेन द्वैविध्यं ज्ञानस्य ऋग्वेदे'१'समुपवर्ण्यते । साक्षादिंद्रियसंबंधेन जायमानं ज्ञानं प्रत्यक्षमिति,तदितरच्च अपरोक्षमिति गीयते। विद्याऽविद्यात्वेन ज्ञानविभागो छांदोग्याद्युपनिषत्सु'२' समुपलभ्यते । अत्र विद्यापदेन यथार्थज्ञानस्य अविद्यापदेन चायथार्थज्ञानस्य परिग्रहः शास्त्रकारैर्विधीयते। अद्वैतसंप्रदाये तु विद्येति ज्ञानस्य,अविद्येति चाज्ञानस्याभिधानम् । वैशेषिकनये विशेषणतद्विशेष्यसन्निकर्ष-लिंगपरामर्श इत्यादिरूपगुणजन्या विद्या-दूरत्वपित्तादींद्रियदोषजन्या अविद्येति विवेकः ।

अत्रायं विशेषः विद्याऽविद्येति किं ज्ञानस्य प्रकारद्वयमुतान्यदेव किमपि ? तथाचाविद्यापदेन यदि ज्ञानाभावस्य परिग्रहस्तदा प्रकारद्वयमिदमितिकथनमसंगतं भवति, ज्ञानाभावस्य ज्ञानविधात्वासंभवात्।अतः अविद्यापदेन अयथार्थभूतस्यान्यथाज्ञानस्यैव परिग्रहः। एतेन ज्ञानस्य प्रमाऽप्रमारूपेण प्रकारद्वयं सर्वसिद्धांताविरुद्धमिति सिद्धं भवति ।

इदमभ्युपेत्य प्रकारांतरेणापि ज्ञानविभागो दर्शनकारैर्निरूप्यते।

जैनमते– जैनास्तु द्वेधा ज्ञानविभागमुपवर्णयंति।मतिश्रुतावधिमनःपर्यायकेवलरूपेण पंचधाविधीयमानो विभागस्तेषां स्वीयः प्राचीनसिद्धांतत्वेनाभिमतश्च । स च आगमिको विभाग इति मूलसिद्धांतत्वेनाभ्युपगम्यते जैनैः। द्वितीयश्च न्यायनयानुसारी प्रत्यक्षादिभेदेन चतुर्विधः समुपवर्ण्यते । जैनागमसिद्धेषु पंचसु प्रभेदेषु मतिश्रुतयोः परोक्षे तदितराणां च प्रकाराणां प्रत्यक्षे परिगणनं क्रि-

---

1) ऋग्वेदे 1,३,४,६,1०,1०मंडलेषु 1६४,७,३७,७,८२,1२९ अनुवाकाः ज्वालाप्रसादकृतIndian Epistemologyउद्धृतम्। २)मुंडको· 1-1-५, ईशा.९,1०,11,1५, बृहदा· ४-३-२०, ४-४-1०,11,1३,1४, श्वे·५-1, छां.1-1-1०, कठो.1-२-४,५, शब्दकल्पद्रुमः प्रथमो भागः पृ.1३1, वाचस्पत्यं प्रथमो भागः पृ·१२, ४५८

यते प्राचीनैर्जैनदर्शनाचार्यैः। एतदेव च तत्त्वार्थाधिगमसूत्रे प्रत्यक्ष-परोक्षत्वेन प्रमाणद्वैविध्यं स्वीकृत्य उमास्वातिरुपपादयामास'३'। परं प्रत्यक्षपरोक्षत्वेन विधीयमानोयं प्रमाणविभागः किं प्राचीनाचार्यपरिकल्पित उत तेनैव प्रथममुन्नीतः इत्यत्र नोपलभ्यते किमपि निश्चायकम्।प्रत्यक्षादिरूपेण चतुर्धा विधीयमानःप्रमाणविभागस्तु नयवादांतरत्वेन उमास्वातिना निर्दिष्टो न्यायनयानुबंधं बोधयति। अत एव जैनन्यायविदो हेमचंद्रप्रभृतयः ज्ञानं प्रमाणं च प्रत्यक्षपरोक्षत्वेन द्विविधमुपवर्णयंति।'४' ।

आर्यरक्षितः इंद्रियजन्यं प्रत्यक्षज्ञानं,मतिपदेनागमजन्यं च ज्ञानं श्रुतज्ञानपदेन संगृह्णन् तयोः परोक्षत्वं जैनसंप्रदायाभिमतं निर्दिशति।चतुर्विधो ज्ञानप्रभेदः तर्कसिद्ध इति तदनुसारं विवरणमार्यरक्षितः समुपन्यासयत्'५' ।

जैनदर्शने प्रथमतः परसंप्रदायसिद्धा ज्ञानप्रक्रिया केनोपात्तेति कथयितुं नास्तिकिमपिनिश्चायकं प्रमाणम्। तथापि सिद्धसेनदिवाकरविरचिते न्यायावतारे स्पष्टतया तन्निरूपणं प्रथमत एव समुपलभ्यतइतिकथयितुमस्त्यवकाशः।आवश्यकनिर्मुक्तौच भद्रबाहुना जैनसिद्धांतभूतो मतिश्रुतादिरूपेणविधीयमानो ज्ञानविभागःस्पष्टमुपन्यस्तः'६' ।। इंद्रियद्वारा,तदन्यथा वा जायमानं ज्ञानं ; मतिपदेन आप्तोपदेशजन्यं च ज्ञानं श्रुतपदेनोपादाय तयोः परोक्षत्व स्वीकुर्वाणाः जैनाः इंद्रियार्थसन्निकर्षजन्यस्य ज्ञानस्य प्रत्यक्षत्वं स्वीकुर्वद्भिर्दर्शनांतरैःसह विसंवदंतीति विभावनीयम् ।

वस्तुतस्तु जैनाभिमतं प्रत्यक्षपदव्याख्यानमेव भिन्नम्।अक्षपदेन तैरात्मा गृह्यते । तेन साक्षादात्मनो जायमानं ज्ञानं प्रत्यक्षमिति तेषामाशयः। ततश्च इंद्रियजन्यं ज्ञानमतथाभूतम् अतः परोक्षमिति गीयते। अवधिप्रभृत्यलौकिकं ज्ञानं तु साक्षादात्मनो जायत इति हेतोः प्रत्यक्षमित्युच्यते ।

एतदभिप्रेत्यैव नंदिसूत्रे प्रत्यक्षस्य द्वैविध्यमुपवर्णितम्।जिनभद्र-

३]तःसू. 1-10, 1 उद्धृतम् I.L.M.P. 51 4) I.L.M. P.51
५]अनुयोगद्वार पृ. २11 उद्धृतं तत्रैव ६] „ P.P.50,51

क्षमाश्रमणश्च भाष्ये आगमोपवर्णितं पंचविधं ज्ञानविभागमुपवर्ण्य ऐंद्रियकप्रत्यक्षं सांव्यावहारिकमिति निरूपयामास '७'। तच्चात्मजन्यत्वाभावेपि इंद्रियजन्यज्ञानस्य प्रत्यक्षव्यवहारोपपत्तिप्रदर्शनद्वारा समुपदर्शितविरोधपरिहारायैवेति बोध्यम्।

प्रमाणमीमांसायां हेमचंद्रसूरिरमुमेवाशयं विवृणोति। विषयोऽयं विस्तरेण प्रत्यक्षादिप्रकरणेषु निरूपयिष्यते।

बौद्धमते— विज्ञानवादिनो बौद्धास्तु समस्तवस्तूनां क्षणिकविज्ञानात्मकतां वदंत आलयप्रवृत्तिरूपेण द्विविधं विज्ञानमुपवर्णयंति। आलयविज्ञानात्मनः प्रवृत्तिविज्ञानं च घटादीनां स्वरूपमिति तेषामाशयः।

न्यायमते— किंच नैयायिकाः स्मृत्यनुभवरूपप्रकारांतरेणापि ज्ञानस्य द्वैविध्यमुपवर्णयन्ति। यथार्थायथार्थरूपेणावस्थानं तु सर्वत्रानुस्यूतमिति वक्तव्यम्।

इदमत्रानुसंधेयम्। बुद्धिर्द्विविधा नित्या अनित्या च। सर्वेश्वरस्य सर्वज्ञस्य सर्वकालावस्थायिनः सर्वशक्तिमतश्च परमात्मनो ज्ञानं नित्यं, सर्वदा प्रमात्मकं, प्रत्यक्षरूपं च। जीवात्मनस्तु तदनित्यं स्मृत्यनुभवरूपेण द्विविधम् '८'। [८) न्यायकोशः पृ. ६०६]

प्रमाप्रमयोर्विभागः— अधुना प्रमात्मकज्ञानस्य प्रकारान्पर्यालोच्य क्रमेण अप्रमाविभेदानपि विचारयामः।

तत्र प्रमाऽप्रमे ज्ञानसामान्यस्य विशेषभूते इति प्रथममवधारणीयम्। न्यायनये यथार्थानुभव एव प्रमा। सा च चतुर्विधा प्रत्यक्षानुमित्युपमितिशाब्दभेदात्। अयथार्थानुभवस्तु अप्रमा भ्रम इत्युच्यते। प्रकारांतरेण स्मृत्यनुभवरूपेण द्विविधं ज्ञानं प्रत्येकं प्रमाऽप्रमारूपेण विभज्यते। तत्र स्मृतिः केवलं जीवात्मसमवेता अनित्या च। अनुभवस्तु प्रत्यक्षादिभेदेन चतुर्विधः। यथार्थानुभवस्य प्रमेति, तदितरस्य चाप्रमेति व्यपदेशः। ईश्वरीयप्रत्यक्षस्य केवलं प्रमात्वं नित्यत्वं च। अत एव चतुर्ष्वनुभवप्रकारेषु प्रत्यक्षस्य नित्यानित्यत्वेन द्वैविध्यम्। अनुमित्यादीनां तु जीवात्ममात्रसमवेतत्वात् स्मृतेरिव अनित्यत्वमेव। ईश्वरीयप्रत्यक्षं विधाय सर्वेषामनुभवानां यथार्थायथार्थत्वेन द्वैविध्यम् '९'। [९) न्यायकोशः पृ. ६०६]

प्रत्यक्षस्य सविकल्पकनिर्विकल्पकत्वेनापि द्वैविध्यमुल्लिख्यते। लौकिकालौकिकत्वेनापि प्रत्यक्षस्य द्वैविध्यमभ्युपेयते ।

अप्रमात्मकं च ज्ञानं संशयविपर्ययतर्कभेदेन त्रिविधम् ।

वैशेषिकमते तु विद्याऽविद्यात्वेन द्विविधं ज्ञानम्। विद्या च प्रत्यक्षलैंगिकस्मृत्यार्षरूपेण चतुर्विधा। इंद्रियजं प्रत्यक्षम्। तद्द्विविधं सर्वज्ञीयमसर्वज्ञीयं चेति। सर्वज्ञीयं योगजधर्मलक्षणया प्रत्यासत्त्या तत्तत्पदार्थसार्थज्ञानम्। असर्वज्ञीयं च प्रत्यक्षं द्विविधं सविकल्पकं, निर्विकल्पकं चेति। लिंगदर्शनात्संजायमानं लैंगिकम्'१०'। पूर्वानुभूतस्य विषयस्य संस्कारोद्बोधवशात् जायमानं स्मरणरूपं ज्ञानं स्मृतिः। गालवाद्यृषीणामतीतानागतवस्तुविषयकं ज्ञानंआर्षमिति।

नैयायिकमते योगिनां योगजधर्मसहकारेण जायमाने अलौकिकप्रत्यक्षे एव वैशेषिकाभिमतार्षज्ञानस्यांतर्भावसंभवान्न पृथग्विधात्वम् ।

प्रकारांतरेणापि आर्षज्ञानस्वरूपं निरुक्तं वैशेषिकैः। यथा आम्नायविधातॄणामृषीणां अतीतानागतवर्तमानेष्वर्थेष्वतींद्रियेषु धर्मादिषु ग्रंथोपनिबद्धेषुअनुपनिबद्धेषुचात्ममनसोःसंयोगविशेषात्, धर्मविशेषाच्च यत्प्रातिभं ज्ञानमुत्पद्यते तदार्षमित्याचक्षतइति।11

अविद्याऽपि वैशेषिकनये संशयविपर्ययस्वप्नानध्यवसायरूपेण चतुर्विधा'१२'। अन्यविधयापि तैर्विभागो विधीयते। यथा बुद्धिर्द्विविधा अनुभूतिः,स्मृतिश्च।अनुभूतिः प्रत्यक्षानुमितिरूपेण द्विविधैव वैशेषिकनये, प्रत्यक्षानुमानयोरेव प्रमाणत्वात्। प्रत्यक्षं मनःषष्ठैर्ज्ञानेंद्रियैरुत्पद्यमानत्वात् षड्विधम्। सविकल्पकनिर्विकल्पकत्वेन, लौकिकालौकिकत्वेन च प्रकारांतरमप्यनुसंधेयम् । अनुमितिरपि केवलान्वयिकेवलव्यतिरेक्यन्वयव्यतिरेकिरूपत्रिविधानुमानजन्यत्वात्त्रिविधा। स्मृतिश्चोपेक्षानात्मकनिश्चयाधीनसमानाकारकभावनाख्यसंस्काराधीना एकविधैव'१३'। संशयनिश्चयभेदेनापि बुद्धेर्द्वैविध्यं तत्र तत्र निर्दिश्यते'१४' ।

१०)प्र.भा. पृ.१५३ ११)तत्रैव पृ.१५८,१५९,२०९

१२)द्र. तत्रैव पृ. १३७. १३,१४,)न्यायकोषः पृ.६०७

न्यायनये निर्विकल्पकप्रत्यक्षं न प्रमा, नापि भ्रमः, तत्र प्रकारस्यैवाभावात्'१५'। केचिद्वेदांतिनस्तु निर्विकल्पकं नाम ज्ञानमेव नास्तीति वदन्ति'१६'।

मीमांसकैकदेशिनस्तु प्राभाकरादयः भ्रमात्मकं ज्ञानमेव नास्तीति सर्वं ज्ञानमुत्पद्यमानं प्रमात्मकमेवेति अभिप्रयन्ति। अतस्तेषां मते ज्ञानं प्रमापरपर्यायमेव।

यथार्थज्ञानपरतया ज्ञानपदस्य प्रयोगः श्रुतिस्मृतीतिहासपुराणेषूपलभ्यते। यथा सत्यं ज्ञानमनंतं ब्रह्मेत्यत्र'१७'ज्ञानपदेन न कथमप्यप्रमायाः परिग्रहः शक्यः कर्तुम्। तथैव ज्ञानाग्निदग्धकर्माणः, ज्ञानं विज्ञानसहितं इत्यादिगीतावचनेषु च यथार्थमेव ज्ञानं विवक्षितमिति न तत्र संशयावकाशः।

---

१५) न्यायकोषः पृ.६०७ १६) प्रमाणपद्धतिः प्रत्यक्षपरिच्छेदः पृ.१५१

१७) तैत्तिरीयोपनिषत् द्वितीया वल्लिः प्रथमोनुवाकः

प्रमास्वरूपविचारः

प्रमाणतत्त्वावधारणं च प्रमातत्त्वावधारणाधीनमिति प्रतिपाद्य प्रमातत्त्वस्य निरूपणीयत्वे संगतिः प्रदर्शिता मणिकारेण'१'।

मीमांसकादीनां मते प्रमाया एव परमार्थतः प्रमाणत्वात्, प्रमाणलक्षणनिरूपणेनैव प्रमालक्षणमपि निरूपितं भवति । ये तु नैयायिकादयः प्रमाकरणं प्रमाणमिति प्रमाणलक्षणं ब्रुवते तेषां मते प्रमाज्ञानमंतरा तत्करणपदार्थोदुरवबोधो भवति।प्रमाणगतं प्रामाण्यं हि द्विविधम् प्रमाकरणत्वरूपं,प्रमात्वरूपं चेति।अनयोःप्रमात्वरूपप्रामाण्यमेव प्रवृत्तिप्रयोजकं,दुर्निरूपं च अतस्तदेव प्राधान्येन परीक्ष्यते ।

विविधानि मतानि–

यथार्थानुभव एव प्रमेत्युच्यते। तत्त्वज्ञानान्निःश्रेयसाधिगम इति सूत्रखंडे तत्त्वज्ञानपदेन प्रमां निरूपयामास सूत्रकारः'२'।भाष्यकारश्च तत्त्वस्य ज्ञानमिति व्युत्पत्त्या 'निर्णयस्तत्त्वज्ञानं, प्रमाणानां फलं 'इति व्याचख्यौ '३'। यथाभूतमविपर्यीतं तत्त्वं भवतीत्यादि प्रागुपपादितमेव।यत्तदर्थविज्ञानं सा प्रमितिरितिच भाष्यं।वतंप्रमालक्षणम् '४'। उपलब्धिहेतुः प्रमाणमिति वदता वार्तिककारेण प्रमाणफलभूताया.प्रमितेरुपलब्धिस्वरूपत्वं प्रतिपादितंभवति'५'। स्मृतेरन्यामुपलब्धिमर्थाव्यभिचारिणीं प्रमामाचष्टे' इति तात्पर्यटीकाकारो वार्तिकवचनं परिश्चकार'६'। अव्यभिचारिणीमसंदिग्धामर्थोपलब्धिं विदधतीत्यादिवचनैः मंजरीकारोपि तदेव प्रमास्वरूपं निरूपयति। उक्तं च तेन संशयविपर्ययरहित अर्थबोधः प्रमा इति'७'। भासर्वज्ञोप्याह सम्यगनुभवःप्रमा इति'८'। एतदनुगुणमेव मितिःसम्यक्परिच्छित्तिरितिप्रमास्वरूपंप्रतिपाद्य समीचीनोहृयनुभवः प्रमेति कुसुमांजलीकारोपि व्यवस्थापयामास '९'। अत्र समीचीनपदेन अर्थाव्यभिचारित्वादिकं बोध्यते,अनुभवपदेन च स्मृतिर्व्यवच्छिद्यते ।

---

१)त.चिं. प्र.खं. पृ.११५. २)न्या.सू. १-1-1. .३)द्र.न्या.भा.पृ.१५,३४
४)तत्रैव पृ.८,९ ५)न्या.वा.१-१-१पृ.५. ६)न्या.वा.ता.१-१-.पृ,२०
७)न्या.मं. प्र.प्र.पृ.२५ ८)न्या.सा. पृ.५ ९)न्या.कु.स्त.४का.५पृ.४७५

मीमांसकजैनबौद्धादयो ज्ञानप्रक्रियायां प्रमामेव वस्तुतःप्रमाणपदवाच्यांस्वीकुर्वाणाःप्रमालक्षणमेव प्रमाणलक्षणतया निरूपयन्ति। तन्मते करणेषु प्रमाणपदव्यवहारो गौणः। प्रमायाः एव अनधिगतार्थविषयकज्ञानत्वात्।अतस्तद्विचारो विस्तरेण प्रमाणलक्षणनिरूपणावसरे विधीयते'१०'।

विषयेऽस्मिन्गंगेशोपाध्यायः सप्रपंचं विचारितवान्। पूर्वपक्षग्रन्थे बहूनां प्रमास्वरूपनिरूपणपराणां निर्वचनानां सयुक्तिकं खंडनं विधाय सिद्धांते प्रमायाः प्राचीनाचार्याभिमतां मूलपरिकल्पनां विशदय्य विविधान् परिष्कारप्रकारानप्युपवर्णयामास '११'।

तत्रादाविदमवधेयम्।द्विविधं हि प्रामाण्यस्वरूपं-व्यवहारोपयोगि ज्ञानादिप्रवृत्तिप्रयोजकं चेति'१२'। प्रामाण्यवादे स्वतस्त्वपरतस्त्वादिविचारः किं प्रामाण्यमात्रस्य विधीयते, उत निष्कंपप्रवृत्त्यंगभूतप्रामाण्यस्य? इति चेदत्र वर्तते पक्षचतुष्टयम । तथाहि- पक्षतया निर्दिष्टं प्रामाण्यपदं प्रमाणवृत्तिधर्मपरमित्येकं मतम् । ज्ञानपदं च करणनिष्ठस्य प्रमाकरणत्वरूपप्रामाण्यस्य पक्षत्वभ्रमवारणायेति।प्रामाण्यपदं तद्वति तत्प्रकारकत्वमात्रपरम्।तच्चेच्छावृत्ति न यथोक्तसाध्यवदिति बाधवारणाय ज्ञानपदमिति द्वितीय मतम्। प्रमाणपदप्रवृत्तिनिमित्तपरं वदिति तृतीयं मतम्। तन्निमित्तं च ज्ञाने तद्वद्विशेष्यकत्वं, तत्करणे प्रमाकरणत्वं,प्रमातरि चैत्रादौ चैत्रत्वादिजातिश्चेतित्रयं योगरूढिभ्यां समधिगतम्।तत्र ज्ञानपदेन चैत्रत्वादेः,ज्ञानमात्रवृत्तित्वविवक्षया च करणप्रामाण्यस्य निरासः। भ्रमान्यज्ञानत्वादिकं च गौरवान्न निमित्तमिति।चतुर्थमते ज्ञानप्रामाण्यमित्यत्र प्रामाण्यपदं समर्थप्रवृत्तिजनकतावच्छेदकधर्मपरम्। तच्च न भ्रमान्यत्वादि,गौरवात्।किंतु रजतत्ववति रजतत्वप्रकारकज्ञानत्वादिकं लाघवात् । तदेव च प्रामाण्यत्वेनानुगतं पक्षत्वेनाभिसंहितम् । अत्र समर्थप्रवृत्तिजनकतावच्छेदकरूपप्रामाण्यमात्रस्य पक्षत्वे अननुव्यवसितनष्टज्ञानप्रमाण्यांशे बाधः,तद्वारणाय ज्ञानपदं तद्विशेषपरं ग्राह्यम् इति ।

१०] न्या.कुसु.स्त.४ कारिका५ पृ. ४७५ततः अग्रे

११] द्र.त. चिं. प्रत्यक्षखं. पृ. ४०९-४६१ १२] द्र. तत्रैव पृ.३०१

एषु मतेषु प्रथमं तृतीयं चेति मतद्वयं न विचारसहम्। प्रथमे पक्ष-ज्ञानादेरपि करणत्वप्रसिद्धेः, ज्ञायते अनेनेति व्युत्पत्तेः, चक्षुरादेरपि ज्ञानत्वसंभवाच्च करणप्रामाण्यस्य पक्षत्वभ्रमो ज्ञानपदोपादानेपि तदवस्थ एव। तृतीये च अननुव्यवसितज्ञानसंग्रहापत्तिः। प्रमाणपद-प्रवृत्तिनिमित्तस्य तद्वद्विशेष्यकत्वस्य तत्रापि सत्त्वात्। तद्वारणाय यदि ज्ञानपदस्यानुव्यवसितज्ञानपरत्वं तदा तेनैव करणप्रामाण्यादे-र्व्यवच्छेदसंभवात् तदर्थं प्रामाण्यपदस्य तत्प्रवृत्तिनिमित्तपरत्व-कल्पनावैयर्थ्यम्।

तुरीयं मतं रुचिदत्तमिश्रादिभिः समर्थितम्। द्वितीयं च मतं मथु-रानाथेन सिद्धांतितम्। उभयमतेऽपि तद्वति तत्प्रकारत्वरूपप्रामा-ण्यस्यैव पक्षत्वम्। इयांस्तु प्रभेदः यत् तुरीयमते समर्थप्रवृत्तिजनकता-वच्छेदकतया रजतत्ववति रजतत्वप्रकारकज्ञानत्वादेर्विशिष्यग्रह-णम्, द्वितीयमते तु तद्वति तत्प्रकारकत्वरूपेण।

मीमांसकादिप्रतिवादिमते प्रमास्वरूपस्य भिन्नत्वेपि लाघवात् प्रवर्तकप्रामाण्यस्य स्वरूपं तद्वति तत्प्रकारकत्वरूपमेव स्वीकरणी-यमिति समर्थयता मणिकारेण प्रवृत्त्यंगतया भासमानस्य तद्वति त-त्प्रकारकत्वरूपप्रामाण्यस्यैव पक्षत्वमभिप्रेतमिति सिद्धं भवति। अधिकविचारस्तु प्रामाण्यवादे द्रष्टव्यः।

सति चैवमियमाशंका चित्तमास्कंदयति यत् प्रामाण्यस्वतस्त्व-परतस्त्वविचारे क्रियमाणे पक्षीभूतप्रामाण्यविवेचनं कृतमेव मणिकारेण, तत्किमिति पुनरुपक्रम्यते प्रामाण्यविचारः 'अथ किं तत्प्रामाण्यं' इत्यादिग्रंथेन इति।

तत्रेदं समाधानम्। व्यवहारोपयोगिप्रामाण्यं न स्वतस्त्वाद्यनु-माने पक्षीकृतम्, अनुव्यवसायादिस्थले विप्रतिपत्त्यनुपपत्तेः। किंतु निष्कंपप्रवृत्त्यंगभूतं प्रामाण्यम्॥ अत्र तटस्थः शंकते- नैतद्युक्तम् प्रामाण्यमात्रस्य पक्षत्वेन विशेषणवैयर्थ्यात्। न च व्यवहारोपयोगि प्रामाण्यं प्रवृत्त्यंगपदेन व्यावर्त्यं, तस्यासिद्धत्वात् इति॥ एतादृश-शंकानिरसनाय प्रवृत्त्यंगपदव्यावर्त्यं व्यवहारोपयोगि प्रामाण्य निरूपयितुं प्रमालक्षणवादः प्रारब्धो मणिकारेण इति।

अथ आदौ प्रामाण्यं न जातिविशेषः संकरात् इति पूर्वपक्षग्रंथे प्रथमं निरूप्य मणिकारेण दूषणांतराण्यपि प्रतिपादितानि। तथाहि किंचैवमप्रमाया अंशे प्रमात्वं न स्यात्, जातेर्व्याप्यवृत्तिवानियमात् '१३'। यच्चुच्यते जातिर्व्याप्यवृत्तिरेवेति व्याप्तिमभिभूय अनुभवबलादेव प्रमात्वतदभावयोरव्याप्यवृत्तित्वमस्तु,गुणदोषयोरेकत्रसत्वे अव्याप्यवृत्तित्वं,गुणमात्रसत्त्वे व्याप्यवृत्तित्वमित्युभयथोपपत्तेश्च '१४'इति। तन्न, अवच्छेदकभेदं विना विरुद्धयोरेकत्रासमावेशात्, अप्रतीतेश्च'१५'। यथा खलु ऊर्ध्वदेशाधोदेशरूप-अवच्छेदकभेदेन परस्परविरुद्धौ संयोगतदभावावेकत्रावतिष्ठेते,प्रतीयेते च।

ननु विषय एवांशरूपःप्रमात्ववृत्त्यवच्छेदको भवतु '१६'। तेन भ्रमस्थले पुरोवर्तिधर्मिरूपविषयावच्छेदेन प्रमात्वमप्युपपद्यते।इति चेत्,मैवम्, यत्र हि स एव धर्मी क्वचिदन्यत्रारोप्यते तत्र भ्रमे तस्य अप्रमावृत्त्यवच्छेदकत्वात्।तथाच पुरोवर्तिधर्मिविषयत्वस्य भ्रमत्वावच्छेदककोटिप्रविष्टत्वेन भ्रमांशेपि सत्त्वात् न तथा प्रमात्ववृत्तावच्छेदकमिति भावः '१७'।

विशेष्यावृत्त्यप्रकारकत्वादीनामवच्छेदकत्वस्वीकारे तु तदेव प्रमाव्यवहारजनकमस्तु आवश्यकत्वात्, प्रथमोपस्थितत्वाच्च, किं जातिकल्पनया? '१८'।

इदंत्ववधेयम्। दीधितिकारः संकरस्य जातिबाधकत्वं निरस्य, प्रमात्वं जातिरिति स्वीकुर्वाणः, प्रमात्ववत्त्वमेव प्रमालक्षणमभ्युपैति '१९'।

यथार्थागृहीतग्राहित्वं'२०'प्रमात्वमिति भाट्टसंमतं प्रमालक्षणमपि न युक्तियुक्तम्। धारावाहिकबुद्ध्यव्याप्तेः। मंजरीकृदुक्तदिशा पूर्वमुपपादित एवायं विषयः। तथापीदमनुसंधेयम्। प्रत्यक्षस्य वर्तमानार्थग्राहित्वेन स्वाश्रयक्षणविशिष्टस्तंभादिग्राहकत्वेन सिद्धमेवागृहीतग्राहित्वं धारावाहिकबुद्धेरिति मीमांसकोक्तं समा-

१३,१४,१५,१६)त.चि. प्र.खं. पृ.४१४,४१५
१७)द्र. प्रकाशः. न्या. शि. म. च पृ.४१६, १८)त.चि. प्र.खं. पृ४१६
१९)द्र. न्या.को. पृ.५५। २०)प्रकाशः पृ.४१६

धानं तु न युज्यते क्षणानामतींद्रियत्वात्। वर्तमानत्वग्रहान्यथानुपपत्त्या क्षणभानं कल्प्यत इति चेन्न, स्थूलोपाधिमादय वर्तमानत्वग्रहात्।नच स्थूलकालविशिष्टग्राहित्वे तत्कालावच्छिन्नगोचरनानाज्ञानानां यौगपद्यापत्तिरिति वाच्यम्,तत्तत्क्षणमादायैव भिन्नकालत्वात् ज्ञानानां न यौगपद्यम्'२१'।

किंच धारावाहिकप्रत्यक्षस्थले यथाकथंचित् क्षणभानस्वीकारेऽपि वेदात्क्रमोत्पन्नवेदार्थगोचरधारावाहिकबुद्धावव्याप्तिर्दुर्वारा। शाब्दज्ञाने तत्तत्क्षणभानासंभवात् '२२'।

यथार्थानुभवत्वं प्रमात्वमित्यपि न संभवति। अत्र यथाशब्देनाभिप्रेतं सादृश्यं ज्ञानस्य घटत्वादिना वा, यथाकथंचिद्वा वक्तव्यम्। आद्ये असंभवः,ज्ञाने घटत्वादिना सादृश्याभावात्। द्वितीये अतिव्याप्तिः, भ्रमेपि यथाकथंचित् सादृश्यस्य सत्त्वात्'२३'। नापि गुणजन्यानुभवत्वम्, दोषाजन्यानुभवत्वं वा प्रमात्वं, गुणदोषयोःप्रमाऽप्रमानिरूप्यत्वेनान्योन्याश्रयात्। प्रमाऽसाधारणकारणत्वस्य गुणत्वात्, अप्रमाऽसाधारणकारणत्वस्य च दोषत्वात्। अननुगमाच्च गुणदोषयोरनेकत्वात्'२४'।

अबाधितानुभवत्वमित्यपि न युक्तम्, विपरीतप्रमा बाध इति बाधलक्षणेन आत्माश्रयप्रसंगात्'२५'।

नापि संवाद्यनुभवत्वं, ज्ञानांतरेण तथोल्लीख्यमानत्वस्य संवादित्वस्य भ्रमसाधारणत्वात्।

न च समर्थप्रवृत्तिजनकानुभवत्वं तल्लक्षणमिति वाच्यं,उपेक्षाप्रमायामव्याप्तेः। स्वरूपयोग्यतानिवेशे च योग्यतायाः प्रमानिरूप्यत्वात् आत्माश्रयः।

नापि तत्त्वानुभवत्वम्। न्यायनये अवस्तुनोऽभानात्, तत्त्वपदेन वस्तुमात्रविवक्षायां व्यावर्त्याप्रसिद्धिः। अत्यंतासत्यपि ह्यर्थे इति वदतः कुमारिलभट्टस्य मते असद्भानांगीकारान्न व्यावर्त्याप्रसिद्धिरितिचेत् भ्रमेऽतिव्याप्तिः,भ्रमेपि धर्म्यादेर्वस्तुन एव भानात्'२६'। प्रमाविषयीभूतस्य प्रकारस्य नियमेन विशेष्यवृत्तित्वात्,विशेष्यवृ-

२१ तः २६] त.चि. प्र.खं. पृ. ४१७ तः ४२०

त्तिप्रकारकत्वमित्युक्तौ च निर्विकल्पकासंग्रहात्, विशेष्यावृत्त्यप्रकारकत्वमिति प्रमालक्षणं वाच्यम्, इति यदुच्यते तदपि न विचारसहम्। एकैकविशेष्यावृत्तिनानाप्रकारकसमूहालम्बनाव्याप्तेः। यत्किञ्चिद्विशेष्यावृत्तित्वस्य नाव्याप्तिरित्युक्तौ प्रमाऽप्रमारूपसमूहालंबने अतिव्याप्तिः। तद्वारणाय यावद्विशेष्यावृत्तित्वविवक्षायां च समूहालम्बनाव्याप्तिर्दुर्वारा'२७'।

इत्थमेव लक्षणं द्वेधा परिष्कृत्य निरूपितं मणिकारेण 'विशेष्यावृत्तीत्यत्र नञः अत्यन्ताभावपरत्वमादाय द्वितीयायाः प्रतियोगितायामन्वयं स्वीकृत्य प्रथमः परिष्कारः प्रवर्तते। यथा विशेष्यनिष्ठात्यन्ताभावाप्रतियोगिधर्मप्रकारकानुभवत्वम् इति। न चैतद्युज्यते, अव्याप्यवृत्तिसंयोगादिप्रमायां संयोगस्य वृक्षादिविशेष्यनिष्ठात्यन्ताभावप्रतियोगित्वादव्याप्तेः। अभावे व्याप्यवृत्तित्वविशेषणे च संयोगभ्रमेऽतिव्याप्तेः'२८'। प्रथमनञोऽन्योन्याभावपरतामादाय द्वितीयपरिष्कारः प्रवर्तते। यथा- विशेष्यवृत्त्यन्योन्याभावप्रतियोगितावच्छेदकधर्माप्रकारकानुभवत्वमिति। इह विशेष्यावृत्तीत्यस्य विशेष्यवृत्तिभेदप्रतियोगितावच्छेदक इत्यर्थः। अत्रापि अव्याप्यवृत्तिसंयोगादिविषयकप्रमायामव्याप्तिः। संयोगात्यन्ताभाववत् संयोगवद्भेदस्यापि अव्याप्यवृत्तित्वात्। मूले वृक्षः कपिसंयोगवान् नाग्रे इत्यबाधितप्रतीतिबलात् अवच्छेदभेदेनात्यन्ताभाववत् अन्योन्याभावस्यापि अव्याप्यवृत्तित्वमभ्युपेयम्'२९'।

भ्रमे नियमेन प्रकारतायाः विशेष्यताव्यधिकरणत्वदर्शनात्, विषयता (विशेष्यता) समानाधिकरणप्रकारकानुभवत्वम् इति भ्रमविपरीतस्वरूपबोधकं प्रमालक्षणं वक्तुं शक्यम्। परमिदमपि न दोषविधुरम्। निर्विकल्पकस्य निष्प्रकारकतया तत्र प्रकारगर्भलक्षणानामव्याप्तेः। विषयतासमानाधिकरणदत्वप्रकारकभ्रमेऽतिव्याप्तेश्च'३०'। अस्मिन्नेव लक्षणे, विशेष्यतायां विषयतां प्रति ज्ञानस्य प्रतियोगित्वेन तादृशप्रतियोगित्वघटितः त्रिविधः परिष्कारः समुपवर्णितो मणिकारेण'३१'। दूषणं तु तदेव।

२७-३०) द्र. त. चि. प्र. खं. पृ. ४२०-४२५ ३१) तत्रैव- प्रकारसमानाधिकरणविषयताप्रतियोग्यनुभवो वा, स्वसमानाधिकरणधर्मावच्छिन्नप्रकारताकविषयताप्रतियोग्यनुभवो वा, स्वसमानाधिकरणधर्मावच्छिन्नविषयताप्रतियोग्यनुभवो वा प्रमेति।

प्रकारांतरेण विशेष्यताव्यधिकरणाप्रकारत्वं प्रमास्वरूपं, नञ: अत्यंताभावपरतामन्योन्याभावपरतां चादाय नैकधा परिष्कृत्य दूषितं गंगेशोपाध्यायेन '३२'। तदपि सैद्धांतिकदृशा न किमपि नूतनं वस्तु प्रस्तौतीति नेह विचार्यते ।

इदं पुनरवधेयम्। स्वव्यधिकरणप्रकारकज्ञानभिन्नज्ञानत्वं भ्रमस्य सर्वांशेनाप्रमात्वं स्वीकुर्वतां मते संगच्छते । परं तन्मतमेव न युक्तिसंगतम् । भ्रमस्य धर्म्यंशे प्रमात्वस्यानुभवसिद्धत्वात् ।

अत्रायं सिद्धांत: –

अनुभवत्वमेव प्रामाण्यम्। तच्च भ्रमेप्यंशतो वर्तत इति तस्यांशे प्रमात्वमव्याहतम्।- इति यदुच्यते तत्प्रमाव्यवहारसाधनायालम् । नतु प्रवृत्त्यंगतासाधनाय।अनुभवभिन्नाया:स्मृतेरपि निष्कंपप्रवृत्त:। अत्रेदमनभिमतिबीजम् 'न हि प्रकृते इतरभेदसाधनाय प्रामाण्यनिर्वचनम्, किंतु निष्कंपप्रवृत्त्यंगत्वेन, तच्च नानुभवत्वं भ्रमसाधारण्यादि'ति। अतो यत्र यदस्ति तत्र तस्यानुभव: प्रमा इत्येव तल्लक्षणं वाच्यं'३३'। एतदेव तद्वति तत्प्रकारकानुभवत्वमितिसमुल्लिख्यते।

इदंत्वत्रधेयं । यत्रयदस्तीत्यादिना संबंधघटितमेव प्रमालक्षणं निरूप्यते। तेन यत्रयत्संबधोस्ति तत्रतत्संबंधानुभव इत्यर्थोलभ्यते। तथाच घटे घटत्वमितिप्रमायां विशेष्ये घटत्वे तद्वत्त्वाभावेपि नाव्याप्ति:, घटत्वे घटाद्यभावेपि घटसंबंधस्य सत्त्वात् । घटत्वे घट इतिभ्रमे च नातिप्रसंग: । घटघटत्वयोराधाराधेयभावलक्षणसंबंधविशेषस्य सत्त्वात्, वैपरीत्ये चासत्त्वात्'३४'।

ननु प्रकारघटितलक्षणस्वीकारे निर्विकल्पकप्रमायामव्याप्ति: सुस्थेति चेन्न,तस्या:प्रमाऽप्रमाबहिर्भूतत्वेनालक्ष्यत्वात्'३५'।अथवा तदभाववतितत्प्रकारत्वावगाहिज्ञानभिन्नत्वेसत्यनुभवत्वमिति तल्लक्षणमस्तु।एतच्च निर्विकल्पकसाधारणं।ईश्वरप्रत्यक्षंतु नकुत्रापि लक्ष्यम् तस्य सर्वदा विशिष्टविषयकत्वेन तत्प्रकारकत्वाभावात्।

अथैवमपि संयोगी वृक्ष इत्यादिप्रमायां,वृक्षे संयोगवति संयोगतदभावयो: सत्त्वात् प्रमाऽप्रमात्वे स्याताम्, तद्वतितत्प्रकारकज्ञान-

---

३२)त.चि. प्र.खं. पृ. ४२६-४२७,४३१,४३२ ३३)तत्रैव पृ.४३४

३५,) ,, ४४१ ३४)द्र. प्रकाश: पृ.४३५

त्वस्येव तदभाववति तत्प्रकारकज्ञानत्वस्यापि तत्र सत्त्वादिति चेन्न न हि वृक्षमात्रे संयोगतदभाववावतिष्ठेते किंतु भिन्नावच्छेदेन । तथाच यत्र वृक्षे संयोगो न तत्र तदभावः । अतः यदवच्छेदेन यत्र यदस्ति,तत्र तदवच्छेदेन तदनुभवः प्रमेति विवक्षितम्'३६'।

किंच तद्वन्निष्ठविशेष्यतानिरूपिततन्निष्ठप्रकारताशालित्वम् इति परिष्कारात् न समूहालंबनभ्रमेऽतिव्याप्तिः, नापि रंगरजतयोरिमे रंगरजते इत्याकारकसमूहालंबनप्रमायां रजतत्वप्रकारकत्व रंगविशेष्यकत्वसत्त्वादव्याप्तिः शंक्या,रंगविषयताया रजतत्वावच्छिन्नत्वाभावात्, रजतविषयतायाश्च रंगत्वावच्छिन्नत्वाभावात्। तथाच स्वसमानाधिकरणप्रकारानवच्छिन्नविषयताप्रतियोगिज्ञानं स्वव्यधिकरणप्रकारावच्छिन्नविषयताप्रतियोगिज्ञानं वा भ्रमः ३७, तद्भिन्नंच ज्ञानं प्रमेतिपरिष्कारप्रकारःसिद्धो भवति।अस्यपरिष्कारस्य मूलंतु भ्रमस्य विशेष्यताव्यधिकरणप्रकारकत्वनैयत्यं बोध्यं-

समालोचना –

यत्तदर्थविज्ञानं सा प्रमितिः, स्मृतिभिन्ना अर्थाव्यभिचारिणी अर्थोपलब्धिःप्रमा, सम्यगनुभवःप्रमा, संशयविपर्ययरहितोऽर्थबोधः प्रमा इत्यादीनि प्राचां वचनानि प्रमायाःस्वरूपमवगमयंति।तथापि अन्यूनानतिप्रसक्ततया परिष्कारप्रक्रियामवलंब्य विषयममुं विदुषां पुरतः स्थापयितुं नव्यनैयायिकाः तद्वति तत्प्रकारकानुभवत्वं प्रमात्वमिति सिद्धांतयामासुः । तदनुसारं च गहनो विचारः प्रावर्तत। तत्रायं विचारणीयोंऽशोऽवतिष्ठते । एतानि प्रमालक्षणानि परिष्कारप्रचुराण्यपि न खलु लेशतोऽपि मूलत एवानुस्यूतां शंकामपसारयितुं प्रभवंति। तथाहि लक्षणघटकेन तत्पदेन कतमस्य वस्तुधर्मस्य ग्रहणं येन प्रमात्वं सिद्धयेत् । घटत्वपटत्वादीनामेव ग्रहणमिति तावत् युक्तमुत्तरम् । तच्च न संघटते, घटपटादीनां ज्ञानमंतरा घटत्वपटत्वादीनां दुरवबोधत्वात्। ततश्च कथं नाम घटत्वपटत्वादीनिघटपटादिज्ञानप्रामाण्यसाधनसमर्थानि स्युः ?यथाश्रुतलक्षणानुसारमिदमुक्तं भवति यत् यदा वयं घटे घटत्वं जानीमः,तदा घट

३६,३७)द्र. त.चि. प्र.खं. पृ. ४४२, ४५६

इतिज्ञानं प्रमा भवतीति।परं यथार्थतो विचार्यमाणे घटं घट इत्यजा-नत: पुरुषस्य तत्र घटत्वज्ञानमेव न संभवति। तेन च घटप्रमानंतरं घटत्वज्ञानं, घटत्वज्ञानानंतरं तद्घटितलक्षणद्वारा घटप्रमेत्यन्योन्याश्रय:। तत्कथमुक्तप्रमालक्षणं युक्त'३८'मिति दुष्परिहरोयमाक्षेपो मूले कुठार इव सकलमपि परिष्कारप्रक्रियाजालमुन्मूलयति।

निर्णय:— अत्रेदं समाधानमभिधातुं शक्यम्। अर्थेंद्रियसन्निकर्षसमनंतरमेव घटघटत्वयो: निर्विकल्पकमुत्पद्यते। तदनंतरं चोभयो:संबंधावगाहि सविकल्पकज्ञानमिति न्यायनय:। तत्र सविकल्पकस्यैव प्रमात्वमप्रमात्वं वा शक्यंनिर्धारणम्। तदनुसारं घटत्ववानितिज्ञानं यदि घटत्ववति घटत्वं प्रकारतया विषयीकरोति तदा प्रमेत्युच्यते। यदि च घटत्वाभाववति तदा अप्रमेति विवेक:। एतेनेदमुदितं भवति। प्रामाण्यं हि न्यायनये परत एव सिद्ध्यति। तच्च तद्वति तत्प्रकारकत्वरूपम्। सविकल्पकज्ञानानंतरमपि प्रामाण्यसंशयोपलंभात्, घटत्ववान्घट इति घटज्ञाने जातेपि न तस्य प्रमात्वं निश्चीयते। तथाच यदुच्यते घटज्ञानानंतरमेव घटत्वज्ञानं,तत्कथं घटत्वादि प्रमाणलक्षणघटकमिति तन्न, विशिष्टज्ञानस्य विशेषणज्ञानसापेक्षतया घटत्वनिर्विकल्पकानंतरमेव तद्विशिष्टघटज्ञानसंभवात्।तदनंतरंच 'घटे यद्घटत्वज्ञानं मे जातं तद्घटत्ववति जातमुतघटत्वाभाववती'ति संदेहे संवादादिना 'घटत्ववति जातमि'ति निश्चीयते।एतदभिप्रेत्यैव, अव्यभिचारिणी,असंदिग्धा,अविपरीता इत्यादीनि प्रमाविशेषणानि तात्पर्याचार्यप्रभृतिभिरुपयुक्तानि।

तदेव घटे घटत्वप्रकारकं ज्ञानं संवादादिना घटत्ववति घटत्वप्रकारकमेवेति निर्धार्यते। अतो गुणादिभ्यो जायमानमिवं निर्धार्यमाणं प्रामण्यमपि तद्वति तत्प्रकारकत्वरूपमेव युक्तम्।

अप्रमानिरूपणम्

प्रमानिरूपणानंतरमप्रमाप्रभेदा:संक्षेपेण परीक्ष्यंते। तत्र स्मृति:, तर्क:,संशय:,विपर्ययश्चेति चतुर्णामप्रमात्वं नैयायिकसमयसिद्धम्। संशयविपर्ययस्वप्नानध्यवसायानामविद्यापदवेद्यत्वेनाप्रमात्वं वैशे-

३८) तर्कसंग्रह: English notes by Athalye P. 182.

...कसंमतम्। तदेवमप्रमापदेन यद्यपि स्मृत्यादीनां संग्रहो न्यायनये विधीयते, तथापि प्राधान्येन विपर्ययस्यैव निर्देशो बहुलमुपलभ्यते। स्मृत्यादीनां विचारस्य पृथगेव विधीयमानत्वादप्रमापदबोध्यस्य विपर्ययस्यैव स्वरूपादिकमधुना विचार्यते।

प्रमाणसिद्धांते प्रमाया इव अप्रमाया अपि वैचारिकदृशा महत्त्वं वर्तते। प्रमास्वरूपनिर्धारायापि तद्भिन्नमप्रमास्वरूपमवश्यनिरूपणीयम्। तेन हि इयं प्रमैवेति दृढतरः प्रत्ययो भवति।

किंच व्यवहारेपि सार्वजनीनानुभवविषयमिदं यत्कदाचिदस्मदीया प्रवृत्तिः सफला, कदाचित्पुनरसफला, विपरीतफला वा भवतीति। तत्र सफलप्रवृत्तेर्मूलं प्रमा, तद्भिन्नायाश्चाप्रमा। एवमेव सकलदुःखसंतानस्यापि मूलं मिथ्याज्ञानमेव,यन्निवृत्त्यै निःश्रेयससाधनं तत्त्वज्ञानं परमकारुणिकेन गौतममुनिना शास्त्ररूपेणोपनिबद्धं इति न्यायविदो वदन्ति।

अप्रमायाः प्रमानिवर्त्यत्वेन, नियमेन आरोप्यविषये सत्यज्ञानसापेक्षत्वेन च यद्यपि प्रमायाः प्राधान्यं निर्विवादं तथापि क्वचिदप्रमामुखावलोकनेनैव प्रमा निरूपणीया भवति। यथा प्रथमप्रामाण्यग्रहे अप्रामाण्याभावमुखेन प्रामाण्यं गृह्यत इति मणिकारःप्राह। उपपादितं चैतत्प्रामाण्यवादे। किंच निर्विकल्पकप्रमायां प्रकाराभावात्तद्घटितप्रमालक्षणस्य तत्राव्याप्तेः अप्रमाभिन्नज्ञानत्वलक्षणमेव विवक्ष्यते।

अप्रमास्वरूपम्– अप्रमास्वरूपविषये'स्थाणौ पुरुषोयमितिव्यवसायोमिथ्योपलब्धिरतस्मिंस्तदितिज्ञानं'इतिभाष्यकृदाह३९।एतेन मिथ्याज्ञानस्यांशद्वयमुपपादितं भवति तत्त्वं,प्रधानंचेति। तत्त्वंनाम धर्मिस्वरूपं स्थाण्वादि। प्रधानं नाम आरोप्यं पुरुषादि।प्रथमःप्रमारूपः,द्वितीयश्चाप्रमारूपः।धर्मिस्वरूपविषये भ्रमस्यप्रमात्वात्।एतदभिप्रेत्यैव सूत्रकारेणोक्तं 'तत्त्वप्रधानभेदाच्च मिथ्याबुद्धेर्द्वैविध्योपपत्तिः'इति'४०'.तत्एव भ्रमांशप्रमायामित्यादयो व्यवहाराः,सर्वं ज्ञानं धर्मिण्यभ्रान्तं,प्रकारे तु विपर्यय इति नियमश्चोपपद्यते'४१'।

---

३९)न्या.भा. ४-२-३४ पृ.८०७ ४०)न्या.सू. ४-२-३७ ४१)सप्तपदार्थी पृ. २४ ...उद्धृतम् Theory of Error in Indian philosophy P. 63

ननु धर्मिण: आरोप्यस्य च सत्यत्वे बाधकेन तत्त्वज्ञानेन कोंऽर्थो निवर्तते? इति चेदुच्यते। तत्त्वज्ञानेन न खलु स्थाणुपुरुषलक्षणोऽर्थो निवर्तते, किंतु मिथ्योपलब्धि: '४२'।

इदं त्ववधेयम्।अप्रमायां नियमेनारोप्यस्य सत्यज्ञानमपेक्षितम्। तथाच अपुरुषे स्थाणौ पुरुषोयमिति व्यवसाय: प्रधानमारोप्यं सत्यं पुरुषमपेक्षते। यावत्सत्य:पुरुषो नोपलभ्यते,यावच्च सत्ये पुरुषे पुरुषबुद्धिर्न जायते, तावत् अपुरुषे स्थाणौ पुरुषोयमितिज्ञानं नैव संभवति। उक्तं च भाष्यकारेण 'न खलु पुरुषेनुपलब्धे पुरुष इत्यपुरुषे व्यवसायो भवति '४३' इति। वार्तिककारोप्याह'सर्व एव मिथ्याप्रत्ययो भविष्यतीति ब्रुवाण: प्रधानमनुयोक्तव्य:। न च मिथ्याप्रधानं विपर्ययप्रत्ययं पश्याम इति '४४'।

अप्रमालक्षणम्– अतस्मिंस्तदितिबुद्धिरप्रमेति सूत्रभाष्यसंमतम्। तदेव लक्षणं तदभाववति तत्प्रकारकज्ञानस्वरूपेण परिष्कृतं न्यायशास्त्रे स्थितिमाप। प्रमालक्षणमिव अप्रमालक्षणमपि संबंधावगाहित्वेनाभिमतम्।तदनुसारच मणिकार:प्राह'यत्र यन्नास्ति तत्र तस्य ज्ञानं,तदभाववति तत्प्रकारकज्ञानं वा अप्रमा'४५'इति।प्रकारांतरेण विशेष्यावृत्तिप्रकारकत्वं वा, प्रकारव्यधिकरणविषयताकत्वं वा अप्रमात्वमिति निरुच्य विविधा: परिष्कारप्रकारा: समुपवर्णिता मणिकारेण। ते च प्रमास्वरूपविचारेणैव गतार्था:।

ख्यातिवाद:– भ्रमात्मकज्ञानप्रक्रियाया विश्लेषणं(प्राधान्येन)त्रेधा संभवति- मनोवैज्ञानिकं,वैषयिकं,तार्किकं चेति'४६'। तत्र मनोवैज्ञानिकं विश्लेषणं मुख्यतया मिथ्याज्ञानकारणानि क्रोडीकरोति।शरीरेंद्रियविषयसंबंधप्रधाना कीदृशी सामग्री शुक्ताविदं रजतमित्यादिरूपामप्रमां जनयतीतिविषयोत्र प्रामुख्येन विचारविषयीक्रियते। वैषयिकविश्लेषणे च अप्रमाविषय: पदार्थ: सन्नसन्ननिर्वचनीयो वाऽन्यादृश एव वेत्यादिविचार:प्रवर्तते। तृतीये च विश्लेषणे प्रमात: कथंकारमप्रमा विभिद्यते, कीदृक्तस्या: स्वरूपं,

४२)न्या.सू.४-२-३५ न्या.भा. पृ.८०८ ४३)न्या.भा. ४-२-३४ पृ. ८०७
४४)न्या.वा. 4-2-34 समुद्धृतं खद्योते पृ. ८०७ ४५)त.चिं. प्र.खं. पृ437
46)Theories of Error in indian Philosophy. Intro. P. 1

ज्ञानप्रक्रियायां किं वा तस्याः स्थानमित्यादि विचार्यते । याथार्थ्यं मिथ्यात्वं वा अध्यवसायस्य कस्मिन्नंशे केन रूपेणावतिष्ठते इति प्रधानोऽत्र विचारणीयोंशः ।

त्रिविधमपि विश्लेषणमवलंब्य विधीयमानो विपर्ययविचारः भारतीयदर्शनेषु ख्यातिवाद इति गीयते । सूक्ष्मेक्षिकया परीक्षण-मस्य विषयस्य विजयानंदकरमहोदयेन विहितमुपलभ्यते'४७'।

प्रकृते संक्षेपतो विषयममुमुपवर्ण्य मणिकृदुक्तसिद्धांतपर्यालोचनं विधीयते ॥ भारतीयदार्शनिकसंप्रदायानुसारं पंचविध-ख्यातिवादः प्रसिद्धः । तथाचोक्तम्—

'आत्मख्यातिरसत्ख्यातिरख्यातिः ख्यातिरन्यथा ।
तथानिर्वचनख्यातिरित्येतत्ख्यातिपंचकम् ॥' इति'४८' ।

रामानुजीयैः सत्ख्यातिरित्यभिनव एव प्रकारो निरूप्यते । माध्ववेदांतिनश्चाभिनवान्यथाख्यातिवादिन इत्युच्यंते। अत्र सर्वत्र तत्पुरुषसमासाश्रयणेन असदादिपदानां विषयपरता बहुभिरुपवर्ण्यते । परं दार्शनिकविचारधारायाः मूलपरिकल्पनां अनुसृत्य कर्मधारय-समासाश्रयणमेवात्र युक्तियुक्तमिति प्रतिभाति ।तदनुसारं आत्मे-त्यादिपदानि ज्ञानापरपर्यायख्यातिविशेषणान्येव । तथाहि आत्म-विषया ख्यातिरात्मख्यातिः, असती ख्यातिरसत्ख्यातिरित्यादिक-मूह्यम् '४९' ।

१) तत्र आत्मख्यातिर्नाम आत्मनो बुद्धेः विषयरूपेण प्रति-भासः । इदं च विज्ञानवादिनां बौद्धानां मतम् । वैभाषिक-सौत्रांतिकावपि अस्मिन्विषये ऐकमत्यमूरीकुर्वन्ति'५०' ।

२)शून्यवादिनस्तु बौद्धाः असत्ख्यातिमेव स्वीकुर्वंति । तन्मते भ्रमविषयीभूतं रजतादि न बाह्यसत्ताकं, नाप्यांतरसत्ताकं, उभ-यथाप्यनुपपत्तेः । प्रथमे भ्रम एव नोपपद्यते । द्वितीये आंतरस्य विज्ञानस्य बाह्यत्वेनावभासः कथमिति दुर्निरूप्यम् । तस्माच्छू-न्यमेव रजतादिकं भ्रमे भासते । तस्य च शून्यत्वमसत्त्वं वा बाधज्ञानानंतरमेव ज्ञायते इति ।

47)Theories of Errors in Indian philosophy. Intro P. 1-15
48)न्या.को. पृ.२५६ 49) ,, पृ. ११ ५०)तत्रैव पृ. ८५

यद्यपि मूलमाध्यमिककारिकाप्रभृतिषु मूलग्रंथेषु असत्ख्यातेः स्पष्टतया निर्देशो, विवरणं वा नोपलभ्यते तथापि तद्विरुद्धेषु वैदिकदर्शनेषु, जैनदर्शनप्रबंधेषु च मतमिदं शून्यवादिनां बौद्धानामिति स्पष्टमुल्लिख्यते '५१'।

इदमत्रावधेयम्। भ्रमविषयस्य रजतादेरसत्त्वं सर्वसंमतमेव। नहि कोपि भ्रमे शुक्तिकायां भासमानं रजतं सदिति मन्यते। तथाप्यसत्ख्यातिरित्यस्य सर्वमेव ज्ञायमानमसदित्यत्र तात्पर्यं माध्यमिकानाम्। तदेवं रजतादेरिव तदधिष्ठानस्य शुक्त्यादेरप्यसत्त्वमिति प्रतिपादनादेवासत्ख्यातिरिति विशिष्य निर्देशोऽस्य मतस्य दर्शनकारैर्विधीयते। माध्यमिकमते सर्वमेव शून्यम्। इयान्पुनरत्र विशेषो यत् असद्विषयकत्वसामान्यात् प्रमाऽप्रमयोरविलक्षणत्वेपि प्रमाविषयस्य शुक्त्यादेरसत्त्वं व्यवहारतिरोहितमिति न ज्ञायते,अप्रमाविषयस्य तु रजतादेर्ज्ञायत इति। तदेवं सिद्धे रजतादेरसत्त्वे तदधिष्ठानस्याप्यसत्त्वं सिद्धयति।

३) प्रभाकरमीमांसकाः अख्यातिवादसमर्थका इत्युच्यन्ते। अख्यातिवाद एव संदर्भानुसारं विवेकाख्यातिः, भेदाग्रहः, असंसर्गाग्रहः,स्मृतिप्रमोषः,इत्यादिपदैर्व्यवह्रियते'५२'। एतेन अख्यातिर्नाम नाप्रतीतिरपि तु प्रतीतिद्वयगतभेदाग्रहःइत्युक्तं भवति।तथाचेदंरजतमित्यत्र इदमिति पुरोवर्तिमात्रग्राहि प्रत्यक्षं, रजतमिति च स्मरणम्। पुरोवर्तितया प्रत्यक्षीकृता शुक्तिः सादृश्यवशाद्रजतं स्मारयति। तदनंतरं पुरोवर्तिना सह रजतस्य भेदो न गृह्यत इति तादृशभेदाग्रह एव भ्रमः। तदेव सर्वं ज्ञानं प्रमात्मकमेवेति प्राभाकरसिद्धांतोऽपि न व्याहन्यते।

जपाकुसुमसंयुक्ते स्फटिके यो रक्तताभ्रमस्तत्र द्वयोः प्रत्यक्षयोर्विवेकाग्रहः। शुक्लवर्णविशिष्टस्फटिकप्रत्यक्षस्य रक्तवर्णविशिष्टजपाकुसुमप्रत्यक्षस्य चभेदाग्रहादेवतत्ररक्तंस्फटिकोपलभितिभ्रमः।

४)अन्यस्यान्यरूपेण प्रतीतिरन्यथाख्यातिः। न्यायवैशेषिकसंप्रदायिनः, भाट्टमीमांसकाश्च मतमिदमाद्रियंते। भट्टानां विपरीतख्यातिरन्यथाख्यातिरेवेति उदयनाचार्यप्रभृतयः प्रतिपादयन्ति।

51,52) Theories of Error in Indian philosophy. P. 44,34

भिन्नैव सेत्यपरे निरूपयंति'५३'। सांख्यानां सदसत्ख्यातिवादो विपरीतख्यातिसमान एवेत्यपि प्रवाद:'५४'।केचन जैनदार्शनिका अपि अन्यथाख्यातिवादिनइत्युच्यंते।न्यायशास्त्राभिमतान्यथाख्यातिवादस्य स्वरूपं मणिकृदुक्तवचनानुसारं पृथगेव पर्यालोचयिष्यते।

५)अद्वैतवेदांतिनस्तु अनिर्वचनीयख्यातिमाहु:। अनिर्वचनीयख्यातिर्नाम सत्त्वासत्त्वाभ्यामन्यतरेण अनिर्वचनीयस्य रजतादे: ख्याति: प्रतीति:। शुक्तिरजतस्थले च रजतं न सत्, भ्रांतिबाधयोरसंभवात्। नाप्यसत् ख्यातिबाधयोरसंभवात्, बाधस्य प्रतियोगिपूर्वकत्वनियमेन असतस्तदसंभवात्। किंतु शुक्त्यज्ञानपरिणामभूतं सदसद्भ्यामनिर्वचनीयं अपूर्वं रजतमुत्पद्यते। तदेव च तत्र रजतज्ञानविषय:। इति '५५'।

६)सत्ख्यातिर्नाम ज्ञानविषयस्य सत्यत्वम्। तर्हि भ्रमत्वं कथमिति चेत् विषयव्यवहारबाधात् भ्रमत्वम्। तदेवमुपपाद्यते। पंचीकरणप्रक्रियया पृथिव्यादिषु सर्वत्र सर्वभूतानां विद्यमानत्वं सिद्ध्यति। अत एव शुक्तिकादौ रजतांशस्य विद्यमानत्वात् ज्ञानविषयस्य सत्यत्वम्। तत्र रजतांशस्य स्वल्पत्वात् तत्र न व्यवहार इति तज्ज्ञानं भ्रम:। इति'५६'।

७)नैयायिकानामन्यथाख्यातिवाद:– अन्यथाख्यातिपदमप्रयुञ्जानोपि गौतम: मिथ्याज्ञानविषये स्वमतं स्पष्टतया समुपन्यासयत्'५७'। न्यायसूत्रं व्याचक्षाणो भाष्यकार: 'अतस्मिंस्तदितिज्ञानं मिथ्योपलब्धि:'इति प्राह'५८'। मिथ्याज्ञानविषयो हि द्विविध: - धर्मिभूत:,आरोप्यभूतश्चेति।उभयविधोपि स सन्नेव। तदेवं मिथ्याज्ञानं बाह्यालंबनमेवेत्युक्तं भवति। ननु तर्हि बाधकज्ञानेन किं निवर्त्यते?इतिचेदत्रैवमुत्तरम्। बाधकं हि रजतादिभ्रमे समारोपितरजताद्यभिमानमेव निवर्तयति, न तु पुरोवस्थितमर्थसामान्यमपि शुक्लभास्वरम्। तथाचोक्तं भाष्यकारेण'तत्त्वज्ञानेन च मिथ्योप-

---

53,54) Theories of error in Indian philosophy. P. 48, 58

५५,५६)न्या.को. पृ.२५६,२५७. विस्तरस्तु यतींद्रमतदीपिकायाम्।

५७)न्या.सू.४-२-३५,३६,३७.मिथ्योपलब्धेर्विनाशस्तत्त्वज्ञानात्स्वप्नविषयाभिमानप्रणाशवत्प्रतिबोधे, बुद्धेश्चैवं निमित्तसद्भावोपलम्भात्, तत्त्वप्रधानभेदाच्च मिथ्याबुद्धेर्द्वैविध्योपपत्ति: इति। ५८)न्या.भा. ४-२-३५ पृ. ८०८

लब्धिर्न निवर्त्यते,नार्थः स्थाणुपुरुषसामान्यलक्षणः' इति '५९'। सामान्यपदेन स 'दृश्यपरिग्रहः',तन्मूलकत्वादभ्रमस्य। सादृश्यमपि सदेव न निवर्त्यते, बाधज्ञानानंतरमपि प्रतीयमानत्वात् ।

मिथ्याज्ञानानां विषयस्य यथा सर्वथाऽसत्त्वं न व्यवस्थापयितुं शक्यं,तथा तेषां ज्ञानानामपि अत्यंतासत्त्वं नैवोपपादयितुं शक्यम् । यतो मिथ्याबुद्धीनां निमित्तानि सामान्यादीनि स्पष्टमुपलभ्यन्ते। सार्वजनीनसंवेदनासिद्धं च तासामवस्थानं न शक्यमपलपितुं'६०'। तदेवं मिथ्याशब्दस्य न्यायनये न तावत्सर्वथाऽसत्त्वमित्यर्थः। किंतु अन्यथात्वमित्यर्थः । अन्यथात्वं च विपरीतधर्माध्यारोपः ।

एतेनेदमुदितंभवति। भ्रमो नाम न तावदर्थशून्यताप्रयुक्तःप्रतीतिविशेषः,किंतु आरोपप्रयुक्तः । तथाहि रजते इदंरजतमिति ज्ञानं रजतं रजतत्त्वेनावगाहते इति यथावस्थितवस्तुविषयीकारित्वेन भवति प्रमा। शुक्ताविदं रजतमिति ज्ञानं तु शुक्तिं अन्यथा – रजतत्वेन रूपेण गृह्णातीति भवति भ्रमः। प्राचीनग्रंथेषु नैयायिकानां मते भ्रमसामान्यस्य स्वरूपं स्पष्टमुपवर्ण्यते । तत एव चेदमवधार्यते यत् भ्रमस्य न केवलं प्रत्यक्षात्मकत्वमपि तु अनुमित्याद्यात्मकत्वमपि । न्यायसूत्रेषु प्रत्यक्षस्य केवलं प्रमात्मकत्वेनैव परिग्रहः । सूत्रानुसारं प्रत्यक्षात्मको भ्रम एव नोपपद्यते। भ्रमस्थले रजतादिना सह इंद्रियसन्निकर्षाभावात् ।

नव्यास्तु भ्रमप्रत्यक्षमात्रपरतया लक्षणमिदं विचारविषयीकुर्वाणाः शुक्ताविदं रजतमिति भ्रमस्य प्रत्यक्षतासंपादनाय इदमंशे लौकिकप्रत्यक्षं,रजतांशे च ज्ञानलक्षणप्रत्यासत्तिजन्यमलौकिकं प्रत्यक्षमित्युपपादयंति। एतन्मते भ्रमस्य ज्ञानद्वयात्मकत्वं सिद्ध्यति।

निर्णयः– वस्तुतस्तु तदभाववति तत्प्रकारकज्ञानत्वमिति लक्षणं सामान्यतया यज्ज्ञानं पुरोवर्तिन्यविद्यमानं धर्ममारोपयति तदन्यथाज्ञानमिति बोधयति । अयं च धर्मः स्वधर्मिणि वर्तत एव इति न शशविषाणवदत्यंतासत् । अत एव आपणस्थं रजतं शुक्तावारोप्यते इत्यादिप्रक्रिया न युक्तियुक्ता । इदंत्वावच्छिन्ने रजतत्वस्य आरोप्यमाणत्वात् ।

५९)न्या.भा.४-२-३५ पृ.८०८ ६०)द्र. तत्रैव ४-२-३६ पृ.८११

एवंच आरोपविषयस्य स्वोपाधौ सत्त्वं,परोपाधौ चासत्त्वमिति तु युक्तियुक्तमवलोक्यते। तथाचात्रायं विवेक:- ज्ञातस्यैव हि आरोप: संभवति। यत्र चारोप: क्रियते, तत्र अविद्यमानमप्यारोप्यं अन्यत्र विद्यमानत्वात्सदेव। अतो न तस्यैव निषेधो बाधज्ञानेन विधीयत इति वक्तुं सुशकम्। स्वोपाधौ तत्सत्त्वेव तत्स्वरूप-निषेधासंभवात्। ततश्च बाधेन आरोप्यविषयसंबंधाभिमान एव नषिध्यत इति युक्तं वच:।

'बाधकेन भ्रमस्य भ्रमत्वबुद्धिरेव बाध:' इति वदता मणि-कारेणापि एतदेव सिद्धांतितम्'६१'।

इयमत्राभिसंधि:। अथेदं रजतमितिज्ञानं कथमयथार्थं इदंरज-तयो: सत्त्वात्। न च तदुभयतादात्म्यमसत्, उभय तादात्म्यं च इत्यतोधिकस्याभावात्, तयोश्च सत्त्वात्, असत्त्वे वा असत्ख्याति:। एवं संसर्गारोपोपीति चेत् अत्रैवं समाधानम्। सन्मात्रविषयत्वेऽपि तदभाववति तत्प्रकारकत्वं,प्रकारव्यधिकरणविषयताकत्वं वा अयथार्थत्वम् '६२'।

वाचस्पतिमिश्रप्रभृतय: प्राचीननैयायिकास्तु शुक्ताविदंरजत-मित्यादिज्ञाने प्रसिद्धया: शुक्तिरजतत्वयो: अलीक एव समवायो भासत इत्यसत्ख्यातिमेवांगीचक्रु:। तत्कथमेष सिद्धांतविरोध: परिहरणीय इति चेत् अत्रैवं समाहितं गंगेशोपाध्यायेन'६३'। तद्यथा प्रांचस्तु तादात्म्यसंसर्गयोरसतोरेव मन्यते विषयत्वम्। न चैवं सति असत्ख्यातिरेवाभ्युपगता भवतीत्याशङ्कनीयम्। सदु-परक्तस्यात्यन्तासत: ख्यात्यभ्युपगमात्। सदनुपरक्तस्याखंडस्या-त्यन्तासत: ख्यातिरसत्ख्यातिरित्युच्यते। सा तु नाभ्युपेयते। कारणाभावात्। विशिष्टज्ञानसामग्रीबलाच्च सदुपरक्तस्या-त्यन्तासत:ख्यातिरुपपद्यते। तदुक्तं वाचस्पतिमिश्रै:-

तस्माद्यदन्यथासन्तमन्यथा प्रतिपद्यते।
तन्निरालंबनं ज्ञानमसदालम्बनं मतम्॥ इति '६४'।

६१-६४) त.चि. प्र.खं. पृ. ५५६, ५६२-५६४

स्मृतिनिरूपणम्

प्रमाऽप्रमारूपेण विभक्तानां सर्वेषामपि ज्ञानप्रभेदानां स्मृत्यनुभवरूपेण द्वैविध्यं निरूप्यते। स्मृतिभिन्नं ज्ञानमनुभव इत्यनुभवसामान्यलक्षणे च स्मृतिमुपादाय तदितरसंशयादिज्ञानांतराणामनुभवपदव्यवहारविषयत्वं निरूप्यते। तथाच ज्ञानप्रक्रियायां प्रतिपादनीयायां स्मृत्यनुभवविवेकज्ञानाय स्मृतेः स्वरूपादिकमवश्यमेव विचारणीयम्। किंच स्मृतिप्रामाण्यविषये बहवो दार्शनिका विप्रतिपद्यंते। समानतंत्रयोर्न्यायवैशेषिकयोरपि विषयेस्मिन् विमतिरुपलभ्यते। अतः स्मृतिप्रामाण्यं प्रथमं पर्यालोच्य ततः स्वरूपलक्षणादिविचारो विधीयते।

स्मृतिप्रामाण्यविचारः—— न्यायवैशेषिकमतम्—

स्मृतिः स्वतंत्रःप्रमाप्रभेद इति वैशेषिकाः'६५'। नैयायिकमते तु सा प्रमाजन्या चेत् यथार्था, अप्रमाजन्या चेदयथार्था'६६'। जाग्रदवस्थायामुभयविधापि स्मृतिर्भवितुमर्हति। स्वप्ने तु सर्वमेव ज्ञानं स्मृतिरूपमयथार्थं च'६७'। वैशेषिकमते तु स्वप्नो नाम पृथगेवाप्रमाप्रभेदः '६८'।

वस्तुतस्तु स्मृतेरप्रामाण्यमेव नैयायिकानामिष्टम्। तच्च न गृहीतग्राहिताप्रयुक्तमपि तु अर्थजन्यत्वाभावप्रयुक्तम्। तथाचोक्तं मंजरीकारेण— 'न स्मृतेरप्रमाणत्वं गृहीतग्राहिताकृतम्।
अपि त्वनर्थजन्यत्वं तदप्रामाण्यकारणम्॥'इति६९।

तथाच निर्दग्धपित्रादिविषयिणी स्मृतिःस्वविषयमर्थमनपेक्ष्यैव प्रवर्तते। एवंच अर्थाभावेपि जायमानत्वात् स्मृतिः अर्थजा भवितुं नार्हति। अर्थमनपेक्ष्य प्रवर्तमानं च ज्ञानं न प्रमाणम्। ननु तर्हि त्रिकालवृत्तिविषयजातं साधयतोऽनुमास्य कथं प्रामाण्यं, तस्यानर्थजत्वात् इतिचेदत्रैवं समाधानम्। नदीवृद्ध्या यद्भूतकालीनवृष्टेरनुमानं तत्र धर्मिणोऽनुमेयत्वात् तस्यच सत्त्वादर्थजमेवेदमनुमानम्। तथाहि नद्याख्य एक धर्मी तत्र वृष्टिमदुपरितनदेशसंसर्गलक्षणेन धर्मेण तद्वाननुमीयते,विशिष्टसलिलपूरयोगित्वात्। स चानु

६५)प्र.पा.भा. प्र.प्र. पृ.१५३. ६६,६७)तर्कभाषा. समुद्धृतं. न्या.को.पृ.१०४० ६८) ,, बुद्धिप्रकरणम् पृ. १३७ ६९)न्या.मं. प्र.प्र. पृ. २१

…नग्राह्यो धर्मी विद्यत एवेति नानर्थजमनुमानं इति। अनागतार्थ-…ग्राहिप्रातिभंप्रत्यक्षमपि विशिष्टरूपेण गृह्यमाणस्य धर्मिणःसत्त्वम-…लंब्य प्रवर्तत इत्यर्थजमेव।इदंच मंजरीकारादिभिरुपन्यस्तंमतं'७०'।

केचित् स्मृतेःस्वप्रामाण्यसंपत्तये स्वजनकानुभवमुखावलोकन-प्रवणतया अप्रामाण्यमिति निरूपयंति। तदेतन्नैयायिकमतम।

मीमांसकमतम्— मीमांसकास्तु श्रुतेः प्रमाणमूर्धन्यत्वव्यवस्था-पनाय स्मृतिग्रंथानां वेदानुसारितया वेदप्रामाण्यमूलकमेव प्रामाण्यं स्वीकुर्वंतः स्वमतपरिपोषाय गृहीतग्राहिताप्रयुक्तमप्रामाण्यं स्मृतीनां निरूपयंति'७१'। तेषामेव प्रभावात् वैदिकेषु न्यायादिदर्शनांतरेषु स्मृतेरप्रामाण्याभ्युपगम इति सुखलाल संघवीमहोदयः प्रतिपादयति'७२'। तदनालोचननिबंधनमिति वैशेषिकनये द्वैतवेदांतादिदर्शनांतरेषु स्मृतिप्रामाण्यस्वीकारदर्शनात् सिद्धं भवति।

मतांतराणि—

मीमांसकमतानुप्रवेशमंगीकृत्य जयंतभट्टमतं प्रत्याचक्षाणःकंदलीकारो गृहीतग्राहित्वादप्रामाण्यं स्मृतेर्निरूपयामास '७३'। लोकव्यवहारबलात्स्मरणमप्रमाणमिति वाचस्पतिमिश्रो निरणैषीत् '७४'। विकल्पज्ञानमात्रस्याप्रामाण्यं स्वीकुर्वंतो बौद्धाः गृहीतग्राहित्वमेव तदप्रामाण्यकारणतया निर्दिशन्ति '७५'। जैनास्तु अबाधितविषयत्वात्संवादित्वाच्च स्मृतिः प्रमाणमेवेति कथयंति '७६'। अद्वैतवेदांतिनां मते स्मृतेः प्रवर्तकतया प्रवृत्त्यंगत्वेन स्मृतिसाधारणस्यापि प्रमालक्षणस्योक्तत्वात्, यथार्थस्मृतेरपि पक्षे प्रमात्वमिष्टमेवेति निश्चीयते '७७'।

---

७०) न्या.मं. प्र.प्र. पृ.२१ ७२) I.L.M. P. 44

७१) 'तत्र यत्पूर्वविज्ञानं तस्य प्रामाण्यमिष्यते। तदुपस्थानमात्रेण स्मृतेः स्याच्चरितार्थता ॥' श्लो.वा. अनु. श्लो.१६० समुद्धृतं I.L.M. P. 44

७३) कंदली पृ.२५७ समुद्धृतं I.L.M. P.44 'ये त्वनर्थजत्वात्स्मृतेरप्रामाण्यमाहुः,तेषामतीतानागतविषयस्यानुमानस्याप्रामाण्यं स्यादिति दूषणं।

७४) न्या.वा.ता. पृ. २० समुद्धृतं I.L.M. P. 45

७५) प्र. वा. २ - ५ समुद्धृतं पा. व्या. प्रमाणसमीक्षा पृ.११

७६) प्रमाणमीमांसा पृ.२३ समुद्धृतं I.L.M. P.46 द्र. ,,

७७) 'अबाधितार्थविषयकज्ञानत्वं' वेदांतपरिभाषा समुद्धृतं ,,

अत्र द्वैतवेदांतिनो विचारक्षोदक्षमं स्वपक्षमुपस्थापयंति। स्मृते-र्याथार्थ्यमस्ति। याथार्थ्यं हि न ज्ञानकाले विषयसत्त्वमपेक्षते,अपि तु ज्ञानोल्लिखितदेशकालयोर्विषयसत्त्वम् '७८'। पूर्वानुभूतं विषयं विषयीकुर्वाणा स्मृतिः तद्देशकालविशिष्टं विषयं गृह्णाति। एवं च स्मृतिकाले विषयस्यातथात्वेपि स्मृत्युल्लिखितदेशकालयोः विष-यस्यातथात्वान्न याथार्थ्यहानिः। यथा पूर्वानुभूतस्य रक्तघटस्य नाशानंतरं स्मृतिकाले तदभावेपि यत्तस्य ग्रहणं भवति तत् तस्य पूर्वतनदेशकालसंबंधमेवावगाहते, न तु स्मृतिसमकालीनम्। न च पूर्वमसौ न तादृश इति वक्तुं शक्यम्। पूर्वतनकाले तस्य तथात्वा-नुभवात्। अतो न स्मृतेरयाथार्थ्यं'७९'। यदि स्मृतिःस्वोत्पत्तिकाले पूर्वानुभवोल्लिखितविशेषणविशिष्टस्य विषयस्य तथैवावस्थानं गृह्णीयात्तदा तस्या अप्रामाण्यं प्रसज्येत। न च तथा भवति।

किंच सतोऽसत्त्वावगाहित्वं,असतःसत्त्वावगाहित्वम् इत्यनयो-रन्यतरस्यैव भ्रमरूपत्वेन स्मृतेर्घटादौ तत्काले असति तत्काला-सत्त्वानवगाहित्वेन न भ्रमत्वम् '८०'।

तथा स्मृतिर्न संस्कारमात्रजन्या, किंतु मनोजन्या। संस्कार-स्तु मनसस्तदर्थसन्निकर्ष एव। ततश्च संस्कारसहकृतं मनोऽननु-भूतामपि निवृत्तपूर्वावस्थां विषयीकुर्वत् स्मरणं जनयेत्। एवंच स्मृतेरनुभवजन्यत्वमपि नास्ति '८१'।

तदेवं स्मृतिर्नाम मानसः साक्षात्कारः। यथा योगींद्रियाणि योगजधर्मविशेषरूपसहकारिकारणवशात्अतीतानागतादिविषयकं ज्ञानं जनयंति, तथा मनःसंन्निकर्षात्मकसंस्काररूपसहकारिकारण वशात् मनः स्मरणं जनयति'८२'। सति चैवं संस्कारेणान्यथासिद्ध-मनुभवमनपेक्ष्य मनः अननुभूतामपि विषयस्य निवृत्तपूर्वावस्थां विषयीकरोति'८३'। एवंचानुभवसमानाकारत्वं स्मृतेरनपेक्षित-मिति सिद्धं भवति। लोकप्रसिद्धिरपि तदा तत्रासौ तादृश इति स्मृत्याकारं निवृत्तपूर्वावस्थावगाहिनं प्रमाणयति '८४'।

---

७८)प्रमाणपद्धतिः टिप्पण्यष्टकयुता पृ.१३४ ७९)तत्रैव 'स्मृतिश्च तत्र तदाऽसौ तादृश इति गृह्णाति। न च तत्र तदाऽसौ तादृशः।'
८०) तत्रैव आदर्शः पृ.१३७ ८१) तत्रैव पृ.१३५
८२,८३) तत्रैव श्रीनिवासतीर्थी पृ१३९ ८४) तत्रैव अभिनवामृतम् पृ.१३७

नच अनुभवजन्यसंस्कारस्य मन:सन्निकर्षत्वकल्पना विनिगमनाविरहादनुपपन्नेति वाच्यं,संस्कारस्य मनसस्तदर्थेन सह सन्निकर्षत्वे बाधकाभावात् । न च संस्कारस्य सन्निकर्षत्वमप्रसिद्धमिति वाच्यं, उपनीतभाननिर्वाहाय नैयायिकैरपि ज्ञानस्य सन्निकर्षरूपताया:स्वीकारात् । ज्ञानवत्संस्कारस्यापि सन्निकर्षत्वसंभवात्‘८५’। तथाच यथा योगजप्रत्यक्षादिषु वर्तमानमात्रविषयाण्यपींद्रियाणि सहकारिसामर्थ्यात् कालांतरसंबंधितां गोचरयंति, तथा संस्कारसहकृतं मनो निवृत्तिमपि विषयीकरोति ‘८६ ।

मणिकारमतम् – गंगेशोपाध्यायस्तु प्रत्यभिज्ञानिरूपणावसरे ‘स्मृतेर्याथार्थ्यमपि कुत:’इत्युदयनाचार्यवचन‘८७’मुपन्यस्य स्मृतेरप्रामाण्यं निरणैषीत् । न्यायनये‘सएवायंदेवदत्त:’इत्यादिप्रत्यभिज्ञारूपं ज्ञानंअर्थजत्वादिंद्रियजत्वाच्च प्रत्यक्षविशेषएव‘८८’।प्रत्यभिज्ञाबलादेव प्राधान्येन नैयायिकैरात्मस्थैर्यं साध्यते:अत:प्रत्यभिज्ञाप्रामाण्यव्यवस्था क्षणिकविज्ञानात्मवादिनां बौद्धानां मतं निराकर्तुमवश्यकरणीया भवति। परं प्रत्यभिज्ञायां तदंशे स्मृतिसान्निवेशात्स्मृतेश्चाप्रमात्वेन तस्याअप्यप्रमात्वं प्रसज्यते।पारोक्ष्यापारोक्ष्यरूपविरुद्धधर्मसंसर्गात् अनेकदेशकालसंबंधस्य चैकस्मिन्धर्मिणि बाधात् प्रत्यभिज्ञाप्रामाण्यं प्रलीयते । तदर्थं स्मृतेरप्रामाण्यं प्रसाध्य प्रत्यभिज्ञाप्रामाण्यं व्यवस्थाप्यते नैयायिकै:। प्रत्यभिज्ञाविषये पुनरपनिर्णयो मणिकारस्य,यत्पारोक्ष्यापारोक्ष्ययोरिहासिद्धे:,इंद्रियजत्वेनापरोक्षत्वनियमात्, तत्तांशस्य च स्मृत्युपनीतत्वात् इंद्रियसंबद्धविशेषणताप्रत्यासत्तेरिति ‘८९’ ।

अत्रेदमवधेयम् । प्रत्यभिज्ञा पुरोवर्तिनि पदार्थे पूर्वकालसंबंधमवगाहते । तत्पदबोध्य:पूर्वकालसंबंधश्च स्मृत्युपनीत: । प्रत्यभिज्ञासमुत्पत्त्यनंतरं साक्षात्करोमीत्यनुव्यवसायो जायते।नच स बाधितो भवति।एतेन प्रत्यभिज्ञाया अपरोक्षत्वं सिद्धं भवति‘९०’।एककाल-

८५) न्या. द. आदर्श: पृ.१३८, श्रीनि० पृ.१३९ ८६) प्र.प. पृ. १३५
८७) न्या.वा.ता.परिशुद्धि: पृ.११० ८८) त.चि.प्र.खं.सविकल्पकवाद: पृ.८८1
८९) तत्रैव ९०) न्या.सू.५-१-31‘ज्ञानविकल्पानां भावाभावसंवेदनादध्यात्मं’ तुल. न्या.कु. ४स्त. ४का- पृ. ४७४

संबंध: कालांतरसंबंधाभावाविनाभूतो न भवतीति स्मृत्युपनीतपूर्वकालसंबंधबोधोपि साधु संघटते। स्मृत्युपनीता तत्ता पुरोवर्तिनि पदार्थे विशेषणतया भासत इति तत्र इंद्रियसंबद्धविशेषणताख्य: सन्निकर्षो विशेषणताविशेषरूप:साक्षात्कारकारणत्वेनाभ्युपेयते९१। योऽहमन्वभवममुमर्थं सोऽहंस्मरामीतिमानसप्रत्यक्षबलादनुभवस्मरणयो: कार्यकारणभाव:सिद्धा भवति। अनुभवे भासमानविषयाणामेव स्मरणेपि भानं,न पुनरननुभूतानाम्। अनुभवे विषयसन्निकर्षोऽपि कारणं,स्मरणे तु केवलं संस्काररूप:सन्निकर्ष:९२। प्रागवस्थास्मरणसहकारिणा चक्षुषा जनिते प्रत्यभिज्ञाने प्रागवस्थाया: संयुक्तविशेषणतया स्फुरणं नतु स्मरणमतो न प्रत्यभिज्ञानं ग्रहणस्मरणाकारम्। केवलग्रहणाकारमेव तत्'९३'। सतिचैवं अनुभूतायास्तत्ताया: स्मृतिविषयत्वं कथमुपपादनीयमिति विचारणीयम् ।

तत्र तत्तास्वरूपं पराभिमतमनुपपद्यमानमुपवर्ण्य बहुविचारित गंगेशेन'९४'। सारांश:पुनरियान् यथा- ननु केयं तत्ता ? न तावदतीतानुभवविषयत्वं, अतीतानुभवविषयत्वस्य अनुभवाविषयतया स्मृत्या तदनुल्लेखापत्ते:। नच तस्यानुभवाविषयत्वेपि यदा ज्ञानांतरेण ग्रहणं तदा स घट इति स्मृति: अन्यथा प्रमुष्टतत्तांशा घट इति वाच्यं, अतीतानुभवविषयत्वस्यानुमितौ भानेपि स इति बुद्धेरभावात्। नाप्यतीतधर्मवैशिष्ट्य ; यदि हि यो वस्तुतोऽतीतो धर्म: तद्वैशिष्ट्य तत्ता तदा अनुभवेपि तद्विषयत्वात्तत्तोल्लेखापत्ति:,अतीतधर्मविशिष्ट: स इति सहप्रयोगानुपपत्तिश्च। नाप्यतीतत्वेन भासते यो धर्मस्तद्वैशिष्ट्यं, भासमानधर्मस्यातीतत्वेनानुभवाविषयत्वात्, प्रत्युत वर्तमानत्वेनानुभवात् स्मृतौ तत्तोल्लेखानापत्ते:। नाप्यतीतसमयसंबंध:, अनागतगोचरस्मृतिप्रत्यभिज्ञयोस्तत्तोल्लेखानापत्ते: '९५' इति । सिद्धांत:पुनरित्थमुपवर्णितो मणिकारेण यत् अनुभवे कालो धर्मांतरं वा यो वर्तमानत्वेन विषय: स एव स्मरणस्य । अनुभवस्मरणयोरेकविषयत्वेपि स्मरणे तत्र तच्छब्दप्रयोग:, संस्कारजज्ञानस्यैव तच्छब्दप्रयोगहेतुत्वात्। अत एव प्रत्यभिज्ञाने

९१-९३) न्या.कु. ४ स्त. कारिका ४ पृ. ४७४ ९४) त.चि. प्र.खं. सविकल्पकवाद: पृ.882-885 ९५) द्र. न्या. कु. प्रकाश: पृ. 458

तत्र तच्छब्दप्रयोगः,प्रत्यक्षानुभवे तत्रैव इदंशब्दप्रयोगः। ननु विषयकृतोऽनुभवस्मरणयोर्विशेषः। अत एव अयंघट इत्यनुभवादयघट इतिनस्मरणं,सघटइतिस्मरणकारण सघटइति नानुभवः'९६'इति।

नव्यमतपरिष्कारः– अस्मिन्पक्षे व्यवहर्तव्यज्ञाने सति व्यवहारेऽधिकानपेक्षणात् उभयत्रोभयशब्दप्रयोगापत्तेर्दुर्वारत्वात्अस्वरसं हृदि निधाय पक्षांतरः प्रतिपाद्यते गंगेशोपाध्यायेन। यथा- 'यद्वाऽयं घट इत्यत्र यद्धर्मवैशिष्ट्यं भासते तस्यातीतत्वं तत्ता। तद्वैशिष्ट्यमननुभूतमपि स्मृतिविषयः। स घट इति स्मृतिप्रति अनुभवस्य हेतुत्वनिर्वाहकतया संस्कारस्य तथैव कल्पनात्। नचैवं स्मृतिः अननुभूततत्तांशेऽनुभवः स्यात्, संस्कारासाधारणकारणकत्वेन स्मृतित्वात्। सहप्रयोगश्च धर्मविशेषमादाय प्रतिविधेयः। अत एव संस्कारहेत्वनुभवप्रामाण्यपारतंत्र्येण यथार्थत्वेऽपि स्मृतिरप्रमेति सर्वतंत्रसिद्धांतः 'इति'। '९७'

इदमत्राकूतम्। स्मृतिः सर्वदा'स घट'इत्यादिरूपा घटादौ भासमाने धर्मे अतीतत्ववैशिष्ट्यमवगाहते।अनुभवस्तु'अयंघट'इत्यादिरूपः सर्वत्रेदंतां विषयीकरोति। सतिचैवं अनुभवजन्यः संस्कारः समानाकारत्वेनेदंतामेव विषयीकुर्वन् कथं तत्ताविषयकं स्मरणं जनयेदितिचेदुच्यते। संस्कारद्वाराऽनुभवस्य स्मरणकारणत्वमन्वयव्यतिरेकसिद्धम्। तन्निर्वाहाय अनन्यगत्या इदंताविषयकस्यापि संस्कारस्य तत्तास्मृतिजनकत्वंकल्प्यम्। नचैवसति अनुभवाविषयतत्ताया विषयीकरणात्तदंशे स्मृतेरनुभवत्व भवतीति शंक्यम्, अनुभवस्य संस्कारेतरसन्निकर्षादिरूपासाधारणकारणजन्यत्वनियमात्, तत्तास्मृतेश्च संस्काररूपासाधारणकारणजन्यत्वान्नानुभवत्वापत्तिः। संस्कारजन्यत्वाच्च स्मृतित्वं न व्याहन्यते।

ननु अननुभूततत्तारूपमतीतधर्मवैशिष्ट्यमनुभवमूलकत्वाभावादयथार्थं भवति। ततएव स्मृतिरप्ययथार्थेति युज्यते इतिचेन्न अयथार्थज्ञानस्य सर्वदा बाधितविषयत्वनियमात्, तत्तांशे च स्मृतेरबाधितविषयत्वेन यथार्थत्वसिद्धेः॥ अबाधितविषयायाः स्मृतेः

९६,९७) त.चि. प्र.खं. सविकल्पकवादः पृ. ८८५, ८८६

अप्रामाण्यं न्यायसंमतं कथमुपपद्यत इति चेदेवम्- अनुभवस्याबाधितविषयत्वे तज्जन्यसंस्कारजन्यस्मृतेर्यथार्थत्वम्, अन्यथा अनुभववत् तस्या अपि बाधितविषयत्वादयथार्थत्वम्। तदेवं संस्कारहेत्वनुभवप्रामाण्यमूलकत्वात्स्मृतिप्रामाण्यस्य परमुखावलोकनप्रवणा स्मृतिरप्रमेति न्यायसिद्धान्तः '९८'।

स्मृतेरप्रामाण्यं प्रकारांतरेणापि निरूपितं गंगेशोपाध्यायेन। तद्यथा- प्रतीतिः सर्वदा समयविशेषमपि विषयीकरोति। तदनुसारं घटोऽस्तीत्यादिवर्तमानत्वविषयकानुभवजन्या, तत्समानविषयत्वेन अतीतानागतविषयाविषयिणी स्मृतिरपि स्वविषयगतं वर्तमानत्वेन विषयीकरोति। अननुभूततत्तारूपपूर्वकालांशे ज्ञानसामग्रीमहिम्ना स्मृतिरुपजायते,नतु संस्कारेण।संस्कारव्यापारस्य तत्रान्यथासिद्धेः।

स्मृतेर्वर्तमानत्वविषयत्वे प्रवृत्त्यन्यथानुपपत्तिरनुमानंचप्रमाणं। तथाहि-अतीतानागतवह्न्यविषयानुमितिस्थले विद्यमानधूमेन वर्तमानत्वविशिष्टवह्निर्निश्चीयते। ततएवच वह्न्यर्थिप्रवृत्तिः।वह्नौ वर्तमानत्ववैशिष्ट्याग्रहे तु तत्संदेहेन प्रवृत्तिर्नस्यात्।किंच व्याप्तावपि वर्तमानत्वाग्रहे प्रवृत्त्यन्यथानुपपत्तिः। तथैव'स घट'इत्यादिस्मृतावपि तत्ताविशिष्टस्य वर्तमानता भासते। संस्कारस्य वर्तमानज्ञानसामग्रीसहितस्यैव स्मृतिहेतुत्वात्। सोयमिदानीमित्यादौ तथा कल्पनात्। ननु प्रत्यभिज्ञास्थले तथाभूतस्य संस्कारस्य स्मृतिहेतुत्वेपि न सर्वत्र तन्नियम इतिचेन्न'गेहे स घटः'इतिस्मरणान्निःशंकप्रवृत्तेः। स्मृतेः स्वविषयवर्तमानत्वाविषयत्वे गृहाधिकरणकघटसत्तायां संदिहानस्य प्रवृत्तिर्नोपपद्येत। तदुक्तं तत्ताविशिष्टस्य इदानीं संदेहे सा न स्यादिति '९९'॥ सतिचैवमनुभवे केवलविषयस्य वर्तमानत्वग्रहात् तत्ताविशिष्टस्य विषयस्य वर्तमानत्वं विषयीकुर्वाणा स्मृतिः तदंशे अननूभूतविषया भवतीति न शक्यम्, वर्तमानत्वेनानागतवर्तमानस्य पूर्वमनुभवात् '१००'।

स्मृतेर्वर्तमानत्वविषयत्वे च इदमनुमानं प्रमाणं- स्मृतिः स्वविषयवर्तमानत्वविषया अतीतातानागतागोचरप्रतीतित्वात् प्रत्यभिज्ञावत्, प्रतीतित्वाद्वा घटोऽस्तीतिप्रतीतिवत्'१' इति।

९८,९९,१००,१) त. चि. प्र. खं. सविकल्पकवादः पृ.८८६-८८८

सिद्धे वर्तमानत्वविषयत्वे स्मृतेरप्रामाण्यमप्युदितं भवति।तथाच श्यामघटस्यपाकरक्तनादशायां श्यामोऽयमितिप्रतीतेःश्यामत्वे वर्तमानत्वावगाहित्वेनायथार्थत्वं लोकव्यवहारसिद्धं। तत्र पूर्वकालावच्छेदेन श्यामताया घटे विद्यमानत्वेपि श्यामत्वे वर्तमानत्वावगाहिज्ञानमप्रमैव। एवमेव स्मृतावपि प्रागुपदर्शितदिशा प्रागवस्थ द्यात्मकतत्ताविशिष्टस्य विषयस्य वर्तमानता विषयी भवति। सा च वर्तमानता विशेष्यविशेषणयोरन्यतरस्य नियमेनानवस्थानात् बाधिता सती स्मृतेरयथार्थत्वं साधयति।

न च विषयस्य पूर्वकाले तथावस्थानात् प्रागवस्थात्मकतत्ताविशिष्टं विषयीकुर्वाणा स्मृतिः यथार्थेवेति वाच्यम्, पाकरक्ते श्यामोऽयमितिज्ञानस्य यथार्थत्वप्रसंगात् '२'।

एतेनेदमुदितं भवति। अतीतानागताविषज्ञानं स्वविषयस्य वर्तमानत्वमपि नियमेन विषयीकरोति। तत्रानुभवात्मकं ज्ञानं विषय वर्तमानत्ववैशिष्टचमवगाहते, स्मृत्यात्मकं तु तत्ताविशिष्टविषये वर्तमानत्ववैशिष्टचम्। घटस्य पाकरक्ततादशायां वर्तमानत्वेन पूर्वकालीनश्यामतावगाहिज्ञानं यथा न यथार्थं भवितुमर्हति तथा स्मृतिरपि प्रागवस्थाद्यात्मकतत्ताविशिष्टस्य वर्तमानत्ववैशिष्टचमवगाहमाना न प्रमा। एतच्च सर्वमुपपादनं प्राचीनमतानुसारेणेति रुचिदत्तमिश्रः '३'।

योगदर्शनानुसारं ग्राह्यग्रहणोभयात्मिका स्मृतिर्जायते। तथाचोक्तं योगभाष्ये 'किं प्रत्ययस्य चित्तं स्मरति, आहोस्वित् विषयस्येति। ग्राह्योपरक्तः प्रत्ययो ग्राह्यग्रहणोभयाकारनिर्भासः तज्जातीयकं संस्कारमारभते। स संस्कारः स्वव्यंजकांजनः तदाकारामेव ग्राह्यग्रहणोभयात्मिकां स्मृतिं जनयति' इति '४'।

किंच ग्राह्यग्रहणाकारत्वस्य अनुभवस्मृत्योः समानत्वेपि प्राधान्यमूलकस्तयोर्भेदः। तथाहि ग्रहणाकारपूर्वाबुद्धिः, ग्राह्याकारपूर्वा स्मृतिः।। एतेनेदमुदितं भवति– बुद्धौ विषयग्रहणं प्रधानं, स्मृतौ तु गृहीतो विषयः प्रथममुपस्थितो भवतीति ग्राह्यं प्रधानम्।

---

२) त.चि. प्र.खं. पृ.८८८. ३) प्रकाशः पृ.८८७ ४) योगभाष्यं १-११ समुद्धृतम् The हेयपक्ष of Yoga Section 7 पृ.133

प्रकृतविचारानुकूलः पुनरेष । विषयेऽत्रावधारणीयः । स्मृतौ वर्तमानकालो विषयो भवति वा न वा इति । प्रमुष्टतत्ताकस्मरणे भूतकालस्याविषयत्वात्, स्मृतिर्नियमेन पूर्वकालविशिष्टं विषयमेव गृह्णातीति एतन्न सिध्यतीति विज्ञानभिक्षुः प्रभृतयः । योगसूत्रानुसारं तु स्मृतिः पूर्वकालीनविषयमेव गृह्णाति । यथोक्तम्– संस्कारसाक्षात्करणात्पूर्वजातिज्ञानम् इति ।

वस्तुतस्तु योगदर्शनानुसारं अनुमत्यादीनामिव स्मृतेरपि वर्ततेऽवस्थात्रयम् । तत्र योगजविलक्षणधर्मसहकृता, अतीतसकलविषयपदार्थसार्थस्मरणजननक्षमा संस्कारसाक्षात्करणरूपा परमावस्था, लौकिकप्रत्यक्षस्येव अनुभूतविषयासंप्रमोषरूपस्मृतिजननसमर्था द्वितीयावस्था, मध्यावस्था वा, प्रमुष्टतत्ताकस्मरणकारणीभूता च तृतीयावस्थेति । प्रथमतृतीययोरवस्थाविशेषयोरन्तराले वर्तमाना सार्वजनीना स्मृतिः, कदाचित्पूर्वावस्थां कदाचिदुत्तरावस्थां च स्पृशन्ती देशकालादिसंबन्धं तद्विरहं वा भजत इति पाठकमहाशयो निरूपयति । 106

ननु स्मृतेरप्रमात्वे पदजन्यपदार्थस्मरणस्याप्रमात्वेन सर्वत्र तन्मूलकस्य शाब्दज्ञानस्याप्रमात्वप्रसङ्गः । सति चैवं लोकवेदयोः शब्दव्यवहारस्याप्रमामूलकत्वेन प्रामाण्योच्छेदापत्तिः । इति चेदत्रैवं निर्णीतं मणिकारेण– यस्मिन् स्मरणे तत्तांशः प्रमुष्टः सन्न भासते तत्र प्रागवस्थाद्यविद्यमानधर्माणां धर्मिण्यनवगमान्न याथार्थ्यभङ्ग 107 । तेन घटादिपदजन्यं घटादिपदार्थस्मरणं प्रमुष्टतत्ताकमेवेति तन्नायथार्थम् । तत्तोल्लेखिस्मरणस्यैवायथार्थत्वादिति ।

वस्तुतस्तु घटस्य पाकरक्ततादशायां जायमाना श्यामोऽयमिति प्रतीतिर्बाधिता भवति, तत्राविशिष्टं विषयं विषयीकुर्वाणा स्मृतिस्तु न कदाऽपि बाधिता भवति । एवं चाबाधितविषयायाः स्मृतेर्याथार्थ्यं न केनाप्यन्यथयितुं शक्यम् । अत एव वैशेषिकादयोऽत्रस्मृतेर्याथार्थ्यमुद्घोषयन्ति । नन्वनैयायिका अपि स्मृतेरबाधितविषयत्वेन याथार्थ्यं स्वीकुर्वाणाः स्वसमयसिद्धं स्मृतेरप्रामाण्यं केवलं स्वजनकसंस्कारकारणीभूतानुभवप्रामाण्यपारतन्त्र्येण साध-

---

105 योगसूत्रम् 3.18 समुद्धृतम् The हेयपक्ष ऑफ Yoga Sect 7 पृ 135

106 The हेयपक्ष of yoga पृ 138, 107 द्र. त. चि

यन्ति। परतन्त्रं स्वतन्त्रं वा प्रामाण्यं प्रामाण्यमेव भवितुमर्हति। नहि प्रयत्नशतेनापि तत्स्वरूपमन्यथयितुं शक्यम्। तस्मात् स्मृतिप्रामाण्यपक्ष एव ज्यायान् इति सुप्रतीयते। तदेवमनुभववत् स्मरणमपि प्रमाऽप्रमारूपेण द्विविधं भवतीति सूपपादम्।

यत्पुनरनुभवप्रामाण्यपारतन्त्र्येण प्रामाण्यमासादयन्त्याः स्मृतेरप्रामाण्यमिति नव्यन्यायसंप्रदायविदो वदन्ति, तेषामयमाशयः, अनुभवानन्तरं सुदूरदेशकालभाविनी स्मृतिः स्वप्रामाण्यनिश्चयाय नहि संवादादिकमवलम्बते, विषयाणां तदानीमभावात्। ततश्च स्वजनकसंस्कारजनकानुभवप्रामाण्यनिश्चय एव स्मृतिप्रामाण्यनिर्णयानुकूलो भवति। न च अनुमितिप्रामाण्यस्य परामर्शप्रामाण्यपरतन्त्रत्वात् शाब्दबोधप्रामाण्यस्य च वाक्यज्ञानप्रामाण्यपरवशत्वात् तयोरपि स्मरणवदप्रामाण्यप्रसङ्गः इति वाच्यम्। तत्र कार्यकारणभाववैलक्षण्यावगमात्। तथाहि कारणीभूतपरामर्शवाक्यज्ञानयोः प्रामाण्ये निश्चिते ताभ्यामप्रमात्मकानुमितिशाब्दबोधयोरुदयः कदापि न संभवति। अनुभवस्मरणयोस्तु न तथा। सत्यपि प्रामाणिके अनुभवे कालादिजनितदोषवशात् लुषितेन संस्कारेणाप्रामाणिकस्मरणोत्पत्तेरस्त्यवसरः। किं च प्रणिधानवैकल्याद् उद्बोधकदोषवशाद्वा क्वचिदनुभवविसंवादिनी स्मृतिरुदेतुमर्हति 108

अन्यच्च स्मरणात्मकस्यान्यपदार्थज्ञानस्याप्यनुभवमूलकत्वात् प्रामाण्यप्रसङ्गः। अतः सर्वासां स्मृतीनां प्रामाण्यस्य नियमेनानुभवप्रामाण्यनिश्चयाधीनत्वादप्रामाण्यमेव 109 इति।

स्मृतिप्रक्रिया

सूत्रभाष्याद्यनुसारं न्यायनये स्मृतिप्रक्रिया, आत्मा, मनः, आत्मप्रयत्नपूर्वकं मनसः प्रणिधानं चेति त्रितयं क्रोडीकरोति 110। स्मृतिश्च कदाचिच्छीघ्रमेव भवति, कदाचित्तु दीर्घकालप्रणिधानानन्तरं विलम्बेन भवति 111। तत्र सुस्मूर्षया प्रेरित आत्मा स्मर्तव्यविषये प्रणिधानरूपं मनोव्यापारं जनयति 112। तदनन्तरं पूर्वानुभवजनितात्म-

---

108 तर्कसंग्रहः English notes by Athalye पृ. 359, 109 तत्रैव

110 न्या. भा. 3,2,28 पृ. 580 111 न्या. सू. 3,2,30 न्या. भा. च पृ. 582

निष्ठभाव (?)ध्यमस्क(?)रवशा स्मरणं जायते 113 । नानाज्ञानसंतान-जनितेषु आत्म मनेतेषु संस्कारेषु यदा पुनरमाधार(?)लिङ्गविचिकासा स्मरणं यार्थविशेषस्य विषयभूतस्य चिन्तनं चिरकालव्यापेक्षमवतिष्ठते तदा विलंबेन स्मरणमुत्पद्यते 114 । तदनुसारेण आत्ममनःसंयोगस्य संस्कारस्य च स्मृतिकारणत्वेऽपि प्रणिधानादीनामेकविंशतिसंख्याकानां कारणानामयौगपद्यात् स्मृतीनामयौगपद्यमिति सूत्रभाष्यादिग्रन्थेषु प्रतिपाद्यते 115 । स्मृति-विशेषरूपे प्रातिभज्ञाने चाकस्मिकस्वज्ञानं कारणकलापानवबोधनिबन्धनत्वात् भ्रम एव । अतः प्रणिधानाद्यनपेक्षं स्मरणमेव न संभवतीति ध्येयम् । मंजरी-कारादिमते च प्रत्यक्षरूपमपि प्रातिभं ज्ञानमस्तीत्यन्यदेतत् 116 ।

वैशेषिकमते तु स्मृतौ संयोगविशेषेऽसमवायिकारणम्, संस्कारो निमित्तकारणम्, आत्मा च समवायिकारणमिति विज्ञेयम् । नैयायिकमते तु स्मृतिं प्रत्यनुभवः कारणम्, संस्कारो व्यापारः, तज्जन्यत्वे सति तज्जन्यजनकत्वात् । आत्ममनःसंयोगस्तु ज्ञानसामान्यं प्रत्यसमवायिकारणम् ।

'श्रद्धावीर्यस्मृतिसमाधिप्रज्ञापूर्वक इतरेषाम्' इति योगसूत्रे 117 स्मृतिपदेन ध्यानं परिगृह्यते वाचस्पतिमिश्रेण । तच्च ध्यानम् न प्रत्ययैकता-नतारूपम् 118 अपि तु समाधिपूर्वकालीनोऽवधानविशेषः । योगदर्शने स्मृतिप्रक्रिया प्रणिधानरूपे नोव्यापारे महानादरभरो विलोक्यते यतः स एव तास्वपि बहुषु संस्कारविषयेषु विहायान्यान् प्रकृतमेव विषयं यथावत् प्रकृत-स्मृतिगोचरं करोति । अत एव कैश्चित् स्मृतेः मनोद्वारे रक्षार्थमवस्थानमुप-वर्ण्यमानं युज्यते । उपनिषत्स्वपि स्मृतेरवधानार्थकतया प्रयोग उपलभ्यते । यथा छान्दोग्ये- 'सत्त्वशुद्धौ ध्रुवा स्मृतिः । स्मृतिलम्भे सर्वग्रन्थीनां विप्रमोक्ष ।' इति 119 ।

---

112 न्या. भा. पृ. 58 । 113 तत्रैव 3.2.25 पृ 577

114 न्या, भा. 3;2;30 पृ. 582 115 न्या. सू. 3;2:33, न्या. भा. पृ. 588 वै सू. 1;2;6 प्र. पा. भा पृ 207 द्र न्या को पृ 1045-1046

116 द्र न्या मं प्र प्र पृ 21 117 योगसूत्रम् 1;2 118 तत्रैव 3:2

119 छान्दोग्योपनिषत् 7;26:2 द्र The हेयपक्ष of yoga, Section 7 पृ 130 31

स्मृतिलक्षणम् —

उपरि निर्दिष्टेषु कारणेषु संस्कारस्यैव स्मृतिं प्रत्यसाधारणकारणत्वेन संस्कारजन्यं ज्ञानं स्मृतिरिति तल्लक्षणं नैयायिकैः प्रतिपाद्यते 120। अत्र प्रत्यभिज्ञां व्यावर्तयितुं संस्कारमात्रजन्यमिति मात्रपदप्रयोगो नवीननैयायिकैरपेक्ष्यते। प्राचीनास्तु अनुभवादीनामपि स्मृतिकारणत्वेन मात्रपद संनिवेशो न योग्य इत्यभिप्रयन्ति 121। तन्मते संस्कारजन्यत्वोक्त्यापि प्रत्यभिज्ञाव्यावृत्तिः। प्रत्यभिज्ञायां संस्कारो न साक्षात्कारणमपि तु तत्ताविषयक-स्मृतिजननद्वारा। स्मृतौ तु संस्कारः, साक्षादेव कारणम् इति 122।

तत्र तत्तांशेन प्रत्यभिज्ञायाः संस्कारजन्यत्वं, न तु तत्तास्मृतिरेव प्रत्यभिज्ञाकारणमिति नीलकण्ठादयः प्राहुः। एतेनमात्रपदस्य चक्षुराद्यजन्यत्वे सतीति नीलकण्ठादिभिरुपपादितोऽर्थः सङ्गच्छते।

ज्ञातविषयकं ज्ञानं स्मृतिरिति तर्कभाषाकारः [4]। अनुभूतविषया-संप्रमोषः स च स्मृतिः इति योगदर्शनम् [5]। असंप्रमोष इत्यनेन स्मृतेः वैलक्षण्यं बोध्यते। सामान्यतः प्रकारतो वा अननुभूतविषयविषयीकरणं संप्रमोषः। स च प्रत्यक्षादिषु दृश्यते। स्मृतिस्तु न पूर्वानुभवमर्यादामतिक्रा[illegible]। स्मृतिजनकसंस्कारकारणीभूतानुभवावभासितविषयापेक्षया किञ्चिदधि[illegible] वयपरिग्रहो हि संप्रमोषः। स च स्मृतौ न संभवति, तस्याः नि[illegible] तद्विषयत्वात् तदून्रविषयत्वाद्वा इति [6]।

कारणकलापः —

देवमनुभवजन्यो भावनाख्यसंस्कारविशेषः स्मरणकारणमिति न्यायवेद[illegible]नम्। तत्र स्मरणस्याकस्मिकत्वाभावात् उद्बुद्धस्यैव संस्कारस्य स्मृ[illegible]हेतुत्वमिष्टम्। संस्कारोद्बोधकाश्च सदृशदर्शनादयः [7]।

---

1 [illegible]दीपिका पृ. २२ 2 तर्कसंग्रहः English Notes by Athalye
3 [illegible] पृ 1045, न्या कु प्रकाशः, पृ 474 4 समुद्धृतम् न्या को पृ 1045
5 [illegible]म् 1:11 समुद्धृतम् The हेयपक्ष of yoga पृ 132 6 समुद्धृतम्
The [illegible] of yoga, Section 7 पृ 132-133 7 न्या को पृ 1046

कारणतावच्छेदकधर्मविचारः—

स्मृतिं संस्कारं चानुभवो जनयतीति निर्विवादम्। परं तद्विषयकोऽनुभवः किमनुभवत्वेन रूपेण कारणमुत ज्ञानत्वेन रूपेणेत्यत्र वर्तते मतभेदो विदुषाम्। प्राचां मते अनुभवस्यानुभवत्वेन रूपेणैव कारणत्वम्। तेषामयमाशयः, अनुभवे अनुभवत्वं ज्ञानत्वं चेति वर्तते धर्मद्वयम्। तत्र प्रथमो धर्मो व्याप्यः, द्वितीयश्च व्यापकः। व्याप्यधर्मपुरस्कारेण कारणत्वसंभवे व्यापकधर्मस्यान्यथासिद्धिनिरूपकत्वात् ज्ञानत्वेन रूपेण कारणत्वमाश्रयेयम्। उभयोरपि जातित्वेन ज्ञानत्वापेक्षयाऽनुभवत्वस्य कारणतावच्छेदकत्वकल्पने गौरवाभावाच्च।

नव्यनैयायिकमते तु ज्ञानत्वेन रूपेणैवानुभवस्य कारणत्वं कल्प्यम्। अन्यथा तद्विषयस्मरणानन्तरं तद्विषयस्मरणान्तरोत्पत्त्यनुपपत्तिः।

तथाहि सकृदनुभूते विषये तदनुभवजनितसंस्कारस्य स्मरणरूपफलोत्पत्त्यनन्तरं नष्टत्वात् तद्विषयकस्मरणान्तरं नोत्पद्येत। कारणाभावे कार्योत्पादासंभवात्। अतः तादृशस्मरणोत्पादनाय प्रथमानुभवः स्वजन्यसंस्कारनाशेऽपि स्वजन्यस्मरणजन्यसमानाकारकसंस्कारान्तरमुखेन सकृदनुभूतविषयस्य स्मरणान्तरं जनयतीति वक्तव्यम्। तदेव द्वितीयस्मरणं प्रति पूर्वानुभवः स्वजन्यस्मृतिमुखेन कारणं भवति न पुनरनुभवत्वेन रूपेण। ततस्तत्परिग्रहार्थमनुभवः स्वजन्यस्मृतिमुखेन कारणं भवति न पुनरनुभवत्वेन रूपेण।

ततस्तत्परिग्रहार्थमनुभवः ज्ञानत्वेन रूपेण कारणं भवतीति स्वीकर्तव्यम्। तेनानुभवस्य तज्जन्यस्मरणस्य च कारणत्वेन परिग्रहात् अनुभवजन्यस्मरणोत्पादितसंस्कारस्मृत्योरुपपत्तिर्भवति। न च तथा सति स्मरणस्यैव द्वितीयस्मरणादिकं प्रति कारणत्वमस्तु इति वाच्यम्। स्वातन्त्र्येण स्मरणस्य स्मृतिकारणत्वासंभवात् (८)।

अत्रायं विशेषोऽनुसन्धेयः। प्राचां मते कालस्य रोगस्य चरमफलस्य वा संस्कारनाशकत्वम्, न तु स्मरणरूपफलोत्पत्तेः। अन्यच्च समूहालम्बन-

---

(८) न्या सि मु पृ ३२५, दिनकरी च पृ ३२, स्मरणस्य तृतीयक्षणे नाशेन स्वरूपतो हेतुत्वासंभवात्।

त्मकज्ञानोत्तरं जायमाने घटपटादिविषयके क्रमिकस्मरणे कारणव्यवस्थाविलोपप्रसंग। तादृशज्ञानजन्यसंस्कारस्य घटविषयकस्मृत्युत्पत्तिसमनन्तरमेव नाशात्। किं च एकविषयकस्मरणधारायां अनन्तसंस्कारतद्ध्वंसकल्पनापेक्षया चरमस्मरणस्यैव संस्कारनाशकत्वकल्पने लाघवम् (९)।

नव्यमते तु प्रत्येकं स्मरणानां स्वजनकसंस्कारनाशकत्वम्। अतस्तन्मते स्मरणस्यैव ज्ञानत्वेन रूपेण एकविषयकस्मरणधारायां स्मरणान्तरकारणीभूतसंस्कारजनकत्वम्, स्वजनकसंस्कारनाशकत्वं च कल्पनीयम्।

निर्णयः—

इदं त्ववधेयम्। संस्कारस्य व्यापारत्वेन फलोत्पत्तिसमनन्तरमेव विनाश्यत्वं नवीनमते संगच्छते। चरमस्मरणस्य च निर्धारयितुमशक्यत्वात्केन स्मरणेन संस्कारनाश इति दुर्वचम् प्राचां मते। तथापि करणस्य फलव्यापारौ प्रति समानरूपेण कारणत्वनियमात्, अनुभवस्य ज्ञानत्वेन रूपेण स्मृतिकारणत्वस्वीकारे तेनैवरूपेण तस्य संस्कारकारणत्वमपि स्वीकार्यम्। ततश्च चरमस्मृत्यनन्तरमपि तयैव स्मृत्या संस्कारजननसंभवात् स्मृत्यन्तरापत्तिः (१०)। चरमस्मृत्यक्तीनां संस्कारप्रतिबन्धकत्वकल्पनं तु अनन्तप्रतिबध्यप्रतिबन्धकभावकल्पनाप्रयुक्तगौरवात्पराहतं वेदितव्यम्। तदपेक्षया अनुभवत्वेन हेतुताकल्पने लाघवमस्तीति प्राचीनपक्ष एव प्रामाणिकः।

योगदर्शने स्मृतेरपि संस्कारकारणत्वमुपवर्ण्यते ११। तच्च नव्यन्यायमतमनुपोद्बलयतीति द्रष्टव्यम्।

मनो निरूपणम्

ज्ञानसामान्यप्रक्रियायां, आत्ममनःसंयोगे, त्वङ्मनःसंयोगे चोपात्तं मनः, स्मृतिप्रक्रियायां 'मनसा स्मरामि' इत्यादिव्यवहारबलात्, किमप्यसाधारणं महत्त्वं धारयतीत्यवश्यमभ्युपेयम्। तदुपपादनाय सङ्क्षेपतो मनस्तत्त्वं तावद्विचार्यते।

---

९) तत्रैव पृ ३२४ ३२७ (१०) रामरुद्री पृ ३२७

११) योगभाष्यम् ४-९, यदा च वासनास्तथा स्मृति स्मृतेश्च पुनः संस्कार इत्येवमेते स्मृतिसंस्काराः- समुद्धृतम् The हेयपक्ष of योग पृ १३३

ऋग्वेदादिषु मनसा वर्ण-मुपलभ्यते (१२)। विशेषतो वाजसनेयिसंहितायां तस्य ज्ञानप्रक्रियायां विद्यमानमपूर्वं स्थानमु वर्ण्यते (१३)।

किञ्च 'मनःषष्ठानीन्द्रियाणि' इति भगवद्गीतायां [१४] बाह्येन्द्रियाधिष्ठातृत्वेन मनसः पृथक्निर्देशो न पुनरनिन्द्रियत्वेन। 'इन्द्रियाणां मनश्चास्मि' [१५] तत्रैव मनस इन्द्रियत्वनिरूपणात्। उपनिषदादिषु परमपुरुषार्थप्राप्त्युपायनिरूपणपरेषु इन्द्रियनिग्रहस्य मनोनिग्रहसाध्यत्वेन वैराग्यसंपत्तये विषयपराङ्मुखतामुखेन तदावश्यकतां प्रतिपाद्य इन्द्रियादीनामश्वत्वादिकमिव मनसः प्रग्रहत्वमुपवर्ण्यते [१६]। संकल्पात्मकं च मनो मूलं सकलकर्मणाम्। अत एवोच्यते- 'मन एव मनुष्याणां कारणं बन्धमोक्षयोः' इति।

मनःसिद्धिः

मनो न खलु बाह्येन्द्रियगम्यं अतीन्द्रियत्वात्, नापि मनोगम्यं तस्यैव सिद्धत्वात्। अतो न्यायनये अनुमानेनैव मनोरूपद्रव्यसिद्धिः।

तत्र कणादमतानुसारं (१७)- सत्यप्यात्मेन्द्रियार्थसन्निकर्षे यज्ज्ञानं कदाचिदुत्पद्यते कदाचिन्नोत्पद्यते तदेव मनःसत्त्वे प्रमाणम्। अस्यायमाशयः ज्ञानोत्पत्तौ मनःसन्निकर्षो यदि नापेक्ष्यते तदा सति बाह्येन्द्रियार्थसन्निकर्षे विभुनात्मना सह इन्द्रियार्थयोः संयोगस्य सर्वदा विद्यमानत्वेन ज्ञानस्य सार्वदिकत्वं यौगपद्यं चापद्यते। न च तथा केनाप्यनुभूयते। प्रत्युत सत्यपीन्द्रियार्थसन्निकर्षे ज्ञानायौगपद्यं असार्वदिकत्वं च 'नाहमेतदश्रौषमन्यत्र मे मनोऽभूत्' इति व्यवहारबलात्सिद्धं भवति (१८)। एवं च सत्यपीन्द्रियार्थ-

---

१२) ऋग्वेदः, नासदीयसूक्त १० १२९ ४. कामस्तदग्रे समवर्तताधि मनसो रेतः प्रथमं यदासीत् १३) वाजसनेयिसंहिता 'तन्मे मनः शिवसंकल्पमस्तु'- समुद्धृतम् इंडियन एपिस्टेमोलॉजी पृ.२९

१४) श्रीमद्भगवद्गीता अ १५ श्लो ७ ९ १५) तत्रैव- अ १० श्लो २२ १६) कठोपनिषद- १-२ श्रीमद्भगवद्गीता च अ ३ श्लो २४ ७ अ ६ श्लो ३४ ३५ १७) वै सू ३ २ १

१८) द्रव्याणां द्वितीय- भागः पृ ४४

सन्निकर्षे ज्ञानस्य भावाभावौ स्वकारणीभूतमात्ममनःसंयोगं चाक्षिपन्तौ मनः साधयतः।

मनःसाधकयुक्त्युपन्यासे च 'युगपज्ज्ञानानुत्पत्तिर्मनसो लिङ्गम्' इति गौतममुनिरसूत्रयत् [१९]। तेनेदमुदितं भवति– यदि मनःसंयोगमनपेक्ष्य इन्द्रियार्थसन्निकर्षस्य ज्ञानजनकत्वमुच्यते तदा युगपदेककालावच्छेदेन घ्राणादीनां गन्धादिभिः सह सन्निकर्षे विद्यमाने युगपद्गन्धादिविषयकाण्यनेकज्ञानान्युत्पद्येरन्। न च तथोपलभ्यते। तेनानुमीयते यदिन्द्रियसंयोगि सहकारि निमित्तान्तरमप्यस्ति वर्तते इति। तदेव च मनः इति मनसिद्धिः।

भाष्यकारस्तु स्मृत्यनुमानागमसंशयप्रतिभास्वप्नज्ञानोहाः सुखादिप्रत्यक्षमिच्छादयश्च मनसो लिङ्गानीति सूत्रानभिहितान्यपि लिङ्गान्युपन्यस्यति (२०)। अत्र स्मृत्यादिकं न बाह्येन्द्रियजन्यं भवितुमर्हति नाप्यकारणकमतः स्मरणाद्यन्यथाऽनुपपत्त्या मनः कल्प्यते इति भावः (२१)। तदेवं करणं सुखादिसाक्षात्कारेण कारणं मनोऽनुमीयते। यथा सुखादिसाक्षात्कारः करणसाध्यः, जन्यसाक्षात्कारत्वात् चाक्षुषसाक्षात्कारवदिति।

मणिकारोपि 'ज्ञातकरणाजन्यः', सुखाद्यनुभवः, इन्द्रियजन्यः', जन्यप्रत्यक्षत्वात्, रूपप्रत्यक्षवत्' इत्यनुमानेन सुखाद्यनुभवस्य इन्द्रियजन्यत्वसिद्धौ घ्राणादीनां गन्धादेकैकमात्रसाक्षात्कारजनकत्वेन तज्जनकत्वासंभवात् मनसः सिद्धिरिति निरूपयामास (२२)।

सुखादुःखाद्युपलब्धिसाधनमिन्द्रियं मनः प्रतिशरीरमेकमेव। ज्ञानायौगपद्येनैतदध्यवसीयते। ज्ञानायौगपद्यं हि द्विविधम्– एकेन्द्रियकरणकानां ज्ञानानामयौगपद्यमेकम्, नानेन्द्रियकाणां ज्ञानानामयौगपद्यमपरम्। तत्र स्वभावएवायं करणानां यदेकस्मिन् क्षणे एकस्यैव कार्यस्य जननमिति। तस्मात् प्रथमं ज्ञानयौगपद्यं न मनस एकत्वे अनेकत्वे वा लिङ्गं भवितुमर्हति। द्वितीयं तु नानेन्द्रियाणां नानाविषयेषु ज्ञानायौगपद्यं तदेव मनस एकत्वं

---

१९) न्या सू १ १ १६ । २०) न्याभा १ १ १६ पृ ४३
२१) द्र न्या मं द्वितीयभागः पृ ४३ । २२) त चि प्र ख पृ ८२३

साधयति । यदि बहूनि मनांसि स्युः प्रतीन्द्रियं युगपदपि मनःसन्निकर्षे युगपदनेकार्थसन्निधाने युगपदनेकानि ज्ञानान्युत्पद्येरन् । न च तथा भवति । ततः प्रत्ययपर्यायादेकमेव मनः इति सिद्धं भवति (२३) ।

भाट्टमीमांसकास्तु मनसो विभुत्वमभ्युपगच्छन्ति । तन्मतं विस्तरेणोपपाद्य कुसुमाञ्जलिकारोपदर्शितदिशा दूषितं गंगेशेन [२४] ।

न्यायनये अध्ययनदर्शनश्रवणादीनां यद्यौगपद्यमनुभूयते तदलातचक्रदर्शनवद् भ्रम एव । अलातभ्रमणानामिव ज्ञानानामपि क्षणिकत्वादतिशीघ्रमुत्पद्यमानानां विद्यमानोऽपि क्रमो नोपलभ्यते । अत एव यौगपद्यभ्रमो भवति (२५) ।

न च यौगपद्यप्रतीतिर्भ्रमात्मिकेत्यत्र किं विनिगमकमिति वाच्यम् । नानाविषयकज्ञानानां क्रमिकत्वस्य सर्वसंमतत्वादेकविषयकज्ञानानामपि क्रमिकत्वमनुमीयते । अनुमानप्रयोगश्चेत्थम् - घटज्ञानानि क्रमिकाणि, ज्ञानत्वात्, घटपटमठविषयज्ञानवदिति । बुद्धीनामाशुवृत्तित्वं चात्र क्रमाग्रहणे निमित्तम् (२६) । एवं च ज्ञानानामयौगपद्यात् प्रत्यात्मनियतं मनः एकमेवेति सिद्धम् । तत एव मनसोऽणुत्वमपि सिद्धं भवति । तस्य विभुत्वे सर्वदा तत्संयोगस्य विद्यमानत्वात्, ज्ञानस्य सार्वदिकत्वं यौगपद्यं च प्रसज्यते ।

स्मृतिप्रक्रियायां मनस उपयोगः पुनरेवमुपपद्यते 'कर्मविपाकः संवेदनं दर्शनम्' इति भाष्यवचनानुसारं [२७] कर्मविपाकवशात् शरीरसमाविष्टस्यैव मनसः ज्ञानजननोपयोगित्वं संभवति इति ।

अत्रायमाक्षेपः । यद्यपि मनःसंयोगस्य ज्ञानकारणत्वोपगमेन ज्ञानयौगपद्यमापादयितुं न शक्यम्, तथापि प्रकारान्तरेण स्मृतीनां यौगपद्यमापद्यते । तथाहि स्मृतिहेतुभूताः संस्काराः कारणभूतज्ञानानन्त्यात् अनन्ताः समवायेन आत्मनि तिष्ठन्ति । तत्र च आत्ममनःसंयोगस्य सर्वदा विद्यमान-

---

२३) न्या. भा. ३-२-५६, पृ. ६३१, ६३२.

२४) त. चि. प्र. ख. पृ. २२८ – २४०.

२५) द्र. न्या. भा. ३.२-५७.५८. पृ. ६३२ न्या. मं. च द्वितीयभाग पृ ४४

२६) न्या. भा. ३-२-५८ पृ. ६३४. २७) तत्रैव ३-२-६८ पृ ६५३

त्वात् कारणयौगपद्येन कार्यभूतानां स्मृतीनामपि यौगपद्यं प्रसज्यते इति ।

अत्र नैयायिकैकदेशिनः एवं समादधते । 'ज्ञानजनिताः संस्काराः खलु विभोरात्मनो विभिन्नप्रदेशावच्छेदेन वर्तन्ते । अणुपरिमाणस्य च मनसः संयोग एकस्मिन् क्षणे एकेनैवात्मप्रदेशेन भवति । तस्मिन् प्रदेशे विद्यमानेन संस्कारेण तदानीं मनःसंयोगवशात् तत्संस्कारमात्रजन्यस्मृतेः प्रादुर्भावः न स्मृत्यन्तरस्येति न युगपदनन्तस्मृतिप्रादुर्भावप्रसङ्ग (२८) इति ।

एतत्समाधानमसमंजसमिति निराकृतं सूत्रभाष्यकारादिभिः (२९) । तदित्थम्- विभुरात्मा शरीरे शरीराद्बहिरपि च वर्तते । परं मनस्तु शरीराभ्यन्तर एव आत्मना संयुक्तं ज्ञानजनकव्यापारवद्भवति । ततश्च तच्छरीरावच्छिन्नज्ञानसंस्कृतात्मसंयोगस्य मनसि वर्तमानत्वेन तच्छरीरावच्छिन्ननानासंस्कारजनितनानास्मृतीनां यौगपद्यस्यापाद्यत्वात्तद्दूषणादवस्थ्यम् इति ।

सूत्रभाष्यकारसंमतं समाधानं पुनरेवम्- यथा खल्वात्ममनसोः सन्निकर्षः संस्कारश्च स्मृतिहेतुरेवं प्रणिधानं लिङ्गादिज्ञानानि (३०)। तानि च न युगपद्भवन्ति । तत्कृता च स्मृतीनां युगपदनुत्पत्तिरिति (३१) ।

इदमत्रानुसन्धेयम् । वस्तुतस्तु स्मृतिप्रक्रियायां स्मरणेच्छया आत्मा स्मर्तव्यविषये मनः प्रणिदधाति । ततः स्मरणं जायते । तच्च सदा सशरीरस्यैवात्मनो भवति नान्यथेति दर्शनात् । शरीराद्बहिर्विद्यमानस्य आत्ममनःसंयोगस्य न ज्ञानजनकत्वम्, शरीरस्यैव भोगायतनत्वात् । अन्यथा शरीरानपेक्षमुपभोगादीनां संपन्नत्वाच्छरीरस्य वैयर्थ्यापत्तिः (३२) ।

स्वरूपम्-

भौतिका एव परमाणवः, अणवो वा मनांसि इति जैनाः (३३) । तन्मते पार्थिवादीनामणूनां मनसश्च गुणोऽदृष्टम् । तत्र पार्थिवाद्याः अणवः

---

२८) न्या. भा. ३.१-२५, पृ ५७८ २९) तत्रैव पृ. ५७९.
३०) न्या. सू ३-२-४१ न्या. भा. पृ. ६०४
३१) न्या. सू. ३-२-३३ न्या भा पृ. ५८७
३२) द्र. स्वर्थोक्तिः पृ ५८३ ३३) न्या. कौ पृ. ६४४

स्वादृष्टप्रयुक्ताः शरीरमारभन्ते । मनश्च स्वगुणप्रयुक्तं शरीरमाविशति । तच्च स्वकादेवादृष्टात् पुद्गलस्य जीवस्य सुखदुःखोपभोगं साधयति । न तु पुद्गलस्य धर्मोऽदृष्टम् इति ।

तदेतन्मतमुपन्यस्य दूषितं सूत्रभाष्यकाराभ्याम् (३४)। तत्र अपवर्गानन्तरमपि अदृष्टरूपकारणसत्त्वात् देहप्राप्तिः, हेत्वभावात् शरीरमनःसंयोगानुच्छेदप्रसङ्गः (मरणाभावप्रसङ्गः), एकस्यैवादृष्टस्य जीवनप्रापणकारणत्वानुपपत्तिरित्यादीनि दूषणानि विशेषतोऽवधेयानि ।

वायुरेव मनः इति केचिदाहुः (३५) । तत्र 'द्रव्यत्वनित्यत्वे वायुना व्याख्याते' इति मनोनिरूपणपरं काणादं सूत्रमपि प्रमाणम् (३६) ।

नव्यन्यायसंप्रदायिनस्तु अनुद्भूतविशेषगुणवद्समवेतभूतमेव मनः इत्याहुः [३७]।

लक्षणम् -

मनसो लक्षणानि पुनरेवमुपन्यस्यन्ते सुधीभिः । सर्वविषयमन्तःकरणमिति वात्स्यायनः (३८) । मनस्त्वयोगान्मन इति प्रशस्तपादाचार्यः (३९) । सुखप्रत्यक्षस्यासाधारणं कारणमिति वरदराजः (४०)। सुखाद्युपलब्धिसाधनमिन्द्रियं मनः इति च वृत्तिकारादयः [४१] । केचित्तु स्पर्शरहितत्वे सति क्रियावत्त्वम् तल्लक्षणमिति वदन्ति ।

तर्कनिरूपणम्

विषयोपक्षेपः

न्यायशास्त्रस्य मूलरूपमवगमयत्सु पर्यायपदेषु तर्कविद्येत्यपि पदं प्राचीनप्रबन्धेषु समुल्लिख्यते । वेदवाङ्मयादेव न्यायविद्यायाः प्रभवः स...

---

३४) न्या. सू ३-२-६८.६९ न्या भा पृ ६५३-५४, ६५६

३५) न्या. कौ पृ ६४४ ३६) वै सू ३-२-२

३७) द्र, रामरुद्री पृ ११९ ३८) न्या भा १-१-९ पृ ८८

३९) प्र पा भा मनःप्रकरणम् पृ ५६

४०] तार्किकरक्षा कारिका ३० समुद्धृतम् न्या को पृ ६४४

४१) समुद्धृतम् न्या को पृ ६४४

नीति पूर्वमुपपादितमेव । तर्कस्य चोपयोगो मन्त्रार्थनिर्णयार्थं निरुक्तशास्त्रे विधीयते । किं च यास्काचार्यो निरुक्तशास्त्रं वेदवाङ्मयान्तर्भूतमेवेति प्रतिपादयितुं तस्य मन्त्रार्थनिर्णयानुकूलोहापरपर्यायतर्कप्रधानतया ऊहब्रह्मेति नामान्तरं साधयति । परलोकं गतेषु मन्त्रद्रष्टृ ऋषिषु मनुष्यैरभ्यर्थिता देवास्तेषामुपकाराय मन्त्रार्थनिर्णयप्रणाली मूलाधारं तर्कऋषिं प्रायच्छन्निति कल्पनोपष्टम्भेन भूयोविद्यो यदभ्यूहति तत्सर्वमार्षमेव भवतीति निरणैषीत् यास्काचार्यः (१) ।

एवं रीत्या मन्त्रार्थचिन्ताभ्यूहोऽपि ब्रह्मैवेति प्रतिपाद्य तर्कस्य वेदवदनिरूढं प्रामाण्यं निर्दिश्यते निरुक्तकारेण [२] । मन्त्रार्थचिन्तायां विधीयमानायां अर्थाभासानां निराकरणमपि तर्कविद्यावैशारद्यमपेक्षते । अत एव वेदबोधितधर्मविनिर्णयार्थमायोज्यमानायां विद्वत्परिषदि तर्कविद्याविचक्षणस्य विदुषोऽप्यावश्यकतां प्रत्यपादि राजर्षिः मनुः (३) । तर्कविद्यां विना धर्मज्ञानं संशयादिदोषविधुरं न भवतीत्यपि मनुरभिप्रैति (४) । एतेन प्राचीनवचनान्तरपर्यालोचनया च श्रुतिविरोधिनः तर्कस्यानुपादेयत्वं श्रुत्यनुसारिणः पुनरुपादेयत्वं शास्त्रकारसंमतमिति निश्चीयते (५) ।

सति चैवं द्रव्यादिपदार्थतत्त्वनिरूपणाय तर्कप्रश्नानां प्रणालीमुपयुज्य वैशेषिकदर्शनं तर्कशास्त्रपदव्यपदेशमभजत [६] । मोक्षाख्यपरमपुरुषार्थप्राप्त्युपायभूततत्त्वज्ञानस्य विषयीभूतानां षोडशपदार्थानां स्वरूपनिरूपणाय तदुपयोगं विधाय न्यायदर्शनमपि प्रागुपदर्शितदिशा वैशेषिकाभिसम्बन्धानन्तरं दर्शनतां

१ [निरुक्तम १३ पृ ५१४ मधोर्थो [illegible] अपि श्रुतितोऽपि तर्कत न तु पृथक्त्वेन मन्त्रा निर्वक्तव्याः । मनुष्या ऋषिषु वा ऋषिषूत्क्रामत्सु तर्क प्र[illegible] तस्मा यदेव [illegible]नानूचानोऽभ्यूहत्यार्षं तद्भवति २] तत्रैव पृ ५१५

३ [मनुस्मृतिः अ १२ श्लो. ३ त्रैविद्यो हेतुकस्तर्की नैरुक्तो धर्मपाठकः त्रयश्चाश्रमिणः पूर्वे परिषत्स्याद्दशावरा ॥

४ [तत्रैव अ. १२ श्लो १०६ यस्तर्केणानुसन्धत्ते स धर्मं वेद नेतरः

५ [महाभारतम् - अनुशासनपर्व अध्याय ३७

६ [[illegible] को [illegible]

प्राप्य स्वमूलस्वरूपाभिव्यञ्जकं तर्कमपि स्ववाचकत्वेन स्वीचकार [७]। वैशेषिकदर्शनस्य तर्कशास्त्रत्वेन व्यवहारस्तु न्यायशास्त्रसमानतन्त्रत्वमूलको न्यायवैशेषिकयोरैक्य परिकल्पनानन्तरकालीनत्वात् सुतरामर्वाचीनः संभाव्यते। प्राचीनग्रन्थेषु विद्वत्परंपरायां च न्यायशास्त्रस्यैव तर्कशास्त्रत्वेन व्यपदेशो बहुलमुपलभ्यते। सूक्ष्मेक्षिकया विचार्यमाणे सनिश्चयमिदमवधार्यते यत् प्राचीनकाले तर्को नाम प्रधानघटको न्यायशास्त्रविषयाणां परमुत्तरत्र अप्रमाप्रकारत्वेन परिगण्यमानो न्यायप्रबन्धेषु स गौणं स्थानमाससाद।

प्रमाणप्रमेयेत्यादिसूत्रे प्रमेयान्तर्भूतस्यापि तर्कस्य संशयादीनामिव पृथगुपादानं तस्य तत्त्वज्ञानोपयोगितां सूचयति। निःश्रेयससाधनीभूतं हि तत्त्वज्ञानं निर्णयात्मकं भवति। स च विनिर्णयो न्यायप्रवर्तकप्रमाणानां फलम् [८]। पञ्चावयववाक्यरूपन्याये तर्कानुगृहीतानां प्रमाणानां सन्निवेशः। सर्वत्र विषयविभागप्रदर्शनपर्यवसायितया तर्कः प्रमाणान्यनुगृह्णाति। तथा कुर्वाणश्च तत्त्वज्ञानाय कल्पते। अत एव तर्कपूर्वकस्तत्त्वनिश्चयो निर्णय इति न्यायनयनिष्णातधियामभिप्रायः (९]। भाष्यकारोऽपि 'तावेतौ तर्कनिर्णयौ लोकयात्रां वहत' इत्याह [१०]। तत्त्वनिर्णयपर्यवसायिनि वादे स्थितस्यास्थितस्य वा पक्षस्य ज्ञापनं प्रमाणसहितेन तर्केण विधीयते [११]। न तु कश्चिदपूर्वः पक्षः स्थाप्यते खण्ड्यते वा। अत एव वादविद्यात्वेन परिगृहीते गौतमन्यायशास्त्रे तर्कस्य पृथगुपादानं प्रतिपादनं च संगच्छते।

७] महाभारतम् अनुशासनपर्व अध्याय ३७

प्र हेत्वाभाससामान्यनिरुक्तिः – बाधनिरूपणम् पृ ३४ नैयायिकैः पर्यवसितप्रास्तर्कक यस्योक्तयः

८] न्या भा १–१–१ पृ ३४,

९) खद्योते समुल्लिखितम् प. ३४ परमार्थतस्तु तर्कपूर्वकस्तत्त्वनिश्चयो विनिर्णय इति। प्रत्यक्षादीनामपि तर्कसहायानां निर्णयफलत्वमिति वाचस्पतिमिश्राः

१०) न्या भा. १–१–१ पृ. ३४ न्या वा च, पृ १८ बुद्ध्वा बुद्ध्वा लोकः प्रवर्तमानः तर्कनिर्णयाभ्यां हेयं जहाति, उपादेयं चोपादत्ते।

११) तत्रैव

एव विषयप्रत्यासत्त्या संशयस्य तर्कप्रवृत्तिं प्रति साक्षादङ्गता घटते [१८]। इयमप्यनुज्ञैवप्रमाणानामनुग्रहः प्रतिसंधानमिति चोच्यते।

इदं तु तत्त्वम्: यत् प्रतिज्ञायां प्रवर्तमानं प्रमाणं विपर्ययाशङ्कया प्रतिबद्धं भवति। सा च विपर्ययाशङ्का विषयशोधनद्वारा तर्केणापनीयते। तदनन्तरं च प्रमाणमप्रत्यूहं प्रवर्तते। यथा अपूर्वशरीरेन्द्रियादिप्राप्तिरूपं जन्म किंनिमित्तमिति विचारे पक्षत्रयमुपस्थितं भवति, कृतकहेतुकं, अकृतक-हेतुकं, आकस्मिकं चेति। तत्र प्रथमपक्षे प्रमाणविषयीभूतो जन्मोच्छेद उपपद्यते। द्वितीयतृतीययोस्तु न तथा। अनया प्रमाणोपपत्त्या प्रवृत्तः तर्कः प्रथमपक्षस्य स्वीकारमात्रं करोति।

वाचस्पतिमिश्रमतम्–

वाचस्पतिमिश्रस्तु यद्यपि सामान्यतः संशयोत्तरं परीक्षा प्रवर्तते तथापि क्वचित् परीक्षायां प्रवृत्तायां विचारणीयविषयस्वरूपविषये संशयः समुदेतीति प्रतिपाद्य, परीक्षोत्तरकालीनसंशयव्युदासाय तर्कस्यावश्यकतां निरूपयति (१९)।

मतान्तराणि–

भाष्यानुसारं समुपस्थितेषु विकल्पेषु कमप्येकं पक्षमनुज्ञाय संशयम-पाकुर्वाणस्तर्कः विषयशोधनद्वारा प्रमाणप्रवृत्तिं निरातङ्का विदधदनु-गृह्णाति। विशेषतः परार्थानुमाने सत्यां व्यभिचारशङ्कायां तन्निवर्तकत्वेन व्याप्तिग्रहोपायतया च तर्कस्योपयोग इति न्यायनयसंमतः पन्थाः। परं उद-यनाचार्यवरदराजनारायणभट्टप्रभृतयो विद्वांसः न केवलमनुमाने किन्तु प्रत्य-क्षादिष्वपि तर्को विषयपरिशोधनद्वारा साहाय्यमाचरतीति समभिप्रयन्ति। (२०)

उदयनः वरदराजश्च 'अनिष्टप्रसंगस्तर्कः' इति तर्कलक्षणं प्रतिपादया-मासतुः। अनिष्टं च द्विविधम्–प्रमाणसिद्धस्य परित्यागः, तद्विरुद्धस्य स्वी-।

---

१८) प्र खद्योतः पृ १ ६

19 NPh Part I Nyayasutra I I 40 Elucidation by Phanibhoosana P 126

20 Nyayasutra 1 1 40 Elucidation by Phanibhooshan P127

प्राप्य स्वमूलस्वरूपामिव्यञ्जकं तर्कमपि स्ववाचकत्वेन स्वीचकार [७) वैशेषिकदर्शनस्य तर्कशास्त्रत्वेन व्यवहारस्तु, न्यायशास्त्रसमानतन्त्रत्वमूलकं न्यायवैशेषिकयोरैक्य परिक ल्पनानन्तरकालीनत्वात् सुतरा वाचीनः संभाव्यते प्राचीनग्रन्थेषु विद्वत्परंपरायां च न्यायशास्त्रस्यैव तर्क शास्त्रत्वेन व्यपदेशो बहु लमुपलभ्यते । सूक्ष्मेक्षिकया विचार्यमाणे सनिश्चयमिदमवधार्यते यत् प्राची काले तर्को नाम प्रधानघटको न्यायशास्त्रविषयाणां परमुत्तरत्र अप्रमाप्रकारत्वे परिगण्यमानो न्यायप्रबन्धेषु स गौणं स्थानमाससाद ।

प्रमाणप्रमेयेत्यादिसूत्रे प्रमेयान्तर्भूतस्यापि तर्कस्य संशयादीनामिव पृथ गुपादानं तस्य तत्त्वज्ञानोपयोगितां सूचयति । निःश्रेयससाधनीभूतं हि तत्त्व - ज्ञानं निर्णयात्मकं भवति । स च विनिर्णयो न्यायप्रवर्तकप्रमाणानां फल (८] । पञ्चावयववाक्यरूपन्याये तर्कानुगृहीतानां प्रमाणानां सन्निवेशः सर्वत्र विषयविभागप्रदर्शनपर्यवसायितया तर्कः प्रमाणान्यनुगृह्णाति । त कुर्वाणश्च तत्त्वज्ञानाय कल्पते । अत एव तर्कपूर्वकस्तत्त्वनिश्चयो निर्णय इ न्यायनयनिष्णातधियामभिप्रायः (९] । भाष्यकारोऽपि तत्त्वेन तर्कनिर्णयौ लोकयात्रां वहत' इत्याह [१०] । तत्त्वनिर्णयपर्यवसायिनि वादे स्थिरस्या स्थिरस्य वा पक्षस्य ज्ञापन प्रमाणसहितेन तर्केण विधीयते (११] । न कश्चिदपूर्वं पक्षः स्थाप्यते खण्ड्यते वा । अत एव वादविद्याद्वारेन परिगृही गौतमन्यायशास्त्रे तर्कस्य पृथगुपादानं प्रतिपादनं च संगच्छते ।

७] महाभारतम् अनुशासनपर्व अध्याय ३७

८ हेत्वाभाससामान्यनिरुक्तिः - बाधनिरूपणम् पृ ३४ मैथबो ... पवितर्कपरास्तर्कक यस्योक्तयः

८] न्या भा १-१-१ पृ ३४,

९) खद्योते समुल्लिखितम् पृ. ३४ परमार्थतस्तु तर्कपूर्वकस्तत्त्वनि विनिर्णय इति । प्रत्यक्षादीनामपि तर्कसहायानां निर्णय फलत्व वाचस्पतिमिश्राः

१०) न्या भा. १-१-१ पृ. ३४ न्या वा च, पृ १८ बुद्ध्वा बुद्ध्वा प्रवर्तमानः तर्कनिर्णयाभ्यां हेयं जहाति, उपादेयं चोपादत्ते ।

११) तत्रैव

एव विषयप्रत्यासत्त्या संशयस्य तर्कप्रवृत्तिं प्रति साक्षादङ्गता घटते [१८] । इयमप्यनुज्ञैवप्रमाणानामनुग्रहः प्रतिसंधानमिति चोच्यते ।

इदं तु तत्त्वम् । यत् प्रतिज्ञायां प्रवर्तमानं प्रमाणं विपर्ययाशङ्कया प्रतिबद्धं भवति । सा च विपर्ययाशङ्का विषयशोधनद्वारा तर्केणापनीयते । तदनन्तरं च प्रमाणमप्रत्यूहं प्रवर्तते । यथा अपूर्वशरीरेन्द्रियादिग्राहिरूपं जन्म किंनिमित्तमिति विचारे पक्षत्रयमुपस्थितं भवति, कृतकहेतुकं, अकृतकहेतुकं, आकस्मिकं चेति । तत्र प्रथमपक्षे प्रमाणविषयीभूतो जन्मोच्छेद उपपद्यते । द्वितीयतृतीययोस्तु न तथा । अनया प्रमाणोपपत्त्या प्रवृत्तः तर्कः प्रथमपक्षस्य स्वीकारमात्रं करोति ।

वाचस्पतिमिश्रमतम्—

वाचस्पतिमिश्रस्तु यद्यपि सामान्यतः संशयोत्तरं परीक्षा प्रवर्तते तथापि क्वचित् परीक्षायां प्रवृत्तायां विचारणीयविषयस्वरूपविषये संशयः समुदेतीति प्रतिपाद्य परीक्षोत्तरकालीनसंशयव्युदासाय तर्कस्यावश्यकतां निरूपयति (१९) ।

मतान्तराणि—

भाष्यानुसारं समुपस्थितेषु विकल्पेषु कमप्येकं पक्षमनुज्ञाय संशयमशक्यशक्यं कुर्वाणस्तर्कः विषयशोधनद्वारा प्रमाणप्रवृत्तिं निरटङ्का विदधदनुगृह्णाति । विशेषतः परार्थानुमाने सत्यां व्यभिचारशङ्कायां तन्निवर्तकत्वेन व्याप्तिग्रहोपायतया च तर्कस्योपयोग इति न्यायनयसंमतः पन्थाः । परं उदयनाचार्यवरदराजनारायणभट्टप्रभृतयो विद्वांसः न केवलमनुमाने किन्तु प्रत्यक्षादिष्वपि तर्को विषयपरिशोधनद्वारा साहाय्यमाचरतीति समभिप्रयन्ति । (२०)

उदयनः वरदराजश्च 'अनिष्टप्रसंगस्तर्कः' इति तर्कलक्षणं प्रतिपादयामासतुः । अनिष्टं च द्विविधम्— प्रमाणसिद्धस्य परित्यागः, तद्विरुद्धस्य स्वी-

---

१८) प्र. खद्योतः पृ १२६

19 NPh Part I Nyayasutra I I 40 Elucidation by Phanibhoosana P 126 20 Nyayasutra 1 1 40 Elucidation by Phanibhooshan P127

रुध्येते । तथा हि – जलं न पिपासाशामकमिति स्वीकारे पिपासुना जलं पेयमिति कथितं भवति । तच्च सकललोकानुभवविरुद्धत्वात् प्रसिद्धपरित्यागे पर्यवस्यति । जलमन्तर्दाहं जनयतीति कथनं प्रमाणबाधितस्य जले अन्तर्दाह-जनकत्वस्य स्वीकारे पर्यवस्यति (२१) ।

तर्कभाषायां तर्कस्य अनिष्टप्रसङ्गरूपत्वमुपपाद्य प्रमाणानुग्राहकत्वमुपपादितम् २२ । तथाहि – पर्वतोऽयं साग्निरुतानग्निरिति सन्देहानन्तरं यदि कश्चिन्मन्यते अनग्निरिति तदा तं प्रति – यद्ययमनग्निरभविष्यत् तर्हि धूमवान्नाभविष्यत् इत्यवह्निमत्त्वेन धूमवत्त्वप्रसञ्जनं क्रियते । स चानिष्टप्रसंगस्तर्क उच्यते । एवं प्रवृत्तस्तर्कः अनग्निमत्त्वस्य प्रतिक्षेपात् भवत्यनुमानस्यानुग्राहक ।

न्यायविदो नव्याश्च व्याप्यारोपेण व्यापकारोपस्तर्क इति तर्कस्वरूपं व्याचख्युः [२३] । अत्रारोपपदप्रयोगेणैव भ्रमात्मकत्वमस्याभ्युदितं भवति तथा सति तर्कस्य विपर्ययात्पृथगुपादानं कथमुपपद्यत इत्याशङ्कां मनसि निधाय केचित् प्रमाणानुग्राहकत्वाद्भेदेन कीर्तनमिति समादधुः (२४)

तदेतदचारु । भाष्यविरोधात् । तथाहि तर्कस्याप्रमाणतां प्रतिपादयता तस्यानवधारणात्मकत्वं स्पष्टमाचष्टे भाष्यकारः (२५) । भ्रमस्य च निश्चयात्मकत्वं सार्वजनीनानुभवसिद्धम् । अतस्तर्कस्य भ्रमात्मकत्वकथनं नोपपद्यते ।

एतदालोच्यैव दिनकरभट्टादयो नव्यमते तर्को नाम आहार्यारोपविशेष इति निरणैषुः (२६) । तथा च आहार्यव्याप्यवत्ताभ्रमजन्य-आहार्यव्यापकवत्ताभ्रमस्तर्क इति नव्यमतमवतिष्ठते ।

जैनन्यायनये तु तर्कः पृथगेव प्रमाणम् भवति (२७) ।

द्वैतवेदान्तिनस्तु तर्कमनुमान एवान्तर्भावयन्ति । तन्मते द्विविधमनुमानं, साधनानुमानं दूषणानुमानं चेति । दूषणानुमानमपि द्विविधम् दुष्टि...

---

२१) तत्रैव पृ १२६.

२२) तर्कभाषा पृ, ४८ समुद्धृतम् न्या. को. पृ. ३२३

२३) तर्कसंग्रह: पृ ५६ दीपिका च पृ ५७.

२४) न्या, को. पृ ३२३. २५) न्या भा. १-१-१ पृ ३३.३४

२६) द्र. दिनकरी, गुणनिरूपणम् कारिका १३८, पृ. ४९२ न्या को पृ ३२३. २७) पृ. ८

मितिसाधनं तर्कश्चेति । कस्यचिद्धर्मस्य अङ्गीकारेऽर्थान्तरस्यापादनम् इति वा 'व्याप्याङ्गीकारेऽनिष्टव्यापकप्रसञ्जनम्' इति वा तर्कस्य स्वरूपम् । अत्र आपादनं नाम नारोपः किन्तु अङ्गीकार्यं नाङ्गीकार्यमेव आपाद्यमानमर्थान्तरं च नियमेन व्यापकमनिष्टभूतं चेति द्रष्टव्यम् । व्याप्यारोपेत्यारोपपदं परित्यज्य अंगीकारपदप्रयोगे बीजं तु धूलीपटले धूमभ्रमानन्तरं वह्न्यनुमितिस्थले यद्यग्निर्न स्यात्तर्हि धूमोऽपि न स्यादिति तर्कोऽव्याप्तिप्रसंग एव । प्राचीनग्रन्थेषु समुपलभ्यमानः अनुमानपरतर्कपदप्रयोगः मतमिदं समर्थयति ।

समालोचना–.

एतावता नैयायिकेष्वपि तर्कस्वरूपविषये मतिभेदो वर्तत इति स्पष्टं भवति । तर्कशब्दस्यानुमानपरतया प्रयोगोपलम्भेऽपि भाष्ये तस्याप्रमाणत्वप्रतिपादनात् तर्कस्य नुमानान्तर्भावो न कथमपि नैयायिकाभिमतो भवितुमर्हति । ऊहात्मकत्वपक्ष एव प्राचीनतमः भाष्यसंमतश्च प्रतिभाति । ऊहत्वं च मानसत्वव्याप्यो जातिविशेषः तर्कयामीत्यनुभवसिद्ध इति वृत्तिकारोऽप्याह । भाष्ये तर्कस्यानवधारणात्मकत्वप्रतिपादनात् संशयापेक्षया पृथगुपादानाच्च भिन्न एवायमप्रमात्मको ज्ञानप्रकार इत्युक्तं भवति । निश्चयात्मकत्वाभावकथनादेवाप्रमात्वमुदितं भवति ।

परन्तुतरत्र तस्याप्रमात्वोपपत्तये भ्रमात्मकत्वं नैयायिकैरभ्युपेतमिति विभाव्यते । तर्कभाषायां संशयात्मकत्ववादोऽपि समुल्लिख्यते । अस्य नियमेन निश्चयात्मकत्वात् भाष्यवचनविरोधपरिहाराय आहार्यभ्रमरूपोऽयमित्यभिनव एव प्रकारः कैश्चिदुपन्यस्तः । बाधकालीनेच्छाबलात् यत् ज्ञानं जायते तदाहार्यमित्युच्यते । तच्च नियमेन प्रत्यक्षात्मकमेवेति न्यायसिद्धान्तः ।

---

२८) प्रमाणपद्धतिः अनु.परि पृ. २०३

२९) तत्रैव. वेदेशतीर्थीं टीका. पृ २०३ विष्णुतत्त्वविनिर्णय टीका पृ ३६०

३०) विष्णुतत्त्वविनिर्णयः टीका पृ. ३६६.

३१) ब्रह्मसूत्राणि १-१-१२ गौतमसूत्रवृत्तिः १-१-१

३२) गौतमसूत्रवृत्ति १-१-४० समुद्धृतं न्या. को पृ ३२२.

३३) न्या. को. पृ १२०

शाब्दबोधात्मकमपीत्यालङ्कारिका वदन्ति ३४। अनिष्टप्रसङ्गात्मकत्वमपि तर्कस्य कैश्चिन्निरूपितम् । तदेतत्सर्वमपि मूलसूत्रमध्यविरोधान्न संगच्छत इति सुविलोकम् ।

यत्पुनरुच्यते तर्कस्यानुमानेऽन्तर्भाव इति तदपि न युज्यते । साध्यसाधनभावासंभवात् । आपादकं लिङ्गं आपाद्यं च साध्यमिति वक्तव्यम् । न च तद्युक्तम् । आपादकस्याहार्यत्वेनान्यतरासिद्धत्वात् । आपाद्यस्य चानिष्टत्वेन बाधितत्वात् । न ह्यसिद्धं लिङ्गं भवति । नापि साध्यम् ।

किं च तर्के पक्षाभावादप्यनुमानता नोपपद्यते । पक्षा... साध्यसाधनतामापन्नयोरापाद्यापादकयोः सामानाधिकरण्यानुपलम्भात्, व्यधिकरणस्य च बहुलमुपलभ्यमानत्वाद्बोद्धव्या ।

अपि च अनायत्त साधनेऽपसिद्धान्तो भवति । धूमादिमत्त्वस्य स्वयमभ्युपगतत्वात्तत्रैव धूमाभावादेः स्वीकारस्य अनुपपत्तेः । ... पर्यायपरतन्त्रत्वादप्रमाणमेव प्रमाणानामनुग्राहकस्तर्कः ।

अत्रैवं द्वैतवेदान्तिनः प्रत्यवतिष्ठन्ते । किमिदमापादनं नाम ? ...हि यदिवह्निर्न स्यात् तर्हि धूमोऽपि न स्यादित्याकारके तर्के धूमाभावादे... आपादनं यत्क्रियते तत्किं सद्भावप्रतिपादनमुत अङ्गीकार्यताज्ञापनम् । ...त्प्रतिपाद्येत तदा पूर्वोक्तप्रकारेणापसिद्धान्तादिदोषप्रसक्तिर्भवेत् । न तु तथा कल्पयितुं शक्यम् । 'यदि' 'स्यात्' इत्यादिपदप्रयोगानुपपत्तेः । तेन ...यते यदत्र व्याप्याङ्गीकारे व्यापकस्याप्यङ्गीकर्तव्यता बोध्यते न तूभयोः सद्भावः यथा खलु 'यदि विषं भक्षयसि, तर्हि मरिष्यसी'त्यादिव्यवहारस्तथाऽत्रापीति बोध्यम् । एवमेव यदि "निर्वह्निः" स्यात्' इत्यनेन यदि निरग्निकत्वेनाङ्गीक्रियत इत्येवार्थो बोध्यते । न चायमसिद्धः । तथा सति तर्कस्याप्यनुत्थानात् । तथाच निर्वह्नित्वाङ्गीकारस्याप्रमारूपत्वेऽपि आपाद्याङ्गीकर्तव्यताप्रमाजनकत्वात् तर्कः प्रमाणमेव । अनिष्टोपदर्शनरूपप्रयोजनस्य परसिद्धैरेव न्यायैः कार्यतया नाश्रयासिद्ध्यन्यतरासिद्धी दूषणे किन्तु भूषणे एव । तदेवं साध्यसाधनतामापन्नयोरापाद्यापादकयोः सामानाधिकरण्याभावेऽपि व्याप्त्यपेक्षया

३४) न्या. क., पृ.१३६.

तर्कस्य प्रवर्तमानत्वात् तदनुमानं भवत्येव (३५) इति ।

निर्णयः—

तत्रेदं समाधानम् । न्यायसूत्रभाष्याद्यनुसारं निर्णयविषयस्य इदमित्थमेवेति ज्ञानं न तर्केण जायते । अपि तु तदनुगृहीतेन प्रमाणेनैव । तर्कस्तु समुपस्थितयोरन्यतमं पक्षमभ्यनुज्ञाय प्रमाणप्रवृत्तिं परिपुष्णाति सोऽयं परिपोषः अनुग्रह इत्युच्यते । तेन तर्केण जायमानाऽभ्यनुज्ञा [स्वीकृतिरङ्गीकारो वा] न कथमपि निश्चयात्मिका इति न तत्त्वज्ञानरूपा । अत एव प्रमा । एवं च न्यायनये तर्कस्याभ्यनुज्ञैव फलम् । सा चाप्रमात्मिकेति न तर्कस्य प्रमाणत्वम् ।

किं च प्रामाणिकविषयस्वीकारः अभ्यनुज्ञा इत्युक्ते प्रमाणाविरोधित्वात्तस्याः प्रमात्मकत्वमेव स्वीकृतं भवति । परं तत्त्वज्ञानार्थं प्रवृत्ते न्याये विषयनिश्चयस्य प्राधान्यात् तत्रासमर्थस्तर्को न तत्त्वज्ञानजनको भवति विषयपरिशोधनद्वारा तु निश्चयजनकं प्रमाणमुपकरोति । ततश्च निश्चयभिन्नत्वमप्रमात्वे तन्त्रमिति न्यायमतमवतिष्ठते ।

अन्यच्च व्याप्त्यपेक्षत्वेऽपि तर्कस्य साध्यसाधनभावादिवैधुर्यान्न नुमानत्वम् ।

अपि च तर्कः प्रमाणमेव न भवति । कुतोऽनुमानम् । प्रमाकरणं हि प्रमाणं बोधाबोधस्वरूपं भवितुमर्हति । तत्र आहार्यभ्रमरूपस्तर्कः न प्रमा भवतीति तस्य लिङ्गदर्शनादिवत् बोधात्मकप्रमाणत्वं दुर्वचम् । प्रमाफलकत्वाभावाच्च प्रमाकरणत्वमपि नोपपद्यते । आरोपितविषयत्वात् चक्षुरादिवदबोधात्मकत्वमपि न संभवति । तदेवं प्रमात्वं प्रमाणत्वं च तर्कस्य न संभवतः । तस्मात्तर्को न प्रमामिति सिद्धम् ।

तर्कस्य प्रवृत्तिः—

न्यायनये द्वेधा खलु तर्कस्य प्रवृत्तिर्भवति । व्याप्तिग्राहकतया विषयपरिशोधकतया चेति । तदनुसारमाकारद्वयं तर्कस्यानुसंधीयते नव्य-

---

३५) विष्णुतत्त्वविनिर्णयः टिप्पणि व्यासतत्त्वज्ञविरचिता पृ ३२

तर्ककारणानि–

एतावता विवेचनेन आ॰ाद्यन्यतिरेकनिश्चयः आपाद्यापादकयोर्व्याप्तिनिश्चयः, भूयोदर्शनं चेत्येवमादयो विषयपरिशोधकस्य व्याप्तिग्रहोपायभूतस्य वा तर्कस्य कारणानीति सिद्धं भवति (४६) ।

तर्कांगपंचकम्–

किं च अङ्गपञ्चकसंपन्न एव तर्कस्तत्त्वज्ञानाय कल्पते, न तदन्यतमविरहितेऽपि । तच्चाङ्गपञ्चकं यथा– १] आपादकस्यापाद्येन व्याप्तिः, २) प्रतितर्केणाप्रतिघातः, ३) अनिष्टत्वम्, ४] आपाद्यस्य विपर्यये पर्यवसानम् ५] परस्याननुकूलत्वं चेति । तथाचोक्तं वरदराजेन तार्किकरक्षायाम्

व्याप्तिस्तर्काप्रतिहतिरवसानं विपर्यये ।

अनिष्टाननुकूलत्वमिति तर्काङ्गपञ्चकम् (४७) ॥ इति ।

विभाग.– सोऽयं तर्कः नव्यमते पञ्चविधः, आत्माश्रयः, अन्योऽन्याश्रयः, चक्रकम्, अनवस्था, प्रमाणबाधितार्थसंप्रसङ्गश्चेति (४८) । प्राचीनास्तु एकादशविधं तर्कमुपवर्णयन्ति। यथा व्याघातः, इतरेतराश्रयः आत्माश्रयः चक्रकाश्रयः अनवस्था, प्रतिबन्धिकल्पना, लाघवकल्पना, गौरवम्, उत्सर्गः, अपवादः, वैजात्यं चेति ४९। एतेषु व्याघातादीनां प्रसंगरूपत्वाभावात् न तर्कत्वमिति नव्याः (५०)। फणिभूषणतर्कवागीशस्तु मूलतस्तर्कस्यानिष्टप्रसंगरूपत्वमेवेत्यभिप्रयन्, उदयनाचार्यादिभिरूपन्यस्तानि प्रकारान्तरणानि तर्कस्य व्यापकार्थपरिष्कारप्रयुक्तानीति निरूपयामास [५१] ।

---

(४६) न्या को पृ ३२३

४७) तार्किकरक्षा श्लो ७२ समुद्धृतम् न्या को. प्र ३२२

48 NPh Part I Nyayasutra I I 40 Elucidation by Phanibhoosana P 126 127

४९) सर्वदर्शनसंग्रहः अक्षपाद॰॰नम् पृ. २३९.

(५०) न्या. को. पृ. ३२५. ३॰

51 Nyayasutra 1 ॰ ॰॰ ॰॰॰on by Phanibhoosha P12,

संशयनिरूपणम्

विषयोपक्षेपः

संशयस्याप्रमात्वविषये नास्ति विमतिः शास्त्रकाराणाम् । केषांचिन्मते स्मृतितर्कयोः प्रामाण्याभ्युपगमेऽपि संशयस्याप्रामाण्यं सर्वसंमतमेव । अधुना क्रमप्राप्तस्य संशयस्य निरूपणं प्रस्तूयते । तत्रादौ संशयोपयोगविषये न्याय-शास्त्रकाराणां मतमुपन्यस्यते ।

संशयोपयोगः

संशयात्मा विनश्यतीत्यभाणकं विदितमेव समेषाम् । परं संशयो नाम सत्यमेव आत्मान्यायस्य । प्रमाणप्रमेयेत्यादिसूत्रे प्रमेयानन्तरं परिगणितानां पदार्थानां प्रमेयान्तर्भूतत्वात्पृथक्कथनं तेषां विशेषतो मोक्षाख्यपरमपुरुषार्थोपायभूततत्त्वज्ञानानुकूलत्वं सूचयति । किमधिकं तादृशतत्त्वज्ञानार्थं प्रवृत्तं न्यायशास्त्रं तत एव शास्त्रत्वं बिभर्ति । तथाहि त्रयीवार्ता दण्डनीतिरान्वीक्षिकी चेति चत्वारि विद्यास्थानानि भारतीयविद्वत्परंपरायामुल्लिख्यन्ते । तत्र त्रयी ब्राह्मणप्रधाना, वार्ता वैश्यप्रधाना, दण्डनीतिः राजप्रधाना, तासामुपकारिकेयमान्वीक्षिकी धर्मार्थकाममोक्षानुकूला सर्वैरपेक्ष्या । तथाचोक्तं वार्तिककारैः 'चतस्र इमा विद्या भवन्ति, ताश्च पृथक् प्रस्थानाः । अग्निहोत्रहवनादिप्रस्थाना त्रयी । हलशकटादिप्रस्थाना वार्ता । स्वाम्यमात्यभेदानुविधायिनी दण्डनीतिः । संशयादिभेदानुविधायिनी आन्वीक्षिकी इति (५२) । अनितरसाधारण-संशयादिपदार्थनिरूपणपरत्वादेव न्यायविद्यायाः पृथगवस्थानं शास्त्रान्तरेभ्यो विशेषश्च । एतादृशविषयवैशिष्ट्यादेव व्याकरणादिविविधशास्त्राणां सर्वोपकारकत्वं शास्त्रकारैरभ्युपगम्यते ।

संशयादिविषयनिरूपणं न्यायविद्यायाः प्रस्थानभेदं ज्ञापयति, तदभावे विषयभेदाभावान्न्यायविद्याया उपनिषदादिवदध्यात्मविद्यायामेवान्तर्भावः स्यादिति भाष्यकारोऽप्यभिप्रैति (५३) ।

(५२) न्या. वा. १-१-१ पृ. १२.

(५३) न्या. भा. १-१-१ पृ. २०, तेषां पृथग्वचनमन्तरेणाध्यात्मविद्यामात्रमियं स्यात् यथोपनिषदः ।

नैयायिकैः । यथा - तत्र विषयपरिशोधको निर्वह्निः स्यान्निधूमः स्यादित्य दि धूमो यदि वह्निव्यभिचारी स्याद्वाह्निजन्यो न स्यादित्यादिश्च व्याप्तिग्राहकः (३६) इति । व्याप्तिग्राहको हि तर्कः कार्यकारणभावभङ्गप्रसङ्गलक्षणः व्यभिचारशङ्कानिवर्तकश्च (३७] ।

तर्कस्य विषयपरिशोधकता प्रागुपपादितैव । व्याप्तिग्रहोपायता तावद्विचार्यते । तत्रैवमाह मणिकारः व्यभिचारज्ञानविरहसहकृतं सहचारदर्शनं व्याप्तिग्राहकम् । ज्ञानं निश्चयः शङ्का च । सा च (शङ्का) क्वचिदुपाधिसंदेहात्, क्वचिद्विशेषादर्शनसहितसाधारणधर्मदर्शनात् । तद्विरहश्च क्वचिद्विपक्षबाधकतर्कात् क्वचित् स्वतः सिद्ध एव [३८] इति ।

इदमत्राशङ्क्यते । तर्कायत्रानुमित्यौपयिकव्याप्तिनिश्चयविरोधिव्यभिचारशङ्कानिवृत्तिरूपेष्यते तत्र तर्ककारणभूतस्य आपादकनिष्ठापाद्यव्याप्ति आपाद्यव्यतिरेक-पक्षतावच्छेदकादीनां निश्चयस्य विरोधिनी या शङ्का तन्निवृत्त्यर्थमपि तर्कात्पूर्वं तर्कान्तरमुपेयं, तत्पूर्वमपि तज्जनकनिश्चयविरोधिशङ्कान्तरनिवृत्त्यर्थं पुनस्तर्कान्तरमित्यनवस्थितत्तर्कधारास्वीकारप्रसङ्गः (३९) इति ।

इयं समाधिः । स्यादेतदेवं यदि सर्वत्र शङ्का समुत्पद्येत तन्निवर्तकं च तर्कमितरं न स्यात् । न च तथा इश्यते व्याप्त्यनादिनाऽपि शङ्कानवतारदर्शनात् । तथाहि- हुताशनरासभादिपदार्थसार्थस्यान्वयव्यतिरेकयोनन्वयव्यतिरेकौ धूमस्योपलभमानोऽवश्यमेतेषामन्यतमं कारणं धूमस्येत्यवधार्य सन्दिग्धे, किमेतानि सर्वाण्येव कारणानि ? किं वा कानिचित्तथा, कानिचिच्च नेति ? तत्र च यस्य व्यतिरेकेऽपि इतरेभ्यस्तथाविधेभ्यो धूमोत्पत्तिमुपलभते तस्या हेतुत्वमेवावधारयति, यथा रासभादेः । यस्य च व्यतिरेके तादृशापरसकला-

---

३६) जागदीशी तर्कग्रन्थे, समुद्धृतम् न्या. को पृ ३२६ दिवकरीय ! नि. कारिका १३८ पृ-४९२.

३७) न्या. को पृ ३२३.

३८) त. चि अनुमानखण्डः व्याप्तिग्रहोपायप्रकरण पृ ६६२ (अनुमानगादाधरी) ३९) तत्रैव तर्कप्रकरणम् ६७५ (अनुमानगादाधरी)

४०) दीधितिः अनुमानखण्डः तर्कप्रकरणम् पृ ६३६ (अनुमानगादाधरी)

…येऽपि धूमानुत्पत्तिं पश्यति तस्य कारणत्वमेव निश्चिनुते यथा वह्नेः [४०]। अत्र धूमो यदि वह्न्यसमवहिताजन्यत्वे सति वह्निसमवहिताजन्यः स्यान्नोत्पन्नः स्यादिति तर्केण अकारणत्वसंदेहो निवर्तते। एतादृशतर्ककारणीभूतश्च निश्चयो 'धूमो वह्निजन्य' इति। यदि खलु तत्रापि, किं धूमोऽवह्नेरेव भविष्यति …चिद्वह्निं विनापि भविष्यति, अहेतुक एव वा उत्पत्स्यते ? इति शङ्का …न्, तदा तन्निवृत्त्यर्थं तर्कान्तरोपादानप्रसङ्गः, प्रागुक्तरीत्या अनवस्था च …न्। परं स्वक्रियाव्याघातवशादीदृशी शङ्कैव नोदेति। तथा चोक्तमुदयनाचार्यैः व्याघातावधिराशङ्का तर्कः शङ्कावधिर्मतः। इति। तस्मान्नानवस्था। व्याघातनिवर्त्यशङ्कायां निवर्तने तर्कस्यानपेक्षणात्। तथा चोक्तं मणिकारेण 'सर्वत्र स्वक्रियाव्याघातः स्यात्। यदि हि गृहीतान्वयव्यतिरेकं हेतुं …नाऽपि कार्योत्पत्तिं शङ्केत तदा स्वयमेव धूमार्थं वह्नेः, तृप्त्यर्थं भोजनस्य, …प्रतिपत्त्यर्थं शब्दस्य चोपादानं नियमतः कथं कुर्यात् ? तेन विनाऽपि …स्यात्। तस्मात्तदुपादानमेव तादृशशङ्काप्रतिबन्धकम् (४१)। इति।

भूयोदर्शनं चैतादृशव्याप्तिग्रहोपयोगि तर्कोत्थतयाऽकारणत्वेन व्याप्ति…हार्थमपेक्ष्यते। न तु भूयःसहचारग्रहः तर्कमद्वारीकृत्य स्वातन्त्र्येण व्याप्ति…हे उपयोगी (४२)। एवमेव तर्कोऽपि शङ्कानिवृत्तिद्वारा व्याप्तिग्रहोपयोगी, न …स्वातन्त्र्येण इति व्याप्तिग्रहकारणत्वाभावान्न तस्य मानान्तरताप्रसक्तिः [४३]। ननु भूयोदर्शनस्य व्याप्तिग्रहकारणत्वाभावेऽपि तर्ककारणत्वमस्त्येवेति …थं न मानान्तरत्वमिति चेत्। उच्यते। तर्कस्याप्रमात्वेन अप्रमाजनकत्वादेव भूयोदर्शनस्य न प्रमाणान्तरता इति (४४)।

यत्राबाधमबाधितं बाधभ्रमाद्यापत्तिः तत्रापि जनकज्ञानविषयाबाध…व्यतिरेकावगाहित्वं स्वीकृत्याप्रमात्वमुपपादनीयमिति गदाधरभट्टाचार्यः [४५]

---

(४१) त चिं अनुमानखण्डः तर्कप्रकरणम् पृ ६७८ (अनुमानगादाधरी)
(४२) त चिं अनुमानखण्डः तर्क प्रकरणम् पृ ७२२ (अनुमानगाधरी)
(४३) द्र तत्रैव पृ ७२४ [४४] द्र तत्रैव पृ ७२६
(४५) तत्रैव गादाधरी पृ … …

संशयस्य न्यायांगत्वम्–

संशयप्रयोजनादीनां न्यायाङ्गत्वं भाष्यकारेणोपपादितम् । प्रकृते कोऽसौ न्यायः ? कथं च संशयस्तदङ्गो भवितुमर्हतीति विचार्यते ।

तत्र प्रमाणैरर्थपरीक्षणं न्याय इति भाष्यकारो व्याचख्यौ (५४) समस्तप्रमाणव्यापारादर्थाधिगतिर्न्याय इति वार्तिककारः [५५] प्राह । तन्मते एकैकशः प्रमाणानामर्थपरिच्छेदकत्वे न न्यायः, अपि तु मिलितानाम् प्रत्यक्षादिप्रमाणमूलाः प्रतिज्ञादयः पञ्चावयवाः प्रमाणानि, तैः अर्थस्य लिङ्गस्य परीक्षणं न्याय इति तात्पर्यटीका (५६)। न्यायस्तत्त्वनिर्णय इति भाष्यचन्द्रे (५७) । न्यायपदस्यानुमानपरत्वमपि केचिदूरीचक्रुः । प्रतिज्ञादिपञ्चावयववाक्यं न्याय इति शास्त्रप्रसिद्धिः । न्यायो नाम कथेत्यपि केश्चिदुपवर्ण्यं [५८] । सोऽयं प्राधान्येन अनुमित्या अनुमितिमुद्दिश्य वा प्रवर्तते । अनुमितिश्च पश्चान्मितिः । अत एव प्रत्यक्षागमसापेक्षिता । प्रत्यक्षागमाभ्यामीक्षितस्यान्वीक्षणमिति व्युत्पत्त्या अन्वीक्षणमप्यनुमितिः [५९] । तामधिकृत्य प्रवर्तते इति हेतोरान्वीक्षिकीति नामधेयं न्यायविद्यायाः ।

अयं च न्यायः विप्रतिपन्नपुरुषं प्रति प्रतिपादकत्वात् तथा प्रवृत्तिहेतुत्वाच्च परमो न्याय इत्युच्यते (६०) । तथाहि श्रुतिस्मृतिकारैः सर्वज्ञैः स्वयं दृष्टोऽर्थः आगमेन प्रदर्श्यते । ततः श्रुत्वा स्मृत्वा च प्रमाता एडमूकवत् विहाय वावदूकानामासाद्य जल्पवितण्डाभ्यां सद्विद्याविद्वेषिणः परिभूय तान् सन्दिग्धीकृत्योपदिशति । तेषामपि स्वस्य चानेन क्रमेण पश्चादीक्षणं भवति अत एवान्वीक्षिकी न्यायशास्त्रं युक्तिशास्त्रमित्यप्युच्यते । न चैवं यस्य यस्य युक्ता प्रतिभा तेन तेन तथा तथा अर्थः कल्पनीयः, यथेष्टं तथा तथा युक्तिप्रतिभयेति तु न शक्यम् । अन्वीक्षायाः प्रत्यक्षागमानुसारित्वस्यावश्यापेक्षणात् । प्रत्यक्षागमविरोधिनोऽनुमानस्य न्यायाभासत्वनियमात् (६१)।

५४) तत्रैव पृ. २३ — ५५) न्या. वा. १-१-१ पृ. ३
५६) समुद्धृतम् न्यायोते पृ. २३ — ५७) भाष्यचन्द्रः पृ २१
५८) तत्रैव पृ. २३ — ५९) द्र. न्या. भा. पृ. २३
६०) न्या. वा. १-१-१ पृ. [illegible]
६१) तत्रैव पृ. २४, न्या. वा. च १ १-१ पृ १५

न्यायशास्त्रस्य प्रवृत्तिरिह त्रेधा निरूप्यते भाष्यकारेण उद्देशः लक्षणं परीक्षा चेति। एतत्त्रितयमपि तत्त्वनिर्णयानुकूलम्। तत्त्वनिर्णयश्च न्यायप्रवृत्तिमवलम्बते। तत्र पक्षप्रतिपक्षावेव न्यायप्रवृत्तिरिति भाष्यवचनं प्रमाणैरर्थपरीक्षणं पक्षप्रतिपक्षगत एव भवतीति सूच्यते [६२]। तदेतत्स्पष्टमवगमयति न्यायविद्याया वाकोवाक्यत्वं वादविद्यात्वं वा

संशयप्रवृत्तिः—

त्रिविधा खलु पदार्थानां स्थितिः। अनुपलब्धिरूपा संशयिता निर्णीता चेति। तत्र पदार्थपरीक्षापरपर्यायो न्यायः न खल्वनुपलब्धे निर्णीते वाऽर्थे प्रवर्तते अपि तु संशयित एव। पदार्थानुपलब्धौ निर्णये वा जिज्ञासानुपपत्तेः तदानीं प्रमाणैरर्थपरीक्षाया अवसर एव नोदेति। पक्षप्रतिपक्षौ परस्परविरुद्धं मतं बुद्ध्युपारूढं सत् संशयजननद्वारा परीक्षायै प्रेरयति। तस्मात्संशयः सर्वन्यायप्रवृत्तेर्मूलम्। तदनुसारं 'विमृश्य पक्षप्रतिपक्षाभ्यामर्थावधारणं निर्णयः' इति गौतममुनिरसूत्रयत् (६३)।

अत्रायं विवेकः। एकस्मिन् धर्मिणि विरुद्धधर्मद्वयावभासो हि संशयः तयोर्धर्मयोरेकः साधयितुमिष्टः, अत एव पक्ष इत्युच्यते। अपरश्च बाधितुमिष्टस्तस्मात् प्रतिपक्ष इत्युच्यते।

एताभ्यां धर्माभ्यां संशय्य परीक्षया अर्थावधारणं क्रियते। परं धर्मिणि पक्षतावच्छेदकधर्मस्य निर्णये सत्येव संशयविषयसाध्यधर्मादिनिर्णयाय न्यायप्रवृत्तिः। यथा पर्वतरूपे धर्मिणि, धूमरूपपक्षतावच्छेदकधर्मस्य प्रत्यक्षेण निर्णये जाते सति संशयविषयसाध्यधर्मस्य वह्निनिर्णयार्थं विप्रतिपद्यमानपुरुषं प्रति बोधयितुं पञ्चावयववाक्यरूपः परमो न्यायः प्रयुज्यते।

पक्षप्रतिपक्षयोरन्यतरनिवृत्त्या तदन्यस्यावस्थानमवधारणं, स एव निर्णय इति हेतोः पक्षप्रतिपक्षाभ्यामर्थावधारणं कथमुपपद्यत इति चेदत्रैवं समाधिः। पक्षप्रतिपक्षयोरेकस्य संभवः, अपरस्य चासंभवः। संशयनिवृत्तिमन्तरा न निर्णयः सेत्स्यति। संशयनिवृत्तिश्च उभयोरपि पक्षयोः संभवत्वे असंभवत्वे वा न जायते। प्रत्युत एकस्य असंभवत्वे अपरस्य चासंभवस्त्व एव

---

६२) तत्रैव पृ. २१ ६३) न्या. सू. १-१-४१

जायते । तदेवं संभवासंभवौ निरूप्य सशयं निवर्तयतः । अत एवोक्तं सूत्रे पक्षप्रतिपक्षाभ्यामिति भाष्यकारेऽप्याह– उभाभ्यामेवार्थावधारणमिति ६४।

संशयापरपर्यायोऽसौ विमर्शः पक्षप्रतिपक्षाववद्योत्य न्यायं प्रवर्तयतीत्युपादीयते (६५)।

अत्रेदमवधेयम । निर्णयो हि विमर्शमन्तराऽप्युपपद्यते । यथा इन्द्रियार्थसन्निकर्षोत्पन्नप्रत्यक्षे विमर्शनिरपेक्षमर्थावधारणं निर्णयः (६६)। तथैव ज्योतिष्टोमादीनां स्वर्गादिसंबन्धनिर्णये आगमेन कर्तव्ये विमर्शो नास्ति । नापि वादजल्पवितण्डासु निश्चितयोरेव वादिप्रतिवादिनोस्तत्र प्रवृत्तेः (६७)।

परीक्षाविषये तु विमर्शो नितरामपेक्षितः । अत एव 'विमृश्य पक्षप्रतिपक्षाभ्यामित्यादि न निर्णयमात्रस्य लक्षणमपि तु परीक्षाप्रयोज्यनिर्णयस्यैव । स्वार्थानुमानेऽपि न विमर्शापेक्षा (६८)। परार्थानुमाने तु परीक्षावसरस्य विद्यमानत्वात्तत्र विमर्शसापेक्षो निर्णयः । सा च परीक्षैव न्यायः तस्मात्तदङ्गं संशयः । अत एव साङ्गोपाङ्गे न्याये व्युत्पादनीये प्रकरणान्तरेभ्यः संशयादीनामुत्कर्षः (६९)।

संशयस्वरूपम्–

न्यायाङ्गभूतत्वादवश्यनिरूपणीयोऽयं संशयः किं स्वरूप इति तावद्विचार्यते । तत्र 'समानानेकधर्मोपपत्तेर्विप्रतिपत्तेरुपलब्ध्यनुपलब्ध्यव्यवस्थातश्च विशेषापेक्षो विमर्शः संशय' इति गौतमसूत्रम् (७०)। अत्र विमर्शः संशय इति संशयसामान्यलक्षणम् । एकस्मिन् धर्मिणि विरोधिनानार्थावमर्शो विमर्शः किंस्विदिति ज्ञानम । तदनेनासमानजातीयेभ्यः प्रमाणादिभ्यः समानजातीयेभ्यश्च विपर्ययादिभ्यः संशयो व्यवच्छिद्यते ।

---

६४) न्या. भा. १-१-४१, पृ. १६२ ६५) तत्रैव

६६) तत्रैव पृ. १६४.

६७) तत्रैव शास्त्रे वादे च । शर्ववर्जम् पृ. १६४.

६८) न्यायवार्तिक पृ. १६४ ६९) तत्रैव पृ. ११९

७०) न्या. सू. १-१-२३

विषयस्वरूपानवधारणात्मकः प्रत्ययः संशय इति वार्तिककारः । प्रत्ययत्वं चास्य न विषयस्वरूपप्रत्यायकत्वात्, अपि तु स्वरूपप्रत्यायनात् । तथा चोक्तं 'संशयः प्रतीयत इति प्रत्यय इत्युच्यते' (७१) इति । विमर्शपदार्थोऽपि तथैव विवृतः— विमर्श इति, नानार्थावमर्शनं विमर्शः, उभावर्थौ मृगतीव । संशीतिः संशय इति भावसाधनम् । करणसाधनं वा संशेतेऽनेनात्मा, सुप्त इव भवति । क उपमार्थः? अर्थानवधारणमुपमानार्थ (७२) इति ।

विरुद्धयोरेकधर्मिसंसर्गावगाहिज्ञानमेव संशयो न तु तदुभयप्रकारताऽपि नियता इति दीधितिकारः प्राह [७३] । तदेतन्नव्यमतमिति निर्दिश्यते । अस्यायमाशयः— वायौ रूपं न वेत्यादिरूपः संशयो न वायुविशेष्यकस्तत्कथमस्य विरुद्धधर्मद्वयप्रकारकत्वमिति चेत्, प्रकारद्वयनैयत्याभावादिति समाधानम् । तथा च रूपतदभावविशेष्यको वायुविशेषणकोऽसौ संशय इति न दोषः ।

गदाधरभट्टस्तु साधारणधर्मदर्शनादिकमन्तरेणापि तुल्यबलसामग्रीभ्य संशयो जन्यते । साधारणधर्मदर्शनादेः कोटिद्वयोपस्थापकतयैवोपयोग संशयत्वादेः कार्यतावच्छेदकत्वविद्वेषिणो नव्याः इत्याह (७) । तन्मते संशयत्वं न विषयताविशेषः, परन्तु एकधर्मिकभासमानविरोधिकोटिद्वयज्ञानत्वं तत्तत्सामग्रीसमाजप्रयोज्यमेवेति ।

संशयत्वं संशयलक्षणम् । स च मानसत्वव्याप्यो जातिविशेष इत्यपि केचिदूचुः । तदसमीचीनम् । चाक्षुषत्वादिना संकरप्रसङ्गात् [७५] । संकरस्य च जातिबाधकत्वात् [७६] ।

अनवधारणं ज्ञानं संशय इति केचित् [७७] । अत्र अनवधारणत्वं

---

७१. ७२) न्या. वा. १-१-२३ पृ ८७ ८८ ९० ९१

७३) दीधितिः अनुमानखण्डन पृ, ५३८ (अनुमानगादाधरी)

७४ अनुमानगादाधरी पृ. १०५० ७५) दिनकरी पृ. ४८० (...

७६) न्या. त. [illegible])

७७) प्रम. पद्धतिः पृ ४९

नाम निश्चयत्वानधिकरणत्वम् । अवधारणत्वापरपर्यायं निश्चयत्वं च निष्कम्पप्रवृत्तिजननयोग्यज्ञानत्वम्, तेन नान्योऽन्याश्रयः अथवा एकस्मिन् धर्मिण्येकजातिसामग्र्यविषयकारिप्रमाविरोध्युभयकोटिज्ञानं संशय इति तदर्थः। यद्वा एकस्मिन् धर्मिणि साधारणधर्मोपस्थितभासमानविरोधोभयकोटिकज्ञानं संशयः। प्राचीनास्त्वेकस्मिन् धर्मिणि विरुद्धत्वेन भासमाननानाधर्मावगाहिज्ञानं संशय इत्याचक्षते (७८)।

एकस्मिन् धर्मिणि विरुद्धनानाधर्मवैशिष्ट्यावगाहिज्ञानं संशय इत्यन्नम्भट्टाः (७९)। अत्र विरुद्धपदार्थस्य दुर्वचत्वादनुचितमिदं लक्षणवचनमाठल्येमहाशयः (८०) समभिप्रैति। तन्मते एकत्र कदाचिदप्यगृहीतयोर्विरोधः निश्चयेनावगन्तुमशक्यः। अस्मदादीनां सर्वज्ञत्वाभावात्। यथा अश्वत्वपुरुषत्वयोर्नियमेन वैयधिकरण्याद्विरोधो वक्तव्यः। परं किन्नरादौ उभयोरपि सामानाधिकरण्यसंभवाद्विरोधो व्याहन्येत। न च तादृशप्राणिविशेषो नास्त्येवानुपलब्धेरिति वाच्यम्। अस्मदीयज्ञानविषयत्वमात्रेण वस्तुसत्तानिराकरणस्यानुचितत्वात्। किं च कल्पनापरिकल्पितकिन्नरादौ विरुद्धत्वेन निश्चितधर्माणां सामानाधिकरण्यसंभवो दुष्परिहरः। काल्पनिकवस्तुनो धर्मित्वाऽभावात् नेयमापत्तिरिति कथनं तु यथाकथंचित् लक्षणयोजनाचातुर्यमूलकमपि न मनःसमाधायकम्।

तस्मात् एकस्मिन् धर्मिणि विरुद्धनानाकोटिकं ज्ञानं संशय इति लक्षणमेवोचितम्। ताश्च कोटयो भावाभावरूपाः। अत्र भावविरोधित्वं तदभावस्य सर्वसंमतमिति न कश्चिद्क्षुद्रोपद्रवः। अनुभवबलाच्चैवमवसीयते यदसौ संशयः क्वचिद् द्विकोटिकः क्वचिच्च चतुष्कोटिकोऽपि भवतीति। यथा नित्योऽनित्यो वा शब्द इत्यत्र नित्यत्वतदभावरूपे द्वे कोटी स्तः, अथ स्थाणुर्वा पुरुषो वा इत्यत्र तु स्थाणुत्वतदभाव-पुरुषत्वतदभावरूपाश्चतस्रः कोटयः सन्ति। इति।

प्राचीननैयायिकानां मते संशयकोटीनां परस्परविरोधसंपादनाय भावाभावात्मकत्वमेवेति न नियमः। तेन स्थाणुर्वा पुरुषो वा इत्यत्र तन्मते स्थाणु-

७८) तत्रैव टिप्पणीषु पृ ४९ – ५३. ७९) तर्कसंग्रहः पृ ५६

८०) तत्रैव इंग्लिश नोट्स बाय आठल्ये पृ ३५५ ३५६.

ऽपुरुषत्वरूपकोटिद्वयात्मक एव संशयः, न तु तदभावात्मकोऽपि । नव्यमते तु भावात्मकानां धर्माणां स्वविरोधिअभावात्मकधर्मसामानाधिकरण्यसत्त्व एव संशयोदयः । ततस्तेषां मते स्थाणुर्वा पुरुषो वेत्यादौ चतुष्कोटिकः संशयो भवतीति बोध्यम् । फणिभूषणतर्कवागीशस्तु प्राचीनमतसमुपोद्बलनार्थं 'स्वप्नो नु माया नु मतिभ्रमो नु' इत्यादिकालिदासपद्यमनूद्य केवलं भावात्मककोट्यवगाहित्वमपि संशयस्य संभवतीति मतं समर्थयति (८१) । उदाहृतपद्ये स्वप्नत्वाभावादीनां संशयकोटिघटकत्वं न संभवत्यनुभवविरोधादिति द्रष्टव्यम् ।

अनवधारणात्मकप्रत्यक्षं संशय इति मीमांसकाः कथयन्ति (८२) । दृष्टे पदार्थविशेषे साधारणधर्मज्ञानात् विशेषादर्शनाच्च प्रस्तुतास्वनेकासु कोटिषु किंस्विदिति दोलायमानं मनो यदा अन्यतरां अन्यतमां वा कोटिमवधारयितुं न प्रभवति तदा संशयो जायते । इयं च मनसो दोलायमाना अवस्था इन्द्रियप्रयत्नवशात् दृष्टे विशेषे निवर्तते यदनन्तरं निर्णयो भवति ।

ज्ञानप्रक्रियायां इन्द्रियव्यापाररूपा विषयावभासरूपा चेति द्विविधा स्थितिर्भवति । तत्र संशयः न केवलं इन्द्रियव्यापाररूपां स्थितिमपेक्ष्य प्रवर्तते अपि तु क्वचिद्विषयावभासोत्तरकालीनामपि । प्रत्यक्षापेक्षितसकलसामग्र्यसमवधानदशायां संशयस्येन्द्रियव्यापारजन्यत्वं सुवचम्, परं यदा ज्ञानेन्द्रियैरप्यनाकलनीयेन केनापि पक्षेण निरुद्धव्यापाराः विषयनिर्णयाय प्रयतामहे तदाऽपि संशयः समुत्पद्यते इति गोवर्धनभट्टमहोदयः प्रतिपादयति (८३) । अनेन मीमांसकमतेन संशयलक्षणे विशेष्यत्वेन प्रत्यक्षपदनिवेशो नोचित इत्युक्तं भवति ।

समालोचना-

एतावता संशयस्यानवधारणात्मकत्वे, अनेककोट्यवगाहित्वे च प्रायः सर्वेषामपि शास्त्रकाराणां संमतिः प्रदर्शिता भवति । परं संशयस्योत्पत्तिविषये कारणमीमांसायां वर्तते विदुषां विप्रतिपत्तिः । तदनुसारं गौतमीयसूत्रस्यापि

(८१) न्याय फिलॉसॉफी पार्ट १ न्यायसूत्र १ १ २३ इ पब्लिकेशन पृ. ९४

(८२) श्लोकवार्तिकम् ७. ४८

(८३) एपिस्टेमोलॉजी आफ दि भट्ट स्कूल ऑफ पूर्वमीमांसा पा. ३ पृ. ९३

[illegible]न्धानं द्वेध प्रवर्तते । यथा भाष्यकारमते, समानानेकधर्मोपपत्तेरित्या-दिसूत्रे पंच संशयकारणानि समुल्लिखितानि (८४) । तदनुगुणं सूत्रे पंच संशयभेदा लक्षिता । उपपत्तिपदस्योपलब्धिरित्यर्थः । तेन समानधर्मोपलब्धे-रनेकधर्मोपलब्धेर्विप्रतिपत्तेरुपलब्ध्यव्यवस्थातोऽनुपलब्ध्यव्यवस्थातश्च विशेषा-पेक्षः संशयो जायत इत्युक्तं भवति । संशयपरीक्षायां गौतमसूत्र एव, उप-लब्ध्यनुपलब्ध्योः कारणत्वोपपत्तये विशेषविचारस्योपलंभात् गौतमाभिमतोऽयं संशयस्य पंचविधो भेद इति स्फुटमवगम्यते (८५) ।

वार्तिककारस्तु 'तत्र समानधर्मोपपत्तेर्विप्रतिपत्तेश्चेति त्रिविध एव संशय इतरयदविशेषणाद्भवतीति सूत्रार्थ इत्याह (८६) । तात्पर्याचार्योऽपि पक्षममुं समर्थयति ।

विशेषापेक्ष इति पदं संशयप्रवर्तकं बोधयति । बुभुत्समान इति पदेन तदविवरणं प्रास्तौत भाष्यकारः । समानमनयोर्धर्ममुपलभे विशेषमन्यतरस्य नोपलभ इत्येषा बुद्धिरपेक्षा संशयस्य प्रवर्तिका वर्तते इत्यप्याह (८७) । तदेतद्भाष्यमनुपपादयन् वाचस्पतिमिश्रः, विशेषधर्मनिर्णयेच्छा संशयबीज-मित्यभिप्रैति । तदनभिमतं भाष्यकारस्येति फणिभूषणतर्कवागीशः प्रतिपाद-यामास । संशयानन्तरमेव तादृशेच्छाया दर्शनात्, उत्तरग्रन्थेन च संशयस्थले सर्वत्र विशेषादर्शनेऽपि तत्स्मरणमवश्यमपेक्षितमिति भाष्यकाराभिप्रायस्या-वगमात् (८८) ।

वार्तिककारमतानुसारं विशेषापेक्षपदेन विशेषस्मृति-कारणत्वं बोध्यते । तन्मते संशयस्य त्रैविध्यात् विशेषस्मृतिकारणक इति उपलब्ध्यनुपलब्ध्यव्यवस्थाहेतुक इति च त्रिविधस्यापि संशयस्य विशेषणे ।

उद्योतकारः पुनरेवमाह— अपेक्षाशब्दो यद्यपीच्छायां वर्तते तथापीह जिज्ञासापरो बोध्यः वाक्यसामर्थ्यात् । न च सा संशयस्य हेतुः, संशये सति

८४) न्या भा. १-१-२३ पृ ११९-१२५

८५] न्याय फिलासाॅफी पार्ट २ न्यायसूत्रम् २ १ ६ पृ १७

८६) न्या. वा १-१-२३ पृ [illegible] ८७) न्या भा पृ. १२० - १२१

८८] न्याय फिलाॅसाॅफी पार्ट १ [illegible] १ १ २३ पृ ९४

तस्याः भावात् । तस्माद्विशेषापेक्षा जिज्ञासालक्षणयेह विशेषयोः पूर्ववर्तिनो, सादृश्यात्स्मरणे सत्यग्रहणं लक्षणीयम् । एवञ्च साधकबाधकप्रमाणानुपपत्तौ सत्यां समानधर्मोपलब्धिर्विनश्यदवस्था विशेषस्मृत्या सहाविनश्यदवस्था एकस्मिन क्षणे सतीसंशयज्ञानस्य हेतुरिति सिद्धम् (८९) । इति ।

गदाधरभट्टस्तु विशेषापेक्ष इति– विशेष्यते-व्यावर्त्यते विशेषदर्शनविषयोऽनेनेति विशेषो– विशेषदर्शनम्, तदपेक्षस्तज्जन्य, तादृशविशेषापेक्षत्वं संशयसामान्यस्यैव । 'विमर्श' एकधर्मिणि विरुद्धकोटिज्ञानम् तच्च संशयलक्षणमिति नव्यमतमुपपादयामास [९०] ।

निर्णयः–

संशयस्य पञ्चविधत्वं सूत्रभाष्यसंमतमित्यत्र नास्ति शङ्कावकाशः । तथापि उपलब्ध्यनुपलब्ध्यव्यवस्थात इति सूत्रखण्डेन दर्शितः साधकबाधकप्रमाणाभावो न स्वातन्त्र्येण संशयकारणमित्यस्वरसं मनसि निधाय वार्तिककारस्त्रीण्येव संशयप्रभेदानीति स्पष्टमुपपादयामास (९१) । तदेवं विशेषापेक्षपदबोध्या विशेषजिज्ञासा उभयनयेऽपि संशयसामान्यहेतुरिति सिद्धं भवति

इदं त्ववधेयम् । यत् उदासीनपदार्थविषयकसंशयस्य मध्ये मार्गे सहस्रशः साधारणधर्मदर्शनेऽप्यनुदयात्, विशेषजिज्ञासायाः सर्वत्र संशयकारणत्वमवश्यमभ्युपेयम् । येषां पुनः संशयपूर्वं विशेषजिज्ञासा नानुभूयत इत्याग्रहस्तेषां मतेऽपि विशेषजिज्ञासायाः संशयहेतुत्वे प्रायिकत्वं द्रष्टव्यम् [९२] ।

किं च विशेषाकाङ्क्षानिवृत्तौ संशयनिवृत्तिदर्शनेन तयोः कार्यकारणभावोऽवधार्यते । समानधर्मोपपत्त्यादीनां कोटिस्मारकतया संशयहेतुत्वमिति तु संशयविशेषकारणनिर्णयापेक्षयोच्यते ।

एवमेव कोटिस्मृत्यादिकारणकलापसत्त्वेऽपि निर्णायकाभावकाल एव संशयदर्शनात् निर्णायकाभावस्य संशयसामान्यं प्रति सहकारिकारणत्वमवश्यमभ्युपेयम् ।

८९] खद्योत पृ 121, 122 ९०] अनुमानगादाधरी पृ 1050
९१] न्या वा 1 1 23 पृ 10 ९२] प्रमाणपद्धतिः आदर्श. पृ ५७

संशयप्रभेदाः—

सूत्रकारनिर्दिष्टेषु पंचसु संशयप्रभेदेषु आदिमत्रयं भाष्यवार्तिकोभयसंमतमिति तत्स्वरूपोदाहरणादिकमादौ पर्यालोच्योर्वरितयोर्द्वयोः संशयप्रभेदयो. विचारः परस्तात् विधीयते ।

प्रथमः संशयप्रभेदः—

समानधर्मोपलब्धेर्जायमानः संशयः संशयप्रभेदेषु प्रथमः। अत्र समानशब्दः सादृश्यवाची । एवं च सदृशधर्मोपलब्धेः संशय इत्युक्तं भवति (९३)। विवक्षिततज्जातीयवृत्तित्वे सति विजातीयवृत्तिर्यो धर्मः स एव समानपदव्यपदेश्यः, तस्य विवक्षिततज्जातीयेषु विजातीयेषु च समानत्वात् । यथा विषाणित्वादिकम् (९४)।

अस्य च संशयस्य भाष्यकृदुक्तमुदाहरणं स्थाणुर्वा पुरुषो वा इति । पुरोवर्तिनि पदार्थे स्थाणुपुरुषयोः समानं धर्ममारोहपरिणाहौ पश्यन्, पूर्वदृष्टं च तयोर्विशेषं बुभुत्समानः किं स्विदित्यन्यतरं नावधारयति । तदनवधारणं ज्ञानं संशयः (९५)।

अत्रेदमवधेयम् । भाष्यकारमते केवलायाः समानधर्मोपपत्तेरपि सत्यां विशेषाकांक्षायां संशयकारणत्वम् (९६)। वार्तिककारमते तु सत्यपि समानधर्मोपलम्भे सत्यां च विशेषाकांक्षायां यदा उपलब्ध्यनुपलब्धी न व्यवतिष्ठेते इदन्तया वाऽनिदन्तया वा तदा अर्थसंदेहो भवति । नान्यदा । तस्मात् समानधर्मोपपत्तेरुपलब्ध्यनुपलब्ध्यव्यवस्थातश्च विशेषापेक्षो विमर्श इति समग्रं लक्षणं प्रथमसंशयप्रभेदस्येति तन्मतमवतिष्ठते (९७)।

सूत्रानुसारमनेकधर्मोपपत्तेर्जायमानः संशयस्य द्वितीयः प्रभेदः । अनेकधर्मपदेनात्र असाधारणधर्मस्य ग्रहणम् (९८)। एवं चासाधारणधर्मोपलब्धेरिति फलितोऽर्थः ।

---

९३) द्र न्या वा 1-1-23 पृ. ८८ ९४) तत्रैव पृ ८९

९५) न्या भा १-१-२३ पृ १२० ९६) तत्रैव पृ ५५

९७) न्या वा १-१-२३ पृ ८९ ९० ९८) तत्रैव पृ ९१

अत्र समानजातीयमसमानजातीयं चानेकम् इति भाष्यम् (९९)। अस्य चानेकपदस्य द्वेधाऽन्वयष्टीकाकारैः प्रदर्श्यते (१००)। संबन्धविवक्षायामनेकस्येति षष्ठी भवति। निवर्तकत्वेन संबद्धो धर्मस्तत्र बोध्यते। कारकविवक्षायां तु तस्मादिति भवितुमर्हति। एतस्मिन् व्याख्याने 'तस्मात् विशेषक' इति पदयोरध्याहारः कल्पनीयः। एवं च समानासमानजातीयानां निवर्तको यो धर्मस्तस्योपपत्तेरध्यवसायादित्येकोऽर्थः। अनेकावधिविशिष्टकर्तृकर्मा व्यवसाय इति चापरोऽर्थः।

ननु व्यावर्तको हि विशेषधर्मः कथं संशयहेतुरिति चेत्, अत्रेदं विचार्यते। साधारणपदेन अनेकवृत्तित्वम्, असाधारणपदेन चैकवृत्तित्वं बोध्यते। तदेतदुभयमपि न संशयनिश्चययोर्बीजम्। किन्तु तद्विशिष्टयोर्धर्मयोर्व्यभिचाराव्यभिचारौ संशयनिर्णयहेतू (१०१)।

न चैवमपि साधारणासाधारणत्वेनाभिमतयोर्धर्मयोर्व्यभिचारित्वादेव यदि संशयहेतुत्वं तदा असाधारणधर्मस्य संशयहेतुत्वेन पृथगुपादानं व्यर्थम् साधारणधर्मपदेनैव तस्यापि ग्रहणसंभवात्, उभयोरविशेषात् इति वाच्यम्। व्यभिचारितामन्तरेण नान्यत् किमपि संशयकारणमिति तु सत्यम्। परमस्ति द्वैविध्यं व्यभिचारस्य, विधीयमानव्यभिचारः प्रतिषिध्यमानव्यभिचारश्चेति। उपपत्तेरित्यनेन विधीयमानव्यभिचार उपदिश्यते, अनेकधर्मोपपत्तेरित्यनेन च प्रतिषिध्यमानव्यभिचारः। एतावता धर्मयोरनयोः पृथगुपादानम् (१०२)।

अस्यायमाशयः। आरोहपरिणाहादिरूपः समानधर्मो हि स्थाणुपुरुषादिषु विधीयमानः सन् व्यभिचरति। तत एव च भवति संशयहेतुः। विभागजत्वरूपः शब्दगतोऽसाधारणधर्मस्तु शब्देतरेषु समानजातीयेष्वसमानजातीयेषु च प्रतिषिध्यमानः सन् व्यभिचरति। शब्दभिन्नेषु सर्वेषु गुणद्रव्यादिषु तदभावस्य निश्चितत्वात्। तदेवं प्रतिषिध्यमानव्यभिचारेण सहितोऽसाधारणधर्मोऽपि व्यभिचारित्वाद्भवति शब्दो द्रव्यं

---

९९) न्या भा १-१ २३ पृ २२२

१००) न्यायचन्द्र पृ १२१ न्या वा पृ १ खद्योतः पृ १२२

१०१) द्र न्या वा पृ १२-१३

(गु)णो वेत्यादिसंशयहेतुः ।

एतदनुसन्धायैव तत्तत्कोटिसहचरिताभावप्रतियोगित्वमेव ज्ञानागर्भमसाधारण्यं संशयप्रयोजकमिति दीधितिकृदाह (१०३)।

उदाहरणोपपादनप्रकारे भाष्यवार्तिकयोर्मतभेदो विभाव्यते । तथा हि भाष्यानुसारं 'यत् खलु सदादिरूपसंपन्नं विशेषवत् तत् समानजातीयेभ्योऽसमानजातीयेभ्यश्च व्यावृत्तम् । यथा पृथिवीद्रव्यमब दिद्रव्यान्तरेभ्यो गुण कर्मभ्यश्च विजातीयेभ्यो गन्धवत्त्वेन व्यावृत्तम् । तथा शब्दः सदादिरूपसंपन्नो विभागजत्वेन विशेषेण समानासमानजातीयेभ्यो विशिष्यते । तस्मात् भवति 'शब्दो द्रव्यं गुणः कर्म वे'ति संशयः [१०४]।

वार्तिककारमते तु असाधारणधर्मः व्यतिरेकमुखेन विभिन्नकोटीः स्मारयन् भवति संशयहेतुः । तदुक्तम्– 'सामान्यविशेषसमवायेभ्यः शब्दस्य सदादिना विशेषेण निर्भक्तस्य तस्मिंस्तु द्रव्यं गुणः कर्म वेति विभागजत्वा त्संशयः । न हि किंचिद्द्रव्यगुणकर्मणामन्यतमं विभागाज्जायमानं दृष्टम् सर्वत्रासंभवात् विभागजत्वं संशयं करोति सर्वतो व्यावृत्तेः, इति (१०५)।

इदमत्राकूतम् यद्यपि विभागजत्वं न द्रव्यादौ क्वचिद् दृष्टम्, तथापि तद्व्यतिरेकः प्रत्येकं द्रव्यादौ दृष्टः इति विभागजत्वेन सदाद्यविशेषवान् शब्दः द्रव्यकर्मभ्यां व्यावर्तमानः किं गुणः; गुणकर्मभ्यां व्यावर्तमानः किं द्रव्यम्, गुणद्रव्याभ्यां व्यावर्तमानः किं कर्म इति विभिन्नकोट्युपस्थितेः संशयो भवति ।

तथा च विशेषधर्मः व्यतिरेकमुखेन तत्तत्स्मारयन् संशयकारणं भवतीति वार्तिककाराशयः । समानासमानजातीयव्यवच्छेदद्वारा संशयहेतुर्भवतीति तु भाष्यकाराभिप्रायः । व्यवच्छेदस्य विशेषधर्माभावप्रयोज्यत्वेन उभयमतेऽप्यविरोधो द्रष्टव्यः । शब्दस्य गुणत्वं च एवदनुमानेन साध्यते । ततश्च संशयो निवर्तत इति विलोकनीयम् (१०६)।

---

३) समुल्लिखितम् अ[illegible] मानगादाधर्याम् पृ. १०४९

४) [illegible] न्या भा १–१– ३ [illegible] [illegible]द्योतः च

५) [illegible] ना [illegible] प ९३

६) [illegible] फल स [illegible]

पूर्ववदत्रापि वार्तिककारमते उपलब्ध्यनुपलब्ध्यव्यवस्थाया: पूर्वपद विशेषणत्वात् अनेकधर्मोपपत्तौ सत्यां, उपलब्ध्यनुपलब्ध्यव्यवस्थायां च सत्यां विशेषापेक्षो विमर्श: संशय इति समग्रं लक्षणं द्वितीयसंशयप्रभेदस्य [७]।

तृतीय: संशयप्रभेद:

विप्रतिपत्तिजन्यमान: संशयस्य तृतीय: प्रभेद: अत्रापि प्रागुपदर्शित-दिशा उपलब्ध्यनुपलब्ध्यव्यवस्थाया: विशेषणत्वं वार्तिककारमते द्रष्टव्यम्। विप्रतिपत्तिपदेन च विरुद्धा प्रतिपत्तिर्ज्ञानमिति व्युत्पत्त्या वादिप्रतिवादिनो-र्ज्ञानस्य ग्रहणं न कार्यम्। तस्यात्यन्तपरोक्षत्वेनापरेषां संशयकारणत्वानु-पपत्ते:। अत: तृतीयपुरुषस्य एकस्मिन् धर्मिणि धर्मयो: प्रकारयोरसहभूतयो: दर्शनरूपा विप्रतिपत्तिरत्र ग्राह्या। तस्यास्तृतीयपुरुषगतसंशयकारणत्वात्। वादिप्रतिवादिगता विप्रतिपत्तिस्तु न तयो: संशयं जनयति, नापि परेषाम्। अत एव प्रागुक्तरीत्या वादिप्रतिवादिनो मतमुपश्रुत्य अपरेषां जायमाना या एकस्मिन् धर्मिणि विरुद्धधर्मद्वयावगाहिनी बुद्धि: साऽपि विप्रतिपत्तिपदवाच्या सती संशयं जनयति।

एतदुपपादयितुं भाष्यकारो व्याचख्यौ— 'व्याहतमेकार्थदर्शनं विप्रतिपत्ति:। व्याघात: विरोधोऽसहभाव:' (८)।

इदं त्ववधेयम्। विरोधोऽत्र भावाभावावगाहित्वप्रयुक्तो बोध्य:। न तु नियतवैयधिकरण्यप्रयुक्त:। वैयधिकरण्यप्रयुक्तस्य विरोधस्य क्वचिद्व्य-भिचारदर्शनेन व्यभिचारसंभवशङ्कायां तु पराशक्यत्वात्। किञ्च परस्परं विप्र-तिपन्नयो: वादिनो: स्वस्वसिद्धान्तेषु दृढनिश्चयसत्त्वात् तयोर्विप्रतिपत्ति: न तत्संशयं जनयितुमीष्टे। तस्या: विप्रतिपत्ते: द्वौ प्रति भावाभावान्यतरावगा-हित्वेन विरोधाभावात्। तत्रत्यविरोध: न धर्मगत:, तज्ज्ञानस्य धर्मद्वयानव-गाहात्। अपि तु ज्ञानगत:, विरुद्धविषयावगाहिज्ञानद्वयसत्त्वात्। यथाश्रुत-भाष्यवचनानुसारं एकस्मिन्नर्थे विरुद्धधर्मदर्शनं विप्रतिपत्ति:। सा च तदैव

७) न्या वा १-१-२३ पृ ९७

८) न्या भा १-१-२३ पृ १२३ १२४

संभवति यदा एकव्यक्तिगते एकस्मिन्नेव ज्ञाने एकधर्मिगतविरुद्धधर्मद्वयावगाहः न तु व्यक्तिद्वयगते एकधर्मिकविरुद्धधर्मान्यतरावगाहिनिज्ञानद्वये। तथाहि नास्तिकः कथयति नास्त्यात्मेति, आस्तिकश्चास्त्यात्मेति। अत्र आस्तिक-नास्तिकयोरात्मनि सत्त्वासत्त्वान्यतरावगाहिज्ञानयोर्निश्चयात्मकत्वेन तयोस्ततः संशयानुपपत्तिः। यदा तूभयोर्मतमुपश्रुत्य अन्यतरनिर्धारणाय साधकं हेतुमनुपलभमानः तृतीयः पुरुषः, वादिप्रतिवादिवाक्यजन्यप्रतीतिद्वयप्रामाण्ये सन्दिहानः, अर्थेऽपि सत्त्वादौ संदेहवान् भवति।

न चैवं प्रामाण्यसंशयस्यैवात्र संशयजनकत्वं न तु व्याहतार्थदर्शनस्येति वाच्यम्। प्रामाण्यसंशयस्य तेजकत्वेनोक्तधर्मदर्शनजन्यप्रामाण्यशङ्काशून्यार्थनिश्चयरूपप्रतिबन्धकाभावसपादकत्वेनान्यथासिद्धत्वात्। अन्यथा प्रामाण्यसंशयस्यान्यक्षान्यन्तर्भावेण पृथक् संशयकारणतया परिगणनप्रसङ्गः। (९)

विप्रतिपत्तिरूपवाक्यद्वयं तु संशयविषयसत्त्वादिप्रतीतिजननायैव केवलमुपयुज्यत इति सुतरामन्यथासिद्धम् (१०)। अतो वाक्यद्वयप्रतीतेऽ जायमानः संशयः प्रामाण्यसंशयाहित एव वक्तव्यः (११) एतच्च 'न चान्यतरसाधको हेतुरुपलभ्यते। तत्र तत्त्वानवधारणं संशय' इति भाष्यवचनेनापि सूचितम् (१२)। वार्तिककारोऽप्याह– 'केऽत्र सम्यक् प्रतिपन्नाः के मिथ्येति श्रोतुः सन्देहो भवति (१३) इति। तदेवं संशयजनकत्वं न प्रामाण्यसंशयस्य, किन्तु व्याहतैकार्थदर्शनस्यैवेति निर्णीतं भवति।

वार्तिककारस्तु व्याहतार्थप्रवादो विप्रतिपत्तिशब्दार्थ इति व्याचख्यौ (१४)। तदनुसारं विप्रतिपत्तिरूपवाक्यद्वयं विप्रतिपत्तिपदार्थः। तस्य संशयविषयप्रतीतिमात्रजनकत्वेनान्यथासिद्धत्वात्, न संशयकारणत्वं संभवतीति हेतोः भाष्यकारपक्ष एव साधीयान् इति प्रतीयते। वादिविप्रतिपत्तिः सन्दे-

९) प्रमाणपद्धतिः वेदेशतीर्थी टिप्पणी पृ ६६ १०) तत्रैव

११) द्र न्या सि मु गुणनिरूपणम् कारिका १३० पृ ४८१

१२) न्या भा 1–1–23 पृ 124 १३) न्या वा 1–1–२३ पृ ९६

१४) न्या वा 1–1–२३ पृ ९६

हबीजमिति तु सुवचम्, तत एव संशयविषयोपस्थितेर्जा मानत्वात्।

किं च व्याहत अप्रवाद इत्यत्र प्रवादपदेन विप्रतिपत्तेर्बहुजनप्रसिद्ध-त्वमवश्यकमिति सूचितम्। प्रसिद्धो वादः प्रवाद इति व्युत्पत्त्या तदर्थाव-गमात्।

विप्रतिपत्तिपदेन विरुद्धार्थप्रतिपादकवाक्यद्वयविषयत्वं बोध्यते इत्यपि केचिदूचुः (१५)।

चतुर्थः संशयप्रभेदः–

उपलब्ध्यव्यवस्थातो जायमानः चतुर्थः संशयस्य प्रभेदः। अव्यवस्था हि तत्त्वव्यवस्थापकप्रमाणाभावः। सतः-विद्यमानस्य उदकस्य उपलब्धिस्तडा-गादिषु, असतः अविद्यमानस्य च तस्योपलब्धिः, प्रतीतिः, मृगमरीचिकादौ भवति। एवंरीत्या जलोपलब्धिः सत्त्वासत्त्वावगाहिनी विभिन्नस्थलेषु दृष्टा। यदा पुनर्द्रष्टा जलमुपलभमानः तत्र, सत्त्वासत्त्वान्यतरतत्त्वव्यवस्थापकं प्रमाणं नोपलभते तदा संशेते 'किं सदुपलभ्यतेऽथासत्'? इति। अयं च संदेहः साधकप्रमाणाभावपरिकल्पितः। साधकप्रमाणाभाव एव च उपल-ब्ध्यव्यवस्थापदेन बोध्यते। (१६)

इदमुदाहरणं यथा कूपखननानन्तरं जलोपलब्धौ सत्यां निश्चायका-भावे संशयो जायते किं प्राक् सदेवोदकं कूपखननेनाभिव्यक्तमुपलभ्यते उता-सत्तेनोत्पन्नमिति (१७)।

अत्रायं पूर्वपक्षः। नन्विदं संशयव्युत्पादनमयुक्तम्। तद्बीजानभि-धानात्। न च जलोपलब्धिः संशयबीजमित्युक्तमिति वाच्यम्। तस्य धर्म्यु-पलब्धित्वेन तद्भिन्नस्यैव संशयबीजस्य वक्तव्यत्वात्। अन्यथा संशयमात्रे धर्म्युपलब्धेः सत्त्वेन सर्वोऽपि संशय उपलब्धिजन्य एव स्यात्। किंच किमयं संशयो जलधर्मिकः सत्त्वासत्त्वकोटिकः उताभिव्यक्त्युत्पत्तिकोटिकः। नाद्यः, किमिदं कूपखननात्प्राक् सद्वाऽसद्वा इत्येतावतावतैव पूर्णत्वात् 'कूपखननेना-

१५) प्रमाणपद्धतिः जनार्दनभट्टीत टिप्पणी पृ. ६४

१६) प्र न्या २-२-२३ पृ १२४

१७) प्रमाणपद्धतिः पृ. ५५.

मि... क्तमुपलभ्यते' 'तेनोत्पन्नं' इत्यंशयोर्वैयर्थ्यापातात् । न हि तं यः 'प्राक् ...देव' इत्यस्य, 'असत्' इत्यस्य, 'उपलभ्यते' इत्यस्य च वैयर्थ्यापातात् । इतिचेदिदं समाधानम् । नोच्यते जलोपलब्धिमात्रं सन्देहबीजमिति येनोक्तदोषः स्यात् । किन्नाम ? कूपखननप्रयुक्ततया ज्ञातं संशयबीजमिति । धर्मिज्ञानं तु न ज्ञातकारणम् । किन्तु स्वरूपसदेव । ततश्च न सर्वसंशयस्योपलब्धिजन्यत्वप्रसंगः यदत्रोक्तं संशयः किं कोटिकः ? इति । प्राक् सत्त्वासत्त्वकोटिक इति ब्रूम । न च 'कूपखननेनाभिव्यक्तमुपलभ्यते' तेनोत्पन्नमित्यंशे वैयर्थ्यमिति वाच्यम् । न कूपखननान्तरभाविन्या ज्ञाता उपलब्धिः संशयहेतुः । अपि तु प्राक् सत्त्वे अभिव्यक्ततया असत्त्वे चोत्पन्नतयेत्युभयोपपन्नतया ज्ञातेति ज्ञापनार्थत्वात् । एतेन संशयबीजानां ज्ञातकारणत्वादुपलब्धेरज्ञातकारणत्वेन संशयबीजत्वायोग इति परास्तम् । उपलब्धेरपि ज्ञातकारणत्वाङ्गीकारात (१८) ।

उपलब्ध्यव्यवस्थापदं भाष्यचन्द्रकारः पुनरेवं व्याचख्यौ । अस्तित्वे निर्णीयतेऽनेनेति उपलब्धिः साधको हेतुः तस्य अव्यवस्था अपरामर्शः (१९) इति । वस्तुतस्तु प्रागुक्तप्रकारेण कूपखननादिप्रयुक्ततया ज्ञाता जलाद्युपलब्धि निर्णायकप्रमाणाभावसहकृता सती संशयहेतुः ।

पंचमः संशयप्रभेदः-

अनुपलब्ध्यव्यवस्थातो जायमानः संशयस्य पंचमः प्रभेदः । नास्तित्वप्रकारक प्रमापकाभावादसौ जायत इति भाष्यचन्द्रकारः (२०) । अनुपलब्ध्यव्यवस्था च बाधकप्रमाणाभावरूपेति वार्तिककाराशयः ।

सतोऽपि मूलकीलकोदकस्यानुपलब्धि सतस्त्वनुत्पादादनुपलब्धिरतो जातुचिदनुपलभ्यमाने जले संशयो जायते 'किं सन्नोपलभ्यते, उतासदिति । इदं तु भाष्यकारीयमुपपादनम् (२१) । प्रकारान्तरेण यथा अस्मिन् वटे पिशाचोऽस्तीति वार्तां श्रुतवतो वटसमीपं गतस्य तत्र पिशाचानुपलब्धौ सत्यां निर्णायकाभावे संशयो भवति । 'किं' विद्यमान एव पिशाचोन्तर्धानशक्त्या नोपलभ्यते किं वाऽविद्यमान एव' (२२) इति ।

१८) प्रमाणपद्धतिः - अभिनवामृतम् टिप्पणी पृ ५६ ५७

१९) भाष्यचन्द्रः पृ. १२५   २०) तत्रैव

अत्रेदमवधेयम् । उपलब्धिरपि न स्वरूपसती संशयहेतुः । अपि तु सत्त्वेऽप्यन्तर्धानशक्त्या वा असत्त्वेन वा उपपन्ना भवतीति ज्ञाता संशयहेतुः एतेन धर्मिज्ञानस्य संशयहेतुत्वादनुपलब्धिः संशयहेतुरित्ययुक्तमिति परास्तम् भवति ।

नव्यनैयायिकास्तु उपलब्ध्यनुपलब्ध्योः साधारणधर्म एवान्तर्भावात् त्रीण्येव संशयकारणानीत्याहुः । तथाचोपलब्धिः सतामेव घटादीनां प्रदीपारोपणेन दृष्टा असतां तेषां कुलालादिव्यापारानन्तरमिति सदसद्वृत्तित्वाद्भवति साधारणधर्मः । तथैवानुपलब्धिरपि सतामीश्वरादीनामसतां च शशविषाणादीनां दृष्टेति भवत्युभयसाधारणीति [ ] ।

वार्तिककारोऽप्युपलब्ध्यनुपलब्ध्योः पृथक् संशयकारणत्वं निराह । परं नव्यमते यथा तयोः साधारणधर्मेऽन्तर्भावो न तथा वार्तिककारमते । तन्मते तयोः त्रिष्वपि संशयप्रभेदेषु आवश्यकत्वात् इतरपदविशेषणत्वम् [२४]

समालोचना–

समानासमानधर्मोपपत्ती संशयहेतुकोटिस्मृतिजननद्वारा सन्देहकारणे भवतः । तत्र साधारणधर्मस्य ज्ञानं यथा संस्कारोद्बोधकतया कोटिस्मृतिहेतुर्न तथाऽसाधारणधर्मज्ञानं संशयहेतुः किन्त्वसाधारणधर्मत्वेनैव ज्ञातं संशयहेतु कोटिस्मृतिजनकं भवति । अत एवोक्तं समानासमानजातीयव्यवच्छेदद्वारा व्यतिरेकमुखेन वाऽसाधारणधर्मः संशयहेतुरिति । तथाहि– तदितरावृत्तित्वे सति तद्वृत्तित्वमसाधारणत्वम् । येन रूपेण यस्य संशयकोटिसामानाधिकरण्यं ज्ञातं तेनैव रूपेण तज्ज्ञानस्य कोटिस्मारकत्वनियमात्, शब्दरूपे धर्मिणि नित्यत्वानित्यत्वरूपकोटिद्वयसामानाधिकरण्ये ज्ञातव्ये आकाशगुणत्वरूपो धर्मः नित्यानित्यव्यावृत्तत्वेन रूपेण ज्ञातव्यः । तदेव चासाधारणधर्मत्वमतस्तेनैव रूपेण तस्य कोटयुपस्थापकत्वमभ्युपेयम् ।

---

२३) निर्दिष्टम् प्रमाणपद्धतिः पृ. ५५

२४) द्र न्या वा १-१-२३ पृ ९६

विप्रतिपत्तिजन्यसंशयस्थले कोटिज्ञानस्य निश्चयरूपत्वेन संशयहेतुत्वायोगात् विप्रतिपत्तेः प्रामाण्यसंशयद्वारा अर्थसंशयजनकत्वमिति बोध्यम् । उपलब्ध्यनुपलब्ध्योस्तु विशेषस्मरणकारणत्वात्संशयहेतुकोटिस्मृतिजननद्वारैव कारणत्वं सूपपादम् ।

एतेषु पंचसु कारणेषु पूर्वः समानोऽनेकश्च धर्मो ज्ञेयस्थः उपलब्ध्यनुपलब्धी पुनर्ज्ञातृस्थे' इति भाष्यवचनं (२५) चतुर्णां स्वरूपं विवृणोति । तच्च सोत्प्रासमभिहितं वार्तिककारेण । तद्यथा- तत्र समानोऽनेकश्च धर्मो ज्ञेयस्थः, उपलब्ध्यनुपलब्धी पुनर्ज्ञातृस्थे इति भाष्यम् । तत्रोपलब्ध्यनुपलब्ध्योस्तावत पृथक् संशयकारणत्वं न भवतीति चर्चितमेतत् । समानोऽनेकश्च धर्मो ज्ञेयस्थ इत्यपि न बुध्यामहे । किमत्र धर्मः संशयकारणमथ ज्ञानमिति । न धर्मः संशयकारणमित्यनेकधा समर्थितम् । समानानेकधर्मज्ञानं तु संशयकारणं, तच्च ज्ञातरि वर्तत इति नास्ति भेदः (२६) इति । इदं चोपलब्ध्यनुपलब्ध्योः पृथक् संशयकारणत्ववादिनां मताधिक्षेपायैवेति द्रष्टव्यम् । अत एव केचित् समानधर्माधिगमादित्यादिभाष्यग्रन्थं पंचविधसंशयवादिमतनिराकरणपरतया व्याचख्यु (२७) ।

किंच समानधर्मोपपत्त्यादिकारणानां निश्चयात्मकत्वात्कथं ततो विपरीतस्य संशयस्योत्पत्तिरित्याक्षेपो भाष्यकारेण 'अन्वयव्यतिरेकानुविधायित्वमेव कार्यकारणसारूप्यमिति निर्णीय प्रतिक्षिप्तः (२८) । उद्योतकरस्तु अन्वयव्यतिरेकानुविधायित्वं कार्यकारणयोरान्तरो धर्मः न तु साधारणो धर्म इति कथं स तयोः सारूप्यं सम्पादयेदिति प्रतिपाद्य स्विशेषदर्शनाभाव एव उभयोः समानो धर्म इति निरणैषीत् ।(२९)

फणिभूषणतर्कवागीशस्तु भाष्यकारपक्षमेव मूलानुगामितया समर्थयति । [३०]

२५) न्या वा ३ पृ २५
२६) न्या वा -१-२३ पृ ९६
२७ प्र भाष्यचन्द्रः पृ, १२५
२८) न्या भा २-१-६ पृ २१६
२९) न्या वा २-१-६ पृ १८४
३०) न्याय फिलासॉफी पार्ट २ न्यायसूत्रम् २ १ ६ इल्युडिडेशन पृ 13

'सामान्यप्रत्यक्षात् विशेषाप्रत्यक्षात् विशेषस्मृतेश्च संशयः' इति काणादसूत्रम् (३१)। एतच्च न्यायसूत्रेणाविरुद्धम्। उपपादितं च तथा वार्तिककारेण। शंकरमिश्रस्तु कणादमते एकविध एव संशय इति निरूपयामास [३२]। गौतममते पंचविधः संशयो न तु त्रिविध इति फणिभूषणमहोदयो निपुणं परीक्ष्य निरणैषीत् (३३)।

एष विशेषः पुनरनुसन्धेयः। मणिकारः उपाधिप्रकरणे उपाधेर्निश्चितः सन्दिग्धश्चेति द्वैविध्यमुपपाद्य 'यत्र च साधनाव्यापकत्वसन्देहः साध्यव्यापकत्वसंशयो वा तदुभयसंदेहो वा तत्र हेतुव्यभिचारसंशयाधायकतया सन्दिग्धोपाधिरि'ति प्रतिपादयामास (३४)। तदुपरि हेतुव्यभिचारेत्यस्य – व्याप्यसंशयस्य व्यापकसंशयहेतुत्वादिति मूलकृतो भावमाविश्चकार दीधितिकारः। तत्र व्याप्यसंशयस्य संशयकारणत्वं पृथगेवेति केषांचिन्मतं प्रतिषाद्य तस्य साधारणधर्म एवान्तर्भावसंभवात् न पृथक् संशयहेतुत्वमिति दीधितिकारः (३५) प्राह। एतच्च नव्यमतत्वेन निर्दिष्टं तेन। समर्थितं चैतदेवं गदाधरभट्टाचार्येण। (३६)

तदेवं संशयकारणपरीक्षायां विधीयमानायां व्याप्यसंशयादीनां व्यापकसंशयादिकं प्रति कारणत्वमनुभवबलादवश्यमभ्युपेयं भवति। तथाहि–महानसेज्वलनो न जलहृद इति स्मरतां पर्वतादिकमपि पश्यतां धूमादिसंशयभावाभावाभ्यां हुताशनसंशयभावाभावदर्शनात्तस्यापि तद्धेतुत्वम्। समानेत्यादिसूत्रे तदनुपादानात् मूलविरोध इति तु न शङ्क्यम्। सूत्रस्थचकारस्य अनुक्तसमुच्चयार्थत्वात्। इति (३७)।

एतावता पंचविधोऽपि संशयः सोपपत्तिकं निरूपितो वेदितव्यः।

---

३१) वै सू २–२–१७

३२) निर्दिष्टम् न्यायफिलासॉफी पार्ट 1 पृ ९८

३३) तत्रैव

३४) त चि अनु ख. पृ ०४६ अनुमानगादाधरी

३५) दीधितिः अनुख पृ १०४७ १०५० अनुमानगादाधरी

३६) अनुमानगादाधरी पृ १०५० १०११

ज्ञानसामान्य-कारणानि

विषयोपक्षेपः

स्मृतेः, प्रमायाः, अप्रमायाः, निर्विकल्पकज्ञानस्य, विषयाः णां च विचारः यथायथं तत्संबद्धविषयनिरूपणावसरे विस्तरेणोऽत्र [illegible] त इति संक्षेपमितो विविधदर्शनकारामिमतं ज्ञानविभागप्रकारं उपवर्ण्य [illegible]ते ज्ञानसामान्यकारणानि कानीति विचारयामः।

तत्र ज्ञानसामान्यनिष्ठप्रत्यासत्त्या विषयनिष्ठप्रत्यासत्त्या च ज[illegible]। प्रथमाप्रत्यासत्तिः समवायरूपा आत्मनि तद्गुणस्य ज्ञानस्य समवायात्। द्वितीया च विशेष्यत्वादिरूपा विषयीक्रियमाणेषु विषयेषु ज्ञाननिरूपित [illegible]शे-ष्यत्वादिधर्माणां सत्त्वात्। तदेवं ज्ञेयत्वेन विषयाणां ज्ञातृत्वेन च आत्मनः [illegible]ानं प्रत्यवश्योपादेयत्वेन ज्ञानसामान्यकारणत्वं निर्विवादमुदितं भवति। [illegible] एव ज्ञानसमवायिकारणतावच्छेदकतयाऽत्मत्वजातिसिद्धिरिति न्यायसरणिः।

किं च आत्मनः विभुत्वेन उत्पद्यमानं ज्ञानं कस्मिन्नात्मप्रदेशे [illegible] ते इति विचारणीयम्। तत्र भोगायतनं शरीरमिति शरीरलक्षणं प्रदर्श्य [illegible]-च्छिन्नात्मनि भोगो जायते तत् भोगायतनमिति विव्रीयते नैयायिकैः। [illegible]श्च सुखदुःखसाक्षात्कार इत्युच्येते। एतेन सुखादुःखाद्यनुभवो नाम ज्ञान शरीरावच्छिन्नात्मन्येव जायते इति सिद्धं भवति। एवं चात्मनो विपच्यमान-कर्माशयसहितः शरीरसंबन्धोऽपि ज्ञानसामान्यकारणमिति कथितं भवति।

सति चैवं विभोरात्मनः शरीरसंबन्धस्य सर्वदाविद्यमानत्वेन युगपदनेक ज्ञानोत्पत्तिप्रसङ्गः। न चानुभूयते ज्ञानानां यौगपद्यम्। ज्ञानधारायामनुभूयमानायां एकानन्तरमपरमित्येव क्रमेणज्ञानोदयात्। इदमयौगपद्यमन्तःकरणस्य सकलत्व ह्यन्द्रियाधिष्ठातुरणुपरिमाणस्य च मनसः सत्त्वे प्रमाणम् (१)। ततश्च आत्ममनःसंयोगोऽपि ज्ञानसामान्यकारणमिति सिद्धं भवति। एतन्मनसि निधायैव भाष्यकृदाह सदेहस्यात्मनो मनसा संयोगो विपच्यमान कर्माशयसहितो जीवनमिष्यते इति (२) इति। एतेनात्ममनःसंयोग एव जीवन-

---

(१) युगपज्ज्ञानानुत्पत्तिर्मनसो लिङगम् - न्या सू १-१-१६

(२) ३-२ २६ पृ. ५७९

मित्युक्तं (३) भवति । एतदनुसृत्यैवोक्तं खद्योते 'शरीरावच्छिन्नस्यात्ममनोयो-गस्य ज्ञानहेतुत्वमस्त्येव इति ।

अत्रेयमाशङ्का । सर्वेन्द्रियोपरमरूपा हि सुषुप्तिः । न तस्यां किमपि ज्ञानं जायते । करणसामग्रीसमवधानदशायां च कार्योत्पत्यवश्यंभावनियमात् सति च शरीरावच्छेदेनात्ममनःसंयोगे सुषुप्त्यवस्थायां कथं ज्ञानानुत्पादः ? किं च ज्ञानाधिकरणत्वमप्यात्मनस्तदानीं व्याहतं भवति । इति ।

तत्रैवं समाधीयते, कारणसामग्रीवैकल्यादेव कार्यानुत्पाद इति । तथा च आत्ममनःसंयोगस्येव त्वङ्मनःसंयोगस्यापि ज्ञानसामान्यकारणत्वमभ्युपेयते । सुषुप्त्यवस्थायां च पुरीतन्नाम्नि नाडिविशेषे प्रविष्टस्याणुपरिमाणस्य मनसस्त्व-गिन्द्रियेण संबन्धाभावात् न तस्यामवस्थायां ज्ञानमुत्पद्यत इति (४) । कार-णाभावाच्च कार्याभाव इति न काप्यनुपपत्तिः ।

किं च यः पुनरयं सुप्तोत्थितस्य परामर्शः 'एतावन्तं कालं सुखमह-मस्वाप्समिति' स तु तदानीं दुःखाभावादौपचारिक एव मन्तव्यः । तदव-लंबेन जीवस्वरूपसाक्षीन्द्रियसाधनं तु न रमणीयम् ।

यत्पुनरापादितं ज्ञानाधिकरणत्वमात्मनो व्याहन्येत इति तदसमीची-नम् । मुक्तात्मनोऽपि ज्ञानाधिकरणत्वाभावात्, ज्ञानसमवायिकारणतावच्छेदकजातिमत्वस्य तल्लक्षणत्वेन स्वीकारात् । तथा च सुषुप्त्यवस्थायां ज्ञानाभावेऽपि तथाविधात्मत्वरूपजातिमत्वान्न लक्षणक्षतिः ।

कार्यमात्रं प्रति निमित्तत्वादीश्वरादीन्यष्टौ साधारणनिमित्तकारणमङ्गी-कुर्वन्ति नव्यनैयायिकाः [६] । तानि च कारणानि कार्यसामान्यंप्रति कार-णत्वात् ज्ञानकारणान्यपि भवन्तीति सुविलोकम् ।

प्रत्यक्षादिज्ञानविशेषाणां ज्ञानसामान्यकारण विजातीयकारणजन्य-त्वात् तद्विचारः प्रत्यक्षादि विषयनिरूपणावसरे विधास्येत ॥

३) आत्ममनःसंयोगस्यैव सकलानुभवकारणत्वेन तस्यैव जीवनमिति संज्ञा । भाष्यटीका खद्योते ३-२-२६ पृ ५७९

४) न्यायसिद्धान्तमुक्तावली - कारिका ४८ पृ ३६.

५) न्यायकोशः पृष्ठम् २२६ ६) तत्रैव

ज्ञाननाश कारण विचारः—

इदमत्रानुसन्धेयम् । आत्मसमवेतस्य ज्ञानस्य विनाशो नाश्रयनाशादुपपादयितुं शक्यः । ज्ञानाश्रयस्यात्मनो नित्यत्वात् । विरोधिगुणोत्पत्त्या ज्ञाननाश इत्यपि न संभवति, तथाविधगुणस्याग्रहणात् । तदेवमुभयविधगुण नाशकारणाभावाद् ज्ञानस्य नित्यत्व प्रसंगः [७] । तस्यायं परिहारः । आश्रयनाशरूपकारणाभावेऽपि द्वितीयं नित्यत्वात् । विरोधिगुणोत्पत्तिरूपं कारणं वर्तत एव। तथा च यथा प्रागुच्चरितः शब्दः तदुत्तरभाविनाशब्देन विनश्यते इति सर्वैरभ्युपगम्यते तथैव ज्ञानमपि तदुत्तरभाविना ज्ञानान्तरेणध्वंस्यत इति सूपपादम् (८) । ज्ञानमनित्यमिति च सर्वजनीनानुभवसिद्धम् । प्रतिज्ञानं चास्माभिर्ज्ञानधारोपलभ्यते— प्रथमं घटज्ञानं, ततो घटमहं जानामीति ज्ञानमेवं क्रमेण । ततश्च स्पष्टमेतत्-यदेकं ज्ञानमपरेण तदनन्तरभाविना विनाश्यते तथा च विरोधिगुणान्तरोत्पत्त्यैव ज्ञानस्य नाश इति सुस्थिरम् (९) ।

उत्पत्तिस्थितिनाशानुसारं विभक्ते काले उत्पत्त्यनन्तरं क्षणत्रयावस्थायित्वं ज्ञानस्य नैयायिकैरभ्युपगम्यते । तदनन्तरं ज्ञानान्तरोत्पत्त्यो पूर्वज्ञाननाशो जायते । विनश्यदवस्थाकं च पूर्वज्ञानं संस्कारं जनयति यः समवायसंबन्धेनात्मनि तिष्ठन् स्मृतिहेतुर्भवति । उत्तरोत्तरममुनैव क्रमेणासङ्ख्येयाः संस्काराः जायन्ते (१०) ।

---

७) न्यायसूत्र ३. २.२३, न्यायभाष्ये पृ ५७५ ७६

८) न्यायसूत्रम् ३-२-२४ तथा अस्यैव भाष्येऽपि पृष्ठम् ५७६–७७

९) उद्योते पृष्ठम् ५७६–७७

१०) न्यायभाष्ये सूत्रम ३-२-२४ पृष्ठ ५७७

ज्ञानप्रक्रिया

विषयोपक्षेपः – न्यायशास्त्रीयं ज्ञानप्रक्रियाविश्लेषणं हि त्रिविधं तत्त्वम वलम्बते, १) मनोवैज्ञानिकम् २) तार्किकम् ३) आत्मिकं चेति ज्ञानघटकतत्त्वानां वर्णनात्मकं विश्लेषणं नाम प्रथमा विधा। तत्र सकलस्य ह्येन्द्रियाधिष्ठातृतया प्रसिद्धं मनः तत्तदिन्द्रियद्वारा बाह्यपदार्थान्ज्ञान विषयीकरोति। इदं च विषयाकरणं प्रधानत्वेन मनस्तत्त्वमवलम्बते।

अत एव सत्यपीन्द्रियार्थसन्निकर्षे यदा सौ न विषयपरिज्ञानं न संभवति। न मया दृष्टं अन्यत्र मे मनोऽभूदित्यादिव्यवहारश्चोपपद्यते। ज्ञानप्रक्रियायां विशेषतः स्मृति विषये मनसः किमप्यनितरसाधारणं स्थानं समुल्लसतीति मनोनिरूपणावसरे प्रपञ्चयिष्यते।

ज्ञानप्रकाराणां उद्देशलक्षणपरीक्षादिभिरालोचनं द्वितीया विधा। तर्कमाधारतयोपादाय ज्ञानप्रकाराणां प्रत्यक्षादीनां परस्परव्यावृत्तिप्रयोजकलक्षणादिनिरूपणद्वारा तदुत्पादकसन्निकर्षादि विचारोऽत्र विधीयते।

तृतीया च विधा आत्मनि प्रापितस्य ज्ञानस्य यथावस्थितपदार्थज्ञेयविषयीकारित्वेन परमप्रामाण्यविनिश्चये पर्यवस्यति।

आसां तिसृणामपि विधानां पार्थक्येन निरूपणं न्यायशास्त्रे नोपलभ्यते। अथापि तासां सूक्ष्मेक्षिकया पर्यवेक्षणं ज्ञानप्रक्रियायां न्यायशास्त्रीयं सर्वातिशायि विश्लेषण प्रणालीपाटवमवगमयति। एतच्च यथावसरं तत्तद्विषय निरूपणावसरे निर्दिश्येत।

प्रमात्रादि चतुर्वर्गः

प्रकृते न्यायशास्त्रानुसारं सामान्यतो ज्ञाने निरूपिते तत्प्रभेदनिरूपणात्पूर्वं ज्ञातृज्ञेयभावादिविषये किंचिद्विचार्यते। ज्ञाता, ज्ञेयं, ज्ञानं, ज्ञानसाधनं चेति चतुष्टयं ज्ञानप्रक्रियायां नियमेनावतिष्ठत इति सर्वविदितम्। तत्र चेतनो ज्ञाता इत्युच्यते, सकलमपि पदार्थजातं च ज्ञेयमिति। ज्ञानं तु प्रागुपपादितमेव। ज्ञानसाधनं च परस्ताद्विचारयिष्यते। इदमेव तत्त्वचतुष्टयं प्रमाता, प्रमेयं, प्रमा, प्रमाणमिति, व्यपदिश्यते शास्त्रकारैः। अयथार्थज्ञानस्य सफलप्रवृत्तिजनकत्वाभावात्तद्व्युदासाय ज्ञात्रादिस्थाने प्रमात्रादिपरि-

१] न्याय थेयरी ऑफ नॉलेज बाय सतीशचंद्र चटर्जी इन्ट्रॉडक्टरी।

मह: । यथार्थज्ञान जननद्वारा सकललौकिकालौकिकप्रवृत्तिसंपादनात् न्यायशास्त्रं तत एव सप्रयोजनं भवति । अत एव विषय-प्रयोजन-अधिकारि-संबन्धरूपानुबन्धरूपानुबन्धचतुष्टयोपपत्तये प्रमात्रादि तत्त्वघटितप्रमाणेप्रांः यानिरूपणं प्रथममारभ्यते शास्त्रेषु । तत्र प्रमात्राद्यपेक्षया प्रमेय परिकल्पना व्यापकीभूता । प्रमात्रादीनामपि तदंतर्भावसंभवात् । संक्षेपेण तदुपपादनं तावद्विधीयते ।

१) प्रमाता

यस्येप्साजिहासाप्रयुक्तस्य प्रवृत्ति स प्रमाता इति (२) वात्स्यायनो व्याचख्यौ । एतेन प्रवृत्तेः प्रमामूलकत्वं सूचितं भवति । अन्यथा प्रमावान् प्रमाकर्ता वा प्रमाता इत्येव युक्तं भवेत् । तथाहि प्रमाकर्तुः प्रवृत्तिमत्वकथनेनेदमुदितं भवति यत् चेतनो हि प्रमाकरणेन प्रमां कृत्वा हेयमुपादेयं हातुमुपादातुं वेच्छति । तथेष्ट्वा च मनसा वचसा कायेन वा व्याप्रियते । तेन उपादेयमुपादत्ते हेयं जहाति । तदिदं लौकिकावगति जानाति इच्छति ततो यतते वदति चेष्टते वा इति । क्रियावर्गस्यास्य प्रयोजनोद्देश्यकत्वात् व्यापारवत्वम् । तदपेक्षया प्रयोजनस्य फलत्वम् (३) एवं च प्रयोजनोद्देशक व्यापारवान् प्रमाता । इत्युक्तं भवति ।

स च प्रमाता आत्मा (४) । तस्यैव प्रमासमवायित्वात् प्रतिमत्त्वाच्च प्रमां प्रति समवायिकारणत्वं प्रमातृत्वमिति तु न वक्तव्यम् । ईश्वरीयप्रमाया आजन्यत्वात् तत्सवायिकारणाप्रसिद्धेः । अतः प्रमासमवायित्वमेवोचितम् ।

रागित्वादिरूपेण प्रमातृप्रभेदानां प्रवृत्तिविषयकश्च विशेष विचारो वार्तिकादौ द्रष्टव्यः ।

२) प्रमेयम्–

'योऽर्थः प्रमीयते तत्प्रमेयम्' इति वात्सायनवचः । अर्थपदेन अर्यते

२) न्या भा. १ १ १ पृ ८

३) न्या भाष्यचंद्र २ २ २ पृ ८

४) प्रशास्तपादभाष्यम् पृष्ठम २६ न्यायकोशे उदाहृतम पृ ५५७

५) कुसुमांजली टीका स्तबक ४ कारिका ५ तत्रैवोदाहृतम पृ ५५७

६) पाणिनीय व्याकरणे प्रमात समीक्षा प्र समीक्षा प्र पु पृ २०

इदमिति व्युत्पत्त्या [६] विषयग्रहणम् । स च त्रिविधः । प्रमाणेन हि त्रिविधं प्रमेयमर्थ्यते ।

किंचिदुपादेयं किञ्चिदुपेक्षणीयमिति । वर्तते चात्र सकलशास्त्रकाराणां संमतिः । व्याकरणमहाभाष्यकारोऽप्यूरीकरोति प्रकारमिमम् । योऽर्थो वेदविहितः सोऽभ्युदयायोपादेयः, यस्तु निषिद्धः स दोषावहः इति हेयः, यस्तु न विहितो नापि प्रतिषिद्धः स उपेक्षणीयः इति भाष्यकृदाशयः (७)। उक्तं च न्यायभाष्येऽपि 'अप्रतीयमानमर्थं कस्य जिज्ञासते ? तं तत्त्वतो ज्ञातं हास्यामि वोपादास्ये, उपेक्षिष्ये वेति । ता एता हानोपादानोपेक्षाबुद्धयः तत्त्वज्ञानस्यार्थः तदर्थमयं जिज्ञासते (८)।' इति । कंदलीकारोऽप्याह— 'प्रमितिर्गुणदोषमाध्यस्थ्यदर्शनम् । गुणदर्शनमुपादेयत्वज्ञानम्, दोषदर्शनं हेयत्वज्ञानम्, माध्यस्थ्यदर्शनं न हेयं नोपादेयमिति ज्ञानं यतः सा प्रमितिः (९)' इति।

तात्पर्याचार्याः (वाचस्पतिमिश्राः) अपि विषयत्रैविध्यमेवमेव निरूपयामासुः (१०)।

बौद्धाचार्यो धर्मोत्तरस्तु [११] उपेक्षणीयं [illegible]ार्थमेव न स्वीकरोति । तन्मते हेयोपादेयरूपा द्विविधैव प्रमेयराशिः, उपेक्षणीयो ह्यनुपादेयत्वाद्धेय एव अन्तर्भवति । तत्तु न युक्तिसहम् । हेयोपादेयभिन्नत्वेनोपेक्षणीय विषयस्योपलम्भात् ।

जयन्तभट्टो न्यायमञ्जर्यामसुमेवाभिप्रायमाविष्करोति [१२]।

जैनदर्शनाचार्या अपि पक्षममुं समर्थयन्ति [१३]।

---

७) पाणिनीयव्याकरणे प्रमाणसमीक्षा प्र स प्र पु पृ १९ तत्रैवोद्धृतं महाभाष्ये १ अ १ पा २ आ पृ १०४

८) न्याय भाष्ये १ १ ३२

९) कन्दली पृष्ठम्१९९इति पाणिनीय शास्त्रे प्रमाणसमीक्षायामुद्धृतम १९

१०) तात्पर्य पृष्ठ ११

११) न्यायबिन्दुटीका १ १ तत्रैव उद्धृतं पृ १९ २०

१२) न्याय मकरन्दः प्रथम भागपृष्ठम २२–२३

सकलमपि पदार्थजातं सामान्यतः प्रमाविषयत्वात्प्रमेयमित्युच्यते । अथापि अस्मदीय प्रमा विषयत्वस्य सर्वत्रासंभवात् प्रमेयत्वं नाम ईश्वरीय प्रमाविषयत्वमिति केचिन्नैयायिका व्याचख्युः (१४)। तच्च ईश्वरस्य सर्वज्ञत्वात् सर्वपदार्थेषु संभवतीति केवलान्वयी ।

सत्यप्येवं प्रमाणप्रमेयेत्यादिसूत्रे प्रमेयपदेन द्वादशविधमेव प्रमेयं गौतमाभिमतमिति उत्तरसूत्रेण (१५) सिद्धं भवति । एतेन विरोधस्तु न शङ्क्य. । प्रमाणादीनां प्रमेयत्वेऽपि कतिपयपदार्थानामेव प्रमेयत्वेन परिगणनं तेषां तत्वज्ञाननियामकत्वं बोधयति न तु प्रमेयान्तराणां व्यवच्छेदम् । अत एव संसारहेतु मिथ्याज्ञानविषयः मोक्षहेतुष विषयो वा प्रमेयमिति तल्लक्षणान्तरमप्युच्यते नैयायिकैः (१६) ।

प्रमा

'यदर्थविज्ञानं सा प्रमितिः' इति भाष्यम् । अर्थे अर्थस्य वा निशानमर्थविज्ञानम् । व्युपसर्गो याथार्थ्यं विशेषमाह । ज्ञानपदमनुभव परम् । तेन यथार्थानुभव एव प्रमितिरित्युक्तं भवति । इदं च प्रमातत्वं बहुभिर्बहुधा व्याख्यातं विशेषतो विचारणीयमिति पृथक् सविस्तरं निरूप्येत ।

प्रमाणम्

'स येनार्थं प्रमिणोति तत्प्रमाणमिति' भाष्यवचनानुसारेण प्रवृत्तिमत्पुरुष समवेतप्रमाकरणं प्रमाणमिति कथितं भवति । प्रकृतशोधप्रबन्धानुबन्धेन प्रमाणनिरूपणं स प्रपञ्चमुपरि विधीयेत इति नात्र किमप्यधिकमभिधीयते ।

चतुर्वर्णस्य महत्वम्

एतत्प्रमात्रादि चतुष्टयं प्रमाणप्रधानमिति प्रमाणपरिशीलनेप्रसितत्वे ततः शास्त्रकाराः स्वरचितेषु प्रबन्धेषु प्रारम्भे तदेव प्रतिपादयामासुः ।

---

१४) तर्कदीपिका।

१५) आत्मशरीरेन्द्रियार्थ बुद्धिमनःप्रवृत्तिदोष प्रेत्यभावफलदुःखापवर्गास्तु प्रमेयम् न्याय सूत्रम १ १ ९

१६) संसार हेतुः इत्यादि न्याय कोश पृ ५३८

च नतसृषु चैवंविधास्वर्थतत्वं परिसमाप्यत इत्याह भाष्यकारः (१७)। तत्वपरिसमाप्तिरत्र विनियोगयोग्यता उपेक्ष्यता वा (१८)। सा च चतुर्वर्गसत्व एव भवति। अन्यतमापायेऽप्यर्थस्यानुपपत्तेः (१९)। अनुपपन्ने चार्थे विनियोगो न युज्यते। विनियोगश्चात्र हानोपादानोपेक्षारूपः। प्रवृत्त्यविषयत्वादुपेक्षा प्रयोजनं न भवतीति मनसि निधाय तत्वपरिसमाप्तिपदस्य उपेक्ष्यता वेति विवरणं प्रस्तुतं वार्तिककारेण। उक्तं च भाष्यचन्द्रे—

'प्रमात्रादि चतुर्वर्गप्रयोजनमिहत्रयम्।
प्राप्यप्राप्तिर्हेयहानिरुपेक्ष्ये पेक्षणं तथा॥
प्रवृत्त्यविषयत्वेन नोपेक्ष्यस्य प्रयोजनम्।
प्रमात्रादिरिति प्राहुः प्रयोजनविदोजनाः॥" इति (२०)

अर्थतत्व विचारः

अथेदं विचार्यते किमिदं अर्थतत्त्व नाम? अर्थतत्त्वं नाम अर्थस्य स्वरूपम्। तत्र विद्यते विविधविद्यास्थानानां विमतिः। यथा ब्रह्माद्वैतवादिनः सतेव तत्वं वदन्ति। शून्याद्वैतवादिनस्तु असदेव तत्वं वदन्ति। साङ्ख्यादयस्तु चतुर्विंशतिविधं तत्वमित्यादि वदन्ति। नैयायिकास्तु धर्मं धर्मिणं च भावभवितारौ तत्वं ब्रुवन्ते। भावरूपो धर्मो हि विशेषणम्। स द्विविधः विधिरूपो निषेधरूपश्च। यथा घटः सन् इत्युक्ते घटरूपधर्मिणः सत्वासत्वरूपं स्वभावद्वयं प्रकाशितं भवति। स्वत्वं नाम स्वतादात्म्यम्। पटाद्यसत्वं नाम अन्यान्यातादात्म्यं। ताविमौ स्वतादात्म्यान्यातादात्म्यरूपौ घटस्य तत्वम् (२१) तथा च भावरूपमभावरूपं तत्वं व्याख्यातं भवति। धर्मिरूपं तत्वमपि द्विविधम्। सतो घटादेः घटः सन्नित्यादिरूपेण गृह्यमाणं यथाभूतमविपरीतं स्वरूपम्। तथैवासतः असदिति गृह्यमाणं यथाभूतमविपरीतं स्वरूपं तत्वमि-

१७) न्यायभाष्य १-१-१ पृष्ठम ९ — १८) न्या भा. पृष्ठम ९
१९) न्या भा. पृष्ठ ८ — २०) भाष्यचन्द्रे पृष्ठम ९
२१) भाष्यचन्द्र – पृष्ठम १०

त्युच्यते [२३] इति ।

इदं च सदसदात्मकं भावाभावात्मकं वा तत्वं गौतमीय प्रथमसूत्रे उद्दिष्टम् । वैशेषिकदर्शने तु चतुर्थसूत्रे । अस्य च ज्ञानान्निःश्रेयसप्राप्तिरिति सूत्रार्थः ।

इदमत्रावधेयम् । यथाभूतं अविपरीतं तत्वमित्युपपादयतोभाष्यकारस्यायमाशयः । यथेति स्वभावबोधके पदम् । भूतमित्यस्याविर्भूतमित्यर्थः । आविप्रादुरादयः उपसर्गवत्तात्पर्य द्योतकाः । तथा च भूतमित्यस्य प्रमाविषयमित्यर्थः । स्वभावेन प्रमितमिति पर्यवसन्नं भवति (२४) । प्रमाविषयत्वादेव तत्प्रमेयमित्युच्यते । विपरीतमित्यस्य च परभावेन इतमित्यर्थः । 'इण् गतौ' इति धातोः ज्ञानार्थत्वं 'सर्वेगत्यर्थाः ज्ञानार्थाः' इति शास्त्रप्रसिद्धेरवगन्तव्यम् । भवतेर्ज्ञानार्थत्वं तु नोपलभ्यते । तथापि प्रकाशापरपर्यायोपलब्धिपरतया तदुपपादनीयम् । भाष्यचन्द्रकारस्तुभवते ज्ञानार्थत्वं च भुवःप्रभव इति सूत्रे हिमवतो गंगा प्रभवतीत्युदाहरणे प्रभवतीत्युदाहरणे प्रभवति–प्रथमं दृश्यते इति विवरणेन दर्शितं वृद्धरित्याहुः (२५) ।

ज्ञायतेऽनेनेति करणव्युत्पत्त्या तत्त्वोपदेशकं शास्त्रं ज्ञानपदेनाभिधीयते । अत एव तत्त्वज्ञानान्निःश्रेयसाधिगम इति सूत्रखण्डे ज्ञानपदेन शास्त्रपरिग्रहः (२६) ।

ननु सूत्रे सतामेव तत्त्वानां निरूपणं क्रियते न त्वसताम् । तत् कथमस्य शास्त्रस्य तत्त्वोपदेशपरत्वमिति चेत् नैतदेवम् । सत्तत्त्वे ज्ञाते तद्भिन्नमसदपि विज्ञातं भवति सदधीनप्रकाशत्वादसतः (२७) । अत एव सत्तत्वनिरूपणमेव प्रथमारभ्यते । उक्तं च वार्तिककारेणापि सत्खलु प्रमाणस्या-

---

२३) न्यायभाष्य – पृष्ठम १०–११

२४) भाष्यचन्द्रे पृष्ठ ११

२५ [illegible]चन्द्रे – पृष्ठम ११

२६ [illegible]चन्द्रे पृष्ठम १५ ज्ञानपदमिह करणसाधनमं प्रकृतशास्त्रपरम्

संबन्धं स्वतन्त्रं भवति, असत्तु परतन्त्रं प्रतिषेधमुखेन प्रतिपद्यते (२८)। तत्र स्वातन्त्र्येणासद्भेदा न प्रकाशन्त इति नोच्यन्ते, चतुर्वर्गानन्तर्भावाद्वा, भावप्रपंच दभावप्रपंचोऽप्युद्दिष्टो वेदितव्य इति भावोपदेशादभावप्रपंच उद्दिष्टो भवतीति नोच्यन्त (२९) इति।

किं च सद्भेदानामनन्तानां प्रमाणादि घटपटादीनां मध्ये प्रमाणादीनामेव तत्त्वज्ञानान्निःश्रेयसाधिगमः, ननु घटपटादीनामिति प्रमाणादय एव सूत्रे शास्त्रे वा लक्षिताः परिक्षिताश्च। तथा च भाष्यम् (३०)। सत्खलु षोडशधा व्यूढमुपदेक्ष्यते इति। सूत्रे प्रमाणादीनां तत्त्वमिति शेषिकी षष्ठी। तत्त्वमिति तेषां भावः। भावश्च विशेषणम्। विशेषणं च विशिष्टीकरणम्। विशिष्टिश्च तदितरव्यावर्तना, भेदबोधनमिति यावत्। तथा च भवितारः प्रमाणादयः पदार्थाः विशेष्यस्तेषां तत्त्वमित्युक्ते कर्मणि षष्ठी प्राप्नोति। सा चात्र न विवक्षिता परभावस्याप्राप्त्यापत्तेः। भावो हि द्विविधः। साधारणोऽसाधारणश्च। साधारणः सत्त्वाभिधेयत्वादिः। तस्य सर्वस्य ज्ञानमिह विवक्षितम् [३१]। तच्च शेषषष्ठ्युपादान एव भवति। प्रमाणादीनां च तत्त्वज्ञानपदैकदेशे तत्त्वेऽन्वयः। तत्वस्य ज्ञानं निःश्रेयसस्याधिगमः इत्यत्र तु कर्मणि षष्ठी। एकदेशान्वयस्तु शिष्यस्य गुरुकुलमित्यादाविवव्युत्पादनीयः [३२]

एवं च भावाभावात्मकसकलपदार्थसार्थस्य प्रमेयान्तर्भावः। पृथगुपात्तानां प्रमाणसंशयादीनां किमधिकं प्रमाया अपि प्रमेयान्तःपातो भाष्यादिषु संशयादीनां पृथगुपादानोपपत्ति प्रदर्शनावसरे निरूप्यत एव।

एतादृश सदसदात्मकतत्त्वस्य ज्ञानं 'तत्त्वज्ञानम्' 'सम्यग्ज्ञानं' प्रमा' यथार्थज्ञानमित्यादिपदैर्निर्दिश्यते।

---

२८) न्यायवार्तिकम – पृष्ठम १ २९) तत्रैव – पृष्ठम १०

३०) न्यायभाष्यम पृष्ठ १३ गौतमसूत्रम – १–१–१

३१) भाष्यचन्द्रे – पृष्ठ १५

३२) अधिकं न्यायमंजरी द्रष्टव्यम – पृष्ठम ८ वैयाकरणा अपि हि दृष्टानि पदानि समस्यन्त्येव. अथ शब्दानुशासनम केषां शब्दानां लौकिकानां वैदिकानां चेति।

प्रमात्रादि चतुर्वर्गविषये निर्णयः

पाश्चात्य तर्कशास्त्रकारास्तु ज्ञानसिद्धान्ते प्रमा, प्रमाता, प्रमेयं चेति त्रितयमे विकारव विमर्श कुर्वन्ति। प्रमाण निरूपणं तु पृथगेव विचार्यते। तन्मते तस्यबहिरंगत्वात्। भारतीयदर्शनकारास्तु प्रमाणमपि ज्ञानसिद्धान्तार- ङ्गत्वेन तत्घटकतया स्वीकृत्य प्रमात्रादिचतुष्टयं परस्परमविनाभावेन तिष्ठतीति प्रतिपादयन्ति (३३)। तदेवमेतेष्वन्यतमाभावे उर्वरितानामनिर्व्यक्तिका भवति। एतच्चाग्रे स्पष्टीभविष्यति।

तत्त्वज्ञानं प्रमा वा प्रवृत्तिमूलम्=

अथेदानीं भारतीयदर्शनेषु सर्वेषु मोक्षाख्यपरमपुरुषार्थ प्राप्त्युपायभूतं तत्त्वज्ञानं निरूपयितुं प्रवृत्तेषु मूलाधारतया तत्त्वज्ञानं नाम किमित्यादौ विचा- रणीयं भवति। प्रागुपदर्शितदिशा पदार्थतत्त्वं विज्ञायैव मानवप्रवृत्तिरुपपन्ना- भवति। अनुभूयते चैतदेवं सर्वैः। तद्विचिकित्सायां इदमेव सिद्धं भवति यत् यदा खलु पदार्थं यथार्थतो विज्ञाय पुरुषःप्रवर्तते तदा तस्य प्रवृत्तिः सफला भवति नान्यथा इति। एवं च सफलप्रवृत्तेर्मूलं प्रमात्मकं ज्ञानमेव

तदनुसारं ज्ञानसामान्यं प्रमाऽप्रमात्वेन द्विविधं भवति। सूत्रभाष्यादि प्राचीन प्रबन्धेषु प्रमाऽप्रमयोः सविस्तरं निरूपणमुपलभ्यते। तत्र सूत्रे प्रमा- पर्यायतया तत्त्वज्ञानपदस्य अप्रमा पर्यायतया च मिथ्याज्ञानपदस्य प्रयोगः समुपलभ्यते। सत्यपि संशयादीनां अप्रमात्वे विपर्ययस्यैवाप्रमापदेन व्यवहा- रःशास्त्रेषु बहुलमुपलभ्यते। तत्रार्थतत्त्वं नाम किं इति प्रागुपपादितमेव। तस्य ज्ञानमेव तत्त्वज्ञानमिति भाष्यवार्तिकाद्यनुसारेण प्रमास्वरूपमुपपादितं भवति। सूत्रेतु कण्ठतः प्रमाणसामान्यलक्षणं कुत्रापि न प्रतिपादितम्। अतस्तत्वज्ञानपदमेव तद्व्याख्यानपरतया भाष्यादि वचनानुसारेण ग्राह्यम्।

मिथ्याज्ञानस्य दौर्बल्यम् –

न्यायसूत्रानुसारं तत्त्वज्ञानेन मिथ्याज्ञाननिवृत्तिः। तेन दोषनाशः। ततः प्रवृत्त्यभावः। तदनन्तरं च जन्मनाशद्वारा दुःखनाशः। दुःखात्यन्त विमोक्ष एव चापवर्गः। इत्येवं क्रमेण तत्त्वज्ञानस्य निःश्रेयस हेतुत्वं सिद्धं

(३३) न्याय थिअरी ऑफ नॉलेज बाय एस. सी. चटर्जी ...

भवति । अस्यां प्रक्रियायां अनात्मन्यात्मत्वादि प्रतीतिरूपं मिथ्याज्ञानं दुःखजनक संसारबंधमूलमनादिसिद्धम्, तत्त्वज्ञानापेक्षया प्रबलत्वादिति स्वयमाशङ्क्य प्रमायाः प्राबल्ये कोटिद्वयमुपन्यस्तं वार्तिककारेण । 'सम्यग्ज्ञानस्य च विषयः सहायी भवति' (३४) इति प्रथमाकोटिः । प्रमाणानुग्रहाच्च (३५) इति च द्वितीया कोटिः ।

अस्यायमाशयः प्रमा हि यथावस्थितमेव विषयं विषयीकरोति । यथा वस्तु तथा ज्ञानमिति प्रमायाः प्रामाण्यव्यवस्थापनद्वारा विषयः सहायी भवति । न पुनर्मिथ्याज्ञानस्य तत्र पदार्थस्य तथाऽनवस्थानात् । अतो विरुद्धरूपेणावस्थितो विषयः मिथ्याज्ञानं न कथमप्युपोद्बलयति । तेन प्रमाप्राबल्यं सिद्धं भवति । किञ्च एकेन प्रमाणेन गृहीते यथार्थज्ञाने प्रमाणान्तरसंवादस्तस्य प्राबल्यं दर्शयति । अयमेव च सजातीयसंवाद इत्युच्यते दार्शनिकैः । एवमेव अर्थक्रियाकारित्वरूपो विजातीयसंवादोऽपि प्रमाप्राबल्यं संपादयति । न चैतदेवं मिथ्याज्ञाने । तस्मात् अनादिसिद्धमपि मिथ्याज्ञानं प्रबलेन तत्त्वज्ञानेन बाध्यत इति । तथाचोक्तं तात्पर्यटीकायां– 'आत्मादि तत्त्वज्ञानं हि प्रमाणविशेषैरागमानुमानप्रत्यक्षैरनुगृह्यते– तस्मात् दृढमूलत्वात्तदपि तत्त्वज्ञानं मिथ्याज्ञानं निवर्तयतीत्यर्थः' (३६) इति ।

प्रमाणस्य प्राधान्यम्– विषयोपक्षेपः–

तदेवं ज्ञानप्रभेदान्तरापेक्षया प्रबलस्य सकलमानवप्रवृत्तिमूलाधारस्य च प्रमात्मकज्ञानस्य प्रमाता, प्रमाणं, प्रमेयं चेति त्रितयमवलम्बनं इत्यस्मिन् विषये नास्ति भारतीयदर्शनकाराणां विमतिः । त्रिष्वपि प्रमाणं नाम प्रमासाधनतया प्रकृष्टं, शास्त्रेषु चिन्ताप्रवर्तकतया दार्शनिकविचारधारामूलाधारं सत् विशेषावधानमर्हति ।

ऋग्वेदादि वैदिकग्रन्थेषु प्रमासाधनार्थकतया प्रमाणशब्दस्य प्रोपसर्गकमाधातोर्वा प्रयोगो नोपलभ्यते । तथापि परिच्छेदार्थकतया तादृशधातोः

(३४) न्यायवार्तिके १-१-२ पृष्ठम २५

(३५) तत्रैव

(३६) तात्पर्यटीका १ - पृ १४

प्रयोगः समुपलभ्यते (३७)। सति चैवं प्रमाणपरिकल्पनायै दोत्तरकालीनेति कथयितुं नास्त्यवकाशः। चक्षुरादीन्द्रियेभ्यो मनसश्च जायमानस्य ज्ञानस्य तत्र तत्र निर्देशोपलम्भात्। विशेषतो ज्ञानसिद्धान्तविचारः औपनिषदे वाङ्मये विपुलं प्रसारमासादितो विलोक्यते। अत एव तस्य ज्ञानकाण्डं इति अभिधानमुपपद्यते। प्रागुपपादित प्रकारेण दर्शनरूपेणावस्थानात् प्राक् न्यायशास्त्रं कतिपयज्ञानप्रक्रियाघटकसिद्धान्तानां समुदायं क्रोडीकुर्वत् विशेषतः सकलविध विचारप्रवर्तनाय परमावश्यकं प्रमाणं प्राधान्येन निरूपयामासेति निश्चितम्। एतदेव बीजं गौतममुनये प्रप्रथमतया सूत्रे प्रमाणपरिगणनाय प्रवर्तयामासेति वक्तुं सुशकम्। तदर्थं वात्स्यायनभाष्यभूमिकापि प्रमाणम्। 'प्रमाणैरर्थपरीक्षणं न्यायः' इति व्युत्पत्ति प्रदर्शनद्वारा न्यायापरपर्याय पंचावयववाक्येषु क्रमेण प्रमाणचतुष्टयसंनिवेशं निरूप्य प्रमाणानां प्राधान्यं न्यायनये वर्तत इति प्रतिपादितं भाष्यकारेण। तत एव च प्रदीपः सर्वविद्यानामित्याद्युपपद्यते। मीमांसादि दर्शनान्तरेषु निरूपितेऽपि प्रमाणतत्त्वे न्यायशास्त्रस्य सर्वातिशायी कश्चिदन्यादृश एवाभिनिवेशः प्रमाणतत्त्वनिरूपणे समुल्लसतीति पृथक्प्रस्थाना हीमा विद्याः, सा च वाक्यार्थविद्या न प्रमाणविद्येति न च मीमांसकाः सम्यक् वेदप्रामाण्यरक्षणक्षमां सरणिमवलोकयितुं कुशलाः इत्यादि वचनैः सावष्टम्भमाचष्टे न्यायमञ्जरीकारः [३८]।

किं च दर्शनेषु विधीयमाना मीमांसा हि मेयशोधनरूपा तत्त्वनिर्णयपर्यवसायिनी। मानाधीना मेयसिद्धिरित्याद्युक्तप्रकारेण सा स्वानुकूलं प्रमाणमपेक्षते। न खलु प्रमाणमनवलम्ब्य शतशः प्रतिपाद्यमानोऽपि साधीयान् विषयः शास्त्रस्योपादेयतां परिपुष्णाति, प्रेक्षावत्प्रवृत्तिं वा जनयति। अत एव सर्वेपि दर्शनकाराः स्वसिद्धान्तानां प्रामाणिकत्वप्रख्यापनाय प्रमाणावलम्बनं कामयमानाः, स्वसिद्धान्तानुकूलतया तन्निरूपणे महान्तमादरभरं निरूपयामासुः। तच्च निरूपणं मतभेदे पर्यवसन्नं सत् क्रमेण सूक्ष्मतमविषयविवेचन-

३७) प्रयोगोऽति व्रतं ... । ऋग्वेदे

३८ ... न्यायमंजरी प्र ...

प्रणालीसमुपबृंहितं वैविधदार्शनिकग्रन्थेषूपनिबद्धं भारतीय दर्शनेषु प्रमाणसिद्धान्तस्य क्रमिकं विकासमभिद्योतयति ।

प्रकृत-शोधप्रबन्धानुसारं न्यायशास्त्रे विशेषतो गंगेशविरचिततत्त्वचिन्तामणौ प्रमाणसिद्धान्तनिरूपणं, तत्प्रधानपरिग्रन्थीनां मतमपि संक्षेपेण समालोच्य विचारविषयीक्रियते ।

प्रमाणप्राधान्ये युक्तयः—

तत्रादौ प्रमाये प्रमात्राद्यपेक्षया प्रमाणस्योपादेयत्वे नैयायिकमतरीत्या का वा युक्तयः समुपन्यस्ता ग्रन्थकारैरिति किञ्चिदालोच्यते ।

तत्र सूत्रकारः प्रमाणप्रमेयेत्यादिसूत्रे प्रथमं प्रमाणानां नामसङ्कीर्तनं विधाय तत्वज्ञानविषयीभूतप्रमेयादीनां सिद्धये प्रमाणानां प्रथमनिरूपणीयत्वं समसूचयत् । प्रथमसूत्रव्याख्यानाय भूमिकामारचयन् भाष्यकारः 'प्रमाणतोऽर्थप्रतिपत्तौ प्रवृत्तिसामर्थ्यादर्थवत्प्रमाणम्' (३९) इति प्रमाणस्य सप्रयोजनत्वं निरदिशत् । अत्र प्रवृत्तिसामर्थ्यरूपहेतुना प्रमाणेऽर्थवत्त्वं साध्यते । प्रवृत्तौ सामर्थ्यमितिविग्रहे सामर्थ्यस्य प्रवृत्त्यधिकरणत्वप्राप्त्या पक्षान्तर्भाविन हेतोः साध्यसामानाधिकरण्यं न घटते । अतः प्रवृत्ताविति विषयसप्तमी ग्राह्या । विषयत्वं चोत्पाद्यत्वरूपं ग्राह्यम् । तेन प्रवृत्तिसामर्थ्यपदेन सफलप्रवृत्तिजनकत्वं बोध्यते । ततश्च साध्यहेत्वोर्वैयधिकरण्यापत्तिः ।

किं च प्रमाणस्य प्रवृत्तिजनकत्वं अर्थज्ञानोत्पादनद्वारकमेव न साक्षात् उपपादितं चैतद्भाष्यकारेण प्रमाणान्तरेण नार्थप्रतिपत्तिः । ना प्रतिपत्तिमन्तरेण प्रवृत्तिसामर्थ्यम् (४०) । इति वदता ।

तदेवं सफलप्रवृत्तिजनकत्वरूपं प्रमाणसामर्थ्यमिति निरूपितं भवति । प्रवृत्तिगतं सामर्थ्यं तु फलेनाभिसंबन्धः । स च फलसाधकत्वरूपः । फलं च द्विविधं उपादेयप्राप्तिर्हेयहानिश्च ।

प्रमात्रादि चतुर्वर्गे प्रमाणस्य प्रागुपदर्शितदिशा प्रवृत्तसामर्थ्यादर्थवत्वे सिद्धे तदनुसारं प्रमातुः प्रमेयस्य प्रमितेश्चार्थवत्वं सिद्धं भवति । तेषामपि

३९) न्या भा. १ १-१ पृष्ठम् १

प्रवृत्तिजनकत्वरूपमेव सामर्थ्यमुच्यते। परं प्रमाणाभावे अर्थानुपपत्तेः प्रमात्रादीनां अर्थवत्त्वं न घटते। अतः प्रमात्राद्यपेक्षया प्रमाणस्य प्राधान्यम्।

'अर्थवति च प्रमाणे प्रमाता प्रमेयं प्रमितिरित्यर्थवन्ति भवन्ति। कस्मात्। अन्यतमापायेऽर्थस्यानुपपत्तेः' (४१)। इति भाष्यवचने प्रमात्रादीनां अर्थवत्त्वं प्रमाणाधीनमिति स्पष्टं प्रतिपादितम्। अत्र अन्यतमपदेन साधकतमस्य प्रमाणस्य ग्रहणमकार्षीत् वार्तिककारः। खद्योतकारस्तु प्रमाण प्रमातृ प्रमितिप्रमेयाणां अन्यतमस्येत्यमुमर्थमपि स्वीकरोति (४२)। प्रमाणप्राधान्यस्य प्रकृतत्वात् वार्तिककारमतमेव युक्तियुक्तं प्रतिभाति।

प्रमाणप्राधान्यप्रतिपादनाय बहु विचारितं वार्तिककारेण। तत्र प्रमाणस्येव प्रमाणाभासोऽपि अर्थपरिच्छेदकत्वात् प्रमाणमित्युपचर्यते परं सत्प्रमाणमेव सफलप्रवृत्तिजनकं भवति न तु प्रमाणाभासः। अतः प्रमाणसामान्यात् प्रमाणपदबोध्योऽपि प्रमाणाभासः न प्रमाणवदर्थवान् भवति। तदुक्तं वार्तिककारेण- 'सोऽयं प्रमाता यदा प्रमाणेनार्थमवधार्य प्रवर्तते तदास्य प्रवृत्तिः समर्था भवति यदा पुनः प्रमाणाभासेनार्थमवधार्य प्रवर्तते तदास्य प्रवृत्तिः समर्था भवति यदा पुनः प्रमाणाभासापेक्षया प्रमाणस्य प्राबल्यमुक्तं भवति।

ननु प्रमाणप्रवृत्त्योः परस्परापेक्षित्वादुभयासिद्धेः प्रवृत्तिजनकत्वरूपहेतोरेवासिद्धिः। इति तन्न, संसारस्यानादित्वस्वीकारेण प्रमाणप्रवृत्त्योः परापरभावकल्पनानुपपत्तेस्तादृशदोषविरहात् (४४)। प्रमाणतोऽर्थप्रतिपत्त्यनन्तरं प्रवृत्तेरनादिपरंपरासिद्धत्वात् प्रमाणस्य प्रवृत्तिजनकत्वमुपपद्यत इति भावः। सिद्धश्चानयोः कार्यकारणभावो लोकव्यवहारादपि (४५)।

एतेनेदमुदितं भवति- प्रमाणं हि करणं, अर्थप्रतिपत्तिर्व्यापारः, प्रवृत्तिः फलम्। तत्र प्रमाणेनार्थप्रतिपत्तिः प्रवृत्तिश्च समर्थे भवतः। तन्नान्तरीयकत्वात् (४६)। अर्थप्रतिपत्तिगतं सामर्थ्यं प्रवृत्तिजनकत्वरूपं प्रवृत्तिगतं

४१) तत्रैव १-१-१ पृष्ठम ८ ४२) तत्रैव पृष्ठम १ १-१ खद्योते ८
४३) न्या वा. १-१-१ पृष्ठम ३
४४) तत्रैव २-२-२ पृष्ठम ३ ४५) तत्रैव - पृष्ठम ३-४
४६) न्या वा. पृष्ठम ४ उभयं समर्थं तन्नान्तरीयकत्वात्

च ...त्फलाभिसंबंधरूपं बो·यम् । प्रमात्रादिचतुर्वर्गे प्रमाणावलम्बनैव स्थिति-[४७] भाश्चां प्रमातृ प्रमिति-प्रमेयाणां प्रमाणापेक्षया गुणीभूतत्वं प्रमाणस्य प्राधान्यं परिष्करोति ।

किंच सत्यपि प्रमातृप्रमेययोः प्रमां प्रति कारणत्वे प्रमाणं साधकतमत्वात् (४८) करणं भवति । साधकतमत्वं चास्यातिशयवशादवसीयते । तथा हि असत्वे प्रमानोत्पद्यते, सत्वे तूत्पद्यते न पुनरुत्पद्यत एवेति नियमः । सति तु प्रमाणे नियमेन भवत्येव । सोऽयमतिशयः प्रमाणस्य ।

एवं प्रमाणवानेव प्रमाता प्रमिमीते न तु तदभावभानिति । यस्याभावात् प्रमातृप्रमेये न प्रमां कुरुतः सोतिशयः प्रमाणस्य ।

तथा पश्चाद्भावरूपोप्यतिशयः प्रमाणस्योपपद्यते । यतश्चरमभावि प्रमाणं प्रमातृ प्रमेययोः प्रमाशक्तिर्भवति । प्रमाणाव्यवहितं चरं प्रतिपत्तेर्जायमानत्वाद्वाप्रमाणस्यातिशयो द्योत्यते । असाधारणकारणता वा तस्यातिशयः । प्रमातासाधारणकारणं सर्वप्रतिपत्तीनां । प्रमेयमपि अशेषपुरुषसाधारणत्वात् तथाभूतं । प्रमाणं त्वसाधारणकारणत्वात् प्रधानम् । प्राधान्याच्च साधकतमत्वेनाभिधीयत (४९) इति ।

प्रमाकरारणीभूतसंयोगनिष्पादकत्वेन उपेक्षणीयविषयप्रतिषेधकत्वेन च प्रमात्राद्यपेक्षया प्रमाणस्यातिशयविशेषः सिध्यतीत्यपि प्रतिपादितं वार्तिककरेण (५०) ।

एतावता न्यायनये प्रमाद्वारा सफलप्रवृत्तिजनकत्वमेव प्रमाणानां प्राधान्यं संपादयतीति मुख्यो विषयः प्रतिपादितो भवति । वस्तुतस्तु सत्यपि प्रमाणस्वरूपविषयकमतिभेदे सर्वेषामपि दर्शनकाराणां प्रमाणानामवश्य निरू-

४७) तत्रैव - पृष्ठम ५ अयं विशेष प्रमाणे प्रमातृप्रमेययोश्चरितार्थत्वात प्रमाणे प्रमाता प्रमेयं च चरितार्थम् ।

४८) तत्रैव - साधकतमं प्रमाणं न तु प्रमातृप्रमेये । - पृष्ठम ६

४९) न्या वा. २-२-२ पृष्ठम ६-७

५०) उद्योतकरका न्यायवार्तिक एक अध्ययन अध्याय २ प्राक्कथम पृष्ठं ५२ ५२ र, डॉ. दयाशंकर शास्त्री

पर्णीयत्वे नार्णयस्यपि विप्रतिपत्तिः । प्रमाणमन्तरा प्रमानुत्पत्तेः । तदभावे चार्थस्यैव सिद्धेः ।

नाममीमांसाकारादयोऽपि विषयमिमं विशदश्य निरूपयामासुः ।

मणिकारोऽपि मंगलवादानन्तरं न्यायशास्त्रस्याभ्यर्हिततमत्वं निःश्रेयस प्रयोजनवत्वं चोपपाद्य 'तत्रापि प्रमाणाधीना सर्वेषां व्यवस्थितिरिति प्रमाण-तत्त्वमत्र विविच्यते (५१) इति प्रतिजज्ञे ।

प्रमाणसामान्यलक्षणम्

न्यायवैशेषिकमतम्=

प्रोपसर्गकमांधातोः ल्युटि सिद्धं पदमिदं 'प्रमाणम्' इति । तेन प्रमाकरणमिति तदर्थो लभ्यते । केचित्तु भावार्थकं ल्युटमादाय प्रमा एव प्रमाणत्वमिति वदन्ति । न्यायमते तु तस्यात्र करणार्थकत्वमेव (२) । करणं च साधकतमं भवति । प्रागुपदर्शितदिशा प्रमाणस्य प्रमात्राद्यपेक्षयाऽतिशय-वत्वात् प्रमां प्रति साधकतमत्वं सिद्धं भवति ।

गौतमसूत्रे 'प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानीति (३) इति प्रमाणविभागः स्पष्टमुपन्यस्तो दृश्यते । न तु तत्सामान्यलक्षणम् । 'उपल-ब्धिसाधनानि प्रमाणानीति समाख्यानिर्वचनसामर्थ्यात् बोद्धव्यम्' इति वात्स्यायनमुनिर्व्याचख्यौ (४) । वार्तिककारोऽपि 'उपलब्धिहेतुः प्रमाणम्, उपलब्धिहेतुत्वं प्रमाणत्वम्, यदुपलब्धिनिमित्तं तत्प्रमाणम्' (५) इति प्रमाणसामान्यलक्षणं जगौ । अर्थवत्वस्यानुपयुक्तत्वात् संशयविपर्ययोरुप-लब्धिहेतुत्वेऽपि न प्रमाणत्वमिति निरूप्य उपलब्धिपदेन 'स्मृतेरन्यामुप-लब्धिमर्थाव्यभिचारिणीं प्रमामाचष्टे' इति वार्तिककाराशयमुपपादयामासुस्ता-त्पर्यटीकाकाराः (६) ।

---

५१) त. चि प्र ख. पृष्ठम ११४.

१) कारणाधिकरणयोश्च पा. सू.

२) न्या. भा १-२-३ पृ. ५६

३) न्या सू १-१-३

४) न्या. भा पृ ५६

५) न्या. वा. १-१-१ पृ ५

६) तात्पर्यटीका १-१-१ पृ २०

मञ्जरीकारस्तु एकेनैव सूत्रेण प्रमाणविभागं प्रमाणसामान्यलक्षणं चाभिहितं सूत्रकारेणेति स्पष्टं प्रतिपादयति (७)। 'सामान्यलक्षणं तु प्रमाणपदादेव समाख्यानिर्वचनसामर्थ्यादवगम्यते' इति कथयन् (८) भाष्यमतं समर्थयति। तन्मते स्मृतिसंशयविपर्ययजनकव्यवच्छेदाय प्रत्यक्षसूत्रात् अर्थोत्पन्नमिति अव्यभिचारीति, व्यवसायात्मकमिति पदत्रयमाकृष्यते। तद्धि प्रमाणचतुष्टयसाधारणम्, अर्थोत्पन्नपदेन फलविशेषणेन स्मृतिजनकम्, अव्यभिचारिपदेन विपर्ययाधायि, व्यवसायात्मकपदेन च संशयजनकं प्रमाणं व्युदस्यते। अत्रैवमुक्तं भवति अर्थविषयमसन्दिग्धमव्यभिचारि च ज्ञानं येन जन्यते तत्प्रमाणमिति [९]।

सम्यगनुभवसाधनं प्रमाणम् इति न्यायसारे प्रमाकरणं प्रमाणम् इति च तर्कभाषादिषु निरूप्यते। सत्यपि शब्दभेदे सर्वेषामपि नैयायिकानां प्रकर्षविशिष्टज्ञानकरणस्य प्रमाणत्वे तात्पर्यम्। एतच्च सकलदार्शनिकसिद्धान्ताविरुद्धम्।

प्रमाणस्वरूपविचारः-

प्रमाणस्वरूपविषये तु वर्तते विप्रतिपत्तिर्विदुषाम्। तथाहि प्रमाणं किं ज्ञानस्वरूपं तद्भिन्नस्वरूपं उत बोधाबोधस्वरूपमिति। न्यायनये प्रत्यक्षप्रमाणस्य इन्द्रियादिस्वरूपस्याबोधात्मकत्वं व्याप्तिज्ञानादिरूपाणामनुमानादीनां च बोधात्मकत्वमभ्युपगतं वर्तते। तदनुसारं जयन्तभट्टः, अव्यभिचारिणीमसन्दिग्धामर्थोपलब्धिं विदधती बोधाबोधस्वभावा सामग्री प्रमाणम्। बोधाबोधस्वभावा हि तस्य स्वरूपम्, अव्यभिचारादिविशेषणार्थोपलब्धिसाधनत्वं च लक्षणम् इत्याह [१०]।

अदुष्टं विद्या इति कणादसूत्रे प्रमाणस्य दोषरहितत्वमावश्यकमिति

७) न्या. मं. प्र. प्र. पृ. २५,
८) तत्रैव,
९) न्या, मं, प्र, प्र पृ २५
१०) तत्रैव

सूच्यते। करणशुद्धिमूलकप्रमाणस्यात्र निरूपणात् [११]। वैशेषिकमते स्मृतेः प्रमात्वेन तत्करणस्यापि प्रमाणत्वात् स्मृत्यनुभवसाधारणं प्रमाकरणं प्रमाणमिति प्रमाणसामान्यलक्षणं निर्दिश्यते। दोषाणामप्रमाकारणत्वस्य पृथगुपपादनात् न तदभावस्य लक्षणशरीरे निवेश इति तु न्यायवैशेषिकसंप्रदायसमेतः पन्थाः।

प्राचीनन्यायवैशेषिकसंप्रदायानुसारं प्रत्यक्षप्रमाणमपि बोधस्वरूपमेव तन्मते प्रत्यक्षप्रमैव प्रमाणपदबोध्या न त्विन्द्रियमिन्द्रियार्थसन्निकर्षो वा। अत एव 'प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि' इति [१२] प्रमाणविभागसूत्रस्य 'इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानमव्यपदेश्यमव्यभिचारि व्यवसायात्मकं प्रत्यक्षम्' इति (१३) सूत्रे प्रत्यक्षप्रमैव प्रतिपादिता सूत्रकारेण। एवं च प्रत्यक्षप्रमाणमपि अनुमानादीनामिव प्रमात्मकमेवाभिप्रेतमिति सिद्धं भवति। भाष्यवार्तिककारौ सूत्रमिदं प्रत्यक्षप्रमाया एव प्रमाणत्वमभिप्रेत्य व्याख्यातवन्तौ (१४)। वाचस्पतिमिश्रास्तु प्रमाप्रमाणयोरत्र भिन्नत्वात् अबोधरूपाणामिन्द्रियाणामपि प्रत्यक्षत्वेन परिग्रहो यथा स्यात्तथा यतःपदमध्याहृत्य सूत्रं व्याचख्युः [१५]। जयन्तभट्टोऽपि तेषामेव सरणिमनुससार [१६]।

एतेनेदमुदितं भवति। बौद्धादीनामिव प्रमात्मकत्वमेव सर्वप्रमाणानां पूर्वं न्यायनयसंमतमासीत्। परमुत्तरकाले प्रमाणानां बोधाबोधस्वरूपत्वं नैयायिकविद्वत्परंपरायां दृढमूलं समजनि येन वाचस्पतिप्रभृतयो यतःपदमध्याहृत्य प्रत्यक्षसूत्रं प्रत्यक्षप्रमाणस्याबोधस्वरूपताप्रतिपादनपरत्वेन योजयामासुः (१७)। अत्रैवमाधुनिकसमालोचका निश्चिन्वन्ति। वात्स्यायनोद्योतकरप्रभृतीनां मते प्रमाणस्य प्रमास्वरूपत्वं गौतमाभिमतम्। अप्रमास्वरूपत्वं तस्य न कथमप्युपपद्यते प्रत्यक्षस्यापि गौतममते निर्विकल्पकप्रमारूपत्वात्। इन्द्रियस्य इन्द्रियार्थसन्निकर्षस्य वा प्रत्यक्षत्वेनोपवर्णनं, ततश्च प्रमाणस्य बोधाबोधस्वरूपत्वं तु

(११) आय. एल एम् पृ. ४३ (१२) न्या सू १-१-३
(१३) न्या सू १-१-४ (१४) न्या भा पृ ५९ न्या वा पृ ६१
(१५) भा द प्रा पृ ४ (१६) न्या मं प्र प्र पृ १
(१७) ए कॉन्टीक्यू ऑफ इंडियन रियालिझम पृ. ४२७. भा द प्रा पृ ४

वाचस्पतिप्रभृतिभिरुत्तरकालीनैः न्यायसिद्धान्त या सन्निवेशितमिति (१८)
तत्रेदं विचार्यते, प्रमाणस्य बोधाबोधस्वरूपत्वं न खलु मञ्जरीकारादिभिरूप-
न्यस्तः कश्चिदभिनवः प्रकारः । भाष्येऽपि अबोधात्मकस्य सन्निकर्षस्य प्रत्य-
क्षत्व बोधनात् । तथाचोक्तं भाष्ये अक्षस्याक्षस्य प्रतिविषयं वृत्तिः प्रत्यक्षम् ।
वृत्तिस्तु सन्निकर्षो ज्ञानं वा इति (१९) ।

किं च प्रत्यक्षस्य केवलमबोधात्मकत्वं बोधात्मकत्वं वाऽभ्युपगच्छतां मतं
निरस्यते वार्तिककारेण । तथा हि, 'केचित्तु सन्निकर्षमेव प्रत्यक्षं वर्णयन्ति । न
तन्न्याय्यं प्रमाणाभावात् । सन्निकर्ष एव प्रमाणमिति न प्रमाणमस्ति, उभयं
तु युक्त परिच्छेदकत्वात् । उभयं परिच्छेदकं सन्निकर्षो ज्ञानं च । एकान्त-
वादिनस्तु दोष इति (२०) ।

करणपदार्थविचारः -

प्रमाकरणं प्रमाणमिति प्रमाणसामान्यलक्षणे करणपदे कस्य परिग्रहः
इत्यस्मिन् विषये नैयायिकेष्वेव मतत्रयमुपलभ्यते । (१) 'साधकतमं
करणम् । (२१) इति पाणिनीयसूत्रानुसारं क्रियासिद्धौ प्रकृष्टोपकारकं करण-
संज्ञं भवति । अत्र प्राचीननैयायिकमते व्यापारवदसाधारणं कारणं करणम्
[२२] । तज्जन्यत्वे सति तज्जन्यजनको व्यापारः [२३] । यथा अनुमितिं
प्रति व्याप्तिज्ञानं करणम्, [२४] परामर्शो व्यापारः । यथा वा प्रत्यक्षं पती-
न्द्रियं करणम [२५] सन्निकर्षो व्यापारः इति ।

नव्यनैयायिकेषु वर्तते मतद्वयम् । (२) प्रथमपक्षे असाधारणमेव
कारणं करणम् [२६] । यद्विलम्बात्प्रकृतकार्यानुत्पादस्तदसाधारणम् । यथा
अनुमितिं प्रति परामर्शः करणम्, प्रत्यक्षं प्रति चेन्द्रियार्थसन्निकर्षः करणम् ।
(३) द्वितीयपक्षे फलायोगव्यवच्छिन्नं कारणं करणम्

१८) मा द प्रा पु ४,
१९) न्या भा पु ५३ द्र उ न्या अ पु ५२
२०) न्या वा पु २९ २१) पा सू १-४-४२
२२) न्या को पु २०० २३) त दी पु २५ न्या को पु २९
२४) न्या को पृ २०० २५) तत्रैव २६) तत्रैव

(२७)। यद्व्यवच्छेदे फलस्यायोगस्तत्फलायोगव्यवच्छिन्नम्, फलव्याप्तम् इति यावत्। एतदेव करणलक्षणं मणिकारेणापि निरूपितम् 'यस्मिन् सति क्रिया भवत्येव तदिति (२८)। उदाहरणं तु प्रागुक्तमेव। एतन्मते प्रमाव्याप्तं प्रमाणमिति प्रमाणसामान्यलक्षणं पर्यवसन्नं भवति।

इदमत्रावधेयम्। प्राचीनमते यो व्यापारः स एव नवीनमते असाधारणकारणम्। तस्य फलं प्रत्यव्यवहितपूर्ववृत्तित्वेन तद्व्याप्तत्वेन च करणत्वमुपपद्यते। इन्द्रियापेक्षया सन्निकर्षस्य प्रत्यक्षप्रमाणत्वं भाष्यवार्तिककाराभ्यामनुमोद्यत इति प्राक् निर्दिष्टमेव। प्रत्यक्षप्रमाया अपि प्रमाणत्वेन निर्देशस्तु सूत्रभाष्यकारादिसंमतः हानादिसंमतः हानादिबुद्धिजनकत्वेनोपपाद्यते नैयायिकैः।

करणविषये मञ्जरीकारमतम्–

प्रमाकरणं च किमेकमुत समुदितमनेकमिति विचारे एकस्यां प्रमायामेकमेव करणमिति प्राचां मतम्। यथा चाक्षुषप्रमायां जननीयायां चक्षुरिन्द्रियं प्रमाणम्। जयन्तभट्टस्तु बोधाबोधस्वभावा सामग्री प्रमाणमिति समुदितस्यानेकस्य प्रमाणत्वमभ्युपगच्छति [२९]। सामग्र्याः प्रमाणत्वे प्रमात्रादीनामपि सामग्र्यन्तर्भूतत्वात्साधकान्तराभावात्साधकतमत्वस्यानुपपत्तिः। ततश्च प्रमात्रादिचतुर्वर्गव्यवस्थाविलोपप्रसंगः, दीपेन पश्यामः, चक्षुषा निरीक्षयामहे इत्यादिलोकव्यवहारासिद्धिश्चेत्यादि दूषणानि स्वयमुद्भाव्य तन्निरसनद्वारा सामग्र्याः करणत्वमुपपादितं मञ्जरीकारेण। प्राधान्येनोल्लेखनीया युक्तयः पुनरिमाः–

१) अतिशययुक्तं हि कारकं करणमित्युच्यते। फलोत्पादाविनाभाविस्वभावत्वम्, अवश्यतया कार्यजनकत्वं वाऽतिशयः। स च सामग्र्यन्तर्गतस्य न कस्यचिदेकस्य कारकस्य कथञ्चित्तु पार्यते। सामग्र्यास्तु सोऽतिशयः सुवचः। सन्निहिता चेत्सामग्री संपन्नयेव फलमिति सैवातिशयवती (३०)।

२) न च तादृशोऽतिशयः प्रमातृप्रमेययोरप्यस्तीति वाच्यम्। साकल्यप्रसादलब्धप्रमितिसंबन्धनिबन्धनः प्रमातृप्रमेययोर्मुख्यस्वरूपलाभः। साकल्यापक्षे

---

२७) तत्रैव

२८) त. च.

२९) न्या. मं. प्र. प्र. १२

३०) तत्रैव, १३ पृ.

प्र तीत्यभावात् गौणे प्रमातृप्रमेये संपद्येते (३१)।

३) सामग्री नाम संहतिः, सा च संहन्यमानमन्तरेण न व्यवहारपथीभवतरति। तेन सामग्र्या पश्यामीति न व्यवहारः। यस्तु दीपेन चक्षुषा वा पश्यामीति दीपादीनां करणतृतीयानिर्देशः, स तु फलोपजननाविनाभाविस्वभावाख्यसामग्रीरूपसमारोपनिबन्धनः। अन्यथाऽपि च तद्रूपसमारोपेण स्थाल्या पचतीति व्यपदेशो दृश्यत एव (३२)।

४) न च सामग्र्या एकत्वात्तस्याः किमपेक्षं करणत्वमिति शंकनीयम्। सामग्र्यां तदन्तर्गतकारणापेक्षस्य करणत्वस्योपपत्तेः [३३]। तस्मादन्तर्गतकारकापेक्षया लब्धकरणभावा सामग्री प्रमाणम् [३४]।

५] किं च समग्रेभ्यः सामग्री भिन्ना अभिन्ना वा? आद्ये तेभ्यः पृथगुपलभ्येत। अन्त्ये च सर्वकारकाणां करणत्वापातात् कर्मकर्तृव्यवहार उच्छिद्येत इति न शङ्क्यम्। समग्रसन्निधानाख्यधर्मस्य प्रत्यक्षमुपलम्भात्, पृथगवस्थितेषु हि कारणेषु न समग्रताप्रत्ययः, समुदितेषु तु तेषु स भवतीति सामंजस्यात् (३५)। एवं च समुदितान्येव कारकाणि करणीभवन्ति, पृथगवस्थितानि तु तान्येव कर्तृकर्मादिभावं भजन्ति ३६ इति।

समालोचना—

उपरिनिर्दिष्टानां युक्तीनां पर्यालोचनेन जयन्तभट्टमते प्रमातृप्रमेयादीनां समुदितानां प्रमाणत्वमिति निष्पन्नं भवति। तच्च प्रमात्रादिचतुर्वर्गप्रक्रियामभ्युपगच्छतां नैयायिकानां सिद्धान्तं न कथमप्यनुरुन्धते। ततश्च कथमेवमाह प्राचीनसंप्रदायपरिचितचित्तो मञ्जरीकार इति चेदत्रैवं समाधानमभिधीयते। उक्तयुक्तीनां निरूपणं विधाय 'अपरे पुनराचक्षते, सामग्री नाम समुदितानि कारकाणि। तेषां द्वैरूप्यमहृदयङ्गमम्। अथ च तानि पृथगवस्थितानि कर्मादिरूपं लभन्ते, अथ च तानि समुदितानि करणीभवन्तीति

३१) तत्रैव
३२) तत्रैव
३३) भागम् १ पृ १३
३४) न्या मं प्र प्र पृ १३
३५) भागम् ५ पृ १३
३६) न्या मं प्र प्र पृ १३
३७) तत्रैव

कोऽयं नय (३७) । इत्युपक्रमेण कर्तृकर्मवैलक्षण्यं करणस्यातिशयः इति निरूपितं मञ्जरीकारेण । ततश्च ते प्रयुज्यमानं सामग्रपदं कर्तृकर्मविलक्षणं करणमेव बोधयति, न तु तद्घटितसमुदायमिति स्पष्टं भवति । 'तस्मात् कर्तृकर्मविलक्षणा संशयविपर्ययरहितार्थबोधविधायिनी बोधाबोधस्वभावा सामग्री प्रमाणमित्युपसंहारवाक्यमपि ३८ पक्षममुं द्रढयति ।

अत्रेदमवधेयम् । प्रमाणसामान्यलक्षणे जयन्तभट्टेन विधीयमानोऽयं सामग्रीपदनिवेशः कमपि विशेषमर्थं गमयति । अत एव कर्तृकर्मविलक्षणे करणे लाक्षणिकोऽयं प्रयोग इति डॉ. रामप्रसादत्रिपाठीमहोदयाः प्रतिपादयामासुः [३९] । लाक्षणिकप्रयोगस्य प्रयोजनं पुनरिदं संभाव्यते – प्राचीनन्यायमते इन्द्रियादीनां नवीनमते च संनिकर्षादीनां प्रमाणत्वं प्रसिद्धम् । न तत्र शब्दलिङ्गदीपादीनामन्तर्भावः । परं कर्तृकर्मविलक्षणतया कार्यजननसमर्थानां तेषामपि प्रमाणत्वमभिप्रेतं जयन्तभट्टेन । अत एव तदनुसारं करणस्य समुदायरूपत्वमुपनिबद्धमिति प्रतिभाति । तथाचोक्तं बौद्धाभिमतप्रमाणपरीक्षावसरे मञ्जरीकारेण 'तदयुक्तम्, सकलजगद्विदितबोधेतरस्वभावशब्दलिङ्गदीपेन्द्रियादिपरिहारप्रसंगात्, तस्मात्सामग्र्यनुप्रविष्टबोधो विशेषणज्ञानमिव क्वचित्प्रत्यक्षे लिङ्गज्ञानमिव लिङ्गिप्रमितौ, सारूप्यदर्शनमिवोपमाने, शब्दश्रवणमिव तदर्थज्ञाने प्रमाणतां प्रतिपद्यते, अत एव बोधाबोधस्वभावा सामग्री प्रमाणमित्युक्तम् [४०] ।' इति ।

विषयेऽस्मिन् जैनन्याये विधीयमानं कारकसाकल्यस्य प्रमाणत्वखण्डनं जयन्तभट्टमतानवबोधनिबन्धनमिति बोध्यम् [४१] ।

जैनन्यायमतम् -

जैनमतेऽपि प्रमाणैरेवार्थस्य सम्यक्परिच्छित्तिः प्रमाणाभासेन च मिथ्यापरिच्छित्तिः (४२) ।

मतिश्रुतावधिमनःपर्यायकेवलानि ज्ञानम्, तत्प्रमाणम्' इति सूत्रद्वयेन

३८) न्या पं, प्र प्र पृ १३
३९) पा त्य प्र पृ २१
४०) न्या म द्र प्र पृ १४
४१) पा न्या प्र पृ २२
४२) मागधम् प्र पृ १८

प्रत्यादिरूपं सम्यग्ज्ञानमेव प्रमाणमिति प्रतिपादितं तत्त्वार्थाधिगमसूत्रकारैः । सिद्धसेनदिवाकरः समन्तभद्रश्च स्वपरावभासकत्वं ज्ञानस्य प्रमाणलक्षणे निवेशयामासतुः । बाधविवर्जितमिति विशेषणं तु पूर्वाचार्यसंमतमेव । जैनन्याय-प्रवर्तकत्वेनाभिमत अकलङ्कस्तु 'प्रमाणमविसंवादि ज्ञानम्' इति प्रतिपाद्य अनधिगतार्थकत्वमपि लक्षणे निवेशयति । स्वपूर्वार्थव्यवसायात्मकं ज्ञानं प्रमाणमिति माणिक्यनन्दिः । विद्यानन्दस्तु अनधिगतेत्यादीनां व्यर्थत्वम् प्रतिपाद्य स्वार्थव्यवसायात्मकं ज्ञानं प्रमाणमित्यभिप्रैति । हेमचन्द्राचार्यस्तु स्वपूर्वेषामपि-नामाचार्याणां मतानि पर्यालोच्य 'सम्यगर्थनिर्णयः प्रमाणम्' इति निरणैषीत् (४३) ।

एतेन प्रमाणसामान्यलक्षणे जैनाचार्याणां मतभेदः स्पष्टमवगम्यते । किं च स्वपरावभासकत्वकथने विज्ञानवादिबौद्धानां, अनधिगतेत्यादिपदनिवेशे च मीमांसकानां प्रभावो विभाव्यते (४४) ।

इदं तु तत्त्वम् । जैनमते प्रमैव प्रमाणम् । न त्वक्षादिकम् । अज्ञानाविरोधित्वाभावात् । तथाच प्रमितिः प्रमाणस्य फलमित्यत्र न कस्यापि विप्रतिपत्तिः । सा चाज्ञाननिवृत्तिरूपा । तदुत्पत्तौ करणेन सता तावदज्ञानविरोधिना भवितव्यम् । न चाक्षादिकमज्ञानविरोधि अचेतनत्वात् । तस्मादज्ञान-विरोधिनश्चेतनधर्मस्यैव करणत्वमुचितम् । लोकेऽप्यन्धकारविघटनाय तद्विरोधी प्रकाश एवोपास्यते । न पुनर्घटादिस्तदविरोधित्वात् । किं च अस्वसंविदितत्वादक्षादेर्नार्थप्रमितौ साधकतमत्वम् । स्वावभासनाशक्तस्य परावभासकत्वायोगात् । ज्ञानं तु स्वपरावभासकं प्रदीपादिवत्सुप्रतीतम् । ततः प्रमितावसाधकत्वादकरणमक्षादयः [४८]

प्रमाप्रमाणयोः संबन्धः—

प्रमाप्रमाणयोः कार्यकारणभावापन्नयोः परस्परमत्यन्तं भेदः न्यायनयसंमतः । तयोरत्यन्ताभेदो बौद्धसिद्धान्तसिद्धः । जैनास्तु तयोर्भेदाभेदं

४३] आय एल एम पृ. ३६ ३७ ४४) तत्रैव पृ३८

४८) प्र न्यायदीपिका मामधम् ॥ पृ १९

दुच्यते । तथाचोक्तम्— करणस्य क्रियायाश्च कथंचिदेकत्वम् प्रदीपतमोविगमवत्, नानात्वं च परश्वादिवत् (४९) इति ।

समालोचना—

न्यायप्रक्रियानुसारं प्रथमं सन्निकर्षः, ततो निर्विकल्पकप्रत्यक्षं, तदनन्तरं सविकल्पकप्रत्यक्षम् , ततश्च हानोपादानोपेक्षाबुद्धयः । अस्मिन् क्रमे त्रयाणामपि स्वोत्तरभाविनं प्रति करणत्वात् प्रमाणत्वमुच्यते [५०] । ततश्च प्रमाणजन्यायाः निर्विकल्पकप्रमायाः सविकल्पकप्रमाया वा प्रमाणत्वं नैयायिकसंमतम् । परमेतावता प्रमाप्रमाणयोरैक्यं न्यायसंमतमिति न मन्तव्यम् । प्रमाणभूतायाः प्रमायाः स्वोत्तरभाविप्रमान्तरं प्रति करणत्वोपगमात् । एवं च यथा जैनैर्बौद्धैर्वा कार्यभूताया प्रमायाः करणभूतायाश्च प्रमाया ऐक्यमभ्युपगम्यते न तथा नैयायिकैरिति सिध्यति ।

जैनमतानुसारं अज्ञाननिवृत्तिरेव प्रमाणस्य फलम् । हानादिबुद्धयस्तु परंपरया फलत्वमश्नुवते । प्रतिपादितं चैतदेवं सिद्धसेनसमन्तभद्रादिभिः । अतः निर्विकल्पकज्ञानादीनां प्रमाणप्रक्रियायां प्रमाणतत्फलयोरन्तरा वर्तमानानां प्रमाणत्वं न सिध्यति । प्रमाप्रमाणयोः कार्यकारणभावापन्नयोः भेदाभेद इति जैनमतं अकलङ्कदेव एव प्रथमं स्पष्ट निर्दिशति । विद्यानन्दः अज्ञाननिवृत्तेरेव प्रमाणफलत्वं निरूप्य तस्याः स्वपरव्यवसितिरूपत्वं प्रतिपादयति । हेमचन्द्रस्तु उभयोर्भेदमुपपाद्य प्रमाणफलत्वं तस्याः समर्थयति । तदेवं प्रमाप्रमाणयोर्भेदाभेदवाद एव जैनसिद्धान्त इति सिद्धं भवति [५१]।

बौद्धन्यायमतम्—

नागार्जुनविरचितग्रन्थेषु प्रमाणसामान्यलक्षणस्य विचारो न दृश्यते । बौद्धाभिमतप्रमाणसिद्धान्तस्य विशदप्रतिपादनं तु प्रथमं दिङ्नागेनैव प्रमाणसमुच्चये प्रस्तुतमुपलभ्यते (५२) । तदनुसारं विषयाकारेण परिणताद्धि-

४९) ILM पृ ४१ उद्धृतम् अष्टशती अष्टसहस्री अष्ट [illegible]
५०) न्या भा न्या सू १-१-३ पृ ५४ श्लो वा प्रत्य ५९-६३ सां त कौ. का ४
५१) आय एल. एम् पीपी. ४२ - ४३.
५२) मागधम १ पृ ४३

ज्ञानादर्थनिश्चयो भवति इति विज्ञानस्य विषयाकारः अर्थसारूप्यं वा प्रमाणस्वरूपमित्युक्तं भवति । तथाचोक्तं प्रमाणसमुच्चये-

स्वसंवित्तिः फलं चात्र तद्रूपादर्थनिश्चयः ।

विषयाकार एवास्य प्रमाणं तेन मीयते ॥ [५३] इति

एतेन प्रमाप्रमाणयोरभेदो बौद्धसंमत इति सिद्धं भवति । तदित्थम् । प्रमाया वर्तते रूपद्वयम् । विषयाकारः, विषयबोधश्चेति । यथा घटादेरर्थात् ज्ञानं द्विरूपमुत्पद्यते- घटाकारं, घटबोधस्वरूपं च । अत्रायं विवेकः= ज्ञानस्यार्थाकारतैव तत्तदर्थाधिगतिनिश्चायिका । तस्मादर्थाकारता प्रमेयाधिगतेः साधनं भवति । ततश्च प्रमाणमित्युच्यते । अर्थाकारताया प्रमेयाधिगतेः साधनं भवति । ततश्च प्रमाणमित्युच्यते । अर्थाकारताया इव फलभूता प्रमेयाधिगतिरपि ज्ञानस्यात्मभूतैव । एवं चैकमेव ज्ञानमर्थाकारत्वापेक्षया च फलमिति । तथा चोक्तं धर्मकीर्तिना– तदेव च प्रत्यक्षं ज्ञानं प्रमाणफलमर्थप्रतीतिरूपत्वात् । अर्थसारूप्यमस्य प्रमाणम् । तद्वशादर्थप्रतीतिसिद्धेः । इति [५४] । तत्त्वसंग्रहकारोऽप्याह=

विषयाधिगतिश्चात्र प्रमाणफलमिष्यते ।

स्ववृत्तिर्वा प्रमाणं तु सारूप्यं योग्यताऽपि वा ॥ ५५ इति।

इदमत्रानुसन्धेयम् । बौद्धसंप्रदाये केचिद् विज्ञानवादिनः केचिद् बाह्यार्थवादिनश्च । तत्र विज्ञानवादे बाह्यपदार्थानामसत्वात् विषयसारूप्यादिकं नोपपद्यते । अतस्तन्मते ज्ञानगतयोग्यता प्रमाणम्, स्वसंवित्तिश्च फलमित्युच्यते । बाह्यार्थसत्तामभ्युपगच्छतां बौद्धानां मते तु सारूप्यं प्रमाणम्, अधिगतिश्च फलम् । विषयेन्द्रियादिकारणेभ्यः समुत्पन्नं ज्ञानं स्वकारणायातविषयगतशक्तिभेदात् विषयाकारमेव भवति नेन्द्रियाद्याकारम् [५६] ।

५३) तत्रैवोद्धृतम

५४) न्या वि पृ १८.१९ उद्धृतम् मागधम ।। पृ ५४

५५) त सं का १३४४, तत्रैवोद्धृतम

५६) प्र वा २ - ३६८, ३६९ तत्रैवोद्धृतम पृ ५५

५७) प्र वा २ २४७ तत्रैवोद्धृतम

किं च सर्वपदार्थानां क्षणिकत्वात् ज्ञानोत्पादनानन्तरं विनष्टः पदार्थः ज्ञानस्य विषयः कथं भवेदिति चेदुच्यते पदार्थे विनष्टेऽपि विनाशकाले सोऽर्थः स्वाकारं ज्ञाने समर्पयति । अतस्तस्मादर्थादुत्पन्नं ज्ञानं तदाकारं भवति । एतद्रीत्या च सोऽर्थः ज्ञानस्य विषयो भवति । [५७]

एतदनुसारं प्रमाणसमुच्चयटीकायां अज्ञातार्थज्ञापकं प्रमाणम् इति प्रमाणसामान्यलक्षणमुपलभ्यते (५८) । प्रमाणवार्तिके तु अविसंवादि ज्ञानं प्रमाणम् इति तल्लक्षणमुच्यते । अविसंवादनं चार्थक्रियास्थितिः (५९) । तदेतन्नैयायिकानां यत् प्रमाणस्यार्थवत्वं नाम तदेव परामर्ष्टि । लक्षणान्तरमप्युपन्यस्तं धर्मकीर्तिना यथा– अज्ञातार्थप्रकाशो वा इति [६०] ।

वस्तुतस्तु अविसंवादीति अज्ञातार्थज्ञापकमिति चोभयमपि ज्ञानविशेषणम् । तदुभयविशेषणविशिष्टमेव ज्ञानं बौद्धमते प्रमाणम् । तथा चोक्तं न्यायबिन्दुटीकायां धर्मोत्तरेण अविसंवादकं ज्ञानं सम्यग् ज्ञानम् । लोके हि पूर्वमुपदर्शितमर्थं प्रापयन् संवादक उच्यते । तद्वज्ज्ञानमपि स्वयं प्रदर्शितमर्थं प्रापयत्संवादकमुच्यते । प्रदर्शिते चार्थे प्रवर्तकत्वमेव प्रापकत्वम् । प्रवर्तकत्वमपि प्रवृत्तिविषयप्रदर्शकत्वमेव । न हि पुरुषं हठात् प्रवर्तयितुं शक्नोति ज्ञानम् । अत एव चार्थाधिगतिरेव प्रमाणफलम् । अधिगते चार्थे प्रवर्तितः पुरुषः प्रापितश्चार्थः । तथा च सति अर्थाधिगमात् समाप्तः प्रमाणव्यापारः । अत एवानधिगतविषयं प्रमाणम् । येनैव हि ज्ञानेन प्रथममधिगतोऽर्थस्तेनैव प्रवर्तितः पुरुषः प्रापितश्चार्थः । तत्रैवार्थे किमन्येन ज्ञानेनाधिकं कार्यम् । ततोऽधिगतविषयमप्रमाणम् [६१] इति ।

एतेनेदमुदितं भवति । अविसंवादिपदोपादानेन संशयविपर्यययोर्व्युदासस्तयोर्विसंवादित्वात् । अज्ञातार्थप्रकाशकमित्यनेन च गृहीतग्राहिज्ञानस्य

---

५७) प्र. वा. २-२४७ तत्रैवोद्धृतम पृ ५५

५८) प्र स टीका पृ ॥ आय एन एम् पी ३५

५९) प्र वा १-३ प्रमाणमविसंवादि ज्ञानमर्थक्रियास्थितिः । अविसंवादनम

६०) तत्रैव १-७

६१) न्या वि टिका पृ. ४, म ागधम ॥ पृ ४५

व्यवच्छेदो भवति ।

इदमत्रावधेयम् । प्रागुपदर्शितदिशा नैयायिकमते सफलप्रवृत्तिजनकत्वादर्थवत्त्वं प्रमाणानाम् । बौद्धमतानुसारेण तु अर्थप्रापणमेव प्रमाणकार्यम् । तदेवार्थाधिगतिरूपम् । अत एवाविसंवादनं नाम प्रमाणेनोपदर्शितस्यार्थस्य क्रियायाः स्थितिः प्रमाणयोग्यता इति निर्दिश्यते । एवं च प्रमाणेनोपदर्शितोऽर्थो यदि स्वामर्थक्रियां कर्तुं समर्थस्तर्हि तज्ज्ञानमविसंवादि, अविसंवादित्वाच्च प्रमाणमित्युक्तं भवति । तेन यदा प्रमाणेनार्थं परिच्छिद्यापि पुरुषोऽर्थे न प्रवर्तते, प्रवृत्तो वा कुतश्चित् प्रतिबन्धादेः कारणात् अर्थक्रियां नाधिगच्छति, तदा तस्य ज्ञानस्य अर्थक्रियाकारित्वाभावेऽपि तद्योग्यतायाः सत्वात् प्रमाणत्वोपपत्तिः (६२) । तदेवमज्ञातार्थप्रकाशकमविसंवादि ज्ञानं प्रमाणमिति बौद्धमते सिद्धम् ।

मीमांसकमतम्—

कौमारिलमते फलानुमेयो ज्ञानव्यापारो ज्ञानादिशब्दवाच्यः प्रमाणम् (६३) तस्य लक्षणान्तरमप्युच्यते मीमांसकैः । यथा अनधिगतार्थगन्तृ प्रमाणम् (६४) इति । कारणदोषबाधकज्ञानरहितमगृहीतग्राहि ज्ञानं प्रमाणम् (६५) इति च । उक्तं च कुमारिलभट्टपादैः—

तत्रापूर्वार्थविज्ञानं निश्चितं बाधवर्जितम् ।
अदुष्टकारणारब्धं प्रमाणं लोकसम्मतम् ॥ (६६) इति ।

अत्रायं विवेकः । कुमारिलमते ज्ञाततारूपप्रकाशविशेषो ज्ञानक्रियायाः फलम् । तस्माज्ज्ञानमेव प्रमाणम् । ज्ञातता च ज्ञानक्रियातो भिन्ना । तेन न फलकरणयोरैक्यापत्तिः । इन्द्रियाणां प्रमाणत्वेन व्यवहारस्त्वौपचारिकः । ज्ञानक्रियोत्पादनद्वारा तेषां ज्ञाततारूपफलेनाभिसंबंधः, न तु साक्षात् ।

---

६२) मागधम II पृ ४८ ६३) न्या मं. प्र प्र पृ १६

६४) प्र प पृ ४१, न्या की पृ ५५३ (सि च पृ २०, न्या कु च पृ २४ न्यायकोशेद्रष्टव्य

६५) शा. दी. पृ १५२ भा. द. प्रा, प्र ६, ६६) श्लो वा श्लो

सत्यप्येवं इन्द्रियसन्निकर्षादीनां प्राधान्यविवक्षया अज्ञाततत्त्वार्थविषयकज्ञानजनकत्वं प्रमाणसामान्यलक्षणमिति केचिदुपवर्णयन्ति [६७]। तत्तु लोकप्रसिद्धप्रमाणपदव्यवहारसाधनपरमेव न तु मीमांसकसिद्धान्तावबोधनपरमिति बोध्यम्।

प्रभाकरानुयायिनस्तु 'अनुभूति प्रमाणम्' इति कथयन्ति। तथा चोक्तं प्रकरणपञ्चिकायाम्=

अनुभूतिः प्रमाणं सा स्मृतेरन्या स्मृतिः पुनः।

न प्रमाणं स्मृतिः पूर्वप्रतिपत्तिरपेक्षणात्॥ इति। [६८]

तन्मते स्मृतिभिन्ना संविदेवानुभूतिः। सर्वेषां ज्ञानानां सत्यपि याथार्थ्ये प्रमाणमनुभूतिरेव।

अत्रेयमभिसन्धिः। स्मृतेरप्रमाणत्वं तूभयमीमांसकसंप्रदायसिद्धम्। परं धारावाहिकज्ञानं तु प्रमाणत्वेन मीमांसकानामिष्टम्। अतः अनधिगतार्थगन्तृत्वरूपं, पूर्वज्ञाननिरपेक्षानुभूतित्वरूपं वा प्रमाणलक्षणम् अयं घटः अयं घटः इत्यादिधारावाहिकज्ञाने न समन्वेति। ततश्चाव्याप्तिः प्रमाणलक्षणस्येति चेदुच्यते। उभयविधेऽपि लक्षणे नायमव्याप्तिदोषः प्रसरति। दोषपरिहारप्रकारस्तूभयत्रापि भिन्नः। भाट्टलक्षणानुसारं धारावाहिकज्ञानस्थले प्रतीयमानः घटः विभिन्नक्षणवृत्तित्वेन प्रतीयते तत्तत्क्षणानां च पूर्वपूर्वज्ञानानधिगतत्वात् तत्तत्क्षणविशिष्टान् घटान् बोधयतां ज्ञानानां अनधिगतार्थबोधकत्वं सिद्धं भवति। ततश्च लक्षणसमन्वयसंभवान्नोक्तदोषप्रसरः।

धारावाहिकस्थले सूक्ष्मकालकलाविशिष्टानां विषयाणां ग्रहणमवश्यं स्वीकरणीयमिति पार्थसारथिमिश्राः शास्त्रदीपिकायां संयुक्तिकं निरूपयामासुः (६९)।

प्राभाकरमते पूर्वप्रतिपत्तिरूपा स्मृतिरप्रमाणम्। स्वपूर्वभाविनमनुभवमपेक्ष्यैव स्मृतिः प्रवर्तत इति सा सापेक्षा। पूर्वानुभवजनितसंस्कारजन्यत्वात् तद्याया: विषयीकरणाच्च सा पूर्वानुभूतिमतिक्रामति। अतः उत्पत्तितः प्रती-

६७) शास्त्रालोकः पृ २ ६८) प्र पं पृ १०४ भा द प्रा पृ ६

६९) शा दी पृ ७०) प्र पं पृ १२६, भा द प्रा पृ ७

तितश्च पूर्वानुभवमतिशयाना॰ सा ज्ञातमेव विषयं विषयीकरोति । सापेक्षा चावतिष्ठते । तस्मादप्रमाणम् । न चैतदेवं धारावाहिकस्थले । तत्र ज्ञानान्तर-मुत्पत्तितः प्रतीतितो वा विशेषाभावदर्शनात् । तदुक्तं शालिकनाथेन= 'तत्राह अन्योन्यनिरपेक्षास्तु धारावाहिकबुद्धयः । व्याप्रियमाणे हि पूर्वविज्ञानकारण-कलापे उत्तरेषामप्युत्पत्तिरिति नोत्पत्तितः प्रतीतितो वा धारावाहिकविज्ञानानि परस्परस्यातिशेरत इति युक्ता सर्वेषामपि प्रमाणता (७०) इति ।

तदेवमज्ञातार्थज्ञापकत्वमुभयसंप्रदायसंमतं प्रमाणलक्षणमिति सिद्धम् ।

अत्रेयमभिसन्धिः । सिद्धान्तानुसारं ज्ञानक्रियाया एव प्रमाणत्वेऽपि लोकसिद्धमिन्द्रियादीनामौपचारिकं प्रमाणत्वं स्वीकृत्य तदनुसारमेव प्रत्यक्षानु-मानादीनां निरूपणं मीमांसाशास्त्रे समुपलभ्यते । तस्मात सत्यपि प्रमाणसि-द्धान्तभेदे प्रत्यक्षादिनिरूपणं प्रायः न्यायशास्त्र सरणिमेवानुसरति । विशेषस्तु प्रकरणानुसारमग्रे विचारयिष्यते ।

सांख्ययोगमतम् =

प्रागुपदर्शितदिशा सांख्यमतसंमतायां ज्ञानप्रक्रियायां वर्तते स्थिति-द्वयम् । प्रथमं पुरुषप्रतिबिम्बवशात्, इन्द्रियप्रणालिकया विषयमवगाहमाना बुद्धिरचेतनाऽपि तत्तद्विषयाकारेण परिणता भवति । इयं परिणतिरेव बुद्धि-वृत्तिरिति चित्तवृत्तिरिति अपौरुषेयबोध इति चाख्यायते । तदनन्तरं बुद्धि-सान्निध्यवशात पुरुषस्य यो बोधो जायते, घटं जानामि इत्यादिरूपः, स पौरुषेयबोध इत्युच्यते । स च तत्तद्विषयाकारेण बुद्धौ परिणतायां सत्यामेव जायते अतः चित्तवृत्तिरूपा प्रथमा स्थितिः पौरुषेयबोधरूपां प्रमां प्रति कारणत्वात प्रमाणमित्युच्यते । तथा च असन्दिग्धाविपरीतानधिगतविषया चित्तवृत्तिः प्रमाणमिति सांख्यमते प्रमाणसामान्यलक्षणमुदितं भवति । तदुक्तं योगवार्तिके= 'प्रमाणं वृत्तिरेव च (७१) इति । उक्तं च वाचस्पतिमिश्रैरपि प्रमीयतेऽनेनेति निर्वचनात् प्रमां प्रति करणत्वं गम्यते । असंदिग्धाविपरीतान-धिगतविषया चित्तवृत्तिः । पौरुषेयबोधश्च फलं प्रमा । तत्साधनं प्रमाणमिति [७२] ।

७१) योगसातक पृ ३०, भा द प्रा पृ १ ७२ (सां त कौ पृ

इदमत्रावधेयम् । मिश्रमते बुद्धौ प्रतिबिम्बितः पुरुषः अचेतनामपि तां चेतनवत् सम्पादयति । ततः सा तद्विषयाकाराकारिता सती निरतिशयसान्निध्यवशात् पौरुषेयबोधं जनयति (७३) । विज्ञानभिक्षुमतानुसारं विषयाकाराकारितायां बुद्धौ पुरुषस्य प्रतिबिम्बः, तेन च पौरुषेयबोधः जायते [७४] उभयथाऽपि विषयाकारेण बुद्धिपरि० तिरेव चित्तवृत्तिः सैव च प्रमाणम् । तादृशचित्तवृत्तिसम्पादकानामिन्द्रियादीनां तु गौणं प्रमाणत्वम् । लोकरिद्धव्यवहारमनुरुन्धानाः स्वसिद्धान्ताविरोधेन सांख्या अपि प्रत्यक्षादीनामिन्द्रियादिरूपेण निरूपणं कुर्वन्ति ।

चित्तवृत्तिस्तु व्यवहारार्थमनपेक्षणात् गौणप्रमेत्युच्यते । तज्जनकत्वाच्चेन्द्रियादीनां प्रमाणत्वमुच्यते । गौणप्रमाजनकत्वात्तदीयं प्रमाणत्वमपि गौणम् । प्रधानं प्रमाणं तु चित्तवृत्तिरेव ।

वेदान्तिमतम्—

विविधवेदान्तसंप्रदायेषु प्रमाकरणं प्रमाणम् इति समाख्यानिर्वचनलभ्योऽर्थः संमत एव । प्रमास्वरूपे तु वर्तते विप्रतिपत्तिः । प्रमाया इव चक्षुरादीनामपि मुख्यप्रमाणतास्वीकारात्, नैयायिकाभिमतं प्रमाणस्य बोधाबोधस्वरूपत्वं वेदान्तिमताविरुद्धमिति सिद्धं भवति ।

इदं तु तत्वम् वेदान्तिमते इन्द्रियादीनि तत्तद्विषयाकाराकारितां चित्तवृत्तिं जनयन्ति । तत एव च प्रमाणतामासादयन्ति । तथैव चित्तवृत्तिरपि विषयं प्रकाशयन्ती प्रमाणमित्युच्यते । सति चैवं वेदान्तिनो चित्तवृत्त्यात्मकज्ञानस्वीकारेण तस्य ज्ञानस्य प्रमाणतास्वीकारेण च नैयायिकेभ्यो विप्रतिपद्यन्ते । न्यायनये मनसोऽणुत्वस्वीकारान्नित्यत्वाच्च न तस्य विषयाकारेण परिणतिः संभवति ।

अद्वैतवेदान्ते अनधिगताबाधितार्थविषयकज्ञानजनकं प्रमाणमिति निरूच्यते । एतच्च प्रायो भाट्टमतमेवानुसरति । तत्र स्मृतेरपि प्रवर्तकत्वात् प्रमाणत्वोपगमपक्षे केवलमबाधितार्थविषयकज्ञानजनकत्वमुपादीयते (७५) ।

---

७३) योगभाष्य - तत्ववैशारदी, पृ, ११. भा द प्रा पृ ८

७४) भा द प्रा पृ ८-९

७५) वे. प, , प्र प. , १३ , पा व्या प्र. पृ ११

प्रमाजनकत्वरूपप्रमाणलक्षणस्य तु स्मृतौ न समन्वयः । अधिगतविषयत्वेन तस्याः अप्रमात्वात् । धारावाहिकज्ञानस्थले तु न ज्ञानानन्त्यम् । किंतु यावद्घटस्फुरणं तावद् घटाकारा वृत्तिरेकैव, न तु नाना । वृत्तेः स्थिरत्वे विवृत्युत्पत्तिपर्यन्तं स्थायित्वाभ्युपगमात् (७६) ।

द्वैतवेदान्तिनस्तु यथार्थं प्रमाणमिति प्रमाणसामान्यलक्षणं निरूपयन्ति (७७) । अत्र यथाशब्दोऽनतिक्रमे वर्तते । अर्थशब्दश्चार्थ्यत इति व्युत्पत्त्या ज्ञेयवाची । ज्ञेयमनतिक्रम्य वर्तमानं यथास्थितमेव ज्ञेयं यद्विषयीकरोति नान्यथा तत्प्रमाणमित्यर्थः । यथावस्थितज्ञेयविषयीकारित्वमिति फलितोऽर्थः ।

इदमत्रानुसंधेयम् । ज्ञेयविषयीकरणं हि ज्ञेयतासंपादकत्वम् । तच्च ज्ञाने तत्करणेषु च वर्तते । एष पुनरत्र विवेकः, यत् विषयस्य ज्ञेयतां ज्ञानमुपाधितया करणानि तु तज्जनकतया संपादयन्ति (७८) । एतदनुसारं ज्ञानं तत्करणानि च ज्ञेयविषयीकरणात् प्रमाणपदबोध्यानि । ज्ञानं तु साक्षादेव ज्ञेयं विषयीकरोतीति मुख्यप्रमाणत्वात् केवलप्रमाणमित्युच्यते । इन्द्रियाणि तु ज्ञानद्वारा ज्ञेयं विषयीकुर्वाणा गौणप्रमाणत्वादनुप्रमाणानीत्युच्यन्ते ।

न्यायनये ज्ञानेच्छाकृतीनां सविषयत्वमिति नियमः । करणानामिन्द्रियाणामेतत्त्रितयभिन्नत्वात् कथं सविषयत्वं कुतस्तरां च ज्ञेयविषयीकारित्वमिति चेदत्रैवं समाधानम् अभिधीयते द्वैतवेदान्तिभिः ज्ञानविषय एव हि करणानां विषय इत्यवश्यमभ्युपगन्तव्यम् । अन्यथा निर्विषयत्वप्रयुक्तसाम्यात् करणानि यत्किमपि ज्ञानमुत्पादयेयुः । न च तथा दृश्यते, घटविषयकं हि चक्षुः घटज्ञानमेव जनयति नान्यत् । तथाचोक्तं न्यायसुधायाम्- न हि किमप्यविषयीकुर्वन्त्येतानि ज्ञानं जनयन्ति (७९) इति ।

इदमत्रावधेयम् । नैयायिकमतेऽपि प्रमाणस्य बोधाबोधात्मकत्वात् इन्द्रियादीनामिव प्रमाया अपि प्रमाणत्वं दृष्टम् । परं तत्प्रमान्तरजनकत्वमूलकम् । द्वैतवेदान्तिमते तु तज्ज्ञेयविषयीकारित्वप्रयुक्तम् । ज्ञेयविषयीकारित्वं

---

७८) न्यायसुधा, उद्धृ प्र प टी भावदीपः पृ ४०

७९) न्यायसुधा उद्धृ प्र प टी भावदीपः पृ ४०

७६) तत्रैव पृ. २२-२३, पा. व्या, प्र. पृ ८ ७७) प्र प पृ ३३

च ज्ञानतत्करणेषु समानम् । परं तदर्थे यज्ज्ञातत्वं तज्ज्ञानोपाधिकम् । न करणोपाधिकम् । अतो ज्ञेयविषयकार्णत्यत्र ज्ञेयत्वांशेऽनन्यापेक्षत्वान्यापेक्षत्वरूपभेदमात्रेण साक्षात्त्वतत्साधनत्वव्यवहार (८०) इति ।

एवं च प्रमाणपदस्य भावे करणे च ल्युटो वर्तमानत्वात् प्रमितिरिति प्रमासाधनमिति च व्युत्पत्तिलभ्योऽर्थः सिद्धो भवति ।

अतो यथार्थं प्रमाणमित्युक्ते यथार्थं ज्ञानं यथार्थकरणं च प्रमाणत्वेन संगृहीतं भवति ।

समालोचना –

सैद्धान्तिकदृशा व्यावहारिकदृशा च प्रमाणनिरूपणं विविधशास्त्रकारैर्विधीयते तत्र व्यावहारिकदृशा विचार्यमाणे चक्षुषा पश्यामि, धूमेनानुमिनोमि इत्यादिव्यवहारबलात् प्रमाकरणं प्रमाणमिति यथाश्रुतं लक्षणं सकलशास्त्रकारसंमतं विभाव्यते । अत एव प्रमेयादिपदार्थानां विस्तरेण निरूपणं कुर्वाणोऽपि गौतममुनिः प्रमाणसामान्यलक्षणं समाख्यानिर्वचनसामर्थ्यादेव लभ्यमिति मत्वा न सूत्रयामास ।

कणादमुनिः 'अदुष्टं विद्या' इति सूत्रे करणानां दोषरहितानां सतामेव प्रमाजनकत्वमिति समसूचयत् ।

क्रमेण अर्थाव्यभिचारित्वं स्मृतिभिन्नत्वं च प्रमाणलक्षणघटकप्रमायां विशेषणतया निवेशनं तात्पर्यार्थः [८१] ।

एवं रीत्या व्यावहारिकदृशा विधीयमानं प्रमाणनिरूपणं क्रमेण सैद्धान्तिकपक्षमपि कक्षीकृत्य बौद्धजैनमीमांसकादीनां स्वस्वसिद्धान्तानुगुण्येन प्रमाणतत्वं परिशीलयतां चिरतरपरंपराभिरूपबृंहितं भारतीयदर्शनेषु प्रचुरं विकासमाससाद । तथाहि प्रमाणस्य स्वरूपविषये द्विविधा विचारसरणिरुपलभ्यते दार्शनिकानाम् (१) प्रमाणं बोधात्मकमिति (२) बोधाबोधात्मकमिति च ।

तत्र बौद्धजैनमीमांसकाः प्रमाणस्य प्रमात्मकत्वमभ्युपगच्छन्ति । अनधिगतविषयत्वरूपज्ञानविशेषणस्य प्रमाणलक्षणशरीरे संनिवेशः त्रयाणामपि

८०) द्र प्र प टी भावदीपः पृ ४०

८१) न्या वा ता पृ २१

मते समानः। विशेषः पुनरयं यत् जैनाः ज्ञानस्य स्वपरावभासकत्वं विशेषतो विशिंषन्त फलीभूतप्रमायाः करणीभूतप्रमायाश्च भेदाभेदमभ्युपगम्य प्रमाण-व्यवस्थां स्वीकुर्वन्ति। बौद्धास्तु अर्थाधिगतिं स्वसंवित्तिं वा फलत्वेनोपादाय अर्थसारूप्यं योग्यता वा तत्करणत्वेन प्रमाणमिति स्वं कुर्वन्तः फलकरणयोरात्यन्तिकमभेदं निरूपयन्ति। जैनागमेषु स्वपरावभासकज्ञानविचारानुपलम्भात् उत्तरकाले बौद्धाभिमतविज्ञानवादस्य प्रभावबलात् जैनसंप्रदाये ज्ञानस्य स्वपरावभासकत्वं सिद्धान्ततयाऽभ्युपगतमिति तद्विदामाशयः ८२। परं भारतीय वेदान्तसंप्रदायेऽपि ज्ञानस्य स्वप्रकाशत्वदर्शनात् वैदिक एवायं सिद्धान्त इति विभाव्यते।

मीमांसकास्तु प्रमेयनिष्ठज्ञाततायाः फलत्वमभ्युपेत्य तत्करणतया ज्ञान-क्रिया प्रमाणमिति प्रमाणस्वरूपमुपपादयन्ति। एतन्मते फलकरणयोः सुतरां भेद। अनधिगतविषयत्वस्य ज्ञानविशेषणतया प्रमाणलक्षणशरीरे निवेशः प्रथमं मीमांसकैरेव विहितः। ततश्च क्रमेण जैनबौद्धसिद्धान्तयोरपि स्थितिमाप इति तत्प्रमाणलक्षणपरिशीलनेन निश्चिनुमः। एवं रीत्या सैद्धान्तिकं प्रमाणनिरूपणं मीमांसकादिभिर्विधीयते इति विभावनीयम्। व्यवहारदृशा तु इन्द्रियादीनामेव प्रमाणतया निरूपणं प्रायः सर्वत्रोपलभ्यते। वस्तुतस्तु प्रागुक्तप्रकारेणैतेषां मते इन्द्रियाणामौपचारिकमेव प्रमाणत्वम्।

सांख्ययोगानुसारिणो, वेदान्तिनो, न्यायवैशेषिकाश्च द्वितीयां विचार-सरणिमनुसरन्ति। तत्र सांख्यवेदान्तिनौ चित्तवृत्तेरभ्युपगमात् नैयायिकेभ्यो भिद्येते। प्रमाकरणत्वरूपं प्रमाणत्वं तु सर्वसंमतम्। इन्द्रियाणामपि प्रमाणत्वस्य स्वीकारात्, प्रमाणस्य बोधाबोधात्मकत्वमपि सर्वसंमतमवतिष्ठते।

द्वैतवेदान्तिनस्तु प्रमायां प्रमाकरणत्वानुपपत्तेर्यथार्थमेव प्रमाणमिति स्वीकुर्वन्ति।

निर्णयः—

अत्रेदानीं विचार्यते कतमः पक्षः साधीयानिति। तत्र जैनबौद्धयोर्मतं प्रमामेव प्रमाणतया स्वीकरोति। तच्च न कथमपि विचारसहम्। सार्व-

---

८२) ३८

जनीनो नूनमयमनुभवो यत्प्रमानाम प्रमाणफलमिति । करणस्यैव प्रमाणत्व-मिति च व्यवहारबलादपि सिध्यति । तथा च कदाचित् प्रमाणजन्या प्रमा-ऽपि हानादिबुद्धिं जनयन्ती प्रमान्तरजनकत्वात्प्रमाणमित्युच्यते । परं या प्रमा प्रमान्तरं न जनयति सा तु न प्रमाणपदबोध्या । तामपि प्रमाणपदव्यपदेश्य स्वीकुर्वाणा जैनाः बौद्धाश्च लोकसिद्धं प्रमाणतत्त्वमपलपन्तीति निःसारं वचः ।

किं च ज्ञानमेव केवलं प्रमाणं न तु चक्षुरादय अज्ञानरूपत्वादिति यदुच्यते तदपि न युक्तियुक्तम् । प्रमाणस्य बोधाबोधात्मकसामग्रीविशेषत्वस्य प्रागुपपादितत्वात् (८३) । अत एव मीमांसकमतमपि न दोषविधुरम् ।

क्षणिकवादिनां बौद्धानां मते प्रमाणतत्फलयो कार्यकारणभावो नोपपद्यते । तयोर्व्यवस्थापकभावस्यैव सिद्धेः । ८४ । एतेन प्रमामजनयदेव ज्ञानं प्रमाणमिति सकलशास्त्रप्रक्रियाविरुद्धं अनुभवविरुद्धं च कथितं भवति (८५) ।

किं च क्षणिकं विज्ञानं स्वावस्थानसमये फलजननासमर्थं कथं प्रमाणं भवेत् । न चैतदेवं स्यायनये । कार्योत्पादनसमये कारणावस्थानस्वीकारात् (८६) ।

अर्थसारूप्यं प्रमाणमित्यपि निःसारं वचः । एकस्यैव ज्ञानस्य ग्राह्य-ग्राहकभावानुपपत्ते । साकारज्ञानवादिनां मते अर्थस्यैवासिद्धेश्च । तथा अर्थो ह्यनुमेयो वा स्यात् प्रत्यक्षो वा । नानुमेयः संबन्धग्रहणाभावात् । न प्रत्यक्षः, आकारद्वयप्रतीत्यभावात, अभ्युपगमे चानवस्थाप्रसंगात् । अर्थाकारो हि निराकारज्ञानगम्यो न भवतीति, ज्ञानेनाकारवता गृह्यते । सोऽ-मिदानीं ज्ञानाकारोऽपि अग्राह्यत्वादन्येनाकारवता गृह्यते, सोऽप्यन्येनेति ।

अथवा अर्थो निराकारज्ञानग्राह्यतां नोपयातीति स्वग्राहके ज्ञाना-त्मनि समर्पिताकारा भवतीति साकारं ज्ञानमेवेदं सम्पन्नमिति पुनरर्थोऽन्यः

---

(८३) अत्रैव पृ

(८४ आय एल. एम्. फूट नोट नं ५७ पृ. ४२

(८५) द्र न्या मं, प्र पृ २८- ३०

(८६) न्या मं इंग्लिश ट्रान्सलेशन पृ. ३०

कल्पनीयः, सोऽपि ग्राह्यत्वात्स्वग्राहकस्य साकारत्वसिद्धये तत्रैव लीयते इति ...कारं ज्ञानमेवावशिष्यते इति पुनरर्थोऽन्य इतीत्थमनवस्था (८७)।

वस्तुतस्तु साकारपक्षेऽपि न प्रमाणव्यतिरिक्तं फलमुपपद्यते ...एवायम् (८८)।

प्रमाणमविसंवादि ज्ञानमिति यदुक्तं तदप्यसमीचीनम्। अर्थक्रियास्थितिरविसंवादनम् नाम। प्रमाणफलं चार्थप्राप्तिरेव न तु प्रवृत्तिरिति प्रागुपादितमेव। अत्रायमाक्षेपः- अर्थप्रापकत्वमिति यदुच्यते प्रमाणस्य तदसंभवि। अर्थस्य क्षणिकत्वेनातिक्रान्तत्वात् प्राप्तिर्नोपपद्यते। किं च अव्यापकमिदं लक्षणम्, उपेक्षणीयविषयबोधस्याव्यभिचारादिविशेषणयोगेन लब्धप्रामाणभावस्याप्यनेनासंग्रहात् (८९)।

ज्ञानस्य क्रियात्मकत्वनिराकरणेन ज्ञानविषयत्वभिन्नायाः ज्ञाततायाश्चाभ्युपगमे मानाभावेन ज्ञातताजनकज्ञानक्रिया प्रमाणमिति मीमांसकमतं प्रत्याख्यातं भवति।

मीमांसकैरुपादीयमानं अगृहीतग्राहित्वरूपं प्रमाणविशेषणमपि न समंजसम्। गृहीतग्राहिणा प्रमाणेन प्रमैवोत्पद्यते। तत्र प्रमाणत्वेनाभिमते प्रथमज्ञाने, गृहीतग्राहिणि द्वितीयादिज्ञाने च वैलक्षण्याभावात्। न च प्रमान्तरानुत्पाद एव वैलक्षण्यम्, तत्सत्वाच्च न द्वितीयादिज्ञानानां प्रमाणत्वमिति वाच्यम्। युज्यते खलु चेतनपुरुषे पर्यनुयोगः 'किमक्षिणी निमील्य नास्से कस्मात् दृष्टं पश्यसीति' न चैतदचेतनेषु प्रमाणेषु संघटते (९०)। एवं च बाधकाभावात् सति सकलकारणसमवधाने गृहीतविषयग्रहणेऽपि प्रवर्तत एव प्रमाणम्।

ननु गृहीतमेव विषयं विषयीकुर्वत् प्रमाणं निष्फलं भवेदिति तु न शङ्क्यम्। पुनःपुनरुपलम्भस्य सप्रयोजकत्वदर्शनात्। तथाचोक्तं मञ्जरीकारेण न च सर्वात्मना वैफल्यम्, हेये हि कण्टकवृकमकरविषधरादौ विषये पुनःपुनरुपलभ्यमाने मनःसन्तापात् सत्वरं तदपहानाय प्रवृत्तिः, उपादेयेऽपि चन्द्र-

---

८७) न्याय, प्र प्र पृ १५ ८८) तत्रैव

८९) न्या ..., प्र प्र पृ १२ ९०) प्र तत्रैव पृ २०

नवनक्षारहारनहिल दौ परिदृश्यमाने प्रीत्यतिशयः स्वसंवेद्य एव भवति इति (९१)।

गृहीतग्राहिणोऽपि प्रमाणत्वेऽनवस्था तु न शङ्कनीया। विषयान्तर संपर्काद्वा प्रमादाद्वा, उपायसंक्षयाद्वा प्रमाणविरामसंभवात् (९२)।

किं च प्रत्यभिज्ञाया गृहीतग्राहित्वादप्रामाण्यं प्रसज्यते।

स्मृतेरप्रामाण्यं तु न्यायनये न गृहीतग्राहिताकृतमपि तु प्रकारान्तरेणेति प्रागुक्तमेव।

सांख्यानां प्रमाणप्रक्रिया तु सुतरामहृदयंगमा, भिन्नाधिकरणत्वात्प्रमाणफलयोः। तथाहि यो हि जानाति बुध्यते अध्यवस्यति न तस्य तत्फलम् अर्थदर्शनमचेतनत्वान्महतः। यस्य चार्थदर्शनं न स जानाति, न बुध्यते, नाध्यवस्यतीति। [९३]

अद्वैतिनां मते स्वीक्रियमाणं अनधिगतविषयस्वरूपं प्रमाविशेषण मीमांसकमतनिरासेनैव निरस्तं वेदितव्यम्।

ज्ञानात्मकचेतनस्य प्रकाशिका चित्तवृत्तिरिति साऽपि प्रमाणमित्यादिकथनं तु ज्ञानस्यात्मस्वरूपतानिरासेन सांख्यप्रक्रियाप्रत्याख्यानेन च हतार्थमिति बोद्धव्यम्।

द्वैतवेदान्तिनां यथार्थं प्रमाणमिति लक्षणं तु व्यापकम्। नैयायिकाभिमतं करणानां प्रमाणत्वं, जैनाद्यभिमतं प्रमायाः प्रमाणत्वं चेत्युभयमपि पक्षं तत्क्रोडीकरोति। विशिष्टदेशकालसंबद्धस्य घटपटादिविषयस्य ज्ञेयतासंपादनमेव प्रमाणपदव्यवहारनियामकमिति तेषामाशयः।

इममत्रा सन्धिः। विषयो हि ज्ञाननिरपेक्ष एव तिष्ठति। यो यो विषयः स सर्व एव ज्ञेय इति न नियमः। यस्य तु ज्ञानं जायते स ज्ञेयो भवति। तथाच अर्थेषु ज्ञेयता प्रमया जायते इति प्रमाऽपि प्रमाणम्। तादृशप्रमाजनकत्वाच्च चक्षुरादिकमपि प्रमाणम्।

प्रमाणतोऽर्थप्रतिपत्तौ प्रवृत्तिसामर्थ्यादर्थवत्प्रमाणमिति भाष्यवचनानुसारं निर्धारितं नैयायिकसंमतं प्रमाणलक्षणं प्रवृत्तिरूपं फलं मूलाधारत-

९१) न्या म, प्र ७० ९२) प्र तत्रैव पृ २१

योपकल्प्य प्रसरति ।

सत्यप्येवं यथार्थं प्रमाणमिति कथनमपि नैयायिकानामविरुद्धम् । यथार्थमिति फलीभूतज्ञानविशेषणम् न तु प्रमाणविशेषणम् । तादृशज्ञानजनकस्यैव प्रमाणत्वात् । एतच्च न्यायनये चक्षुरादिकरणानां निर्विषयत्वात्साक्षाद्याथार्थ्यसंबन्धानुपपत्तेर्बोध्यम् । प्रमाणस्य भावः प्रामाण्यमिति व्युत्पत्त्या प्रमाणधर्मेणैव प्रामाण्येन भाव्यम्। परं सकलशास्त्रीयदर्शनकारैः प्रामाण्यपदेन प्रमातत्वमेव निर्दिश्यते । करणगतं प्रामाण्यं तु प्रमाजनकत्वरूपं प्रमागतयाथार्थ्यापरपर्यायप्रामाण्यसापेक्षत्वाद्गौणम् । प्रमातत्वस्य प्रामाण्यपदेन व्यवहारः प्रमायाः प्रमाणत्वे प्राचीनशास्त्रकाराणां संमतिं सूचयति । यथार्थं ज्ञानं हि प्रमा । तेन याथार्थ्यं प्रमाधर्मः । न तु तत्करणधर्मः । अतः प्रामाण्यपदेन व्यवह्रियमाणं याथार्थ्यं प्रमागतं तत्करणेषूपचर्यते इति कथनीयं भवति ।

एवं च मणिकारवचनपर्यालोचनयापि इदं सिद्धं भवति । प्रमाणतत्वविवेचनं प्रतिज्ञाय प्रमातत्वमेव प्राधान्येन मणिग्रन्थे तेन विवेचितम् । तत्र कारणं तु स्वयं तेनैवोपन्यस्तं यथा– 'प्रमाणतत्वं च प्रमातत्वावधारणाधीनम्' (९४) इति । 'अथ किं तत्प्रामाण्यम्?' (९५) इत्याद्यग्रिमग्रन्थेन च प्रमालक्षणमेव विमर्शविषयीकृतम् ।

९३) तत्रैव पृ, २४ ९४) त चि प्र ख पृ ११५
९५) तत्रैव पृ ४०४

प्रामाण्यवादः

संगति — प्रामाण्यनिश्चयस्य प्रवृत्तिप्रयोजकत्वम् ।

प्रामाण्यस्य निरूपणमारभमाणो गंगेशोपाध्यायः, संगतिसंपत्तये प्रामाण्यनिश्चयस्य प्रवृत्त्यङ्गत्वं प्रथममुपपादयामास ।

प्रवृत्तिर्हि द्विविधा, ससन्देहा निष्कम्पा चेति । तत्र संशयजन्य कृष्यादिप्रवृत्तिः । तद्भिन्ना चार्थनिश्चयजन्या जलाहरणादिप्रवृत्तिः । तत्र प्रामाण्यज्ञानस्य प्रवृत्तिजनकत्वमुभयत्रापि नोपपद्यते । तस्य प्रवृत्तिमात्रजनकत्वे कृष्यादौ व्यभिचारः, तदभावेऽपि प्रवृत्त्युपलम्भात् । यदि केवलं निष्कम्प प्रवृत्तावेव प्रामाण्यज्ञानस्य हेतुत्वमुच्यते तथापि न निस्तारः । आवश्यकार्थ निश्चयादेव तदुपपत्तौ तस्य तं प्रत्यन्यथासिद्धत्वात् । एतदभिप्रेत्यैव पूर्वपक्ष-ग्रन्थे मणिकृदाह– 'अथ किं प्रामाण्यज्ञानेन ? प्रवृत्तिमात्रे तस्य व्यभिचार बहुवित्तव्ययायाससाध्ये प्रवृत्तिश्चावश्यकार्थनिश्चयादेव (१) । इति ।

तटस्थस्येयमाशंकेति रुचिदत्तमिश्राः (२)। मीमांसकमते माध्यमिकमते च प्रामाण्यावधारणस्य प्रवृत्त्यर्थमावश्यकत्वात्तन्मतेनेयमाशंकेति कथनमयुक्तमिति न्यायशिखामणिकाराः । (३)

इदं तु तत्वम् । प्रमाणादीनां तत्वं प्रतिपादयति शास्त्रे प्रवृत्तिः प्रमाणत्वावधारणं विना नोपपद्यते । प्रमाणत्वावधारणं च प्रमात्वावधारणाधीनम् । ततश्च शास्त्रप्रवृत्तिः प्रमात्वनिश्चयं विना नोपपद्यते इत्युक्तं भवति अत्र मीमांसकवेदान्तिनौ माध्यमिकाश्च प्रामाण्यनिश्चयस्यापि सर्वत्र प्रवृत्तिहेतुत्वमभ्युपगच्छन्ति । नैयायिकास्तु अदृष्टार्था वैदिकी प्रवृत्तिः प्रामाण्यसंशये संभवन्ती प्रामाण्यावधारणसाध्यैवेति वदन्ति । दृष्टार्था प्रवृत्तिस्तु प्रामाण्यावधारणं विनापि यथातथा भवतीति तेषामाशयः (४) । एवं च निःश्रेयसरूपादृष्टप्रयोजनका शास्त्रे प्रवृत्तिः प्रामाण्यावधारणं विना नोपपद्यत इति सिद्धं भवति ।

१) त चि प्र ख. पृ ११६ २) प्र त चि प्र. पृ: ११६

३) द्र त. चि. न्या शि म पृ ११६, ११७.

४) द्र त चि. न्या शि म. पृ १२३.

अत्रैवं तटस्थः शङ्कते- 'प्रामाण्यावधारणस्य प्रवृत्तिमात्रं प्रति हेतुत्वं नोपपद्यते। कृष्यादौ व्यभिचारात्। नापि प्रवृत्तिविशेषं प्रति, आवश्यकार्थनिश्चयेनान्यथासिद्धत्वात्' इति।

एतदुपरि 'यस्य संशयव्यतिरेकनिश्चयौ यत्र प्रतिबन्धकौ तन्निश्चयस्तद्धेतुरिति' सामान्यव्याप्तिप्रदर्शनद्वारा प्रामाण्यसंशय-प्रामाण्यव्यतिरेकनिश्चययोः प्रवृत्तिप्रतिबन्धकत्वात् प्रामाण्यनिश्चयस्य प्रवृत्तिहेतुत्वमुपपादितं गङ्गेशोपाध्यायेन (५)। यथा व्याप्तिसंशयः व्याप्तिव्यतिरेकनिश्चयश्चानुमितिप्रतिबन्धक इति व्याप्तिनिश्चयो भवत्यनुमितिहेतुरित्युदाहरणमप्युपन्यस्तम् (६)।

अस्यां सामान्यव्याप्तौ प्रवृत्तिप्रतिबन्धकत्वरूपहेतोः प्रवृत्तिहेतुत्वरूपसाध्यस्य च वैयधिकरण्यं दृश्यते। तच्चैकाधिकरण्यवारणाय व्याप्तेराकारः किंचिदेव परिवर्तनीयः। तद्यथा- 'यत्संशयव्यतिरेकनिश्चयप्रतिबध्यं यत् तत् तन्निश्चयसाध्यम्' इति (७)। अधुना प्रतिबध्यत्वसाध्यत्वयोरैकाधिकरण्यान्न काप्यनुपपत्तिः।

किं च ग्राह्यसंशयस्य प्रतिबन्धकत्वानुपपत्तेः संशयपदोपादानमहिम्नैव ग्राह्यभिन्नत्वलाभः (८)। ग्राह्यत्वं चात्र प्रतिबध्यत्वाभिमतप्रवृत्तिविषयत्वम्।

अन्यच्च, अत्र प्रतिबन्धकत्वं नाम न कारणीभूताभावप्रतियोगित्वम्, व्याप्तिव्यतिरेकज्ञानाभावस्यानुमित्यहेतुतया दृष्टान्ते साधनवैकल्यात्। अप्रामाण्यज्ञानाभावस्य प्रवृत्त्यहेतुत्वेन स्वरूपासिद्धेश्च। किन्तु प्रयोजकीभूताभावप्रतियोगित्वम्, कार्यानुत्पादव्याप्यत्वं वा (९)।

अत्रायं विचारः। उक्तव्याप्त्या प्रामाण्यनिश्चयस्य प्रवृत्तिप्रयोजकत्वं साध्यते, उत प्रवृत्तिहेतुत्वम्? प्रामाण्यसंशयव्यतिरेकनिश्चययोः प्रवृत्तिप्रतिबन्धकत्वसत्त्वेऽपि आवश्यकार्थनिश्चयस्यैव प्रवृत्तिहेतुत्वोपपत्तेः प्रामाण्यवधारणस्यान्यथासिद्धत्वादप्रयोजकत्वमिति प्रथमः कल्पः। अर्थसत्तानिश्चयद्वारा, प्रामाण्यनिश्चयः प्रवृत्तिहेतुरिति द्वितीयकल्पः। तत्र प्रथमकल्पो न युक्तिसहः

५) त चि प्र ख पृ ११७ ६) द्र- तत्रैव
७) द्र त चि न्या शि म पृ ११८ ८) त चि प्र पृ ११९
९) द्र तत्रैव न्या शि म. ११९

उक्तव्याप्तिमूलकानुमानात् प्रामाण्यावधारणस्य कारणत्वसिद्धावर्थनिश्चयस्य व्यापारत्वकल्पनेन तद्व्यवधायकत्वाभावात् (१०)। इति चेन्न। प्रामाण्यसंशयव्यतिरेकनिश्चययोः सति खलु प्रवृत्तिप्रतिबन्धकत्वे उक्तव्याप्तिमूलकानुमानेन प्रामाण्यावधारणस्य प्रवृत्तिहेतुत्वं साध्यम्। तदेव तु नास्ति। प्रामाण्यसंदेहे सत्यर्थसंदेहेनार्थानिश्चयादेवाप्रवृत्तेस्तत्र तयोरप्रतिबन्धकत्वात् (११)

वस्तुतस्तु उक्तव्याप्तिरेवाप्रयोजकत्वादसिद्धेः न्यायशिखामणिकाराः ग्रन्थकृदाशयमुपवर्णयामासुः [१२)। अत एव गङ्गेशोपाध्यायोऽपि 'प्रामाण्यसंशयानन्तरमिदमित्थमेवेत्यवधारणस्य निष्कम्पप्रवृत्त्यङ्गस्य निष्कम्पप्रवृत्तिप्रयोजकत्वं सिद्धान्तयामास।

इदमत्रानुसन्धेयम्। प्रागुक्ता व्याप्तिः, प्रवृत्तिविशेषस्य प्रामाण्यनिश्चयप्रयोज्यत्वं साधयति, न तु तज्जन्यत्वम्। प्रवृत्तिविशेषश्च बहुवित्तव्ययायाससाध्ये अदृष्टफलके यागादौ निष्कम्पा प्रवृत्तिः। उक्तव्याप्तिमूलकानुमानप्रयोगश्चेत्थम्— निष्कम्पप्रवृत्तिः, प्रामाण्यावधारणप्रयोज्या, आद्यभिन्नतत्संशयव्यतिरेकनिश्चयप्रतिबध्यत्वात्, अनुमितिवत् [१४] इति।

नव्यन्यायशैलीमनुसृत्य मणिकारादिमतश्रत्याख्यानविख्यातयशस्तर्कताण्डवकारास्तु प्रामाण्यनिश्चयस्यैव प्रवर्तकत्वं सिद्धान्तयन्ति। तन्मते 'कृष्यादौ सन्देहात्प्रवृत्तावपि बहुवित्तव्ययायाससाध्ये पारत्रिकफलके यागादौ निष्कम्पप्रवृत्त्यर्थं प्रामाण्यस्याप्यवश्यवेद्यत्वादस्ति [१५] तस्य प्रवृत्तिजनकत्वम् न तु प्रवृत्तिप्रयोजकत्वमात्रम्। ननु तत्राप्यर्थनिश्चय एव हेतुः।' समानविषयत्वात्, आवश्यकत्वाच्च। न तु प्रामाण्यनिश्चय इति चेन्न। पीतः शंख इत्यादावाकारान्तरार्थोल्लेखाभावेन शंखः पीतत्वेनैव भातीत्यनुभवेन चैकाकारनियते संशयान्यज्ञानरूपे निश्चये सत्यपि पीतार्थिनोऽप्रवृत्तिदर्शनात्

न्यायशास्त्रप्रक्रियानुसारं प्रामाण्यनिश्चयस्य प्रवृत्त्युपयोगित्वं मणि-

---

१०) त चि न्या शि म पृ ११८

११) त चि प्र ख पृ ११७ १२) द्र त चि न्या शि म पृ ११८

१३) त चि प्र ख पृ १२३ १४) द्र त चि न्या शि म पृ १२४

१५) त ता प्र प ५ १२ १६) तत्रैव पृ १२,१३.

कारो निरणैषीत् यथा– 'ज्ञानं न गृहीतप्रामाण्यं प्रवर्तकम् । प्रामाण्यानुमितेः पूर्वमेव तस्य विनाशात् । किन्तु तज्ज्ञानसमानविषयकमप्रामाण्यशंकाशून्यं ज्ञानान्तरमेव । नन्वेवं बहुवित्तव्ययायाससाध्ये निष्कम्पप्रवृत्तावनुपयोगित्वात् निष्फलं प्रामाण्यज्ञानमिति किं तदुपायानुसरणेन ? इति चेन्न । स्वर्गसाधनं याग इति ज्ञानप्रामाण्ये निश्चिते तत्समानविषयकज्ञानान्तरे अप्रामाण्यशङ्का न भवतीति ज्ञानान्तरमगृहीतप्रामाण्यमपि स्वार्थनिश्चयरूपं, निष्कम्पप्रवृत्तिं जनयति । तदेवं अप्रामाण्यशङ्काप्रतिबन्धद्वारा निष्कम्पप्रवृत्तावुपयुज्यते प्रामाण्यज्ञानमिति न निष्फलम् [१७] ।

इदं त्ववधेयम् । प्रामाण्यस्य ज्ञप्तावुत्पत्तौ च स्वतस्त्वमभ्युपगच्छतां तर्कताण्डवकाराणां मते ज्ञानं गृहीतप्रामाण्यमेव ज्ञायते जायते च । अतः ज्ञानगतप्रामाण्यनिश्चयस्यापि प्रवर्तकत्वमुपपद्यते । न चैतदेवं परतस्त्ववादिनि न्यायनये संभवति । अनवस्था वारणाय च तैरप्रामाण्यशङ्कायाः प्रवृत्तिप्रतिप्रतिबन्धकत्वं कल्प्यते । तथाहि यत्राप्रामाण्यशङ्कानन्तरं प्रवृत्तिस्तत्र प्रामाण्यनिश्चयो हेतु । सोऽपि तादृशशङ्कानिरसनद्वारैव, न तु साक्षात् । उक्तं च मणिकारेणापि= 'ननु नान्यगृहीतप्रामाण्यं ज्ञानं परप्रामाण्यनिश्चयरूपम्, अनवस्थानात् । नापि स्वज्ञायमानप्रामाण्यं, स्वतःग्रहापत्तेः । अतोऽगृहीत प्रामाण्यमेव ज्ञानं परप्रामाण्यनिश्चयरूपमास्थेयम् । तथा च व्यवसायेऽप्यगृहीतप्रामाण्य एव स्वविषयं निश्चाययतु । किं विषयनिश्चयार्थं तत्प्रामाण्यनिश्चयेन । अथ व्यवसायस्याप्रामाण्यदर्शनान्न ततोऽपि प्रामाण्यनिश्चय इति चेन्न= न ब्रूमो ज्ञानप्रामाण्यनिश्चयादेव अर्थनिश्चय इति ।

किं तु यत्राप्रामाण्यशङ्का नास्ति करतलामलकादिज्ञाने तत्र व्यवसाय एवार्थनिश्चय इति तत एव प्रवृत्तिनिष्कम्पा । यत्रानभ्यासदशायां प्रामाण्यसंशयेनार्थनिश्चयं परिभूयार्थसंशयस्तत्र प्रामाण्यनिश्चयाधीनज्ञानादर्थं निश्चित्य निष्कम्पं प्रवर्तते नान्यथेति सर्वानुभवसिद्धम् [१८] इति ।

१७) द्र त चि प्र ख पृ २११, त सा पृ ११.

१८) त चि प्र ख पृ २९३, २९४

किं च लिङ्गज्ञानादीनां प्रामाण्यशङ्काविरहे तज्जन्यानुमित्याद्युत्तरकाले अप्रामाण्यसंशये बाधकाभाव एव । यत्र तु लिङ्गज्ञानस्यैवाप्रामाण्यशङ्काकलङ्कानुमित्यनुत्पादः तत्र प्रामाण्यानुमित्या लिङ्गनिश्चये सत्यनुमितिरिति [१९]। एतेन प्रामाण्यनिश्चयस्याप्रवर्तकत्वे व्याप्त्यादिनिश्चयोऽनुमित्यादिहेतुरिति व्यवस्थाऽयोगो न भवतीति बोध्यम् । उक्तं च मणिकारेण— 'अप्रामाण्यशङ्काकलङ्काभावे लिङ्गादिज्ञानस्यैवार्थनिश्चायकत्वात्, तत्कलङ्के तूक्तैव' इति । [२०] इति ।

वस्तुतस्तु प्रामाण्यस्य ज्ञप्तावुत्पत्तौ च स्वतस्त्वपरतस्त्व-तदन्यतरस्वीकारात् नैका विप्रतिपत्तयः समुत्पद्यन्ते । अतस्तासां पर्यालोचनाय प्रथमतो विविधदार्शनिकानां मते कथं प्रामाण्यग्रहः ? कथं चोत्पत्तिः ? इति विचारणीयम् ।

प्रामाण्यस्य स्वतस्त्वपरतस्त्वविचारः—

विषयोपक्षेपः—

विषयोऽयं ज्ञानसिद्धान्ते परमप्राधान्यमर्हति । विविधेषु हानोपादानकार्येषु प्रवर्तमानः पुरुषः प्रथमं प्रमाणावलम्बेन अर्थनिश्चयं संपादयतीति तावदविवादम् । तथापि प्रमाणेन खलु परिच्छिद्यमानोऽर्थः प्रमाणस्य प्रमाणत्वं प्रमाणाभासत्वं वा स्वक्रिययैव निश्चाययति । यथा दाहपिपासाद्युपशमसमर्थं हि जलं स्वविषयकज्ञानस्य प्रामाण्यं परामृशति । अतथाभूतं च अप्रामाण्यम् । तदेतज्ज्ञानगतं धर्मद्वयं प्रामाण्याप्रामाण्यरूपं धर्मिणोऽनित्यत्वादुत्पद्यते विज्ञायते चेत्यवश्यमभ्युपगन्तव्यम् । उभयोः परस्परविरोधित्वादसहभावश्चोक्तो भवति । सति चैवं प्रामाण्याप्रामाण्यान्यतरस्य ज्ञाने उत्पत्तिश्च कथमिति विचारणीयं भवति । अयमेव विचारः प्रामाण्यवाद इति भारतीयदर्शनकारैरुल्लिख्यते ।

ज्ञानगतं याथार्थ्यमेव प्रामाण्यपदेन व्यपदिश्यते सर्वैः । याथार्थ्यं च किं रूपमित्यत्र वर्ततां नाम स्वस्वसिद्धान्तानुसारं विप्रतिपत्तिः शास्त्रकाराणाम् । तथापि याथार्थ्यमेव करणभूतायां फलभूतायां वा प्रमायां प्रामाण्यरूपमित्यत्र

१९) द्र त चि प्र पृ ३०१ २०) त चि प्र ख पृ २९८.

न विवादः । प्रमातत्वनिरूपणपरे प्रकरणान्तरे च विषयोऽयं विस्तरेण विचार्यते ।

प्रकृतविषयानुसारं सति खलु प्रामाण्ये प्रवृत्तौ साफल्यं संभवति नान्यथेति वस्तुस्थितिः । अत एव 'प्रमाणतोऽर्थप्रतिपत्तौ प्रवृत्तिसामर्थ्यादर्थवत्प्रमाणम्' इति प्रमाणप्रधानन्यायदर्शनव्याख्यानारंभे वात्स्यायनमुनिरवोचत् (२१) । इदमेव भाष्यवचनं न्यायनयाभिमतप्रामाण्यवादस्य मूलम् । ऐतिहासिकदृशा पर्यालोच्यमाने प्रामाण्यवादस्य मूलारंभो वेदवाङ्मय एव समुपलभ्यते । वेदवाङ्मयेऽपि विशेषतः उपनिषत्सु नानाप्रकारेण समुपदिष्ट तत्वज्ञानस्य याथार्थ्यनिर्णयो विधीयते । यद्यपि नवमशतकानन्तरं कुमारिलभट्टमारभ्य गङ्गेशोपाध्यायपर्यन्तं यादृशः प्रामाण्यवादो वादविद्यावलम्बेन समुपचीयमानः परां वृद्धिमाप, न खलु तादृशः श्रुतिषु प्राचीनाचार्यविरचितप्रबन्धेषु वा समुपलभ्यते परं तन्मूलभूताः केचन विषयाः स्पष्टमुपदिष्टा विलक्ष्यन्ते । 'अस्तीत्येवोपलब्धव्यः' 'तस्य भासा सर्वमिदं विभाति' इत्यादीनि श्रुतिवचनानि, आत्मनः स्वप्रकाशत्वं, स्वनिश्चयार्थं स्वेतरप्रमाणनिरपेक्षत्वं वा प्रतिपादयन्ति, चाक्षुषादिबाह्यप्रत्यक्षाविषयाम्, आत्मनः सत्तां साधयित्वा आत्मविषयकज्ञानस्य यथार्थतामेव विशिंषन्ति ।

प्रामाण्यवादस्य दर्शनेषु विनिवेशोऽपि वेदवाङ्मयमूलक एवेति मञ्जरीकारादयो निर्दिशन्ति । प्रागुपदर्शितदिशा द्विविधा खलु प्रवृत्तिरुपलभ्यते मानवानाम् । दृष्टार्था अदृष्टार्था चेति । तत्र दृष्टार्था प्रवृत्तिः प्रामाण्यनिश्चयमन्तरेणाप्युपपद्यते ।

न त्वदृष्टार्था । तथाचोक्तं जयन्तभट्टैः= 'अदृष्टे तु विषये वैदिकेष्वगणित द्रविणवितरणादिक्लेशसाध्येषु कर्मसु तत्प्रामाण्यावधारणमन्तरेण प्रेक्षावतः प्रवर्तनमनुचितमिति तस्य प्रामाण्यनिश्चयोऽवश्यकर्तव्यः (२४)' । इति तदेवं वेदवाङ्मयीनप्रामाण्यावधारणस्य प्रत्यक्षादिप्रामाण्यावधारणापेक्षया सुतरामावश्यकत्वेन तदंगतया प्रामाण्यवादो दार्शनिकविचारधारायामभिनिविष्टो विविधप्रबन्धेषु प्राधान्यमधिजगाम ।

२१) न्या भा १-१-१ पृ. ५ २४) न्या मं प्र प्र पृ. १५५

कतमस्मिन् भारतीयदर्शने प्रामाण्यवादः प्रथममुपात्त इति विचारः, सहसमात्रप्रयोजनः । भारतीयदर्शनानां वैचारिकविकासस्य सामान्यतो वेदवाक्यानुबंधित्वेऽपि वेदप्रामाण्यविचारः सामान्येन कतमस्मिन् शास्त्रे प्रवर्तत इति तु विचारमर्हम् । तदनुसारं शब्दप्रामाण्यप्रतिष्ठापनव्यग्राः पूर्वमीमांसका एव प्रथमं शब्दप्रामाण्याप्रामाण्ये विवेचयामासुः । क्रमेण स विचारः ज्ञानसामान्यस्य प्रामाण्याप्रामाण्ये अपि विषयीचकार ।

केचनतु वैदिकावैदिकनयां विभक्तेषु विद्वत्सु जायमानः शास्त्रार्थविचार एव मूलं प्रामाण्यवादस्य इति वदन्ति । तन्मते नैयायिकमीमांसकादीनां वेदप्रामाण्यसंरक्षणबद्धपरिकराणां यागाङ्गपशुहिंसाद्यालोचनजनितप्रद्वेषवशात्, वेदप्रामाण्यविध्वंसननिबद्धबुद्धिभिः जैनबौद्धादिभिः सह प्रचलितो वादविवाद एव प्रामाण्यवादरूपेण विचकास (२५) ।

वस्तुतस्तु वादविवादे परमावश्यकस्य प्रमाणस्य निरूपणमिव प्रामाण्यविचारोऽपि वादविद्याया एव विषयः संभाव्यते । अत एव दर्शनत्वप्राप्तेः पूर्वं कतिपयप्रमाणविषयकसिद्धान्तरूपेणावस्थितं वैदिकावैदिकदर्शनोपकारितया सकलोपादेयं तर्कशास्त्रमेव प्रामाण्यविचारेऽपि स्वमहिमानमाविष्कृयत् मीमांसादर्शनमुखेन प्रावर्तत इति वक्तुं सुशकम् ।

प्रामाण्यवादः स्पष्टतया कुमारिलभट्टपादैः श्लोकवार्तिके समुपन्यस्तो विलोक्यते । कस्मिंश्चित् काले शास्त्रार्थकलाकोविदानां समाजे प्रामाण्यवादो निरतिशयं प्राभवमभिव्यञ्जयामास इति सनिश्चयमवगम्यते । विशेषतो नवमशतकानन्तरं वाचस्पतिमिश्रजयन्तभट्टप्रभृतयो न्यायसमयानुसारं प्रामाण्यवादं विशदीचक्रुः । एवं हि प्रवादो विद्वज्जनसमाजे श्रुतिपथमुपयाति यदुत्तराचरं न्यायशास्त्रीयप्रबन्धेषु मीमांसकमाध्यमिकादीनां प्रामाण्यादिज्ञानप्रक्रियासिद्धान्तविवेचनं खण्डनाय तथा नाम विश्लेष्य प्रतिपादितं यथा तेषां सूक्ष्मविषया मूलग्रन्थापेक्षयाऽपि सुविशदमुपपादिताः पर्यालोचिताश्च समभूवन्निति ।

गङ्गेशोपाध्यायविरचितस्तत्त्वचिन्तामणिर्नाम मुकुटमणिः प्रमाणतत्त्वविवेचनपरेषु न्यायशास्त्रग्रन्थेषु । ये तु पुनरनालोचिततत्प्रबन्धविषयाः कुशा-

२५) भा. दं मे प्रामाण्यवाद पृ २२

प्रविषणाः वाक्प्रपञ्च इति जटिलविचार इति च तस्मिन्ननादरभरमाविष्कुर्वन्ति ते तु तदीयविषयविवेचनप्रणालीसंस्तवमनासाद्य आत्मानमेव वञ्चयन्तीति निश्चप्रचम् ।

सर्वप्रथमतया वेदप्रामाण्यसाधनाय अनपेक्षत्वरूपो हेतुरुपन्यस्तो जैमिनिना (२६)। बादरायणसंमतिश्च तत्र प्रदर्शिता । ज्ञानं प्रमाणम्, अनपेक्षत्वात् इति किल तत्सूचितानुमानप्रयोगः । अत्र अनपेक्षत्वादिति हेतुरेव तन्मते ज्ञानस्य स्वतःप्रामाण्यं साधयति । अनपेक्षत्वस्य स्वान्येनरानपेक्षत्वे तात्पर्यम् । स्वतःप्रामाण्यमित्यादिस्थलेऽपि स्वपदस्य स्वान्ये तात्पर्यम् । तदनुसारमेव च स्वतस्त्वनिरुक्तिः । एवं च जैमिनिमहर्षिः स्वतस्त्वपदमप्रयुञ्जानोऽपि परानपेक्षत्वरूपं स्वतस्त्वसाधकं हेतुमुपन्यास्थत् । बादरायणसंमतिस्तु मृग्या । ब्रह्मसूत्रेषु कुत्रापि प्रामाण्यवादो न स्पष्टतया निर्दिश्यते । शाबरभाष्यमपि जैमिनेराशयं तथैव विवृणोति— तस्मात्तत्प्रमाणमनपेक्षत्वात् । ह्येवं सति प्रत्ययान्तरमपेक्षितव्यम्, पुरुषान्तरं वाऽपि, स्वयं प्रत्ययो न ह्यसौ (२७) इति । अमुमेव सूत्रं विवृण्वन् शबरस्वामी मीमांसकाभिमतं प्रामाण्यवादं परामृशति- 'कथं दुष्टादुष्टावगम इति चेत् प्रयत्नेनान्विच्छन्तो न चेद्दोषमवगच्छेम, प्रमाणाभावात् अदुष्टमिति मन्येमहि । तस्मात् यस्य च दुष्टं करणं यत्र च मिथ्येति प्रत्ययः, स एवासमीचीनः प्रत्ययः नान्य.' (२८) इति । इदमेव मतं मूलाधारतयोपादाय कुमारिलभट्टप्रभृतयः मीमांसकमते स्वतःप्रामाण्यवादं निरूपयामासुः ।

द्वैताद्वैतादि विविधवेदान्तसंप्रदायिनोऽपि प्रामाण्यस्य उभयथा स्वतस्त्वमेवाभ्युपगच्छन्ति । बादरायणविरचितवेदान्तसूत्रेषु तत्र तत्र शब्दप्रामाण्यस्य स्वतस्त्वविषये युक्तयः समुपन्यस्ताः सन्तीति विविधभाष्यटीकारचयितारः प्रतिपादयन्ति । तत्र शाङ्करभाष्यं प्रामाण्यवादं न कुत्रापि परामृशति ।

---

२६) जै सू १-१-५ औत्पत्तिकस्तु शब्दस्यार्थेन संबन्धस्तस्य ज्ञानमुपदेशोऽव्यतिरेकश्चार्थेऽनुपलब्धे तत् प्रमाणं बादरायणस्यानपेक्षत्वात्

२७) शा भा १-१-२ पृ २९ ३१ उद्धृतम् भा द में प्रामाण्यवाद पृ २८

२८] तत्रैव उद्धृतम् पृ २९

संभवत: ब्रह्ममात्रस्य पारमार्थिकसत्वात् तन्मते प्रमाणप्रमेयादिव्यवहार: सर्वोऽप्यविद्यादिबन्धनत्वादसन्नेव । तथाऽपि 'शास्त्रयोनित्वात्' इति सूत्रव्याख्यानावसरे शास्त्रादेव प्रमाणात् जगतो जन्मादिकारणं ब्रह्म अधिगम्यते' इति निरूपयित्वा 'न चानुमानगम्यं शास्त्रप्रामाण्यमिति शङ्कराचार्यैः प्रतिपादनात् (३०) तन्मते शास्त्रं स्वतःप्रमाणमिति सिद्धं भवति (३१) । भामतीप्रभृतिषु टीकाग्रन्थेषु प्रामाण्यवादस्य न तथाविधं विशदं निरूपणमुपलभ्यते यथा तत्समानकर्तृकायां न्यायवार्तिकतात्पर्यटीकायाम् । एतावता षड्दर्शनाचार्य-वाचस्पतिमिश्रा प्रामाण्यवादस्य न्यायशास्त्रविषयत्वमेव प्राधान्येन अभिप्रयन्तीति सूचितं भवति । सति चैवं वेदान्ते प्रामाण्यस्वतस्त्वाभ्युपगमो युक्तिविरुद्धत्वेन तेषामभिमत इति न मन्तव्यम् । अपौरुषेयत्वेन दोषशङ्काकलङ्कविधुरस्य वेदस्य प्रामाण्यं स्वत एव इति वेदान्तिभिरभ्युपगमात् ।

वस्तुतस्तु वेदानामपि ब्रह्मभिन्नत्वादसत्वमेव अद्वैतिनामिष्टम् (३२) अत एव 'व्यवहारे भट्टनय' इति तेषां मतम् । ततश्च प्रमाणप्रमेयादिव्यवहार एव तन्मते नोपपद्यते । अथापि व्यावहारिकदृशा प्रामाण्यवादनिरूपणं वेदान्तपरिभाषाविवरण-प्रमेयसंग्रहप्रभृतिषु अद्वैतवेदान्तप्रकरणग्रन्थेषु संक्षेपविस्ताराभ्यां प्रतिपाद्यमानमुपलभ्यते ।

जैमिन्युक्ता बादरायणसंमतिः ब्रह्मसूत्रेषु कतरत् सूत्रं विशिनष्टीति विचारे माध्वभाष्यानुसारं 'न विलक्षणत्वादस्य तथात्वं च शब्दात्' इति सूत्रे विलक्षणत्वात् इति हेतोः नित्यत्व-नित्यशब्दानुसारित्वरूपं श्रुतिस्मृतिगत-वैलक्षण्यं बोध्यते (३४) । तच्च प्रामाण्यस्य स्वतस्त्वे पर्यवस्यति । अत्रानपेक्षत्वमेव विलक्षणत्वरूपहेतुना विवक्षितमिति सुधाकाराः परिमळाचार्याश्च । तदुक्तं न्यायसुधायाम्— 'नित्यत्वादपौरुषेयत्वात् पुरुषदोषनिबन्धनैः सर्वदोषैर्वर्जित स्वत एव प्रामाण्यमाप्नोति' (३५) इति । अत्रायमभिसन्धिः

२९) ब्र सू २-२ ३ ३०) शां भा (भू २-२-३, २-२-४) पृ ५
३१) [illegible] भा द मे प्रामाण्यवाद पृ ८८ ३२) द न्या को
३३) ब्र सू २-२-४ ३४) ब्र सू भा भा २-२-४ पृ २३३

नित्यत्वादपौरुषेयत्वाच्च दोषाभावः । ततश्च न संवादापेक्षा । संवादानपेक्षत्व-मेव च स्वतस्त्वमिति । तथाचोक्तं परिमळाचार्यैः– 'नेति, 'न विलक्षणत्वा-दस्य तथात्वं च शब्दात्' इति युक्तिपादीयद्वितीयाधिकरणे अस्य वेदादि-शास्त्रस्य विलक्षणत्वात् संवादानपेक्षत्वरूपस्वतःप्रामाण्याख्यात् पाशुपताद्यागम-विलक्षणत्वात् न तथात्वं नाप्रामाण्यम् (३६) इति ।' एतच्च जैमिन्युक्तमन-पेक्षत्वरूपहेतुमेव परामृशतीति सुलभाववोधम् ।

माध्वसंप्रदाये प्रामाण्यवादः द्वादशतमशतकानन्तरं उत्तरोत्तरं सुधीभि-र्विचारविषयीक्रियमाणः न्यायसुधायां टीकाचार्यैः विशदमुपपादितः परि-स्थितिमाप । मिथिलायां गंगेशोपाध्याय आचार्याधिकवित्वपरम्परया विल-क्षणशास्त्रार्थविचारद्वारा समुपबृंहितः प्रामाण्यवादः व्यासतीर्थैः स्वरचिते तर्क-ताण्डवे सुनिपुणमालोच्य वेदान्ताभिमतः प्रामाण्यस्वतस्त्ववादः सिद्धान्तितः अत एव न्यायसंमतप्रामाण्यवादस्थापने यद् गंगेशोपाध्यायस्य स्थानं तदेव वेदान्ताभिमप्रामाण्यस्वतस्त्वस्थापने व्यासतीर्थानां समस्तीति दार्शनिकसाहि-त्येतिहासविदां निर्णयः ।

बौद्धन्यायजैनन्याययोरभिमतः प्रामाण्यस्वतस्त्वपरतस्त्वविषयकोऽनि-यमवादः सुतरामर्वाचीनः । बौद्धन्यायप्रवर्तको दिङ्नागः प्रामाण्यवादं कथं निरूपयामासेति प्रमाणसमुच्चयाख्यग्रन्थस्य समग्रतयाऽनुपलम्भात् न निश्चेतुं शक्नुमः । धर्मकीर्तिः प्रमाणवार्तिके प्रामाण्यवादं निर्दिशति । प्राक् निरूपिते तदीयप्रमाणसामान्यलक्षणे (३७) अर्थक्रियास्थितेरुपादानात् सैव ज्ञानान-साधयतीति सिद्धं भव । बौद्धमते प्रामाण्यं कथं जायते इत्यस्मिन् विषये तेन स्पष्टमेव प्रतिपादितं यत् 'स्वरूपस्य स्वतो गतिः । प्रामाण्यं व्यवहारेण (३८) इति । एतच्च प्रमाणवार्तिकटीकाकारेण मनोरथनन्दिना किञ्चिद्विवेकं विशद्य्य निरूपितम् । तथापि अष्टमशताब्दीभवेन शान्तरक्षितेन तत्वसंग्रहे श्लोकवार्तिकप्रतिपादितं कुमारिलमतं सविस्तरं प्रत्याख्याय बौद्धाभिमतः प्रामा-

३६) न्या. सु. परि. १ पृ ४

३७) प्र वा २-३ उद्धृत भा द में प्रामाण्यवाद पृ ५८

३८) तत्रैव। यउद्धृ तत्रैव

ण्यवादः सिद्धान्तितः । तस्य विशदं निरूपणं तत्वसंग्रहपञ्जिकायां कमलशीलेन विहितम् । बौद्धग्रन्थपर्यालोचनया निर्णीयते यत् मीमांसकाद्यभिमतः प्रामाण्यस्वतस्त्ववादो वेदप्रामाण्यव्यवस्थापने मूलाधार इव साहाय्यमाचरतीति प्राधान्येन तन्निरासप्रयासो बौद्धैर्विधीयते ।

जैनदर्शने प्रमाणलक्षणविभागयोः निरूपणं प्रथमशतकमवेन उमास्वातिना तत्त्वार्थाधिगमसूत्रे विधीयमानमुपलभ्यते । तस्य च विषयस्य क्रमेण विस्तारः सिद्धसेनप्रभृतिभिर्दर्शनाचार्यैः कथं कृत इति प्रागुपपादितमेव । परं प्रामाण्यवादस्य स्पष्टतया विचारः प्रथममकलङ्कविरचितग्रन्थेष्वेव समुपलभ्यते । उत्तरकालभवानां जैनविदुषां कलङ्कन्याये महीयानादरभरोऽपि विभाव्यते । प्रायस्तन्मतमेवानुरुध्यते सर्वैः (३९) ।

सांख्याभिमतत्वेन दार्शनिकग्रन्थेषु निर्दिश्यमानः प्रामाण्यवादः सांख्यानां मूलग्रन्थेषु कुत्रापि नोपलभ्यते इति आधुनिकविचिकित्सकाः वदन्ति (४०) । सर्वदर्शनसंग्रहे प्रामाण्याप्रामाण्ययोः स्वतस्त्ववादः सांख्याभिमतत्वेनोल्लिख्यते । श्लोकवार्तिकारो 'केचिदाहुर्द्वयं स्वतः' इति केचित्पदकारमतत्वेन तदुल्लेखोऽदृश्यते । तदेतत् प्रमुखसांख्यग्रन्थानामधुना दुरधिगमतया न निर्णेतुं शक्यमिति विभाव्यते ।

एवं रीत्या दर्शनेषु निहितपदः प्रामाण्यवादः सुधियां विचारधाराभिराप्यायितो विविधावस्थाः समतिक्रम्य क्रमेण गङ्गेशोपाध्यायकाले सुविशालं रूपमाससाद । सत्स्वपि दर्शनान्तरेषु प्रामाण्यवादविषये, प्रमाणप्रधानतया प्रथिते न्यायशास्त्रे निविष्टदृष्टीनां, यत एव च मार्गदर्शनमपेक्षमाणानां प्रेक्षावतां समाजे तन्मात्रपरीक्षापरस्य मणिग्रन्थस्य महती प्रतिष्ठा समजायत इत्यत्रेतिहासः प्रमाणम् ।

---

३९) द्र भा द यं प्रामाण्यवाद पृ ७७ ७८

४०) द्र तत्रैव पृ १६

प्रामाण्यवादस्य स्वरूपम्—

प्रामाण्यवादो हि प्रामाण्यविचारमपि क्रोडीकरोति । स च विचारः उभयथा क्रमते । तथाहि प्रामाण्यस्य ज्ञप्तिरुत्पत्तिः अप्रामाण्यस्य ज्ञप्तिरुत्पत्तिः अप्रामाण्यस्य ज्ञप्तिरुत्पत्तिरिति च । अत्र ज्ञप्तावुत्पत्तौ च स्वतस्त्वपरतस्त्वरूपं पक्षद्वयम् । एवं चास्य अष्टौ पक्षाः संभवन्ति ।

१ प्रामाण्यज्ञप्तिः– १ स्वतः २ परतः,

२ प्रामाण्योत्पत्तिः– ३ स्वतः ४ परतः,

३ अप्रमाण्यज्ञप्तिः= ५ स्वतः ६ परतः

४ अप्रामाण्योत्पत्तिः= ७ स्वतः ८ परतः इति ।

प्रामाण्यस्य कार्ये स्वतस्त्वपरतस्त्वविचारोऽपि मञ्जरीकारादिभिः उपन्यस्तो विलोक्यते । सोऽपि प्रामाण्यवाद एवान्तर्भवति । दर्शनकारास्तु प्राधान्येन प्रामाण्याप्रामाण्ययोर्ज्ञप्तावुत्पत्तौ च स्वतस्त्वपरतस्त्वविचारमेव कुर्वन्ता तत्रापि विशेषतः प्रामाण्यस्य ज्ञप्तौ स्वतस्त्वपरतस्त्वनिरूपणं विचारविषयीक्रियते । तदनुसारं पक्षान्तराणां गतार्थता संपद्यते । विषयोऽपि सुलभावबोधो भवति ।

प्रामाण्यज्ञप्तौ स्वतस्त्वपरतस्त्वविचारः—

ज्ञानगतं प्रामाण्यं हि तद्वति तत्प्रकारकत्वरूपं याथार्थ्यमेव । प्रागुक्तप्रमालक्षणपरामर्शानुसारं मीमांसकादिमतान्तरे अनधिगतविषयकत्वाबाधितत्व भिविशेषण विशिष्टज्ञानस्य प्रमात्वेऽपि तद्वति तत्प्रकारकत्वरूपयाथार्थ्याभ्युपगमे न केषामपि विप्रतिपत्तिः संभाव्यते । तद्वति तदभावप्रकारकत्वमवगाहमानस्य ज्ञानस्याप्रमात्वे सर्वेषामैकमत्यात्

प्रागुपदर्शितदिशा प्रामाण्यनिश्चयः केषांचिन्मते प्रवर्तकः केषांचिन्मते प्रवृत्तिविशेषं प्रति प्रयोजकः । उभयथापि तन्निरूपणमावश्यकम् । तत्रानभ्यासदशायां जायमाने ज्ञाने तदितरे च कथं प्रामाण्यनिश्चय इति विभिन्नदर्शनकाराणां मतेनादावुपपाद्यते । विभिन्नमतानां वर्गीकरणमत्र त्रेधा विधातुं शक्यम् १) उभयत्राऽपि प्रामाण्यनिश्चयः स्वत एव जायते, २) उभयत्राऽपि प्रामाण्यनिश्चयः स्वत एव जायते, २) उभयत्रापि परतः ३] अन-

भ्यासदशापन्न ज्ञाने परतः तद्भिन्ने च स्वतः इति ।

अभ्यासदशापन्नं अनभ्यासदशापन्नं च ज्ञानं उदाहरणतयोपादाय प्रामाण्यवादस्य विचारः प्रसरति । तथाविधज्ञानानां सूक्ष्मेक्षिकया पर्यालोचनं प्रामाण्यस्वतस्त्वपरतस्त्वविषये विदुषां मतभेदं स्पष्टमुपपादयति ।

तत्राभ्यासो नाम समाने विषये ज्ञानानामभ्यावृत्तिः इति भाष्यकारः (४१) । एकविषयानेकविज्ञानोत्पादोऽभ्यास इति वार्तिककारः (४२) । 'समाधिविशेषाभ्यासात्' इति गौतमसूत्रे (४३) तु पौनःपुन्यमभ्यासपदार्थः (४४) । स च विषयान्तरानभिष्वङ्गस्येति गौतमसूत्रवृत्तिः (४५) । एतदनुसारमभ्यासदशा नाम प्राथमिकज्ञानसमानाकारज्ञानान्तराधिकरणकालः । यथा द्वितीयादिजलज्ञानकालः (४६) । अभ्यासदशापत्तिश्च स्वविषयनान्तरीयस्यार्थक्रियादेः कारणगुणस्य वा विज्ञानान्निश्चितप्रामाण्यैः प्रवर्तकज्ञानैः सह सजातीयत्वानुसन्धानम् इति बोधनीकारः (४७) ।

एतेनेदमुदितं भवति । प्रथमं हि जलज्ञानं अनभ्यासदशापन्नमित्युच्यते । तत्समानाकारं द्वितीयादि जलज्ञानं अभ्यासदशापन्नम् । अनभ्यासदशापन्नं ज्ञानं च द्विविधम्, अप्रामाण्यशङ्काकलङ्कितम्, तच्छून्यं चेति । गहनवनमार्गमवगाह्य श्रान्तस्य मध्येऽह्नि पिपासापरवशतया क्लान्तस्य च जलाभिलाषिणः पान्थस्य यत् प्रथमं जलज्ञानं जायते तत्संवादाद्यभावात् अप्रामाण्यशङ्काकलङ्कितं भवतीति सार्वजनीनोऽनुभवः । तदनन्तरं संवादादिना निश्चिते ज्ञानप्रामाण्ये द्वितीयादिजलज्ञानपरंपरा जायते सा तु प्रथमज्ञानसमानाकारत्वादप्रामाण्यशङ्काशून्या भवति । तथैव करतलामलकज्ञान प्रथमं सदपि अप्रामाण्यशङ्काशून्यं भवति ।

४१) न्या भा. ३-२-४१ पृ ६०९

४२) न्या वा समुद्धृतम न्या को पृ ७३   ४३) न्या सू ४-२-३८

४४) न्या भा टीका खद्योत; पृ ९१४ तस्य समाधे; अभ्यास; तद्विषय प्रयत्नोदयौनः पुन्यम् ।

४५) गौ वृ सू ४-२-३६ समुद्धृतम न्या को पृ ७३

४६) न्या को पृ ७३   ४७) न्या कु टीका बोधनी पृ. २५१

मीमांसकमतम्– सति चैवं प्रामाण्यनिश्चयः कथं जायत इति विचार्यते । तत्र मीमांसकाः स्वतस्त्वपक्षं समर्थयन्ति । तत्र स्वतस्त्वपदस्य 'प्रामाण्यं प्रामाण्येनैव ज्ञायते' इति नार्थः अपि तु स्वाश्रयज्ञानग्राहकैः गृह्यत इत्येवार्थः । प्रामाण्यं हि ज्ञानधर्मः । तस्मात् ज्ञानग्राहकसामग्रीग्राह्यत्वमेव तस्य ज्ञप्तौ स्वतस्त्वम् । निरुक्तं चैतदेवमेव मण्यादिग्रन्थेषु (४८) ।

अत्रेदमवधेयम् । मीमांसकमते प्रामाण्यस्य ज्ञप्तौ स्वतस्त्वं ज्ञानग्राहक सामग्रीग्राह्यत्वादेव सिद्धं भवति । वर्तते तत्र गुरुभट्टमुरारिमिश्राणां मिथो विप्रतिपत्तिः । तथापि गुरुमते ज्ञानस्य प्रत्यक्षत्वमेव । प्रमात्वरूपं प्रामाण्यं च स्वत एव गृह्यते । प्रमात्वाश्रयीभूतं यज्ज्ञानं तत् यथा सामग्र्या, आत्ममनःसन्निकर्षेत्यादिरूपया गृह्यते, तद्वृत्तिप्रमात्वमपि तयैव सामग्र्या गृह्यते । तथा च स्वप्रकाशमेव ज्ञानम् । सर्वस्य ज्ञानस्य स्वविषयकत्वात् (४९) । तथा च 'अयं घटः' इति ज्ञानं यथा घटादिकं विषयीकरोति तथा स्वात्मानं स्वस्वरूपं स्वस्याधिकरणमात्मानं च विषयीकरोति । अत एव सर्वस्य व्यवसायस्यानुव्यवसायात्मकत्वेन ज्ञानस्य मितिमातृमेयविषयकत्वात् त्रिपुटीप्रत्यक्षता इति प्रवादः । तथा च व्यवसायात्मकज्ञानस्य स्वप्रकाशमहिम्ना स्वमिव स्वप्रामाण्यमपि सिध्यति [५०) । एवं रीत्या ज्ञानतत्प्रामाण्ययोर्व्यवसायमात्रवेद्यत्वात्स्वतस्त्वं सिद्धं भवति)

भट्टमते ज्ञानमनुमेयमेव । ज्ञातो घट इत्यादिप्रतीतिबलात् ज्ञानक्रियया घटादौ विषये ज्ञातताख्यं फलं जन्यते। तच्च हेतुभूय ज्ञानमनुमापयति । तथाचायमनुमानप्रयोगः ज्ञानवान्, ज्ञाततावत्वात् इति (५१) अत्र ज्ञानवानिति पदेन घटत्ववद्विशेष्यकघटत्वप्रकारकज्ञानविषयत्वं बोध्यते । हेतुभूताज्ञातता च घटत्वप्रकारका ग्राह्या (५२) । तथाचैतदनुमानम् ज्ञानविधेयकानुमितिं जन-

४८) त चि प्र ख पृ १२४-१७४

४९) न्यायसिद्धान्तमंजरीप्रकाशः लौगाक्षिभास्करविरचितः समुद्धृत न्या को पृ ५६३

५०) न्यायसिद्धान्तमंजरी जानकीनाथभट्टाचार्यचूडामणिविरचिता समुद्धृत तत्रैव पृ ५६३, ५१) न्या को पृ ५६४

५२) द्र नीलकण्ठी प्रा बा प ३५ न्या को. पृ ५६२

यत् घटत्ववति घटत्वप्रकारकत्वरूपं प्रामाण्यमपि विषयीकरोति । ननु ज्ञाततारूपलिङ्गं हि घटे घटत्वप्रकारकज्ञानविशेष्यतां साधयेत् न तु ज्ञाने घटविशेष्यकघटत्वप्रकारकत्वम् । तत्कथं ज्ञानप्रामाण्यमपि ज्ञाततालिङ्गानुमितिवेद्यमिति चेदुच्यते । घटो घटत्वप्रकारकज्ञानविशेष्यः घटत्वप्रकारकज्ञाततावत्त्वात् इत्यनेन घटे घटत्वप्रकारकज्ञानविशेष्यत्वानुमितिर्जायमाना घटविशेष्यकघटत्वप्रकारकत्वं ज्ञानेऽपि विषयीकरोति, तयोः समानवित्तिवेद्यत्वात् (५३] । तदेवं ज्ञाततालिङ्गकानुमानेन ज्ञानतत्प्रामाण्ययोर्ग्रहणं भवति ।

मुरारिमिश्रमते तु 'अयं घटः' इत्याद्याकारकज्ञानानन्तरं 'घटत्वेन घटमहं जानामि' इति ज्ञानविषयकं लौकिकमानसमुत्पद्यते । तदेव अनुव्यवसाय इत्यप्युच्यते । अस्य ज्ञानानु पदमुपजायमानस्य प्रथमानुव्यवसायस्य यथा ज्ञानग्राहकत्वं तथा ज्ञानप्रामाण्यग्राहकत्वमप्युपपद्यते । घटमहं जानामीत्यादिरूपोऽनुव्यवसायः घटं घटत्वं समवायं विषयीकुर्वन्, आत्मनि प्रकारीभूतघटं आत्मानं, तत्संबन्धीभूतव्यवसायं च विषयीकरोति । एवं च पुरोवृत्तिप्रकारसंबन्धस्यैव प्रमात्वपदार्थत्वेन स्वत एव प्रामाण्यं गृह्यत इति सिद्धं भवति ।

प्रकारान्तरेणोपपादनमपि न्यायसिद्धान्तमञ्जर्यामुपलभ्यते । तद्वद्विशेष्यकत्वे सति तत्प्रकारकत्वं प्रामाण्यम् । तच्च घटमहं जानामीति प्रथमानुव्यवसायेनैव गृह्यते । तथाहि-घटत्ववांस्तावत् घटोऽयमिति व्यवसायेनोपनीतः । अतस्तद्वद्विशेष्यकता संसर्गरूपा ज्ञानेन मनसा गृह्यते । विशेषणस्य पूर्वमुपस्थितत्वात् । एवं घटत्वमपि व्यवसायेनैवोपनीतम् । अतः तत्प्रकारता विषयतावत्सुग्रहा इत्युभयस्यैकग्रहेण गृहीतं प्रामाण्यमिति (५४) । तदेवं प्रथमानुव्यवसायेनैव ज्ञानतत्प्रामाण्ययोर्ग्रहणमिति सिद्धं भवति ।

वेदान्तिमतम्— वेदान्तसंप्रदायिनोऽपि स्वतस्त्ववादिन एव । तथापि तेषां ज्ञानग्रहणप्रक्रिया भिन्ना । चित्तवृत्त्यात्मकस्य ज्ञानस्य ग्रहणं न मनसा

५३) न्या. को पृ ५६४

५४) न्यायसिद्धान्तमंजरी पृ ३३-३४ समुद्धृता न्या को पृ ५६४

जायते किन्तु जीवस्वरूपभूतेन साक्षिणा । साक्षी च सर्वदा ज्ञानं तत्प्रामाण्यं च विषयीकरोति । स्वभावएवायं साक्षिणो यदसौ प्रामाण्यमपि गृह्णाति । यदा दोषवशात् प्रतिबन्धपराहतः न प्रामाण्यग्रहणे प्रभवति तदा मानसं दर्शनमुत्पद्यते । तच्च व्यभिचारि भवितुमर्हति (५५) । तथा च सति परीक्षा ... अपेक्ष्यते । परीक्षानन्तरं च प्रामाण्यनिश्चयो जायते । यत्र तु साक्षिप्रत्यक्षसिद्धं प्रामाण्यं न तत्र शङ्कावसरः । साक्षिसिद्धेत्वसंशयात् (५६) ... प्रामाण्यशङ्काननुभवाच्च । एवं च ज्ञानतत्प्रामाण्ययोः साक्षिणैव ... स्वतस्त्वं प्रामाण्यस्य । ननु साक्षिज्ञानस्य प्रामाण्यं साक्ष्यन्तरेण ... पुनरन्येनेत्यनवस्था इति तु न शङ्क्यम् । जीवस्वरूपभूतः साक्षी ... त्वेन स्वमिव स्वप्रामाण्यमपि गृह्णातीति वक्तुं शक्यत्वात् । ... नैयायिकमतम्—

... प्रामाण्यस्य ज्ञप्तौ परतस्त्वमभ्युपगच्छतां पक्षे प्रतिपक्षप्रतिक्षेपाय नायका ... । तेषां मते ज्ञानसामान्यग्राहकं आत्ममनःसन्निकर्षादिकं ज्ञान... स्यापि ज्ञानं जनयत्येव । ज्ञानत्वाविशेषात् । तथापि प्रामाण्यग्रहणे ... अनुमानादिकमपि कारणं भवति । तच्च न ज्ञानसामान्यग्रहणकारणम् । ज्ञानसामान्यग्राहकसामग्रीभिन्नसामग्रीग्राह्यत्वाच्च परतस्त्वं प्रामाण्यस्य सिद्धं भवति ।

अत्रेदमनुसन्धेयम् । प्रागुपदर्शितदिशा प्रामाण्यनिश्चयस्य प्रवृत्तिमात्रप्रत्यहेतुत्वात प्रवृत्तिविशेषं प्रति चान्यथा सिद्धत्वात् निःशङ्कप्रवृत्तिप्रयोजकत्वमात्रं सिद्धं भवति । तथा च प्रवृत्तिसामर्थ्यादर्थवत्प्रमाणमितिभाष्यवचनमनुसृत्य निर्णीयते यत् प्रवृत्तिसाफल्येन ज्ञानगतं प्रामाण्यमनुमीयते इति । प्रामाण्यसंशयपर्यवसायिनो विपरीतनिश्चयात् प्रामाण्यसंशयाच्च प्रवृत्तेर्दर्शनात् प्रवृत्तिहेतुत्वं तु प्रामाण्यस्य न संभवति । परं प्रवृत्तौ साफल्यं तु प्रामाण्यमन्तराऽनुपपद्यमानं याथार्थ्यरूपं प्रामाण्यं साधयति ।

---

५५) अनुव्याख्यान ' यत् क्वचिद्व्यभिचारि स्यान्मानसं दर्शनं हितम्'
५६) तत्रैव साक्षिसिद्धे तसंशयः

विषयोऽयं विस्तरेणोपपादितो वाचस्पतिमिश्रजयन्तभट्टप्रभृतिभिः (५७)। तेषामयमाशयः— अनभ्यासदशापन्नज्ञाने संवादादिवशात् प्रामाण्यमनुमीयते। अभ्यासदशापन्नज्ञाने तु निश्चितप्रामाण्यं यत्प्रथमज्ञानं तत्सजातीयत्वादेव प्रामाण्यमनुमीयते। तदेवं द्वितीयादिजलज्ञाने प्रामाण्यग्रहणाय न प्रवृत्तिसामर्थ्यपर्यन्तानुधावनम्। किं च वेदप्रामाण्यमपि परत एव सिद्धं भवति। द्विविधो हि भागो वेदवाङ्मयस्य। दृष्टार्थक आयुर्वेदादिरूपः, अदृष्टार्थकश्च यागादिनिरूपणपरः। तत्र दृष्टार्थभागस्य प्रवृत्तिसामर्थ्यान्निर्णीते प्रामाण्ये, तद्भिन्नस्य भागस्याप्तोक्तत्वादिरूपहेतुनैव प्रामाण्यमनुमीयते। तस्मात् वेदप्रामाण्यपरिरक्षणाय प्रामाण्यस्य स्वतस्त्वमवश्यमभ्युपेयमिति न नियमः (५८)।

अत्रेयमभिसन्धिः। तात्पर्याचार्याः मञ्जरीकाराश्च भाष्यवचनं मूलाधारत्वेनोपादाय अर्थक्रियाज्ञानस्यैव प्रवृत्तिसामर्थ्यरूपस्य प्रामाण्यग्राहकत्वात् प्रामाण्यं परतो ज्ञायते इति सिद्धान्तयामासुः। परं अर्थक्रियाज्ञानमपि यदि परतो जायमानप्रामाण्यं स्यात् तदा अनवस्थाप्रसंग इति मीमांसकादिकृताक्षेपपरिहाराय विभिन्नं पन्थानमवलम्बयामासुः। प्रवर्तकज्ञानस्यैव परीक्षा लोकसिद्धा न तु फलज्ञानस्य। फलज्ञाने प्रामाण्यसंशयाभावात् न प्रामाण्यपरीक्षावसरः। अथवा जाते फलज्ञाने विशेषदर्शनमात्रादेव प्रामाण्यनिश्चयः किंच कारणपरीक्षयैव वा फलज्ञानमभ्यासदशापन्नज्ञान एवान्तर्भावयन्ति। तनश्च प्रथमज्ञानसजातीयत्वलिङ्गकानुमानेनैव तत्प्रामाण्यग्रह इति तन्मतमव तिष्ठते। उभयथाऽपि प्रामाण्यं परत एव सिध्यतीति विभावनीयम् (५९)।

'सामर्थ्यं चैतस्य फलेनाभिसंबन्धः' इति भाष्योक्ते (६०) अर्थक्रियाज्ञानमेव प्रवृत्तिसामर्थ्यमित्युच्यते। प्रवृत्तिसामर्थ्यं च प्रामाण्यनिश्चायकम्। तस्य स्वरूपं किमिति विचारे पूर्वाचार्यमतमनूद्य खण्डितं मञ्जरीकारेण। तथाहि – पूर्वप्रत्ययापेक्षोत्तरा संवित् प्रवृत्तिसामर्थ्यं विशेषदर्शनं वेति

(५७) द्र न्या वा ता टी अ १२

(५८) द्र न्या पं प्र प्र पृ १५९ (५९) भा द नै प्रामाण्यवाद पृ ५२-५३

(६०) न्या भा

तत्स्वरूपमुक्तम् । तत्पुनर्नातीव हृदयङ्गमम् इति (६१)। निर्णीतं च माध्व-वचनानुसारेण अर्थक्रियारूपफलज्ञानमेव प्रवृत्तिसामर्थ्यमिति (६२)।

मीमांसकैः परतस्त्ववादिपूर्वपक्षिमतानुवादावसरे प्रामाण्यनिश्चायकत्वेन साधनत्रयमुल्लिख्यते, कारणगुणज्ञानं संवादज्ञानं, अर्थक्रियाज्ञानं चेति। परं परतस्त्वपक्षप्रतिष्ठापनदक्षो मञ्जरीकारः कारणगुणज्ञानेन संवादेन च सह बाधकाभावज्ञानं प्रामाण्यग्राहकत्वेन स्वीकरोति। अर्थक्रियाज्ञानं तु तन्मते संवाद एवान्तर्भवति (६३)।

संवादादिलिङ्गकानुमानस्येव द्वितीयानुव्यवसायस्यापि प्रामाण्यग्राहकत्वं स्वीक्रियते नैयायिकैः। एतच्च नव्यनैयायिकप्रक्रियामनुसरति। तथाहि प्रथममयं घटः इति ज्ञानम्। ततः ज्ञानज्ञानत्वे इति निर्विकल्पम्। ततः घटमहं जानामीत्यनुव्यवसायः। ततो व्यवसायस्य नष्टत्वात् पुनः घटोऽमिति व्यवसायः। ततश्च घटमहं जानामीति द्वितीयोऽनुव्यवसायः। तेन प्रामाण्यं गृह्यते इति (६४)।

अत्रेदमनुसन्धेयम्। सर्वत्रानुमानेनैव प्रामाण्यग्रहस्वीकारे प्रामाण्यस्य प्रमाणान्तरेणासिद्धत्वात्साध्याप्रसिद्धिरूपो दोषः प्रसज्यते। तद्वारणायोक्तरीत्या द्वितीयानुव्यवसायेन प्रामाण्यग्रहोऽवश्यं स्वीकार्यः। ततश्च द्वितीयानुव्यवसायेन सिद्धं प्रामाण्यज्ञानं दृष्टान्ततयोपादायानुमानप्रयोगः सुशकः। तथाहि इदं पुरुषज्ञानं प्रमा, करादिमति पुरुषज्ञानत्वात्, संप्रतिपन्नवत्, द्वितीयानुव्यवसायेन गृहीतप्रामाण्यकपुरुषज्ञानवत् इति यावत् (६५)। एवं च क्वचिद्द्वितीयानुव्यवसायेन क्वचित्तु अनुमानेन प्रामाण्यग्रहणात् प्रामाण्यस्य ज्ञप्तौ ज्ञानसामान्यग्राहकातिरिक्तग्राह्यत्वरूपं परतस्त्वं सिध्यति।

जैनबौद्धयोरनियमवाद —

प्रामाण्यस्य ज्ञप्तौ क्वचित्स्वतस्त्वं क्वचिच्च परतस्त्वं स्वीकुर्वाणाः अत एवानियमवादिनो जैना बौद्धाश्च स्वस्वसिद्धान्तानुसारं प्रामाण्यग्रहणप्रकारमुप-

६१) न्या मं प्र प्र पृ १५८

६२) [illegible]   ६३) तत्रैव पृ १४०

६४) न्या को पृ ५६५   ६५) तत्रैव पृ ५६५,५६६

वर्णयन्ति । तत्र बौद्धमते ज्ञाने विद्यमाना प्रामाण्यशक्तिः स्वतो न शक्यते बोद्धुम् । तथाचोक्तं शान्तरक्षितेन–

न वोद्धुं शक्यते स्वतः ।
यथावस्थितविज्ञेयवस्तुबोधाभिशक्तिताम् ।
कोनामानुभवात्मत्वान्निश्चितुं केवलात्प्रभुः ॥
अप्रमाणेऽपि येनैतत्केशपाशादिदर्शने ॥
विद्यतेऽनुभवात्मत्वं विस्पष्टाकारभासिनि ॥
तस्मादर्थक्रियाज्ञानमन्वद्वा समपेक्ष्यते ।
निश्चयायैव न त्वस्या आधानाय विषादिवत् ॥ (६६)इति ।

एतेनेदमुदितं भवति । अनुभवमात्रस्य प्रामाण्यग्राहकत्वं न युज्यते । तथात्वे अनेकेषु केशेषु एकत्वमवगाहमाना 'अयं केशपाशः' इति प्रतीतिरपि प्रामाणिकी स्यात् । किं च यथा विषभक्षणानन्तरं तदनुपदमेव मूर्छादिपरिणामानुभवात् अनिश्चितमपि विषभक्षणं कियताऽपि कालेन मूर्छादिपरिणामसमवलोकनेन निश्चीयते तथा जायमानं ज्ञानं प्रमाणमिति निश्चयोऽपि तदर्थक्रियाज्ञानेनैव जायते । 'प्रामाण्यं व्यवहारेण' इति प्रमाणवार्तिकवचने व्यवहारपदेन अर्थक्रियाज्ञानस्यैव परिग्रहो वृत्तिकारेण (मनोरथनन्दिना) विहितः (६७] । प्रज्ञाकरगुप्तस्तु प्रमाणता च प्राप्यपदार्थाव्यभिचारिता (६८) । न च प्राप्यपदार्थग्रहणे तत्सम्बन्धग्रहणम् । न च तथानवसीयमानं प्रमाणमित्यवसितं भवति ।' इत्यादिवचनैः प्राप्यरूपसंबन्धस्य प्राप्यपदार्थाव्यभिचारित्वरूपस्य प्रामाण्यग्राहकत्वमुपपादयामास ।

अत्रेदमवधेयम् । संवादः कारणशुद्धिश्चेति द्वयं प्रामाण्यग्राहकतया बौद्धानामभिमतम् । तत्र संवादो द्विविधः, सजातीयसंवादो विजातीयसंवादश्चेति । संवादस्य एतादृशो विभागः अन्यदर्शनानुसारिभिः शास्त्रकारैरपि समुल्लिख्यते । सजातीयसंवादपदे ज्ञानस्य ज्ञानान्तरेण सह संवादो विवक्षित

६६) त स कारिका २८३२-३५ ।
६७) प्र वा कृतिः परि १-७ समद्धृतम भा द में प्रामाण्यवाद पृ ६०
) प्र वा भाष्यम् पृ २५

यथा दूरतो वीणागुणरणनमुपश्रुत्य समीपं गतवतो वीणेयमिति चाक्षुषं ज्ञानं जायते । अत्र श्रोत्रज्ञानस्य चाक्षुषज्ञानेन संवादः । अनेन संवादेन श्रोत्रज्ञानस्य चाक्षुषज्ञानेन संवादः । अनेन संवादेन श्रोत्रज्ञानस्य प्रामाण्यं निश्चीयते । द्वितीयो विजातीयसंवादस्तु अर्थक्रियासंवाद इत्युच्यते । अनभ्यासदशापन्नं प्रथमं जलज्ञानं पिपासोपशमरूपार्थक्रियायां संपन्नायामेव प्रमाणं भवति । अत्र अर्थक्रियाज्ञानेन संवादं प्राप्नुवत् प्रथमजलज्ञानं प्रमाणं भवतीति बोद्धव्यम् । विजातीयत्वं च भिन्नविषयकत्वादेव । प्रथमज्ञाने जलादिर्विषयः, संवादज्ञाने च अर्थक्रिया इति भेद । अभ्यासदशापन्नं द्वितीयादिजलज्ञानमपि संवादपदेनैव संगृह्यते । तथाचोक्तं शान्तरक्षितेन= उच्यते, वस्तुसंवादः प्रामाण्यमभिधीयते ।

तस्य चार्थक्रियाभ्यासज्ञानादन्यत्र लक्षणम् ॥ इति । (६९)

संवादस्येव कारणशुद्धिज्ञानमपि प्रमाण्यग्राहकम् । यथा चक्षुरिन्द्रियस्य दोषरहितत्वज्ञानं चाक्षुषप्रत्यक्षस्य प्रामाण्यं निश्चिनोति । बौद्धमते कारणशुद्धेः प्रामाण्यग्राहकत्वं कुमारिलभट्टेन स्पष्टमुल्लिख्यते (७०) । पार्थसारथिमिश्रोऽपि बौद्धमते कारणशुद्धिज्ञानं संवादः अर्थक्रियाज्ञानं चेति त्रयं प्रामाण्यग्राहकतया निरूपयामास (७१) । मञ्जरीकाराभिमतं बाधकाभावज्ञानस्य प्रामाण्यग्राहकत्वं जैनग्रन्थेषु समुपलभ्यते । बौद्धानां तु तत्र संमतिर्नोपलक्ष्यते (७२) ।

अत्रेयमभिसन्धिः । प्रथमज्ञानप्रामाण्यं परत एव निश्चीयते । तत्र सन्निकृष्टविषयकज्ञानप्रामाण्यं अर्थक्रियासंवादेन ज्ञायते । विप्रकृष्टविषयकज्ञानप्रामाण्यं तु कारणशुद्धिद्वारैव निश्चीयते । तच्चानुमेयमेव । तथाचोक्तं तत्वसंग्रहे -

६९) त स कारिका २९५८

७०) श्लो वा १-१-२ ४४ समुद्धृत भा द मे प्रामाण्यवाद पृ ६०

७१) शा दी पृ ७७ समुद्धृतमपि तत्रैव

७२) भा द मे प्रामाण्यवाद पृ ६१

विप्रकृष्टे हि विषये तदुद्भूता मतिः प्रमा ।
तज्जन्यत्वाद्यथैवेयं यन्निकृष्टार्थगोचरा ॥ इति । (७३)

किं च फलीभूतार्थक्रियाज्ञानस्य अभ्यासदशापन्नज्ञानस्य च प्रामाण्यं तु बौद्धमते स्वत एव । तत्र भ्रान्तिकारणाभावेन प्रामाण्यशङ्कानवकाशात् एवं कारणशुद्धेर्विज्ञानं स्वतःप्रमाणात् संवादिज्ञानादेव जायते इति नानवस्थादिदोषः [(७५) ।

इदं तु तत्वम् । यद्यपि बौद्धमते प्रामाण्यं परतः इति दर्शनकारैरुल्लिख्यते, तथापि प्रागुपदर्शितदिशा क्वचित्स्वतोऽपि प्रामाण्यस्याभ्युपगमाद् नियमपक्ष तदिष्ट इति शान्तरक्षितकमलशीलप्रभृतीनां वचनानि स्पष्टं प्रतिपादयन्ति [(७६) । तथा च स्वसंवेदनं प्रत्यक्षं, योगिज्ञानं, अर्थक्रियाज्ञानं, अभ्यासदशापन्नं ज्ञानं, अनुमानं च स्वत एव प्रमाणं भवति । तत्र भ्रान्तिकारणानामविद्यमानत्वात् । तदितरज्ञानानां, अनभ्यासदशापन्नानां अर्थक्रियाज्ञानसापेक्षाणां वा वेदादिजनितानां वा भ्रान्तिकारणसंभावनाभिभूतानां प्रामाण्यं तु परत एव निश्चीयते (७७) इति ।

प्रामाण्यविषये जैनसिद्धान्तोऽपि बौद्धसिद्धान्तसमान एव । तथा चोक्तं हेमचन्द्रसूरिणा– 'प्रामाण्यनिश्चयः क्वचित् स्वतः · यथाभ्यासदशापन्ने स्वकरतलादिज्ञाने स्नानपानावगाहनोदन्योपशमादावर्थक्रियानिर्भासे वा प्रत्यक्षज्ञाने' [(७८) इति ।

एतेनेदमुदितं भवति । यत्र प्रेक्षावतां परीक्षाकांक्षा नास्ति तत्र प्रामाण्यं स्वतः । अन्यत्र तु परतः इति । पिपासाद्युपशमेन कृतकृत्यः पुरुषो

---

७३) त सं कारिका २९८९ समुद्धृतम भा द मे प्रामाण्यवाद पृ २६७
७४) भा द पे प्रामाण्यवाद पृ ६२-६३ द्र त सं कारिका २९६२-६५
७५) तत्रैव पृ ६७, द्र त स कारिका २९८७
७६) भा द मे प्रामाण्यवाद पृ ७५.७६ द्र त सं. कारिका २९४४
त सं पञ्जिका, कारिका कमलशीलरचिता ३१२२
७७) तत्रैव पृ ७६ द्र त सं पञ्जिका, कारिका २९४४
७८) प्र मी वृत्तिः अ आ सू ८

न हि पिपासायुपशमानुभवस्यापि प्रामाण्यं परीक्षमाणो दृष्टः। निश्चितप्रामाण्ये द्वितीयादिजलज्ञानेऽपि न परीक्षावसरः। किं चानुमानमपि अव्यभिचरितलिङ्गलिङ्गिसम्बन्धजन्यं भ्रान्तिशङ्कानवकाशात् स्वतः प्रमाणम् (७९)।

अनभ्यासदशापन्नं ज्ञानं तु अर्थानियतं स्वप्रामाण्यनिश्चयाय ज्ञानान्तरमपेक्षते। अत एव तत्प्रामाण्यं परतः। अत्र प्रामाण्यनिश्चायकं साधनत्रयं निर्दिष्टं हेमचन्द्रेण— १) तद्विषयकं संवादकज्ञानम्। एतच्च प्रागुपदर्शितदिशावसेयम्। २) अर्थक्रियाज्ञानम् ३) अविनाभाविपदार्थान्तरविज्ञानम्। यथा जलज्ञाने जाते तदविनाभाविनो विकसितकमलनिकुरम्बस्य जलविहरणपरायणपतद्गतकदम्बस्य वा दर्शनेन तत्प्रामाण्यं निर्धार्यते (८०)।

दृष्टार्थकादृष्टार्थकशाब्दज्ञानप्रामाण्यं तु ज्ञानान्तरसंवादाप्तोक्तत्वाभ्यां निश्चीयते। तस्मात्परत एवेति सिद्धं भवति। एतच्च प्रायो न्यायप्रक्रियामेवानुसरति (८१)।

न्यायावतारवार्तिकवृत्तिकारः शान्त्याचार्यस्तु बाधकाभावमेव प्रामाण्यनिश्चायकत्वेनोपवर्णयति। तन्मते कारणगुणज्ञानेन अबाधितत्वज्ञानं ततः प्रामाण्यनिश्चयः। अदृष्टार्थकशाब्दज्ञानेऽपि आप्तत्वनिश्चायकगुणज्ञानेन बाधरहितत्वज्ञानं ततः प्रामाण्यविनिश्चयः इति क्रमः। क्वचित्तु बाधाभावज्ञानेन कारणगुणनिश्चयः ततः प्रामाण्यग्रहणमिति क्रमः। सति चैवं बाधाभावकारणगुणज्ञानयोरन्योऽन्याश्रयदोषस्तु न शङ्क्यः। संसारस्यानादित्वात्। वस्तुतस्तु बाधज्ञानेन भ्रमसंशययोर्निराकरणं भवति। ततश्च प्रामाण्यं सिध्यति। तस्मायुक्तं बाधाभावस्य प्रामाण्यनिश्चायकत्वम्।

एवं च प्रामाण्यस्य ज्ञप्तावनियमवाद एव जैनानामभीष्ट इति सिद्धं भवति।

इदमत्रानुसन्धेयम्। अनेकान्तवादिनां जैनानां मते सर्वमपि ज्ञानं प्रमाणमप्रमाणं च भवितुमर्हति। तत्कथमयं विनिश्चयः 'प्रमाणमेव' 'अप्र-

---

७९) तत्रैव

माणमेव' इत्यादिरूप इति चेदत्रैव समाहितम-लङ्केन 'तत्प्रकर्षापेक्षया व्यपदेशव्यवस्था गन्धादिद्रव्यवत्' (८२) इति । अस्यायमाशयः- यथा स्पर्शाद्यपेक्षया गन्धगुणस्योत्कर्षात्कस्तूरिका गन्धद्रव्यमित्युच्यते तथा यथार्थज्ञाने विसंवादापेक्षया संवादस्याधिक्यात् प्रमाणमिति व्यवहारः । अयथार्थज्ञाने च संवादापेक्षया विसंवादस्याधिक्यात् प्रमाणमिति व्यवहारः । अयथार्थज्ञाने च संवादापेक्षया विसंवादस्याधिक्यात् अप्रमाणमिति व्यवहारः (८३] ।

वस्तुतस्तु सर्वस्यापि ज्ञानस्य अंशतः प्रामाण्यमप्रामाण्यं च जैनमते सिद्धं भवति । अत्रायं विचारः— भ्रमस्थले इदन्त्वांशे प्रमात्वस्य रजतत्वांशे चाप्रमात्वस्योपलम्भात प्रामाण्याप्रामाण्यसांकर्यं सूपपादम् । तथापि अयं घटः इत्यादि प्रत्यक्षप्रमायां तद्दुरूपपादम् । परं जैनसिद्धान्तानुसारं स्याद्वादस्याभ्युपगमात्तदुपष्टम्भेन यथाकथंचित्प्रमायामपि प्रामाण्याप्रामाण्ययोः साङ्कर्यमुपपादनीयम् । तथाचोक्तमकलङ्केन= 'तेन प्रत्यक्षतदाभासयोरपि प्रायशः संकीर्णप्रामाण्येतरस्थितिरुन्नेतव्या' [८४] इति ।

स्वतस्त्वपरतस्त्वनिर्वचनम्=

स्वतस्त्वपरतस्त्वयोः सैद्धान्तिकं निर्वचनं विविधदार्शनिकप्रबन्धेषु कथं प्रावर्तत इति प्रागुपपादितमेव । अधुना शास्त्रीयपारिभाषिकप्रक्रियानुसारं तन्निर्वचनं विचार्यते । तत्र स्वतस्त्ववादिनां मीमांसकादीनां सत्यप्यान्तरिकमतिभेदे स्वपदेन प्रामाण्याश्रयज्ञानग्राहकाणां ग्रहणमित्यत्र न विवादः । एवं च स्वतः इत्यस्य स्वकीयेभ्य इत्यर्थः । ततश्च स्वाश्रयज्ञानग्राहकसामग्रीग्राह्यत्वं स्वतस्त्वमिति फलितं भवति । यथा कारणसामग्र्या ज्ञानं गृह्यते इति स्पष्टार्थः [८५] । अत्र निष्कर्षस्तु तत्तद्धर्मप्रकारकज्ञानग्राहकसामग्रीजन्यग्रहत्वव्यापकविषयिताप्रतियोगित्वमिति [८६] ।

इदमत्रानुसन्धेयम् । स्वतस्त्ववादिषु मुख्यतया प्रत्याख्येया मीमां-

८२) अष्टशती कारिका १०१ न्यायावतारसूत्रवार्तिकवृत्तौ टिप्पण्यां समुद्धृता पृ १७२ भा द मे प्रामाण्यवाद इत्यत्र निर्दिष्टा पृ ८६

८३) भा द मे प्रामाण्यवाद पृ ८६ ८४) तत्रैव

८५) न्या को पृ ५५२ ८६) तत्रैव

त्मका एव तेषु भट्टमते ज्ञाततालिङ्गकानुमितिः ज्ञानग्राहिका, सैव तत्प्रामाण्यग्राहिकाऽपि । प्रभाकरमते व्यवसायमात्रस्य मितिमेयमातृविषयकत्वेन व्यवसायः स्वमिव स्वगतप्रामाण्यमपि विषयीकरोति । मुरारिमिश्रमते तु घटत्वेन घटमहं जानामीत्यादिरूपोऽनुव्यवसाय एव घटनामिव तद्गतं घटत्ववति घटत्वप्रकारकत्वरूपं प्रामाण्यमपि विषयीकरोति । एवं रीत्या मीमांसकत्रयमते ज्ञानग्राहकमेव तत्प्रामाण्यग्राहकमिति प्रामाण्यस्वतस्त्वं [८७] प्रागुक्तरीत्या निरुक्तं भवति ।

एतेन परतस्त्वमपि निरुक्तं भवति । यद्धि स्वतस्त्वमित्युच्यते तन्निषेध एव परतस्त्वम् । तथाच ज्ञानग्राहकसामग्रीभिन्नग्राह्यत्वमेव परतस्त्वमिति पर्यवसन्नं भवति ।

तत्त्वचिन्तामणिग्रन्थे प्रामाण्यवादः=

प्रामाण्यस्य स्वतस्त्वपरतस्त्वनिर्णयार्थं प्रवृत्तो वादः प्रामाण्यवाद इति निरूपितपूर्वम् । स च सकलदर्शनसाधारणोऽपि प्रमाणशास्त्रतया प्रथिते न्यायदर्शने प्राधान्यं भजते । तच्च प्राधान्यं स्पष्टमुपपादितं गंगेशोपाध्यायेन । तदीयप्रामाण्यवादस्य पर्यालोचनं तस्य भारतीयविद्वत्परंपरायां विद्यमानमनितरसाधारणं स्थानमवबोधयति । स्वतः पूर्वकालीनानां नैयायिकानां मीमांसकादीनां च मतं विविधविषयेषु तथा नाम परिष्कृत्य स प्रस्तौति यथा मूलग्रन्थापेक्षयापि विषयः सुविशदं निरूपितो भवति । तदेतदवितथमवभासते प्रामाण्यवादेऽपि ।

मण्युक्तविप्रतिपत्तिविचारः–

इदमित्थमेवेत्यवधारणस्य निष्कम्पप्रवृत्तिजनकस्य प्रामाण्यनिश्चयाधीनत्वात् प्रवृत्तिप्रयोजकतयाऽवश्यमभ्युपेयस्य प्रामाण्यनिश्चयस्य किं स्वतस्त्वमुत परतस्त्वमिति प्रामाण्यज्ञप्तिविचारः प्रथममुपात्तो मणिकारेण । तत्रापि वादविद्यावलम्बेन प्रमाणतत्वनिर्णयार्थं प्रवृत्तो वादाङ्गसंशयबीजभूतां विप्रतिपत्तिं प्रथमतो दर्शयामास । प्रामाण्यस्वतस्त्वपरतस्त्वरूपकोटिद्वयोपस्थापनद्वारा विवदमानवादिविप्रतिपत्तिः संशयबीजम् । एतादृशः संशय एव वादाङ्गम् ।

८७) द्र स दर्शन संग्रहः जैमिनीयदर्शनम् पृ २८३ न्या को पृ १०४८

न तु समानधर्मदर्शनादिजन्यः। अत एव पूर्वपक्षग्रन्थात्पूर्वं विप्रतिपत्तिप्रदर्शनव्याजेन स्वतस्त्वस्वरूपं पञ्चधा निरूप्य वादाङ्गसंशयः प्रामाण्यं स्वतः परतो वा इत्यादिरूपः निर्णयार्थमुपन्यस्तो मणिकृता। तत्र परस्परमुद्भावितान्येकदोषवशात् पक्षद्वयमपि न समीचीनमिति विभावयतस्तटस्थस्य मते प्रमात्वावधारणमेव न संभवतीति प्रथममाक्षिप्य 'वक्ष्यमाणदूषणगणग्रासात्' (८८) इति परीक्षणीयानवस्थादिदोषनिर्देशोऽपि कृतः।

इदं त्ववधेयम्। यद्यपि सर्वत्र पूर्वपक्षसिद्धान्तादिनिरूपणात्पूर्वं विप्रतिपत्तेः प्रतिपादनं शास्त्रग्रन्थेषु नोपलभ्यते तथा प्रकृते तदप्रामाण्याग्राहकेत्यादिपदघटितस्य स्वतस्त्वस्य दुरूहत्वात् विप्रतिपत्तिप्रतिपादनं सङ्गच्छते। वेदपौरुषेयत्ववादादौ तु पूर्वपक्षसिद्धान्तानुमानयोः साध्यद्वयनिर्देशेन कोटिद्वयस्य स्पष्टतया विप्रतिपत्तिः सुलभावबोधा। अत एव न तत्र तन्निरूपणावसरः।

गङ्गेशोपाध्यायनिरूपिताः पंचविप्रतिपत्तयः पुनरिमा —

१) ज्ञानप्रामाण्यं तदप्रामाण्याग्राहक— यावज्ज्ञानग्राहकसामग्रीग्राह्यं न वा। २) तज्ज्ञानविषयकज्ञानाजन्यज्ञानग्राह्यं न वा। ३) स्वाश्रयग्राहकेन गृह्यत एव न वा। ४) स्वाश्रयेण गृह्यत एव न वेति प्रत्येकमेव वा ५) यद्वा घटोऽयमिति ज्ञानप्रामाण्यम् एतज्ज्ञानग्राह्यं न वा, एतज्ज्ञानग्राहकमात्रग्राह्यं न वेति (८९)। प्रत्येकमेव वेति वचनादेव प्रथमविप्रतिपत्तित्रयं पूर्वपक्षीभूतमीमांसकमतत्रयसाधारणं निर्वचनं प्रस्तौतीत्यवसीयते। अयमेव च रुचिदत्तमिश्रादिभिरनुमोदितः (९०) पन्थाः। रहस्यकारास्तु द्वितीयविप्रतिपत्त्युपपादनावसरे= 'प्रथमं मतत्रयसाधारणी विप्रतिपत्तिरभिहिता। इयं च गुरुमिश्रमतसाधारणी, अग्रिमाश्च प्रत्येकमतसाधारण्यः' इति प्रतिपादयन्तः अन्यादृशीमेव व्यवस्थां परिकल्पयन्ति। तदनुसारं प्रथमा मतत्रयसाधारणी विप्रतिपत्तिः। द्वितीया गुरुमिश्रमतसाधारणी। तृतीया मिश्रमतमेव केवलं कक्षीकरोति। चतुर्थी गुरुमतमनुसरति। पञ्चमी च भट्टमतम्।

---

८८) त चि प्र ख पृ ११५   ८९) त चि प्र ख पृ १२४-१२४

९०) त चि टी [illegible]

तृतीयविप्रतिपत्तौ स्वाश्रयग्राहकेत्यत्र गुरुमते स्वाश्रयीभूतज्ञानेनैव प्रामाण्यग्रहात् ग्राहकपदवैयर्थ्यमतः केवलं भट्टमुरारिमतसाधारणीयं विप्रतिपत्तिरिति अनुपदमेव व्याख्यातम् (९१)। साध्यविशेषणानामुद्देश्यसिद्धप्रबोजनकतया त्रितयसाधारण्यसिद्धेरिहाप्युद्देश्यत्वात्तदर्थमुपादेयस्य ग्राहकपदस्याऽवैयर्थ्यमुपपाद्य तृतीयविप्रतिपत्तेरपि मतत्रयसाधारण्यं निरूपयन्ति रुचिदत्तमिश्राः (९२)।

गुरुमते प्रामाण्याश्रयज्ञानेनैव प्रामाण्यग्रहात् स्वाश्रयेण गृह्यत एव न वेति चतुर्थी विप्रतिपत्तिस्तन्मतमात्रानुसारिणी। पञ्चमी विप्रतिपत्तिस्तु ज्ञानव्यक्तिगतं प्रामाण्यं पक्षीकृत्य प्रवर्तते। तत्र एतज्ज्ञानग्राह्यं न वेति, एतज्ज्ञानग्राहकग्राह्यं न वेति च विकल्पद्वयेन गुरुमते, भट्टमिश्रयोश्च मते तदन्वयः प्रतिपाद्यते। एतज्ज्ञानग्राह्यं न वेति विकल्पः गुरुमते, द्वितीयश्च विकल्पः भट्टमिश्रयोर्मते। भट्टमते ज्ञाततालिङ्गकानुमितेः मिश्रमते चानुव्यवसायस्य प्रामाण्याश्रयज्ञानभिन्नस्य ज्ञानग्राहकत्वात्, तन्मात्रग्राह्यत्वरूपस्वतस्त्वस्य प्रामाण्ये साधनं संगच्छते।

इदमत्रावधेयम्। एकदा द्वाभ्यां त्रिभिर्वा न विवाद इति (९३) नियमात् मतत्रयसाधारणीनां विप्रतिपत्तीनां निरूपणमादौ विधाय तदनन्तरं प्रत्येकं विप्रतिपत्तिस्वरूपं निरूपितं गङ्गेशेन। मतत्रयसाधारणविप्रतिपत्तीनां प्रदर्शने तु शिष्यबुद्धिव्युत्पादनमेव प्रयोजनमिति प्रतिभाति। तदनुसारं गंगेशोक्तनिरुक्तीनां सयुक्तिकं परीक्षणमेव पाण्डित्यस्य परमं प्रयोजनं मन्वानाः नैके न्यायशास्त्रविशारदाः स्वस्वमतिविभवानुसारं परिष्कार प्रकारमुपवर्ण्य गंगेशोपाध्याय गङ्गेशोपाध्यायवचनानि शास्त्रदृशा निपुणं परिशीलयामासुः। तेषु नैयायिकेषु रघुनाथशिरोमणिमथुरानाथजयदेवरुचिदत्तमिश्रप्रभृतयः सविशेषमुल्लेखनीयाः। अत एव दुरूहपरिष्कारप्रकारानवबोधयन्तो नव्यन्यायप्रबन्धाः केवलं शब्दाडम्बरपरिमण्डिताः सिद्धान्तनिरूपणदृशा न विषयान्

९१) प्रकाश टीका न्या शि म पु १६६

९२) त चि टीका, प्रकाशः पु १६८

९३) त चि टीका प्रकाशः पु १६९

परामृशन्तीति आधुनिकसमालोचकानां वाचोयुक्तिः । परिष्कारकारणावगमे तस्या निःसारता स्पष्टमवधार्यते । न हि परीक्षामन्तरा परिष्कारप्रयोजनमवगम्यते । परीक्षा च व्याप्त्यादिदोषप्रसंगनिरसनद्वारैव भवितुमर्हति । अत एव नैयायिकविद्वद्भिर्विधीयमानो गहनो विचारः सप्रयोजनो भवति ।

प्रकृते पंच विप्रतिपत्तीरुपन्यस्य प्रथमं पूर्वपक्षप्रतिपादनाय प्रवृत्तो गंगेशोपाध्यायः कुतो वा विप्रतिपञ्चकमुपन्यास्यत् इति विचारणीयम् । अत्रायं निर्णयः– प्रथमविप्रतिपत्तिघटकीभूतस्वतस्त्वनिरुक्तौ स्वाश्रयग्राहकसामग्र्यास्तज्ज्ञानप्रकारीभूतप्रकारकत्वादिना विशेषणे तदप्रामाण्याग्राहकपदवैयर्थ्यम्, अविशेषणे च इदं ज्ञानमप्रमेति ज्ञानज्ञानस्य प्रामाण्याग्राहकत्वाद्बाधः । द्वितीयविप्रतिपत्तौ च गौरवमिति लघुभूता मतत्रयसाधारणी तृतीया विप्रतिपत्तिरुपन्यस्ता गंगेशोपाध्यायेन । न ह्येकदा त्रिभिर्द्वाभ्यां वा विवाद इत्याशयेन प्रत्येकमतसाधारणी चतुर्थी विप्रतिपत्तिः प्रतिपादिता । तत्रापि तत्पदसन्निवेशेनाननुगमं मनसि निधाय अयं घट इत्यादि ज्ञानव्यक्तीनां पक्षान्तर्भावेण पञ्चमी विप्रतिपत्तिरुपपादिता ।

गंगेशनिरूपितास्विमासु विप्रतिपत्तिषु विशेषतः प्रथमविप्रतिपत्तिद्वयविषये बहुविचारितं न्यायपक्षीयैः तत्प्रतिपक्षिभिः च । व्यर्थविशेषणत्वादिदूषणगणप्रासादसमीचीनं गंगेशीयं स्वतस्त्वनिर्वचनमिति प्रतिपक्षिणामाक्षेपं प्रतिक्षेप्तुं परिष्कारप्रक्रियावलम्बेन बहु प्रयतितं मणिटीकोपटीकाकारैः । वस्तुतस्तु विचार्यमाणे मतत्रयसाधारण्यसंपादनाय स्वतस्त्वरूपसाध्ये निरूच्यमाने सर्वेषामपि मतेनावश्यनिवेशनीयानां विशेषणानां संकलनं दुष्करं भवति। अतो विशेषणवैयर्थ्यादिविचारः मतसाधारण्ये संपादनीये श्लथीकरणीयः । एतदेव मनसि निधाय कथितं मथुरानाथेन– 'गुरुमिश्रयोर्मते व्यर्थत्वेऽपि भट्टमतसाधारण्याय तस्यावश्यकत्वात् । न हि सर्वमते सर्वविशेषणसार्थक्यमिति (९४)

पंचसु विप्रतिपत्तिषु प्रत्येकं विशेषतो विचारणीयाः विषयाः पुनरत्र संगृह्यन्ते ।

---

९४) त चि टीका रहस्यम् प्रा वा पृ १५२

प्रथमविप्रतिपत्तिविचारः—

ज्ञानप्रामाण्यं तदप्रामाण्याग्राहकयावज्ज्ञानग्राहकसामग्रीग्राह्यं न वेति प्रथमा विप्रतिपत्तिः। अत्र उत्तरत्र च विप्रतिपत्तिषु विधिकोटिर्मीमांसकानाम्। निषेधकोटिश्च नैयायिकानाम् (९५)।

दलप्रयोजनं चेत्थम्। तदप्रामाण्याग्राहकेति यावज्ज्ञानग्राहकेति च सामग्र्या विशेषणे। तत्र प्रथमविशेषणानुपादाने बाधोत्तरकालीने ज्ञानग्राहकसामग्रीघटके 'इदं ज्ञानमप्रमा' इति ज्ञाने व्यवसायनिष्ठप्रामाण्याविषयीकरणात् बाधाख्यो दोषः। तदुपादाने तु अप्रामाण्यग्राहकस्य तस्य व्युदासो भवति। तथाच तादृशज्ञानसामग्र्याः साध्यकोटयनिविष्टत्वात् तथा प्रामाण्यस्याग्रहणेऽपि न बाधः। तदप्रामाण्याग्राहकेत्यत्र तत्पदानुपादाने अनुव्यवसायगतप्रामाण्यग्राहकस्य इदं ज्ञानमप्रमेति ज्ञानस्य अप्रामाण्याग्राहकत्वाभावात्स्वतस्त्वहानिः। तथाहि प्रथमं शुक्ताविदं रजतमिति भ्रमात्मक ज्ञानम्, ततः नेदं रजतमिति बाधज्ञानम्, तदुत्तरं इदं ज्ञानमप्रमेति प्रथमज्ञानगताप्रामाण्यग्राहकं ज्ञानम्, तदनन्तरं इदं ज्ञानमप्रमेतिज्ञानवानहमित्यनुव्यवसायः। अस्यां प्रक्रियायां इदं ज्ञानमप्रमेति ज्ञानं यथा भ्रमात्मकव्यवसायगताप्रामाण्यग्राहकं तथा स्वविषयकानुव्यवसायगतप्रामाण्यग्राहकमपि ततश्च अनुव्यवसायगतप्रामाण्यं व्यवसायगताप्रामाण्यग्राहकग्राह्यं भवति न त्वप्रामाण्याग्राहकग्राह्यमिति प्रकृतलक्षणासमन्वयादव्याप्तिः। तत्पदोपादाने तु तत्पदेन प्रकृतानुमित्युद्देश्यभूतप्रामाण्याश्रयज्ञानस्य ग्रहणात् नाव्याप्तिः। अनुव्यवसायप्रामाण्यग्राहकस्य इदं ज्ञानमप्रमेति ज्ञानस्य अनुव्यवसायगताप्रामाण्याग्राहकत्वोपपत्तेः। यादृशप्रामाण्यस्य स्वतस्त्वं साध्यते तादृशप्रामाण्याश्रयज्ञानस्यैव तदग्राह्यत्वात्।

यावत्पदविषये वर्तते मतिभेदो विदुषाम्। तथाहि प्राचीननैयायिकाः सामग्र्याविशेषणं इदिति स्वीकुर्वन्ति। तदनुसारं नैयायिकमते प्रामाण्यस्य क्वचिदनुमानेन क्वचिदनुव्यवसायेन कदाचित्पुनरिदं ज्ञानं प्रमेत्याप्तवाक्येन च ग्रहणसंभवात् प्रकृतानुमानेन साधनीये ज्ञानग्राहकसामग्रीग्राह्यत्वं पूर्वमेव

सिद्धमिति सिद्धसाधनाख्यो दोषः (९६)। यावत्पदोपादाने तु ज्ञानग्राहिका यावती सामग्री तद्ग्राह्यत्वं प्रामाण्यस्य स्वतस्त्वमिति फलितं भवति । ग्राह्यत्वं च ग्रहविषयत्वम् । इति ।

पक्षोयमनूद्य खण्डितो मथुरानाथेन । तथाहि— 'तादृशसामग्रीत्व-व्यापकस्वग्राहकताकत्वस्य विवक्षितत्वादिति प्राञ्चः । तदसत् । स्वत्वस्यानुगतस्याभावात् । स्वपदस्य दृष्टान्तपरत्वे बाधात् । पक्षीभूतप्रामाण्यपरत्वे साध्याप्रसिद्धेः । तादृशग्राहकत्वव्यापकत्वस्यैव सम्यक्त्वेन साकल्यवैयर्थ्यापत्तेश्च इति (९७)।

दीधितिकारादयस्तु यावदिति ग्रहस्य विशेषणं स्वीकुर्वन्ति । तथा च ज्ञानग्राहकसामग्रीजन्य-यावद्ग्रहविषयत्वमिति फलितं भवति । एतन्मते ज्ञानग्राहकसामग्रीजन्यो यावान् ग्रहः स ज्ञानवज्ज्ञानगतप्रामाण्यमपि विषयीकरोति । अस्मिन् पक्षे साकल्यं चरमग्रहे विवक्षितं न तु सामग्र्याम् । तेन तदप्रामाण्याग्राहकसामग्रीजन्य यावद्ग्रहविषयो न वेत्यर्थः फलितो भवति (९८]।

अपरोऽपि पक्षः केचित्तुकारमतत्वेनोल्लिख्यते रहस्यकारेण । तदनुसारं यावत्वं तज्ज्ञानग्राहकंत्यत्र ग्रहधात्वर्थस्य तज्ज्ञानविषयकग्रहस्य विशेषणं भवति । तथा च यावानेव तज्ज्ञानग्रहस्तत्प्रत्येकजनकसामग्रीजन्यग्रहविषयो न वेत्यर्थः फलितो भवति (९९)।

रुचिदत्तमिश्रादयः प्राचीननैयायिकपक्षमेवात्र समर्थयन्ति । [१००)

न्यायकोशकारास्तु दीधितिकृन्मतमेव सिद्धान्ताभिमतमिति वस्तुतस्त्वित्यादिना सूचयन्ति (१)।

सामग्रीपदसन्निवेशस्यापि वर्तते प्रयोजनम् । तथाहि- आत्मनः

९६) न्या को पृ ५६०

९७) त चि टीका रहस्यम् प्रा बा पृ ३१

९८) तत्रैव पृ १३२ ९९) तत्रैव पृ १३२..१३३

१००) त चि टीका प्रकाशः पृ १३६ न्या शि क च पृ

१) न्या को पृ १००६

संयोगादेः सर्वस्य प्रामाण्याग्राहकत्वाद्बाधः । तद्वारणाय सामग्रीति (१०२]
सामग्री नाम कार्यायोगव्यवच्छिन्नः कारणसमुदायः [१०३] । तेन यावत्
आत्ममनःसंयोगादेः प्रामाण्याग्राहकत्वेऽपि इन्द्रियसन्निकर्षादिघटितसामग्री-
सन्निविष्टस्य तस्य सामग्र्यन्तर्भावेण प्रामाण्यग्राहकत्वान्न बाधः' इति ।

पक्षसाध्यादिपरिष्कारप्रकारस्तु रहस्यादौ सविस्तरमुपपादितः प्रकृत-
विषयाननुबन्धित्वान्न प्रतन्यते । सङ्क्षेपतः पुनरेतावदिह निरूप्यते यत् इह
प्रामाण्यवादे पूर्वपक्षानुमाने स्वतस्त्वं साध्यम् । सिद्धान्तानुमाने च परत-
स्त्वम् । ज्ञानप्रामाण्यं पक्षः' इति ।

द्वितीयविप्रतिपत्तिविचारे पुनरियान् विषयः सविशेषमवधानार्हः ।

ज्ञानप्रामाण्यं तज्ज्ञानविषयकज्ञानाजन्यज्ञानग्राह्यं न वा इति गङ्गे-
शोक्ता (१०४) द्वितीया विप्रतिपत्तिः । यथाश्रुतनिर्वचने तज्ज्ञानपदेन षष्ठी-
भूतप्रामाण्याश्रयज्ञानस्य ग्रहणम् । तद्विषयकं यज्ज्ञानमिति चेत् गुरुमते तदेव
ज्ञानस्य, स्वविषयकत्वात्, भट्टमते तदनुमितिः ज्ञातताल्लिङ्गकानुमानेनैव
ज्ञानग्रहणात् मिश्रमते च तदनुव्यवसायः ज्ञानमात्रस्यानुव्यवसायरूपत्वात् ।
तदजन्यं यज्ज्ञानमित्युक्तौ तेषामेव ज्ञानानुमित्यनुव्यवसायानां ग्रहणं भवति ।
तद्ग्राह्यत्वं प्रामाण्यस्य स्वतस्त्वम् । नेति निषेधमुखेन परतस्त्वं वोध्यते ।

दलप्रयोजनम्=

ज्ञानाजन्यज्ञानग्राह्यमित्येवोक्तौ भट्टमतेनानुमितेः, मिश्रमते चानुव्यव-
सायस्य ज्ञानजन्यत्वाद्बाधः । किं च गुरुमतेऽपि अनुमित्यादिप्रामाण्यांशे
बाधः । तद्वारणायोक्तं ज्ञानविषयकेति [१०५) । तेनानुमित्यादेः व्याप्ति-
ज्ञानादिजन्यत्वेऽपि प्रामाण्याश्रयीभूतज्ञानविषयकज्ञानाजन्यत्वस्याक्षतत्वान्न
कापि क्षतिः । विवक्षितप्रामाण्याश्रयज्ञानग्रहणार्थं च तत्पदम् । तेन मिश्र-
मतेन अनुव्यवसायप्रामाण्यांशे, गुरुमतेनानुमितिप्रामाण्यांशे (गुरुमते लिङ्ग-
ज्ञानस्यास्वप्रकाशत्वेन ज्ञानविषयत्वनिनमात अनुमितिप्रामाण्यांशे प्रसक्तो

---

२) द्र प्रकाश पृ १३६ रहस्यच पृ १३२, १३३

३) न्या को पृ १००६ ४) त चि प्र ख प्रा वा पृ ५०

५) प्रकाशः प्र ब पृ १५० प्रा वा रहस्यम पृ १४३

बाधः।) भट्टमतेन च सर्वत्र ज्ञानलिङ्ककानुमितेर्ज्ञानविषयकव्याप्तिज्ञान-जन्यत्वेन न बाधः (६]।

अस्मिन्निर्वचने त्रिधा ज्ञानपदस्य निवेशो विहितः। तत्र दीधितिमिश्रमते प्रथमज्ञानपदं स्वरूपकथनपरं, वेदान्तिमतस्य प्रामाण्यपरतःप्रत्यक्षशंकतया सिद्धसाधनादिवारणाय। द्वितीयज्ञानपदं चाप्रसिद्धिवारणाय। व्यापारानुबन्धितया तज्ज्ञानविषयकैरात्मादिभिस्तज्जननात्। ज्ञानपदसान्निध्यौ प्रतीत्यनुबन्धिताल भ्यते (७)। अस्यायमाशयः— विषयत्वं द्विविधम् व्यापारानुबन्धेन प्रतीत्यनुबन्धेन च। तत्र चक्षुरादिविषयत्वं रूपादेर्ज्ञानव्यापारद्वारेण। प्रतीत्यनुबन्धश्च व्यापारव्यवधानं विनैव संबन्धित्वम्। तच्च रूपादेर्ज्ञानं प्रत्येव। तथा च ज्ञानसम्बन्धेनात्मनोऽपि ज्ञानविषयकत्वेन स्वप्रकाशानुव्यवसायादिज्ञानानां तज्जन्यज्ञानत्वेनाप्रसिद्धिरिति तद्वारणाय ज्ञानपदम् [८]। तृतीयज्ञानपदमपि ग्राह्यत्वस्य विषयत्वपर्यवसन्नतया व्यापारानुबन्धिताकैस्तैरेव सिद्धसाधनवारणाय [९)।

रहस्यकारमते तु द्वितीयं ज्ञानपदं स्वरूपकथनपरम् (१०)। तन्मते तज्ज्ञानविषयकत्वं न पक्षीकृत घटत्ववनिघटत्ववतिघटत्वप्रकारकत्वाद्याश्रयज्ञानविषयकत्वम्। तथा सति घटविशेष्यकघटत्ववद्विशेष्यकत्वावच्छिन्नघटत्वप्रकारकत्वरूपप्रामात्वात्मकसामान्यलक्षणप्रत्यासत्तिजन्यं, तादृशोपनयसन्निकर्षजन्यं वा ज्ञानविशेष्यकघटत्ववतिघटत्वप्रकारकत्वप्रकारकप्रत्यक्षमादाय विधौ सिद्धसाधनस्य निषेधे बाधस्य प्रसंगात्। किन्तु तत्र ज्ञानविषयो ज्ञानानुबन्धिविषयताश्रयो यस्य ज्ञानस्येति बहुव्रीहिः। तत्पदं पक्षीभूतघटत्ववतिघटत्वप्रकारकत्वादिपरम्। तथा च घटत्ववति घटत्वप्रकारकत्वं प्रतिपत्त्यनुबन्धिघटत्ववतिघटत्वप्रकारकत्वविषयिताश्रयज्ञानाजन्यज्ञानविषयो न वेत्यादि प्रातिस्विकरूपेण विप्रतिपत्तिशरीरम् (११)।

६) प्रकाशः प्रा ब पृ १५१

७] प्रकाशः प्रा का पृ १५१ रहस्य च प्रा का पृ १५७

८] न्या शि मं पृ १५१

९] प्रकाश प्रा वा पृ १५१

१०] रहस्य प्रा बा पृ १४४

११) तत्रैव पृ १४३, १ ४४.

इदं पुनरत्रानुसन्धेयम् । ग्राह्यपदेन तादृश ज्ञानेनैव गृह्यते, गृहात एव इत्येवंरूपो वा नियमो न विवक्षितः । किन्तु संभवमात्रं साध्यम् । मीमांसकैरपि नैयायिकाभिमतानुमित्याप्रामाण्यग्रहस्वीकारात् (१२)

अत्रायं विचारः । यथाश्रुतनिर्वचने ईश्वरज्ञानमादाय सिद्धसाधनं बाधश्च । तथाहि– तज्ज्ञानविषयकं यदीश्वरज्ञानं तदजन्यं तदेव, ईश्वरज्ञानस्य नित्यत्वेनाजन्यत्वात् तद्विषयकत्वं च प्रामाण्यस्य परतस्त्ववादेनां मतेऽपि वर्तते, एवेति सिद्धसाधनम् । किं च स्वतस्त्वपक्षेऽपि व्यवसायप्रामाण्यग्राहकस्यानुव्यवसायस्य व्यवसायविषयकेश्वरज्ञानजन्यतया तदजन्यज्ञानत्वाभावेन बाधः [१३) एतादृशदोषपरिहाराय नैयायिकविद्वद्वरा विविधा परिष्कारप्रकारानुपवर्णयामासुः । यथा–

१. केचन प्राचीननैयायिकाः निरीश्वरवादिभिर्मीमांसकैरीश्वरज्ञाननिराकरणाभिप्रायेणैव एतादृशसाध्यकरणात् न सिद्धसाधनम्, तन्मते ईश्वरज्ञानस्यैवाप्रसिद्धेश्च न बाध इति प्रतिपादयामासुः ।

एतच्च मतं वह्नित्वादिना समुपन्यस्य अर्थान्तरस्य वारयितुमशक्यत्वादिति दूषितं रुचिदत्तमिश्रैः (१४) ।

२ तज्ज्ञानविषयकसमानाधिकरणज्ञानाजन्यसमानाधिकरणज्ञानविषयत्वम् साध्यमिति शिरोमणिपक्षः (१५] ।

यज्ञपत्युपाध्यायस्तु अन्यादृशमेव परिष्कारं निरूपयति । यथा= तज्ज्ञानविषयकजन्यज्ञानाजन्यज्ञानविषयत्वम् इति [१६] । अत्र सर्वस्यापि जन्यज्ञानस्य तज्ज्ञानविषयकेश्वरज्ञानजन्यत्वेन अप्रसिद्धिवारणायाद्यं जन्यपदम् । द्वितीयं त्वीश्वरज्ञानमादाय सिद्धसाधनतानिरासार्थम् । एवमेव

---

१२) प्रकाशः प्रा वा प १५२

१३) तत्रैव पृ १५३ रहस्यं च प्रा वा प १५० १५१ तर्कताण्डवं च

१४) प्रकाशः प्रा वा पृ १५४ तर्कताण्डव टीका न्यायदीपा पृ २८

१५) न्यायदीप प २९ एतेन समानाधिकरणेति विशेषणं वाक्षति शिरोमणिपक्षोपि प्रत्युक्तं (रघुनाथ शिरोमणि दीधितिकारः)

१६) तर्कताण्डवम् पृ. २८ प्रकाशः च प्रा बा पृ १५३

समानाधिकरणपदद्वयकृत्यं बोध्यम् [१७] ।

इमौ द्वितीयतृतीयौ परिष्कारौ दूषितौ रुचिदत्तमिश्रैः तर्कताण्डवकारैश्च । तदनुसारमुभयत्रापि परतस्त्ववादिमतेऽपि प्रामाण्यस्य सामान्यलक्षणादिजन्यज्ञानग्राह्यत्वेन सिद्धसाधनाख्यो दोषस्तदवस्थः । निरीश्वरवादिमीमांसकमते व्यर्थविशेषणत्वं च [१८] ।

यदि तत्परिहाराय तज्ज्ञानविषयकजन्यज्ञानाजन्यसामान्यलक्षणाद्यजन्यजन्यज्ञानग्राह्यत्वं साध्यमित्युच्यते तदा सामान्यलक्षणादिजन्यत्वस्य प्रतियोगिनः परमतेऽप्रसिद्धेस्तद्जन्यत्वघटितं साध्यमप्रसिद्धं भवतीति विभावनीयम् [१९] ।

पक्षधरमिश्रमते परिष्कारप्रकारस्त्वित्थम् –

तद्व्यतिरेकप्रयुक्तव्यतिरेकप्रतियोगित्वरूपजन्यत्वस्याभावरूपजन्यत्वस्याभावरूपमजन्यत्वं हि द्वेधा । तद्व्यतिरेकप्रयुक्तव्यतिरेकाप्रतियोगित्वेन वा, तद्व्यतिरेकाप्रतियोगित्वेन वा इति । तत्राद्यस्याजन्यत्वस्य ईश्वरज्ञाने सत्वेऽपि द्वितीयस्याभावात्तदेवात्र विवक्षितम् । न हीश्वरज्ञानं प्रागभावरूपव्यतिरेकस्य प्रतियोगि भवति । तस्मात्तादृशज्ञानाजन्यं यज्ज्ञानमिति चेत् नेश्वरज्ञानम् । तेन न सिद्धसाधनम् इति [२०] ।

५. पक्षधरमतमेव किंचिदिव परिष्कृत्य प्रस्तुतं रुचिदत्तमिश्रैः वस्तुतस्त्वित्यादिना । यथा– 'वस्तुतस्तु तज्ज्ञानविषयकज्ञानव्यतिरेकाप्रयुक्तव्यतिरेकप्रतियोगितदेकज्ञानमात्रविषयकज्ञानग्राह्यत्वमित्यर्थः । ज्ञानज्ञानप्रामाण्यं न पक्षः । तेन तत्र बाधो न दोषः (२१) इति । तदेकमात्रेति विशेषणेन च सामान्यप्रत्यासत्तिजन्यज्ञान-योगि-परमेश्वरज्ञानवारण भवति । ज्ञानज्ञानप्रामाण्यस्य च पक्षबहिर्भूतत्वात् तद्भिन्नव्यवसायगोचरज्ञानविषयत्वेऽपि न बाधः

---

१७) न्यायदीप पृ २८ न्या शि म च पृ १५३

१८) प्रकाशः प्रा वा पृ १५३ तर्कताडण्वम् पृ २८,२९

१९) प्रकाश; न्या शि म च पृ १५३,१५४

२० द्र तत्रैव पृ ११४, १६२ तर्कताण्डवम् पृ ३० ३१

२१) प्रकाशः प्रा वा पृ १६२

(२२)। पक्षधरमते सामान्यप्रत्यासत्तिजन्यज्ञाने प्रामाण्यस्य प्रकारत्वेन सिद्धसाधनमाख्यो दोषः, 'सर्वं ज्ञानं गुणः' इत्यादौ च ज्ञानज्ञानस्य प्रामाण्यविषयकत्वाद्बाधोऽपि दुष्परिहर इति तण्डवकाराणामभिप्रायः (२३)। तद्वारणाय रुचिदत्तमिश्रैरुपन्यस्तः परिष्कारोऽपि ज्ञानं गुण इत्यादिज्ञानज्ञानप्रामाण्यानुव्यवसायस्य ग्राह्यप्रामाण्याश्रयज्ञानभिन्नप्रथमज्ञानाविषयकतया तदेकविषयत्वाभावेन तदंशे बाधादसमीचीन इति न्यायदीपकारा निरणैषुः (२४)। यत्पुनरुक्तं ज्ञानज्ञानप्रामाण्यस्य पक्षबहिर्भूतत्वान्न बाध इति तन्न। तदन्यस्य पक्षत्वे चार्थान्तरात्। किंच प्रमावानयं समर्थप्रवृत्तिमत्वात् इत्याद्यनुमितेप्रामाण्येनार्थान्तरता। मीमांसकमते सामान्यप्रत्यासत्त्यभावेन ग्राह्यप्रमाव्यक्तेरनुमितिजनकज्ञानागोचरत्वात्। अपि च तदन्यप्रामाण्यस्य पक्षत्वं सामान्यविप्रतिपत्त्यननुगुणमिति द्रष्टव्यम् (२५) इति।

किं च 'सर्वं ज्ञानं गुणः' इत्यादिशाब्दज्ञानानुव्यवसायः तज्ज्ञानविषयकशाब्दज्ञानजन्य एव। तथाच मुरारिमिश्रमते तादृशज्ञानप्रामाण्ये नोक्तरूपं स्वतस्त्वम्। अतस्तत्प्रामाण्यज्ञानांशे बाधः (२६)।

अत्रैवं समादधुः प्रकाशकारा रुचिदत्तमिश्राः। 'प्रामाण्यविशेषस्यैव पक्षतया तादृशज्ञानप्रामाण्यस्यापक्षत्वान्न दोषः' इति (२७)। तदसमीचीनमिति प्रतीयते। सामान्यतया विप्रतिपत्तिनुन्यस्य पक्षविशेषे साध्यसाधने अर्थान्तरात्।

तृतीयविप्रतिपत्तिविचारः —

'स्वाश्रयग्राहकेण गृह्यत एव न वा' इत्याकारा तृतीया विप्रतिपत्तिर्मणिकारेण निरूपिता (२८)। मतत्रयसाधारणतयोपन्यस्तासु विप्रतिपत्तिषु इयमेव लघुतमा [२९]। अत्र एवकारो यावदर्थक इति रुचिदत्तमिश्रः,[३०] मथुरानाथश्च [३१]। तथाच यावत्स्वाश्रयग्राहकग्राह्यमित्यर्थो लभ्यते।

२२) न्या शि म पृ १६२
२३) तर्कताण्डवम् पृ ३१ २४) तत्रैव टीकायां न्यायदीपे पृ ३२
२५) तत्रैव पृ ३३ २७) प्रकाशः प्रा वा पृ
२८) त चि प्र ल पृ १६६ २९) रहस्यम् प्रा वा पृ १६०
३०) प्रकाशः प्रा व पृ १६७ ३१) रहस्यम् प्रा वा पृ १६०

न च गुरुमते प्रामाण्यस्य स्वाश्रयग्राह्यत्वात् ग्राहकपदवैयर्थ्यमिति वाच्यम् । यदि स्वाश्रयग्राह्यत्वे सति ग्राहकग्राह्यत्वमित्युच्येत तदा स्वाश्रयग्राह्यत्वमेव तथात्वे शेषवैयर्थ्यं स्यात् । न चेह तथा विशेष्यविशेषणभावः किन्तु स्वाश्रयस्य ग्राहकविशेषणता, ग्राहकस्य च ग्राह्यविशेषणतेत्यन्यादृश एव । तत्र न व्यर्थत्वम् । किं च साध्यविशेषणानामुद्देश्यसिद्धिप्रयोजनकतया त्रितयसाधारण्यसिद्धेरिहाप्युद्देश्याभावात्तदर्थमुपादेयस्य ग्राहकपदस्यावैयर्थ्यं बोध्यम् (३२) ।

रहस्यकारमते तु स्वाश्रयज्ञानविषयकग्रहेणैव विषयीक्रियते न वेत्येव कारकस्यैव योजना, एवकारश्च यावदर्थकः । स्वपदं सामान्यतः पक्षीभूत घटत्ववतिघटत्वप्रकारकत्वं स्वाश्रयज्ञानविषयकयावद्ग्रहप्रकारो न वेति फलितम् [३३] ।

चतुर्थविप्रतिपत्तिविचारः=

स्वाश्रयेण गृह्यत एव न वा इति चतुर्थी विप्रतिपत्तिः [३४) । इयं तु गुरुमते, प्रामाण्याश्रयज्ञानेनैव प्रामाण्यग्रहात् । मिश्रमते तु स्वानुव्यवसायेन गृह्यत एव न वा इति, भट्टमते च ज्ञानानुमित्या गृह्यत एव न वा [३५] इति विप्रतिपत्तिस्वरूपमूह्यम् इतिशब्देन प्रकारबोधनात् ।

स्वाश्रयेणेत्यत्र यावत्पदमुपादेयमिति रुचिदत्तमिश्राः । अन्यथा योगिज्ञानस्य सर्वविषयत्वेन सर्वप्रकारकत्वेन च सर्वप्रामाण्याश्रयतया तद्ग्राह्यत्वेन सिद्धसाधनतापत्तेः [३६] । यावत्पदोपादाने तु स्वाश्रयीभूतास्मदादिज्ञानग्राह्यत्वाभावात् न सिद्धसाधनम् ।

अत्रायं विचारः । यावत्पदोपादानं गंगेशाभिमतं न वा इति । योगजधर्म सामान्यलक्षणप्रत्यासत्त्या स्वाश्रयप्रामाण्यं तेनैव गृह्यत इति अंशतः सिद्धसाधनं स्वयमाशङ्क्य प्रामाण्यमात्रस्य पक्षत्वे अस्मदादिज्ञानप्रामाण्यस्यापि पक्षान्तर्भूतत्वात् प्रामाण्यं स्वाश्रयेण गृह्यत एवेत्युद्देश्यप्रतीतेरसिद्धेश्च नांशतः

---

३२) द्र प्रकाशः न्या शि म च प्रा ना पृ १६८

३३) रहस्यम् प्रा वा पृ १६० १६१ ३४) त चि प्र ख पृ १६९

३५) प्रकाशः प्रा ता पृ १७० ३६) तत्रैव पृ १६९

सिद्धसाधनम् इति समाहितं गंगेशोपाध्यायेन एतेनानुमीयते यत् यावत्पदोपादानमनभिमतं गंगेशोपाध्यायस्येति ।

रुचिदत्तमिश्रास्तु— 'यद्यपि यावत्पदोपादाने स्वाश्रयीभूतास्मदादिज्ञानग्राह्यत्वाभावात् तदुपादानाभावे च योगिज्ञानमादाय प्रामाण्यमात्र एव साध्यत्वात् अंशतः सिद्धसाधनमुभयथापि न संगतम् । तथापि सर्वविषयकज्ञानमात्रवृत्तिप्रामाण्यविशेषे यावत्स्वाश्रयग्राह्यत्वस्य सत्वात् अंशत इत्युक्तमिति ध्येयम्' इत्याहुः [३८]

एतेनेदमुदितं भवति गंगेशोक्तमंशतः सिद्धसाधनम् पक्षतावच्छेदकस्य नानात्व एव संभवति । सर्वप्रामाण्यत्वस्यैकस्य पक्षतावच्छेदकत्वे तु योगिज्ञानप्रामाण्यस्येवास्मदादिज्ञानगतप्रामाण्यस्यापि पक्षत्वेन संग्रहो भवति, तस्य च स्वाश्रयग्राह्यत्वमसिद्धमिति नोक्तदोषावकाशः । एवं च गंगेशमते नात्र यावत्पदोपादानविचारप्रसङ्गः । उक्तं च रहस्यकारेण 'एवकारश्च पक्षतावच्छेदकावच्छेदेन साध्यसिद्धेरुद्देश्यत्वलाभाय' इति [३९] ।

अत एव स्वमतानुकूलं पक्षान्तरमुपन्यस्तं रुचिदत्तमिश्रैः (४०] । तदनुसारं सर्वविषयकयोगिज्ञानादिप्रामाण्यस्य पक्षबहिर्भूतत्वान्नोक्तदोषः । तथा च असर्वविषयकज्ञानवृत्तिप्रामाण्यमेव पक्षः ।

पक्षान्तरसमाश्रयणे बीजं पुनरेवमुट्टङ्कितं न्यायशिखामणिकारेण [४१]

१. निषेधे अंशतो बाधः इति । अस्यायमाशयः— सर्वविषयकज्ञानप्रामाण्यस्यापि पक्षत्वस्वीकारे परतस्त्वपक्षे अस्मदादिज्ञानप्रामाण्यस्य स्वाश्रयग्राह्यत्वाभावेऽपि सर्वविषयकज्ञानगतप्रामाण्यस्य स्वाश्रयग्राह्यत्वादंशतो बाधः ।

२. किं च मतत्रयसाधारणतयोपन्यस्तासु पूर्वविप्रतिपत्तिषु मुरारिभट्टयोर्मते सर्वविषयकज्ञानप्रामाण्यस्य स्वाश्रयजन्यप्रत्यक्षविषयत्वाभावात् ज्ञानत्वावच्छिन्नानुमितिग्राह्यत्वाभावाच्च बाधः (४२) ।

---

३७) त मि प्र ख पृ १७१ ३८) प्रकाशः प्रा वा पृ १७१ रहस्यं च प्रा वा पृ १६४ ३९] रहस्यं प्रा वा पृ १६४
४०) प्रकाशः प्रा वा पृ १७२ ४१) न्या शि म पृ १७३
४२) द्र प्रकाशः प्रा वा पृ १७०

३ किं चान्यानि प्रामाण्यस्य विशेषणानि पक्षत्वे वक्ष्यमाणपरतस्त्वानुमानेऽपि पक्षत्वापत्तेः तत्र अन्यथा दतहे- सिद्धिः ।

एतादृशदूषणत्रयप्रयुक्तमस्त - - निधाय स्वमतमुपन्यस्तं मन्निद्ः तमिश्रैः । एतन्मतेऽ सर्वदिपि कृत नप्रामाण्यस्य पक्षबहिर्भूतत्वादेव दोष निवारणसम्भवात यावदुक्तमनुपादेयमेवोत विभावनीयम् ।

पंचमविप्रतिपत्तिविचार.—

एतावता पंचमविप्रतिपत्तिविचारोऽपि गतार्थः । विशेष पुनरियानेव यदत्र 'घटोऽयमिति ज्ञानप्रामाण्यं' इत्यादिरूपेण ज्ञानव्यक्तीनां पक्षान्तर्भावः । मात्रपदं कृत्स्नार्थकम् [४३) । ग्राहकपदं तु पूर्ववद्व्याख्येयम्, येन अनुमित्यनुव्यवसाययोः ग्रहणं भवेत् ।

विप्रतिपत्तिमूलभूतो मतभेदः सैद्धान्तिकदृशास्पष्टमुपन्यस्तो गंगेशोपाध्यायेन यथा— 'परतः पक्षे ज्ञात एव ज्ञाने प्रामाण्यग्रहः । स्वतस्त्वे प्रामाण्यवत एव ज्ञानस्य ग्रहात्' इति (४४) ।

पक्षस्वरूपविचारः=

विप्रतिपत्तिनिरूपणानन्तरं प्रथममुभयवादिसंमतपक्षस्वरूपविचारः कृतो गंगेशोपाध्यायेन । स्वतस्त्ववादिमीमांसकमते यद्यपि प्रमालक्षणं भिन्नं, तथापि प्रकृते निष्कम्पप्रवृत्त्यङ्गभूतस्य प्रामाण्यस्य पक्षीकरणात् (४५) व्यवहारोपयोगि विशेष्यावृत्त्यप्रकारकत्वादिरूपं प्रामाण्यं न विचारणीयम् । प्रवृत्त्यङ्गभूतप्रामाण्यस्वरूपं च तद्वति तत्प्रकारकज्ञानत्वं, तद्वति तद्वैशिष्ट्यज्ञानत्वं वा वक्तव्यम् । तस्मिन्नेव निष्कम्पव्यवहारात् । लाघवात्, नान्यत् गौरवात् तस्मात् तद्वति तत्प्रकारत्वरूपं प्रामाण्यमेवात्र पक्षः ।

ननु तद्वति तत्प्रकारत्वमपि प्रामाण्यं न पक्षः । भट्टमते ज्ञानानुमित्यग्राह्यत्वेन बाधात् । तत्र न ज्ञातता लिङ्गम्, व्यभिचारात् । नापि तद्विशेषः तस्य प्रथमं दुर्निरूपत्वात् [४६) । इति न शङ्क्यम् । तद्वति तत्प्रकारकत्व-

४३) रहस्यम् प्रा न प १६१

४४) त चि प्र ख ६५ ४५) द्र तत्रैव

४६) त चि प्र न ४ १७५ - नैमित्तिक ज्ञानमशक्यत्वात नापि

रूपप्रामाण्यस्य भट्टमतेऽपि सिद्धत्वात् । तथाहि= अनुव्यवसायस्य हि घटमहं जानामीत्येवमाकारत्वं सर्वसिद्धम् । स्वप्रकाशेनान्ये वेति प्रकारे विवादः । अत्र च अहं ज्ञानवान्, ज्ञाततावत्वात् इति वा, घटत्वप्रकारकज्ञानवान्, घटत्वप्रकारकज्ञातत्तावत्वात् इति वा जायमानानुमितिर्ज्ञानविषया भवन्ती ज्ञानविषयमप्यवगाहमाना धर्मधर्मिवैशिष्ट्यमपि विषयीकरोति । ज्ञानविषयत्वाविशेषात् (४७) । तथाचोक्तं मणिकारेण- 'विषयनिरूप्यं हि ज्ञानम् । अतो ज्ञानवित्तिवेद्यो विषय इति व्यवसाये भासमाने धर्मधर्मिवैशिष्ट्यमपि विषयः । व्यवसायरूपप्रत्यासत्तेस्तुल्यत्वात्' इति (४८) ।

तदेवं तद्वति तत्प्रकारकत्वस्य तद्वति तद्वैशिष्ट्यस्य वा पक्षीभूतप्रामाण्यरूपत्वे न केषामपि विमतिः ।

पूर्वपक्षग्रन्थः-

निश्चिते पक्षे साध्याभिसम्बन्धो विचार्यते । तत्र पूर्वपक्षग्रन्थे स्वतस्त्ववादिनां युक्तयो मणिकारेण निरूपिताः यथाऽत्तोऽवगते खलु पूर्वपक्षे तन्निरसनद्वारा सिद्धान्तो दृढीकृतो भवति अतः । अत एव गङ्गेशोपाध्यायः अथ पूर्वपक्षमुपपादयन् स्वतस्त्ववादिनां मतं यथावदुपपादयामास ।

प्राधान्येन पूर्वपक्षानुकूलतया समुपन्यस्ता युक्तयः पुनरिमाः ।

१ | तद्वतितत्प्रकारकत्वरूपप्रामाण्यस्य ज्ञानग्राहकमात्रग्राह्यत्वात् स्वतस्त्वम् तद्यथा- गुरुमते ज्ञानस्य स्वप्रकाशत्वात् व्यवसायः स्वमिव स्वविषयानपि भासयन् विशेष्ये तद्धर्मवत्वं तत्प्रकारकत्वं च गृह्णाति । ज्ञानवित्तिवेद्यत्वाद्विषयस्य । एवमेव भट्टमते ज्ञानानुमितिः मुरारिमते चानुव्यवसायः व्यवसायेन सह विषयात् विषयवैशिष्ट्यं च गृह्णाति । एवं च गुरुमते तथाविधा सामग्री घटमहं जानामीत्येवमाकारस्वप्रकाशव्यवसायजनिका चक्षुर्घटसंयोगादिरूपा, भट्टमते घटो ज्ञातविषयः ज्ञानताधारत्वात् इत्यनुमितिजनक

ज्ञातानुमितेर्या सह गृह्यते, ज्ञानमात्रविषयत्व ... य इ तद्वत्त्वविज्ञातत्वापि ... हितज्ञातताविशेषात्, तस्य प्रथम दुर्निरूपत्वाच्च ।

द्रष्टव्या दि म च पृ. १७५.

४७) प्रकाश; प्रा वा पृ १७५ ४८) त चि प्र ख पृ १७८

व्याप्तिज्ञानादिरूपा, मिश्रमते च= तदनुव्यवसायजनकमनःसंयोगादिरूपा (४९) ।

पूर्वोक्तहेतौ किञ्चिदस्वारस्यमुट्टङ्कितं रुचिदत्तमिश्रेण । यथा 'ननु विषयनिरूप्यं हि ज्ञानम् नतु यावद्विषयनिरूप्यं गौरवात्' इति वक्ष्यते । तथाच वैशिष्ट्यविषयतावश्यकत्वे मानाभावादित्यरुचेर्नियामकान्तरमाह (५०) इति । तच्च नियामकान्तरं मिश्रमतेऽनुव्यवसायस्य वैशिष्ट्यग्राहकत्वे मानं भवति । तथाहि अनुव्यवसायः पुरोवर्तिपदार्थविषयकं ज्ञानं निरूपयति । एतच्च ससम्बन्धिकपदार्थनिरूपणं सम्बन्धितावच्छेदकरूपवत्तया ज्ञायमाने सम्बन्धिनि घटते [५१) । नान्यथा । अत एव रजतत्वेन पुरोवर्तिनं जानामीत्यनुव्यवसायस्याकारः । न तु पुरोवर्तिनं रजतं च जानामीति (५२) ।

एतेनेदमुदितं भवति । अनुव्यवसायः रजतादिविषयसंबन्धिज्ञानं विषयीकुर्वन् धर्मधर्मि वैशिष्ट्यमपि विषयीकरोतीत्यवश्यमभ्युपेयम् । अनुव्यवसायाकारेणैव तद्बोधनात् । यदि वैशिष्ट्य न विषय इत्युच्यते तदा पुरोवर्तिरजतसमूहालम्बनानुव्यवसायवत् पुरोवर्तिरजतसंबन्धविषयत्वानुल्लेखी 'पुरोवर्तिनं रजतं च जानामि' इति तदाकारः स्यात् [५३] । न तु 'रजतत्वेन पुरोवर्तिनं जानामीति (५४) । उक्तनियमाभ्युपगमे तु ज्ञानसंबन्धिनि रजते रजतत्वस्यैव संबन्धितावच्छेदकत्वात् रजतत्वेन पुरोवर्तिनं जानामीति तदाकारः सिद्धो भवति ।

३ अनुव्यवसायेन विषयवैशिष्ट्यमपि गृह्यत इत्यत्र युक्त्यन्तरमपि वर्तते । तद्यथा= शुक्ताविदं रजतमिति भ्रमात्मकज्ञानस्य योऽनुव्यवसायस्तेन

४९) द न्यायदीपः

५०) प्रकाशः प्रा वा पृ १७९   ५१) त चि प्र स पृ १७९

५२) तत्रैव पृ १८०   ५३) तत्रैव द्रष्टव्यः प्रकाशः च पृ १८०

५४) तत्रैव पृ १८०

५५) त चि प्र स पृ १८३ (द्र प्रकाशः प्रा वा पृ १८३ विशेषणता विशेषी विषयताख्य इत्येके । समूहालम्बनव्यावृत्तविशिष्टज्ञान प्रयोजक इत्यन्ये ।)

भ्रमेऽपि प्रमेत्येव गृह्यते भ्रमविषयवैशिष्ट्यविषयत्वात्तस्य । न च न प्रामाण्यं प्रथमतो ज्ञातमिति न तदा संशयः स्यादिति वाच्यम् । प्रामाण्यस्य ज्ञानग्राहकसामग्रीग्राह्यत्वेन ज्ञाननिरिक्ष्यत्वात् ।

४ अथ तद्वत्वं न धर्मधर्मि वैशिष्ट्यमात्रम् । किं तु तस्य विशेषणता-विशेषः । स च व्यवसायेभासते नानुव्यवसाये, मनसो बहिस्स्वातन्त्र्यात्, इति चेन्न । व्यवसायोपनीतत्वेन विशेषणविशेष्ययोरिव विशेषणत विशेषस्यापि (५५) तद्विषयत्वात् । विशेषणतायाः निरा-करिष्यमाणत्वाच्च [५६) इति ।

तदेवं व्यवसायगतं प्रामाण्यं तद्विषयकत्वस्य तत्प्रकारकत्वस्य च ज्ञान-ग्राहकसामग्रीग्राह्यत्वात् स्वेनानुव्यवसायेनानुमित्या वा गृह्यत इति प्रामाण्यस्य ज्ञप्तौ स्वतस्त्वम् सिद्धं भवति । परतस्त्वपक्षे दोषोद्भावनम्–

प्रामाण्यस्य ज्ञप्तौ परतस्त्वाभ्युपगमे तु फलमुखी कारणमुखी चान-वस्था आपद्यते । तथाहि= फलम्, प्रामाण्यज्ञानम् । कारणं तु तज्जनकलिङ्गादिज्ञानम् । तत्र ज्ञानप्रामाण्यस्य अनुमानादिगम्यत्वे फलीभूतप्रामाण्यज्ञान गतप्रामाण्यस्य अनुमानान्तरादिना ग्रह इति फलमुखी अनवस्था । तथैव ज्ञानप्रामाण्यानुमापकलिङ्गपक्षव्याप्त्यादिज्ञाने प्रामाण्यस्य ग्रहणाय अनुमानान्तरं तत्रापि प्रामाण्यग्रहणाय अनुमानान्तरमिति कारणमुखीचानवस्था समा-पतति । अतः प्रामाण्यं न ज्ञायेतैवेति परिशेषादपि स्वतः प्रामाण्यग्रह [५७) इति पूर्वपक्षः ।

सिद्धान्तः

प्रामाण्यं परतो ज्ञायते इति नैयायिक सिद्धान्तः । विषयेऽस्मिन् उदयनाचार्यैरुपपादितः प्रकार एव सुनिपुणं परिष्कृत्य समुपन्यस्तो गंगेशेन । तेषां सम्मतिरपि तत्र तत्र महताऽऽदरेण समुपदर्शिता ।

प्रामाण्यापरतस्त्वसाधिका प्रधानायुक्तिः पुनरियम् 'प्रामाण्यस्य स्वतो ग्रहे अनभ्यासदशोत्पन्नज्ञाने तत्संशयो न स्यात् । ज्ञानग्रहे प्रामाण्यनिश्चयात्। अनिश्चये वा न स्वतः प्रामाण्यग्रहः । ज्ञानाग्रहे धर्मिज्ञानाभावान्न संशयः इति [५८) ।

५६) तत्रैव पृ १८३ ५) तत्रैव पृ १८६

५८) चि प्र ख पृ १८७

अनभ्यासदशोत्पन्नज्ञाने कथं प्रामाण्यसंशय इति प्रागुपपादितमेव । सच च संशयः प्रामाण्यस्य स्वतस्त्वाभ्युपगमे न घटते । तथाहि स्वतस्त्ववादिभिः प्रामाण्यग्रह एव ज्ञानस्य ग्रह इति वक्तव्यम् । तेन निश्चये जाते प्रामाण्यनिश्चयोऽपि जायत इत्युक्तं भवति । ततश्च अनभ्यासदशोत्पन्ने 'इदं जलम्' इत्याकारे ज्ञाने ज्ञाते सति तत्प्रामाण्यमपि निश्चीयते । तत्कथं सार्वजनीनानुभवसिद्धस्य तादृशस्थलीयप्रमाण्यसंशयस्योपपत्तिः ? यदि तदानीं प्रामाण्यनिश्चयात् संशय उपपद्यत इत्युच्यते तदा स्वतस्त्वहानिः । सत्यामपि ज्ञानस्याभ्यर्थां प्रामाण्यानिश्चयात् । ज्ञानस्याप्यग्रहात् प्रामाण्यसंशय उपपद्यत इति कथनमप्यसंगतम् । धर्मिणः ज्ञानस्यैवाग्रहे तत्र प्रामाण्याप्रामाण्यरूपकोटिद्वयविषयकसंशयोत्पत्त्यनुपपत्तेः ।

इदमेव मनसि निधाय प्रामाण्यपरतस्त्वे अनुमानप्रमाणमुपन्यस्तमुदयनाचार्यैः— अनभ्यासदशापन्नज्ञानप्रामाण्यं, परतो ज्ञायते सांशयिकत्वात्, अप्रामाण्यवत्' इति [५९] ।

इदमनुमानमाधारतयोपकल्प्य उक्तविप्रतिपत्त्यनुसारं निरुक्तस्य स्वतस्त्वरूपसाध्यस्य अभावं पक्षीभूतप्रामाण्ये प्रतिपादयितु अनुमानान्तराणि निरूपितानि गंगेशोपाध्यायेन । यथा— अनभ्यासदशापन्नज्ञानप्रामाण्यं न स्वाश्रयग्राह्यम्, स्वाश्रयादिरिक्तग्राह्यं वा, स्वाश्रये सत्यपि तदुक्तरतृतीयक्षणवृत्तिसंशयविषयत्वात्; अप्रामाण्यसंशयजन्यसंशयाविषयत्वाद्वा, अप्रामाण्यवत [६०) ।

अत्र स्वाश्रयग्राह्यत्वाभावसाधनेन परमतनिरासः स्वाश्रयातिरिक्तग्राह्यत्वसाधनेन च स्वाभिमतपरतस्त्वसिद्धिरिति द्रष्टव्यम् (६१) ।

'स्वाश्रये सत्यपि' इत्यपिपदप्रयोगः यदि प्रामाण्यं स्वाश्रयेण गृह्येत तदा स्वाश्रये सति न संदेह्येत, इत्येवंरूपतर्कप्रदर्शनाय (६२]

५९) न्या कु पु त चि प्र ख पु २०१

६०) त चि प्र ख पु २१२ २१४ अत्र अप्रामाण्य संशयाजन्य संशयविषयत्वादिति रहस्यकाराभिमतः पाठः रहस्यम् द्रा. का.पृ २९१

६१) न्या शि.म पु २१४

६२) प्रकाशः प्रा वो पृ २१४ न्या पु शि म १२५

न्यायमते योग्यविभुविशेषगुणानां ज्ञानादीनां स्वपेक्षाबुद्धिव्यतिरिक्तानां क्षणिकत्वम् [६३)। तच्च तृतीयक्षणवृत्तिध्वंसप्रतियोगित्वम् (६४]। तथा च ज्ञानादिकं प्रथमक्षणे उत्पद्यते, द्वितीयक्षणे तिष्ठति, तृतीयक्षणे नश्यति इति तात्पर्यत् [६५]। अतः एतदनुसारं प्रकृतानुमाने न्यायनये स्वाश्रयाधिकरणक्षणावधिकतृतीयक्षणवृत्तिसंशयविषयत्वादित्याकारो हेतुर्द्रष्टव्यः।

ननु गुरुमते धर्मिज्ञानसहितो विरुद्धानेकधर्मोपस्थितिविशेषः संशयः, स्वप्रकाशनया च तदेव धर्मिज्ञानं, तदग्रिमक्षणे कोटिद्वयस्मरणमिति द्वितीयक्षण एव संशयादन्यतरासिद्धिरिति चेत्, न। स्वप्रकाशरूपधर्मिज्ञानसहितसंस्कारेण स्मृतिरूपधर्मिज्ञानस्य तृतीयक्षणे संभवात्। कोटिस्मृतेश्च विनश्यदवस्थायास्तदाऽपि सत्वेऽन तृतीयक्षणे संशयाविरोधात्। इयानेव विशेषोयन्न्यायनये स्वाश्रयाधिकरणीभूतस्थितिक्षणावधिकं तृतीयत्वम्। गुरुमते तु तादृशोत्पत्तिक्षणावधिकम् (६६]।

भट्टमिश्रयोर्मते प्रथमक्षणे ज्ञानोत्पत्तिः तदनन्तरं द्वितीयक्षणे ज्ञानत्वमिति निर्विकल्पकं ज्ञानं, ततः तृतीयक्षणे ज्ञानत्ववतः धर्मिणः ज्ञानम्, तदनन्तरं चतुर्तक्षणे कोटिद्वयस्मरणम्, ततश्च संशय इति क्रमः। तथाच प्रामाण्यसंशयस्य स्वाश्रयाधिकरणचतुर्थक्षणवृत्तित्वं स्वाश्रयोत्पत्त्यधिकरणपञ्चमक्षणावधिकत्वं वा सिद्धं भवतीति साध्याप्रसिद्धिरिति। तन्न। विषयवैशिष्ट्यावगाहिनो ज्ञानत्वांशे निर्विकल्पकादेव धर्मिज्ञानात् प्रामाण्यसंशये बाधकाभावात्। तथा च स्वाश्रयाधिकरणक्षणावधिकतृतीयक्षणवृत्तित्वं प्रामाण्यसंशयस्य सिद्धं भवतीति न कश्चिद्दोष) [६७]।

विवादपदं न यावत्स्वाश्रयग्राहकग्राह्यम्, स्वाश्रयनिश्चये सति तत्तदुत्तरक्षणे [तृतीयक्षणे] अप्रामाण्यसंशयं विना वा संदिह्यमानत्वात्, अप्रामाण्यवत्' इति द्वितीयमनुमानम् (६८)

६३) न्या सि मु पृ ५९ भा प कारिका १७ ६४) तत्रैव
६५) न्या को पृ २५३ ६६) द्र प्रकाशः प्रा वा पृ २१७
६७) प्रकाश प्रां. वा पृ २१५ ६८) त. चि, प्र. ख. पृ २२९

भट्टमिश्रयोरभिमतं स्वतस्त्वमनेन निराकृतम् इत्युदयनाचार्यमतम् (६९)। मतत्रयसाधारणं स्वतस्त्वमनेन निरस्तम् इति तु पक्षधरमिश्राः (७०)।

यद्वेत्यादिना तृतीयोऽनुमानप्रकारः प्रदर्शितो मणिकारेण। यथा— अनभ्यासदशापन्नज्ञानप्रामाण्यम्, एतत्प्रामाण्यसंशयपूर्वकालीनैतज्ज्ञाननिश्चयाविषयः, एतज्ज्ञाननिश्चयानन्तरं सन्दिह्यमानत्वात् अप्रामाण्यवत् (७१)।

एवं च अनभ्यासदशापन्नज्ञाने प्रामाण्यसंशयोपपत्तये प्रामाण्यस्य परतस्त्वमङ्गीकर्तव्यमिति सिद्धं भवति।

स्वतस्त्वसाधकयुक्तिनिरासः—

प्रामाण्यस्वतस्त्वसाधकतयोपन्यस्तासु युक्तिषु प्रथमा युक्तिरुक्तरीत्या अनभ्यासदशापन्नज्ञानगतप्रामाण्यस्य ज्ञानग्राहकग्राह्यत्वाभावात् बाधिता भवति।

उर्वरितयुक्तीनां मूलाधारो हि व्यवसायविषयकोऽनुव्यवसायः व्यवसायवद्व्यवसायगतं विषयवैशिष्ट्यमपि गृह्णातीति मतम्। तच्च न विचारसहम्। अनुव्यवसायानन्तरमपि व्यवसायप्रामाण्ये धर्मधर्मिवैशिष्ट्ये च संशयस्यानुभवसिद्धत्वात, नार्थतद्वत्त्वमनुव्यवसायस्य विषयः।

अपुनरुक्तं ज्ञानस्य विषयनिरूप्यत्वात् व्यवसायवत् धर्मधर्मिवैशिष्ट्यमनुव्यवसायस्य विषयः। अत एव रजतत्वेन पुरोवर्तिनं जानामीति तदाकारः न तु पुरोवर्तिनं रजतं च जानामी। तत्रैवमभिहितं मणिकारेण= 'इदं रजतं च जानामीति नानुव्यवसायः, बहिर्विशेष्यके मनसोऽस्वातन्त्र्यात् (७२) इति। अस्यायमाशयः- अनुव्यवसायो हि ज्ञानविषयकं मानसं प्रत्यक्षम्। मनश्च सकलबाह्येन्द्रियाधिष्ठातृत्वेन प्रसिद्धमपि न स्वातन्त्र्येण बाह्यपदार्थान् विषयीकर्तुं क्षमते। चक्षुरादीन्द्रियद्वारैव तत् रूपादिग्रहणसमर्थमवतिष्ठते। अतः बाह्येन्द्रियव्यापारमनपेक्ष्य जायमानोऽनुव्यवसायः न रजतादिबाह्यपदार्थविषयीकरणक्षमः। अपि तु आत्ममनःसन्निकर्षद्वारा आत्मगतं ज्ञानं विषयी

६९) न्या. शि. म. पृ २२९ ७०) तत्रैव

७१) त. चि, प्र. ख. पृ २३२

७२) त. चि. प्र. ख पृ २०८

करोति' इति । बहिर्विशेष्यके इत्यस्य बहिरर्थविशेष्यकज्ञाने इत्यर्थः । तेन तथाविधज्ञाने सामर्थ्याभावादिति फलितं भवति । अतः इदमिदन्त्वेव रजतत्वेन जानामीत्याकारक एवानुव्यवसायः । अत्रैवं मणिकारः प्राह 'तत्र इदन्त्वरजतत्वे प्रकारत्वेन भासेते । तत्प्रकारकज्ञानवत्त्वं चात्मनि भासते । अन्यथा प्रकारवाचितृतीयार्थासंभवः । रजतत्ववैशिष्ट्यस्य तदर्थत्वे व्यवसायेऽपि तृतीयार्थोल्लेखापत्तिः ।

तथाच धर्मिणि इदन्त्वरजतत्वप्रकारकज्ञानविषयत्वे तादृशज्ञानवत्त्वे चात्मनोऽनुव्यवसाय एव मानमिति न विषये तस्य निर्विकल्पकत्वम् । अतः इदन्त्वरजतत्ववैशिष्ट्यं पुरोवर्तिनि नानुव्यवसायविषय इति न स्वतः प्रामाण्यग्रहः । (७३) इति ।

इदमत्रानुसन्धेयम् । प्रथममिदं रजतमिति व्यवसायः । तत्र इदन्त्वरजतत्वयोः प्रकारत्वं चक्षुःसंयुक्ते पुरोवर्तिनि धर्मिणि तद्वैशिष्ट्यावगमात् सिद्धं भवति । तदनन्तरं तद्धर्मप्रकारकज्ञानविशेषणक आत्मविशेष्यकं मानसं प्रत्यक्षमुपजायते एवं च अनुव्यवसायः विषयवैशिष्ट्यमविषयीकुर्वाणोऽपि आत्मनि ज्ञानवैशिष्ट्यं विषयीकुर्वन् सविकल्पक एव भवति न तु निर्विकल्पकः । अत एव व्यवसायस्य भ्रमात्मकत्वेऽपि आत्मनस्तद्वत्त्वमात्रं विषयीकुर्वाणस्यानुव्यवसायस्य प्रामाण्यं न हीयते । आत्मनः ज्ञानवत्त्व एव तस्य मानत्वात् ।

समालोचना-

नैयायिकैः प्रामाण्यस्य स्वतस्त्वभ्युपगमे प्रामाण्यसंशयानुपपत्तिरूपो दोषो यथा प्रतिपाद्यते, तथा प्रामाण्यस्य परतस्त्वे प्रथमप्रामाण्यग्रहानुपपत्तिरूपः अनवस्थारूपश्चेति द्वौ दोषौ मीमांसकादिभिः प्रतिपक्षिभिरापाद्येते । तन्निराकरणाय गंगेशोपाध्यायेन प्रयत्नो व्यधायि । स च कियता अंशेन सफल इति विचारणीयम् ।

तत्र प्रथमप्रामाण्यग्रहः न्यायनये कथमुपपद्यत इति चेदप्रामाण्यव्यतिरेकमुखेनैवेति मणिकारः प्राह । तथाचोक्तम्= 'कथं तु भ्रमः । प्रथमप्रामाण्याभावः एव प्रामाण्यं व्यतिरेकिणा साध्यम् । तत एव निष्कम्पप्रवृत्ते-

---

७३) त. चि. प्र. ख. पृ. २०९ - २१०

रुपपत्तेः ।' इत्यादि [७४] ।

तथाचानुमानप्रयोगः= 'अयं वह्नित्वेनानुभवः, न वह्नित्वाभाववति वह्नित्वप्रकारकः, दाहसमर्थविषयकप्रयत्नजनकत्वे सति वह्नित्वप्रकारकनिश्चयत्वात् दाहसमर्थविशेष्यकवह्नित्वप्रकारकनिश्चयत्वाद्वा । एवं तत्रैवं यथा वह्न्यप्रमा [७५] इति । अप्रामाण्यस्य प्रकारान्तरेणापि निर्वचनसंभवात् साध्यं पञ्चधा प्रदर्शितं मणिकारेण । तद्यथा अवह्निवृत्तिप्रकारको न, विशेष्यावृत्तिप्रकारको न वह्नित्वप्रकारकत्वे सति वह्न्यविशेष्यको न, वह्नित्वप्रकारकत्वे सति वह्न्यविशेष्यको न, वह्नित्वव्यधिकरणप्रकारावच्छिन्नो न, वह्न्यवृत्तिप्रकारको न इति [७६] ।

अत्रायं विचारः । निष्कम्पप्रवृत्त्यंगस्य प्रामाण्यनिश्चयस्य निरूपणीयत्वे अप्रामाण्याभावस्य साधनमसंगतं भवति । किं च स्वतस्त्वविप्रतिपत्तिविषयस्य वह्नित्ववति वह्नित्वप्रकारकत्वादिरूपप्रामाण्यस्य प्राथमिकग्रहस्थले अनुमानाप्रवृत्तेरगत्या स्वतोग्राह्यत्वमेव स्वीकार्यमिति प्रतिपक्षीयमाक्षेपं परिहर्तुं वह्नित्वाभाववद्विशेष्यकत्वाभावस्य व्यतिरेकिसाध्यत्ववर्णनं 'कर्णे पृष्टे कटिं चालयति' इत्यादिवत् प्रकृतासंगतं भवति । इति, तत्कथमुक्तासंगतिपरिहार इति चेत् उच्यते । प्रथमासंगतिपरिहाराय, अप्रामाण्याभावस्यापि प्रामाण्यवत् संशयनिवृत्तिद्वारा निष्कम्पप्रवृत्तिप्रयोजकीभूतनिश्चयविषयत्वेन, तन्निश्चयादेव निष्कम्पप्रवृत्त्युपपत्तिरिति समाधानमभिहितं [७७] गंगेशोपाध्यायेन । द्वितीया असंगतिस्तु द्वयसमाधाय परिहृता । यथा 'तदेव वा सिध्यत् पक्षधर्मताबलेन तद्वति तत्प्रकारकत्वादिकमादाय सिध्यति इति । 'तदनन्तरमर्थाद्वा सिध्यति' [७८] इति च ।

प्रथमसमाधानस्यायमाशयः । प्रामाण्यं द्विस्वरूपम् तद्वति तत्प्रकारकत्वरूपं, अप्रामाण्याभावरूपं च । अप्रामाण्यं च न प्रामाण्याभावः, अपि तु प्रामाण्यविरोधि तदभाववति तत्प्रकारकत्वमिति भावरूपम् । तदभावश्च

---

७४) त. चि. प्र. ख. पृ २५३
७५) तत्रैव पृ २५४
७६) त. चि. प्र. ख. पृ २५४
७७) तत्रैव पृ २५३
७८) तत्रैव पृ २५३-२५४

हेतोः पक्षवृत्तित्वज्ञानात् हेतुव्यापकतया सिध्यन्, तथाभूतेन तद्वति तत्प्रकारकत्वरूपेण प्रामाण्येन सहैव सिध्यति । तथाहि इदं वहि्नत्वप्रकारकं ज्ञानं तद्वति तदभाववति वेति संशयानन्तरं तदभाववति तत्प्रकारकत्वव्यतिरेकः सिध्यन् तत्प्रकारकतामादाय सिध्यति । तृतीयप्रकाराभावेन, तेन विना साध्यस्योपसंहर्तुमशक्यत्वात् [७९) इति ।

ननु अनुपस्थितं तद्वतीत्यादिरूपं प्रामाण्यं न हि पक्षधर्मताबलात्सेद्धुमर्हति । यदि वर्तते तदुपस्थितिरित्याशयस्तर्हि तदेव साध्यं भवतु, किम प्रामाण्याभावानुमानेन । इत्यस्वरसं मनसि निधाय द्वितीयं समाधानमभिहितम् । अत्र 'अर्थात्' इति पदस्य अर्थापत्तिपरत्वमापाततः प्रतीयते । तच्च नैयायिकमते न संभवति । अर्थापत्तेः प्रमाणान्तरत्वानभ्युपगमात् । एवं तदन्तर्भावस्य व्यतिरेक्यनुमान एव विहितत्वादिहापि अर्थादित्यस्य व्यतिरेक्यनुमानात् इत्येवार्थो ग्राह्यः । संमतं चैतत् रुचिदत्तमिश्राणां, अन्येषां च नैयायिकानाम् (८०] व्यतिरेक्यनुमानान्तरप्रयोगश्चैवमुपवर्णितो मणिकारेण— इदं वहि्नत्वप्रकारकज्ञानं, वहि्नत्ववद्विषयकं, वहि्नत्वाभाववदविषयकत्वे सति सविकल्पकत्वात्, यन्नैवं तन्नैवं, यथा वह्न्यप्रमेति (८१) ।

अनवस्था चैवं रीत्या निवाहिता गंगेशोपाध्यायेन । यथा= 'अगृहीतप्रामाण्यमेन ज्ञानं परप्रामाण्यं निश्चाययति । अप्रामाण्यशङ्कया प्रामाण्यसंशयस्तत्र प्रामाण्यज्ञाने प्रामाण्यनिश्चयादेव प्रामाण्यनिश्चयः । एवं यावदप्रामाण्यशङ्कं तज्ज्ञानप्रामाण्यनिश्चयादेव तन्निश्चयः । न चैवमनवस्था । चरमज्ञानप्रामाण्यस्य ज्ञानाभावेन, कोटिस्मरणाभावेन, विषयान्तरसंचारेण वा प्रामाण्यसंशयानवस्थंभावात् (८२) इति ।

निर्णयः —

प्रामाण्यं क्वचित्परतः क्वचित्स्वतः इति तु नैयायिकानामभिमतमेव । अत एव तैरनुमानानुव्यवसाययोः धर्मिज्ञानस्य ईश्वरज्ञानस्य च स्वतःप्रामाण्य-

---

७९) त चि प्र ख पृ २६४

८०) प्रकाशः प्रा वा पृ २५४ न्या. शि. म ख पृ २५४, २५५

८१) त चि प्र ख पृ २६८ ८२) तत्रैव पृ २९४

मेव समर्थ्यते । विवादस्तु अभ्यासानभ्यासदशापन्नेषु ज्ञानान्तरेषु कथं प्रामाण्यग्रह इत्यत्रैव ।

तत्रायं निर्णयः । प्रामाण्यनिश्चयः संशयनिवृत्तिद्वारा निष्कम्पप्रवृत्तिप्रयोजकः । प्रामाण्यसंशये विषयसंशयात् निष्कम्पा प्रवृत्तिः प्रतिबद्धा भवति । अतः प्रतिबन्धकीभूतसंशयव्युदासाय प्रामाण्यनिश्चय आवश्यकः । स च ज्ञानसामान्यग्राहकातिरिक्तैः अनुमानादिभिर्गृह्यत इति तस्य परतस्त्वम् इति ।

एतेनेदमुदितं भवति । प्रामाण्यस्य प्रवृत्तिकारणत्वाभावोपलम्भात् ज्ञानमात्रेण सामान्यतया प्रवृत्तिरुपपद्यते । यत्र तु प्रामाण्यसंशयो मनसि पदमादधाति तत्र तदाहितविषयसंशयद्वारा निष्कम्पा प्रवृत्तिः प्रतिबध्यते । ततः संवादादिलिङ्गकेनानुमानेन प्रामाण्यनिश्चये जाते इदमित्थमेवेति विषयनिर्धारणेन निष्कम्पा प्रवृत्तिरुपपद्यते । प्रामाण्यसंशयश्च त्रिचतुरानुमानपर्यन्तमेव प्रसरीसरीति । यदा तु कोटिद्वयोपस्थित्यभावात् विषयान्तरसंचारद्वा न प्रामाण्यशङ्कावकाशस्तदा न तत्र प्रामाण्यानुमापकलिङ्गपरामर्शस्यावश्यकता । ततश्च तदानीं प्रामाण्यनिश्चयस्यानावश्यकत्वान्नानवस्था । त्रिचतुरवधिकप्रामाण्यानुमितिपरंपरायां यत्रोक्तकारणवशात् प्रमाण्यशङ्काकलङ्काभावोऽभ्युपेयते मणिकारेण तत्र प्रामाण्यस्वतस्त्वमेवोक्तं भवति इति तु न शङ्क्यम् । यतो हि न्यायनये प्रामाण्यनिश्चयाभावेऽपि केवलेन ज्ञानेनैव प्रवृत्त्युपपत्तेः प्रामाण्याप्रामाण्यान्यतरधर्माधिकरणत्वेनानिर्धारितस्यैव ज्ञानस्य तत्राभ्युपगमसंभवात् । परमते तु प्रामाण्यवत एव ज्ञानस्य प्रवर्तकत्वस्वीकारात् प्रामाण्यस्य स्वतस्त्वम् ।

यद्यपीदं समाधानमापाततो युक्तं प्रतिभाति तथापि वर्तेतेऽत्र विचारणीयोंशः । यत्किमियं राजाज्ञा यथा त्रिचतुरनुमानपर्यन्तमेव प्रामाण्यशङ्काकलङ्क इति । न चात्र किमपि नियामकमुपलभ्यते । कोटिद्वयोपस्थित्यभावो विषयान्तरसंचारो वा मनःप्रणिधानविशेषमहिम्ना प्रतिरोद्धुं शक्यत इति नानयोः प्रामाण्यशङ्काभावनियामकत्वं संभवति । अतः केषुचित्स्थलेषु ज्ञानं प्रमाणमित्येव गृह्यते । ततश्च न तत्र प्रामाण्यशङ्कावसर इत्येव वक्तव्यं

भवति। अत एव जयन्तभट्टोऽपि प्रवर्तक ज्ञानस्यैव प्रामाण्यपरीक्षा लोकप्रसिद्धा न तु फलज्ञानस्येत्युक्त्वा, फलज्ञानप्रामाण्यस्य स्वतस्त्वापत्तिपरिहाराय 'अथवा तत्रापि विशेषदर्शनसत्वस्य कारणपरीक्षाया वा प्रामाण्यनिश्चायकत्वादिति प्रतिपादयामास (८३)। तदेवं अनवस्थादोषपरिहारार्थं मणिकारेणन्यस्तं समाधानं विशिथिलमूलमिति सुप्रतीमः। तथापि, तन्मते यस्मिन् ज्ञाने प्रामाण्यशङ्काभाव अभ्युपेयते, तस्य प्रामाण्याप्रामाण्यान्यतरधर्माधिकरणत्वेन अग्रह इत्यत्रैव तत्तात्पर्यमित्यादाय योजनीयम्। ततश्च प्रामाण्यशङ्काभाववति ज्ञाने प्रामाण्यनिश्चयस्याप्यभावात् प्रामाण्यनिश्चयस्य तत्र स्वतस्त्वापत्तिरपि प्रत्युक्ता भवति।

किं च एतेनैव 'प्रामाण्यशङ्काभाववतः ज्ञानस्य किं प्रामाण्यवत्वेन ग्रहणमुत न। प्रथमपक्षे तत्र प्रामाण्यस्य कथं ग्रहः? अनुमानादेस्तत्राप्रवृत्त्या स्वत एवेत्यगत्या स्वीकरणीयम्। द्वितीयपक्षे प्रामाण्यमप्रामाण्यं, वा किमपि तादृशज्ञानस्य न सिद्ध्येत्। तच्चानुभवविरुद्धम्। विवक्षितप्रामाण्याप्रामाण्यान्यतराधिकरणत्वेनैव निर्विकल्पकज्ञानभिन्नज्ञानस्य ग्रह इति नियमात्' इत्यपि प्रत्युक्तं भवति। कोटिद्वयस्यापि तत्रानुपस्थितत्वात्।

इदं तु तत्वम्। मणिकारेण प्रामाण्यवादप्रारम्भ एव निष्कम्पप्रवृत्तिप्रयोजकीभूतप्रामाण्यस्य निरूपणात् तस्यैव स्वतस्त्वपरतस्त्वविचारः प्रकान्तः न तु फलज्ञानादिप्रामाण्यस्य। तद्धि न प्रवृत्तिप्रयोजकम्। फलज्ञानादिप्रामाण्यस्य। तद्धि न प्रवृत्तिप्रयोजकम्। फलज्ञानमप्यभ्यासदशापन्नज्ञानेऽन्तर्भाव्य सजातीयत्वलिङ्गकानुमानेन तत्प्रामाण्यग्रह इति तु प्रतिपादितमेव वाचस्पतिमिश्रप्रभृतिभिः [८४]। आत्ममनःसन्निकर्षमात्रजन्यस्य ज्ञानस्याव्यभिचारित्वात् ज्ञानविषयकज्ञानरूपस्यानुव्यवसायस्य प्रामाण्यं स्वत एवेत्यभिमतं नैयायिकानाम्। एवमेवानुमानप्रामाण्यमपि व्याप्तिज्ञानादिभिरग्राह्यत्वाभावात्, 'सर्वं ज्ञानं धर्मिण्यभ्रान्तं, प्रकारे तु विपर्ययः' इति नियमा-

---

८३) न्या मं प्र प्र. पृ १५९

नुसारं धर्मिज्ञानप्रामाण्यमपि ज्ञानग्राहकातिरिक्तनिरपेक्षत्वात् स्वत [illegible] इति नैयायिकमतम् [८५)।

अथ प्रामाण्यग्रहविषये पुनरेवं निर्णीयते यद् द्वितीयानु[illegible] येन क्वचित् गृहीते प्रा[illegible]ण्ये सफलप्रवृत्तिजनकत्वादिलिङ्गकानुमितिना[illegible] [illegible]द्ग्रहणमिति। तेन न साध्याप्रसिद्धिः। मनसो बहिरस्वातन्त्र्यात् [illegible]मानुव्यवसायेन प्रामाण्यग्रहासंभवेऽपि तदनन्तरं पुनः ज्ञानेनोपनीतेषु विष[illegible] [illegible]यमाने द्वितीयानुव्यवसाये विषयवैशिष्ट्यविषयीकरणस्याव्याहतत्वात् [illegible] च नवीननैयायिकमतम् [८६)।

गङ्गेशोपाध्यायस्तु प्रागुपदर्शितदिशा व्यतिरेक्यनुमानद्वारा अप्रामाण्याभावमुखेन प्रामाण्यसिद्धिरिति निरूपयामास। इदं चाप्रामाण्य[illegible] [illegible] प्रामाण्यसिद्धिरिति निरूपयामास। इदं चाप्रामाण्याभावानुमानं न [illegible]क मिति न्यायविदामाशयः (८७)। क्वचिदप्रामाण्याभावशङ्कया क्वचित्तु प्रामाण्याभावशङ्कया निष्कम्पप्रवृत्तिप्रतिबन्धोपलम्भात्। अत्र [illegible] भावरूपमेव। तच्च बाधानन्तरं स्मृत्युपनीते भ्रमे 'वहि[illegible]त्वाभाववति [illegible]हि[illegible]त्वेन मम ज्ञानं वृत्तमिति मनसैव परिच्छिद्यते मानान्तरेण [८८) [illegible] [illegible]सिद्धम्। तेन न साध्याप्रसिद्धिः। [८९] इति।

प्रामाण्यस्योत्पत्तौ स्वतस्त्वपरतस्त्वविचारः-

प्रामाण्यस्य स्वतस्त्वं परतस्त्वं त्रेधा (९०) भवतीति प्रागुप[illegible]म् तत्र ज्ञप्तौ स्वतस्त्वं परतस्त्वं च कीदृक्? कथङ्कारं च तद्घटते? इति सविमर्शं निरूपितं अधुना प्रामाण्यस्योत्पत्तौ स्वतस्त्वपरतस्त्वविचारः प्रस्तू[illegible]ते।

---

८५) त चि प्र ख पृ २९९, ३००

८६) द्र न्या को पृ

८७) प्रकाशः प्रा वा पृ २७६ . न्या. शि. म. च पृ २७५

८८) द्र तत्रैव पृ २६६ इदं वाहि[illegible]त्वप्रकारकं ज्ञानं वाहि[illegible]त्वाभ[illegible]वद्वि शेष्यकं [illegible] प्रवर्तकत्वादित्यादि मानान्तरेणे[illegible]र्थः।

८९) त चि प्र ख पृ २६६

९०) न्या मं प्र प्र पृ १४७ न चास्य परापेक्षा क्वाचिद्विधत्ते, [illegible] हि

तत्र स्वतस्त्ववादिनां मते प्रामाण्यस्योत्पत्तावपि स्वतस्त्वम् । तच्च ज्ञानसामान्यजनकसामग्रीजन्यत्वमेव । तन्निषेधश्च परतस्त्वम् । एवं च ग्राह्यग्राहकभावस्थले जनजनकभावनिवेशनेन प्रागुपदर्शितमेव स्वतस्त्वनिर्वचनमत्राप्यनुसन्धेयम् । तथाचेदमत्र विप्रतिपत्तिशरीरम्– ज्ञानप्रामाण्यम्, ज्ञानजनकसामग्रीमात्रजन्यं न वा इति ।

अत्रायमभिसन्धिः । ज्ञानं हि कार्यसामान्यम् । प्रमाप्रमे तद्विशेषभूते कार्यसामान्यं प्रति यत्कारणं तदेव कार्यविशेषं प्रत्यपि कारणम् । कार्यविशेषद्वयगतवैजात्यसंपादकं कारणान्तरं तु स्वीकरणीयं न वेति विचारः । तत्र स्वतस्त्ववादिनां मते प्रमां प्रति ज्ञानकारणान्येव कारणानि । अतस्तस्या उत्पत्तावपि स्वतस्त्वम् । अप्रमायास्तु ज्ञानसामान्यकारणभिन्नदोषरूपकारणजन्यत्वात् परतस्त्वम् । परतस्त्ववादिनां नैयायिकानां मते तु यथाऽप्रमारूपकार्यविशेषजनने दोषाणामसाधारणकारणत्वम्, तथा प्रमारूपकार्यविशेषजनने गुणानामसाधारणकारणत्वम् । तस्मात्प्रमाऽप्रमयोरुभयोरपि उत्पत्तौ परतस्त्वम् ।

नैयायिकमतम् ।

प्रामाण्यस्योत्पत्तौ स्वतस्त्वाभावं प्रसाध्य परतस्त्वं स्पष्टमुपपादितं न्यायकुसुमाञ्जलिकारैः । तामेव सरणिमनुसृत्य मणिकारो विषयममुं परिश्चकार । अतो विषयावबोधाय कुसुमाञ्जलिकारमतमत्र प्रथमतः संक्षिप्यते ।

'प्रमा ज्ञानहेत्वतिरिक्तहेत्वधीना, कार्यत्वे सति तद्विशेषत्वात्, अप्रमावत्,' [११] इत्यनुमानं प्रामाण्यस्योत्पत्तौ परतस्त्वसाधनायोपन्यस्यते । इदमनुमानम् 'यत्कार्यं यत्कार्यविजातीयं, तत् तत्कारणविजातीयकारणजन्यम्' इत्याकारकं नियममनुसृत्य प्रसरति । दृष्टं चैतदेवं घटविजातीये । नियमोऽयमवश्यमङ्गीकार्यः । अन्यथा कार्यवैजात्यस्याकस्मिकत्वापत्तेः ।

एतेन व्याप्तिद्वयमत्राभिसंहितं भवति । यो यत्कार्यविशेषः, स तत्सामान्यहेत्वतिरिक्तहेत्वधीनः यथा कलमांकुरः । न ह्यंकुरविशेषः कलमांकुरोऽकुरसामान्यहेतोर्बीजादेव भवति, किन्तु तद्विशेषात् कलमबीजात् । कार्यवि-

११) न्या कु प्र २१२

शेषश्चेत्, प्रमा, तस्मात् तथा, इत्येका सामान्यव्याप्तिः । अपरा च= यो ज्ञानविशेषः, स ज्ञानसामान्यहेत्वतिरिक्तहेतुकः, यथाऽप्रमेति विशेषव्याप्तिरिति (९२) ।

किं चाप्रमाऽपि ज्ञानसामान्यहेतुजन्यत्वात् प्रमा भवेत् । अप्रमाया ज्ञानसामान्यहेत्वजन्यत्वस्वीकारे तु सा ज्ञानमपि न स्यात् । यदि ज्ञानसामान्यहेतुजन्यत्वेन ज्ञानत्वेऽपि अतिरिक्तदोषानुप्रवेशादप्रयोत्पत्तिरित्युच्यते, तदा दोषाभावमधिकमासाद्य प्रमा जायत इत्यभ्युपगन्तव्यम् । तथा च दोषाभावस्याधिकस्यापेक्षणात् प्रामाण्यस्य परतस्त्वमेव सिध्यति ।

यदुच्यते आगन्तुकभावानपेक्षज्ञानसामग्रीजन्यत्वमेव स्वतस्त्वम् । तथाच दोषाभावसापेक्षत्वेऽपि गुणाजन्यत्वात्प्रमायाः स्वतस्त्वमिति [९३] । तन्न । दोषाणां भावरूपत्वस्यानियमात्= यथा प्रमारूपं विशेषदर्शनं गुणः । विशेषादर्शनं च दोषः, अप्रमाजनकः (९४) ।

विशेषादर्शनस्यादोषत्वे कथं ततो विशेषादर्शनादप्रमात्मकौ संशयविपर्ययौ स्याताम् ? इति वक्रकोटरादेः शुक्तिकात्वस्य च विशेषस्यादर्शने हि तयोरुत्पत्तिरिति अभावात्मनो दोषस्याभावो भाव एवेति कथं स भावः प्रमाहेतुर्नेष्यते [९५) ?

यदि चाप्रमाजनने ज्ञानसामग्र्यां सत्यां विशेषादर्शनादेर्दोषस्यान्वयाद्यनुविधानाद्दोषो हेतुः तर्हि विशेषदर्शनादेर्गुणस्यान्वयाद्यनुविधानात् प्रमायामपि गुणो हेतुरिति तुल्यम् (९६) ।

अपौरुषेयवेदानां दोषनिवृत्त्यैव प्रामाण्यमिति चेत् गुणनिवृत्त्याऽप्रामाण्यस्यापि संभवः ।

गुणनिवृत्तेरप्रामाण्यजननासामर्थ्यमिति चेत्, केवलाया दोषनिवृत्तेरपि प्रामाण्यजननासामर्थ्यं तुल्यम् ।

९२) न्या कु टीका बोधनी पृ २११

९३) त चि प्र ख पृ २४० न्या कु प्रकाशः पृ २१३

९४) न्या कु. पृ २१४. ९५) न्या कु बोधनी पृ २१४

९६) न्या कु प्रकाशः पृ २१२

लौकिकवचनेषु दोषा एव अप्रामाण्ये कारणं गुणनिवृत्तिस्त्वन्यथासिद्धत्वादनीय असिद्ध अनिविरिति चेत् प्रामाण्यं प्रति गुणेष्वपि तुल्यमेतत् ।

गुणानां दोषाभावकारणप्रयुक्तः सन्निधिरिति चेत्, दोषाणामपि गुणाभावप्रयुक्त इत्यस्तु [९७] ।

अपेतवक्तृदोषत्वाद्वेदापौरुषेयवेदानां प्रामाण्यं सेत्स्यतीति चेत्, न । अपेतवक्तृगुणत्वेन सत्प्रतिपक्षत्वप्रसङ्गात् ।

केवलाया गुणनिवृत्तेरप्रामाण्यानङ्गत्वान्न तत्प्रयुक्ताप्रामाण्यशङ्केति चेत् केवलाया दोषनिवृत्तेरपि प्रामाण्यं प्रत्यनङ्गत्वान्न तया अप्रामाण्यशङ्कानिवृत्तिरिति तुल्यम् (९८) ।

मीमांसकमतम्—

अत्रैवं मीमांसकाः प्रत्यवतिष्ठन्ते । प्रमाणेन हि ज्ञानमुपजायत इति सत्यम् । तच्च पुनरुपजायमानमेव न सन्देहादिदोषकलुषितं भवतीत्यौत्सर्गिकं प्रामाण्यमेव तस्य सिद्धं भवति । सिद्धे चौत्सर्गिके प्रामाण्ये यत्र तस्यापवादः क्वचिद् भवति तत्राप्रामाण्यम् । अप्रामाण्ये चावश्यंभावी अपवादः । द्विविध एव तदपवादः, बाधकप्रत्ययः, कारणदोषज्ञानं च । तदुक्तं शबरस्वामिना - 'यत्र च दुष्टं करणं, यत्र च मिथ्येति प्रत्ययः, स एवासमीचीनः प्रत्ययो नान्यः' इति (९९) इति । वार्तिककारोऽप्याह—

तस्माद् बोधात्मकत्वेन प्राप्ता बुद्धेः प्रमाणता ।
अर्थान्यथात्वहेतूत्थदोषज्ञानादपोद्यते ॥ (१००)

---

९७) प्रवृत्तिनिवृत्तिप्रयत्नयोः रागद्वेषकारणकत्वमिवात्रापि योज्यम् तथाहि कारणं रागः कार्यं प्रवृत्तिप्रयत्नः । न हि तत्र द्वेषाभावः कारणम् । एवमेव कारणं द्वेषः कार्यं निवृत्तिप्रयत्नः न च तत्र रागाभावो कारणम् द्वेषसद्भावाभावादिना ... रागद्वेषयोरनुविधानविषयः ।

९८) ... गुणनिवृत्तेरेव अप्रामाण्यहेतुत्वात् । गुणसद्दोषनिवृत्तेरेव प्रमात्वप्रयोजकत्वात् । न्या. कु. प्रकाश: पृ २१८

९९) शा. भा. सू. १-१-५

१००) श्लो. वा. सू. १-१-२ श्लो. ५३

किं च प्रमाया उत्पत्तौ कारकस्वरूपमात्रापेक्षा चेद्विवक्षिता तर्हि न विरोधः । अन्यथा कारकेषु कार्यस्य ज्ञानस्यात्मलाभासंभवात् । यदि तदतिरिक्ततद्गतगुणापेक्षा विवक्षितेत्युच्यते तर्हि कारणगुणानां प्रत्यक्षाद्यविषयत्वेन अप्रामाणिकानां तेषामपेक्षणीयत्वं न घटते ।

अपि च यथार्थत्वायथार्थत्वरूपधर्मद्वयान्यतररहितस्य ज्ञानरूपकार्यस्याभावात् कारणत्रैविध्यं नोपपद्यते । तथाचोक्तं जयन्तभट्टेन पूर्वपक्षग्रन्थे— 'यदि हि यथार्थत्वायथार्थत्वरूपद्वयरहितं किञ्चिदुपलब्ध्याख्यं कार्यं भवेत्ततः कार्यत्रैविध्यात्कारणत्रैविध्यमवश्यमवसीयेत, यथार्थोपलब्धेर्गुणवत्कारकं कारकम् अयथार्थोपलब्धेर्दोषकलुषं कारकं कारकम् उभयरूपरहितायास्तु तस्याः स्वरूपावस्थितमेव कारकं कारकमिति । न त्वेवमस्ति, द्विविधैव सर्वत्रोपलब्धिः यथार्थत्वायथार्थत्वभेदेन । तत्रायथार्थोपलब्धिस्तावत् दुष्टकारककार्यैव दृष्टा ।

दृष्टः कुटिलकुम्भासिसंभवो दुष्टकारणात् ।
तथा मानान्तरमितात्तिमिरादेर्द्विचन्द्रधीः ॥

अयथार्थोपलब्धौ च दुष्टकारककार्यत्वेन सिद्धायामिदानीं तृतीयकार्याभावात् यथार्थोपलब्धिः स्वरूपावस्थितेभ्य एव कारकेभ्योऽवकल्पत इति न गुणकल्पनायै प्रभवति । अनुमाने च यैव पक्षधर्मान्वयादिसामग्री ज्ञानस्य जनिका सैव प्रामाण्यकारणत्वेन दृष्टा । न च स्वरूपस्थितानि कारणानि कार्यजन्म न्युदासते एव येन यथार्थोपलब्धिजनने तेषां गुणसहकारिता कल्प्यते । इत्यतो न सन्ति कारणगुणाः, नैर्मल्यव्यपदेशस्तु लोचनादेः काचकामलादिदोषापायनिबन्धन एव स्वरूपातिरिक्तगुणकृतः अञ्जनाद्युपयोगोऽपि दोषनिर्हरणायैव न गुणजन्मने । तस्मान्नोत्पत्तौ गुणापेक्षं प्रामाण्यमिति (१) ।

ननु यत्र प्रथमज्ञानगतमप्रामाण्यं द्वितीयेन दोषज्ञानेन बाधकज्ञानेन चोत्पद्यते तत्र द्वितीयज्ञानगतं प्रामाण्यं स्वत एव जायत इति वक्तुं सुशकम्। परं यत्र तृतीयज्ञानेन द्वितीयज्ञानस्य संशयाद्यात्मकत्वं निर्णीयते तत्र प्रथमज्ञानस्य प्रामाण्यं तृतीयज्ञानेन सिद्धं भवति । तत्कथं तत्र प्रथमज्ञान-

१) न्या मं प्र प्र पृ १४७-१४८

प्रामाण्यस्य स्वतस्त्वमिति चेदत्रैवं समाधानम् । मीमांसकप्रक्रियानुसारं तृतीयज्ञानेऽपि दोषसंभावनायां चतुर्थं ज्ञानं तन्निर्णयाय प्रभवति । एषु चतुर्षु ज्ञानेषु किं प्रत्येकमवश्यमेव प्रमाणं भवति । तच्च स्वत एव प्रामाण्यमश्नुते । ज्ञानान्तराणि तु दोषाभावमेवे साधयन्ति । इतोऽधिकज्ञानापेक्षा तु नैव भवति । तृतीयेन तुरीयेण वा ज्ञानेन प्रथमे द्वितीये वा ज्ञाने दोषाभावनिश्चयस्यावश्यमुपजायमानत्वात् (२) । तदुक्तं श्लोकवार्तिककारेण—

एवं त्रिचतुरज्ञानजन्मनो नाधिका मति. ।
प्रार्थ्यते तावतैवैकं स्वतः प्रामाण्यमश्नुते ॥ इति (३) ।

स्वतस्त्वपक्षसमर्थनम्—

इदमत्रानुसन्धेयम् । विज्ञानसामग्रीजन्यत्वेसति तदतिरिक्तहेत्वजन्यत्वम् प्रमाया उत्पत्तौ स्वतस्त्वं नाम । ईश्वरज्ञानस्याजन्यत्वात् नाव्याप्तिराशङ्कनीया । तत्र विज्ञानसामग्रीजन्यत्वेसति अतिरिक्तकारणाजन्यत्वलक्षणविशिष्टधर्मवत्वाभावात् । नाप्यतिव्याप्तिः । अप्रमायास्तदतिरिक्तहेतुजन्यत्वात् ।

अस्ति चेह मानमनुमानम् । प्रमा विज्ञानसामग्रीजन्यत्वे सत्यतिरिक्तजन्या न भवति, अप्रमातिरिक्तत्वात्, घटादिवत् [४] इति ।

विज्ञानसामग्रीमात्रादेव प्रमोत्पत्तिसंभवे तदतिरिक्तस्य गुणस्य दोषाभावस्य वा कारणत्वकल्पने कल्पनागौरवप्रसङ्गश्च ।

यदुच्यते ज्ञानसामग्रीमात्रजन्यत्वेऽप्रमाऽपि प्रमा स्यादिति (५) । तन्न । प्रयोजकाभावादेव प्रयोज्यस्याप्रसक्तेः । तथाहि दोषासहकृतज्ञानसामग्री प्रमात्वप्रयोजिका । अप्रमायां च दोषसहकृतज्ञानसामग्री वर्तते । दोषसद्भावात् (?) अतो न तत्र प्रयोज्यभूतप्रमात्वप्रसक्तिः [६] ।

दोषस्याप्रमाहेतुत्वे दोषाभावस्य प्रमाहेतुत्वं गले पादुकान्यायेनावश्यमायातमिति तु न शङ्कनीयम् । दोषाभावस्यान्यथासिद्धत्वात । कारणत्वम-

---

२) न्या म प्र प्र पृ १५३

3) श्लो वा सू 1-1-2 श्लो 61 ४) तत्त्वप्रदीपिका (चित्सुखी) प्र प पृ २१५ ५) त चि प्र स पृ ३०६

न्यथासिद्धिशून्याभ्यामन्वयव्यतिरेकाभ्यां निर्णीयते न पुनः केवलाभ्याम् । प्रमाप्रमयोः अन्वयव्यतिरेकव्याप्ती न दोषाभावस्य प्रमां प्रति कारणत्वादिके । दोषाभावस्य प्रमाविरोध्यप्रमाप्रतिबन्धकत्वेनोपक्षीणत्वात् अन्यथासिद्धत्वम् (७) । तथा चोक्तं कुमारिलभट्टेन—

तस्मात् गुणेभ्यो दोषाणामभावस्तदभावतः ।

अप्रामाण्यद्वयासत्वं तेनोत्सर्गोनपोदितः ॥ (८) इति ।

नन्वेकस्यापि दोषाभावस्याप्रमाप्रतिबन्धकत्वं प्रमाहेतुत्वं च किं न स्यात्? एकस्यापि संस्कारस्यानुभवनाशकत्वस्मृतिहेतुत्वयोरुभयोरपि दर्शनात् इति चेन्नैवम् । तत्र संस्कारस्यानुभवनाशकत्वेऽपि स्मृतेः संस्कारातिरिक्तकारणान्तरानिरूपणात् उभयहेतुताया अवश्याश्रयणीयत्वात् । प्रकृते तु ज्ञानसामग्रीत एव प्रमोद्भवसंभवे दोषाभावस्यापि तद्धेतुत्वकल्पना निष्प्रामाणिका (९)।

न च प्रमाऽप्रमयोर्भेदो वैधर्म्यं च न सिध्येदिति वाच्यम् । यथा एकजातीयसामग्रीसत्वेऽपि घटयोर्भेदो यमजयोर्वैधर्म्यं च तथा प्रमाऽप्रमयोर्भेदो वैधर्म्यं च भविष्यति (१०) ।

अथानुगतव्यवहारात् प्रमात्वमनुगतमिति प्रमामात्रेऽनुगतो हेतुर्वाच्यः (स च गुणः) अनुगतकार्यस्याननुगतादनुत्पत्तेरिति चेत् न । प्रमात्वस्योपाधित्वेन कार्यतावच्छेदकत्वे मानाभावात् । कार्यमात्रवृत्तिधर्मत्वस्य कार्यतावच्छेदकत्वप्रयोजकत्वे नीलघटत्व-घटज्ञानत्वादौ व्यभिचारः (११) । तेषां कार्यतानवच्छेदकत्वात् इति ।

पूर्वपक्षानुमाने साध्यविचारः

उदयनाचार्यनिरूपितां सरणिमनुसरन् मणिकारः प्रतिपक्षिभिराक्षिप्तानां दोषाणां प्रतिक्षेपाय प्रथमं साध्यविषयकं विचारं प्रस्तौति (१२) ।

तत्रायं सारांशः । 'प्रमा ज्ञानहेत्वतिरिक्तहेतुजन्या, जन्यज्ञानत्वात्,

---

७) तत्रैव   ८) श्लो वा सू १-१-२ श्लो ६५

९) तत्त्वप्रदीपिका [चित्सुखी] प्र प पृ २१६

१०) त चि प्र ख पृ ३०४   ११) तत्रैव पृ ३०८-३०९

अप्रमावत् ,' इत्येतत् प्रामाण्यस्य गुणजन्यत्वसाधनायोपन्यस्यमानमनुमानम् । अस्मिन्ननुमाने ज्ञानहेत्वतिरिक्तहेतुजन्यत्वरूपं साध्यम्, अनेकदूषणगणग्रासात् नोपपद्यते । तथाहि प्रमाया ज्ञानरूपत्वेन नैयायिकाभिमततद्धेतोर्गुणादेर्ज्ञानहेतुत्वात् ज्ञानहेत्वतिरिक्तत्व न संभवतीति तादृशसाध्याप्रसिद्धेर्बाधः । प्रमायाः ज्ञानाजनकजन्यत्वे प्रतिज्ञाविरोधः । अप्रमाया अपि ज्ञानरूपत्वेन तस्यां ज्ञानाजनकजन्यत्वाप्रसिद्धेर्दृष्टान्ते साध्यवैकल्यं च (१३) । किं च ज्ञानहेत्वतिरिक्तेति विशेषणं व्यर्थम् । जन्यज्ञानत्वरूपहेतोः हेतुजन्यत्वमात्रसाधनसमर्थस्य विशिष्टसाध्यं प्रत्यप्रयोजकत्वात् । एतेन व्याप्यत्वासिद्धिरुक्ता भवति । प्रमाया गुणजन्यत्वासिद्धिदशायां जन्यपदव्यावर्त्यस्येश्वरज्ञानस्यासिद्धेः परं प्रत्यसिद्धत्वाच्च व्यावर्त्याप्रसिद्धिरपि (१४) । विशेष्यभूतं हेतुपदमपि व्यर्थम्, घटादावपि साध्यसत्वेन कार्यत्वस्यैव व्याप्तिमत्वा [१५] ।

यदि पुनरुक्तदोषवारणाय यत्किंचिज्ज्ञानहेत्वपेक्षया सर्वतद्धेत्वपेक्षया वा अतिरिक्तत्वं विवक्षितमित्युच्यते तदाऽपि न निस्तारः । इन्द्रियादिभिः सिद्धसाधनात् (१६) । यथा त्वाचप्रत्यक्षहेत्वतिरिक्तहेतुभूतचक्षुरादिजन्यत्वं चाक्षुषादिप्रत्यक्षाणां सिद्धमेव । ज्ञानकारणीभूतसामग्रीभिन्नत्वमपि चक्षुरादीन प्रत्याहतमेव ।

अत एव ज्ञानसामान्यहेत्वतिरिक्तहेतुजन्येत्यपि न साध्यम् । सकलज्ञानाभिप्राये उक्तरीत्या इन्द्रियादिभिः सिद्धसाधनात् । सामग्रीभेदस्य कार्यभेदकल्प्यत्वात् प्रमाया ज्ञानसामग्रीभिन्नसामग्रीजन्यत्वे ज्ञानभिन्नत्वापत्तेश्च (१७) ।

अथैतादृशदोषवारणाय कल्पान्तराण्युपन्यस्य पुनः पूर्वपक्षदृशा तान्यपि दूषितानि मणिकारेण । तत्र साध्ये द्वेधा परिष्कार प्रकारः प्रदर्शितः । यथा प्रमा, ज्ञानत्वावच्छिन्नकार्यत्वान्यकार्यत्वप्रतियोगिककारणजन्या, जन्यज्ञानत्वात् अप्रमावत् इत्येकः । अपरश्च प्रमात्वं, ज्ञानत्वावच्छिन्नकार्यतानिरूपित

१३) त चि प्रकाशः पृ ३१०

१४) त चि प्र प्र पृ ३०९ न्या कु प्रकाशे च पृ २११

१५) न्या कु प्रकाशः पृ २११

१६) त चि प्र ख पृ ३०९

१७) तत्रैव पृ ३११

कारण । भिन्नक (ण प्र)तियोगिककार्यतावच्छेदकं, ज्ञानत्वसाक्षाद्व्याप्यधर्मत्वात् अप्रमात्ववत् (१८) इति । एतदुभयविधमपि साध्यं न घटते, ज्ञानत्वप्रमात्वयोः नित्यवृत्तितया कार्यत्वानवच्छेदकत्वात [१९] । अनित्यज्ञानत्वस्य, अनित्यप्रमात्वस्य वा कार्यतावच्छेदकत्वं न संभवति । कार्यमात्रवृत्तिधर्मत्वस्य कार्यतावच्छेदकत्वानियामकत्वात् । अन्यथा नीलघटत्वादेरपि कार्यतावच्छेदकत्वं स्यात् (२०)

प्रकारान्तरेण परतस्त्वसाधकानुमानप्रयोगोऽपि नोपपद्यत इति सविस्तरमुपन्यस्तं गंगेशोपाध्यायेन । तद्यथा- अनित्यप्रमा, प्रमाऽप्रमोभयहेतुभिन्नहेतुजन्या, जन्यत्वात् अप्रमावत्' इति । तदेतत् न दोषविधुरम् । अप्रमहेतुभूतस्य दोषस्य पित्तादेः, स्वविषयप्रमाहेतुत्वेनाप्रमायां साध्याप्रसिद्धेः । पीतः शङ्खः इति ज्ञानस्य शङ्खांशे प्रमात्वाद्व्यभिचारोऽपि । किं च–प्रमा, अप्रमव्यावृत्तधर्मावच्छिन्नकार्यत्वप्रतियोगिककारणजन्या अप्रमाविजातीयकार्यत्वात् घटवत् इत्यपि वक्तुं न शक्यम् । अप्रमाव्यावृत्तधर्मावच्छिन्नकार्यत्वं संयोगस्य तत्प्रतियोगिककारणमिन्द्रियादीति तज्जन्यत्वेन सिद्धसाधनात् (२१) ।

अनित्यप्रमा, प्राऽप्रमान्यतरप्रतिबन्धकजन्या, प्रमाऽप्रमान्यतरत्वात् अप्रमावत्, इति वा, चाक्षुषप्रमा चाक्षुषप्रमाजनकजन्या, अनित्यप्रमात्वात्, रासनप्रमावत् इति वा नानुमानप्रयोगः । प्रमाजनकासाधारणव्यक्तिभेदस्याप्रमाप्रतिबन्धकत्वेन चाक्षुषप्रमाजनकत्वेन च सिद्धसाधनात् (२२) ।

किं च प्रत्यक्षप्रमादौ अनुगतस्यार्थान्तरस्य गुणस्याभावः । इन्द्रियसन्निकर्षादीनां चाननुगमः [२३] इति ।

सिद्धान्तः=

उपर्युक्तप्रकारेण पूर्वपक्षग्रन्थे स्वतस्त्ववादिनां मतं यावच्छक्यं सूक्ष्मेक्षिकासहकृतया धिया परिष्कृत्य कुसुमाञ्जलिकारमतं सिद्धान्ततया स्थिरीकरोति

१८) द्र त चि प्र ख पृ ३१२-३१४

१९) तत्रैव पृ ३१२-३१३ २०) तत्रैव पृ ३१५

२१) तत्रैव पृ ३१७

२२) त चि. , प्र ख पृ २०८

मणिकारः (२४)। विशेषतः समुल्लेखनीया विषयाः पुनरत्र संगृह्यन्ते ।

प्रमाया उत्पत्तौ स्वतस्त्वस्वीकारे नूनमप्रमाऽपि स्वत एव स्यात्, न परतः। प्रमावदसाधारणकारणादेव तदुत्पत्तौ दोषस्य तत्राहेतुत्व पत्ते (२५)

अपि च निबन्धनभेदः कार्यकारणभाव नियमश्च न व्यक्त्योरेव, व्यभिचारादतिप्रसङ्गाच्चेति, (२६) नियमनिरूपकमनुगुणमनुगतमास्थेयम् । एवं चाप्रमायामिव प्रमायामपि तद्व्यावृत्तं कारणमनुगतमास्थेयम् [२७] ।

अनित्यप्रमा, अप्रमाकारणविजातीयकारणजन्या अप्रमाविजातीय कार्यत्वात्, घटवत्, इत्यनुमानमपि अनुगतकारणकल्पने मानम् । एवं चानुगतस्य प्रमाहेतुत्वे सिद्धे— प्रमा, स्वविरोध्यनुभवप्रतिबन्धकजातीयजन्या, जन्यानुभवत्वात्, अप्रमावदित्यादावपि न सिद्धसाधनम् [२८] ।

यत्तु उक्तं अनित्यप्रमात्वं कार्यतावच्छेदकं, कार्यमात्रवृत्तिधर्मत्वादित्यपि नीलघटत्वादिना व्यभिचारीति, तन्न बाधकं विना कार्यमात्रवृत्तिधर्मत्वस्य कार्यतावच्छेदकत्वनियामकत्वात् । तथा चैवमनुमानप्रयोगः— अनित्यप्रमात्वं, कार्यतावच्छेदकम्, बाधकं विना कार्यमात्रवृत्तिधर्मत्वात्, अप्रमात्ववत् (२९) इति ।

सिद्धे चानित्यप्रमात्वस्य कार्यतावच्छेदकत्वे निम्नलिखितानुमानैः अनित्यप्रमामामप्रमाव्यावृत्तानुगतहेतुसिद्धिः ।

१] अनित्यप्रमात्वम्, अनित्यज्ञानत्वावच्छिन्नकार्यताप्रतियोगिककारणताभिन्न-कारणताप्रतियोगिककार्यतावच्छेदकम्, अनित्यज्ञानत्वव्याप्यकार्यताव-धर्मत्वात्, अप्रमात्ववत्

---

२४) तत्रैव पृ ३२० - ४०७

२५) तत्रैव पृ ३२१ न्या कु प्रकाशे अपि पृ २१२

२६) त चि प्रकाश. पृ ३२२,३२३ बीजत्वस्याङ्कुरस्करणीयत्वात् बीजं विनाऽपि कुतश्चिदङ्कुरविशेषोत्पादप्रसंगेन व्यभिचारप्रसङ्गादित्यर्थः । बीजे सत्यपि बीजव्यक्तिवदबीजकृतेऽपि वह्निहेतुत्वापत्तेः, किञ्च सत्वमात्रस्य बाने तत्राप्यविशेषादतिप्रसङ्गश्च इति ।

२७) त चि प्र खं पृ ३२२

२८) त चि. प्र ख पृ ३२४ २९) तत्रैव पृ ३२५ विशेष विचारस्तु प्रकाशादौ द्रष्टव्य.

२) अनित्यप्रमात्वम्, अप्रमाकारण-नवच्छेदकरूपावच्छिन्नकारणताप्रतियोगिककार्यतावच्छेदकम्, प्रमावृत्तिकार्यतावच्छेदकत्वात् घटत्ववत्।
३] चाक्षुषप्रमात्वं, चाक्षुषप्रमाकारणतानवच्छेदकरूपावच्छिन्नकारणताप्रतियोगिककार्यतावच्छेदकम्, चाक्षुषप्रमावृत्तिकार्यतावच्छेदकत्वात् घटत्ववत्।
४) अनित्यरजतप्रमात्वम्, रजतप्रमाकारणतावच्छेदकरूपानवच्छिन्नकारणताप्रतियोगिककार्यतावच्छेदकम्, रजतप्रमावृत्तिकार्यतावच्छेदकत्वात् घटत्ववत्, [३०] इति।

वस्तुतस्तु दोषाणामप्रमाकारणत्वस्वीकारे गुणानां प्रमाकारणत्वस्वीकारो दुष्परिहारो भवतीति प्रागुपपादितदशाऽवसेयम्।

अथ विशेषदर्शनादिर्गुणः, तदभावश्चाननुगत इति न तौ प्रमाऽप्रमाहेतू, किं तु दोषतदभावाविति चेत्, तर्हि पित्तादिर्दोषस्तदभावश्चाननुगत इति तावपि न तत्र हेतू। स्वप्रमायां (दोषप्रमायां) स्वाभावस्य (दोषाभावस्य) व्यभिचारश्च [३१]।

इदमत्रानुसन्धेयम्। प्रमामात्रे नानुगतो गुणः, किन्तु तत्तत्प्रमायां भूयोऽवयवेन्द्रियसन्निकर्ष-यथार्थलिङ्गसादृश्यवाक्यार्थज्ञानानां यथायथं प्रत्येकमेव गुणत्वम्, अन्वयव्यतिरेकात् [३२]

नत्तदप्रमायां पित्तादिलिङ्गभ्रमादीनां दोषत्वात् प्रत्यक्षे विशेषदर्शनमपि गुणः, तदनुविधानात् [३३]।

मीमांसकमतनिरासः-

यत्पुनरत्र वेदप्रामाण्यनिष्ठागरिष्ठमतयो मीमांसकाः कथयन्ति= 'वेदे भ्रमप्रमादविप्रलम्भाशक्त्यभावचतुष्टयमेव प्रमायां हेतुर्भवतु इति। तन्न। प्रमाया गुणजन्यत्वेन वेदप्रमायामपि वाक्यार्थयथार्थज्ञानरूपगुणस्य हेतुत्वात्। भ्रमाद्यभावानां चान्यथासिद्धत्वात् [३४]।

---

३०) त चि प्र ख पृ ३३८ ३१) तत्रैव पृ ३४३
३२) तत्रैव पृ ३५३ ३३) तत्रैव पृ ३५९
३४) द्र त च । पृ ३७० – ३८६

प्रभाकरमते तु निष्कम्पप्रवृत्त्यङ्गं स्मृत्यनुभवसाधारणं यथार्थत्वमेव प्रामाण्यम्। तच्च ज्ञानमात्रसामग्रीजन्यम्, न तु गुणं दोषाभावं वाऽपेक्षते। सर्वज्ञानानां यथार्थत्वेनाव्यभिचारात्। तस्मात् प्रामाण्यं स्वत एवोत्पद्यते ज्ञायते च।

अयथार्थत्वे नाप्रामाण्यं, सर्वधियां यथार्थत्वात्। किं तु विपरीतव्यवहारप्रवर्तकत्वम्। तच्च ज्ञानसामग्र्यामधिकदोषानुप्रवेशात्, दोषहेतुकासंसर्गाग्रहाद्वा उत्पन्ने ज्ञाने दोषसहकाराद्वा, धर्मधर्मिणोरसंसर्गाग्रहरूपमेकत्वासंसर्गाग्रहसहितं परत उत्पद्यते, न तु ज्ञानमात्रसामग्रीतः, प्रमायामतिप्रसङ्गात् (३५)। इति।

इदमत्रानुसन्धेयम्। विपर्ययस्थले इदमंशे साक्षात्कारः रजतांशे च स्मरणम्। अनयोश्चानुभवस्मरणयोर्भेदाग्रह एवाप्रामाण्यम्। अत एव प्राभाकरमते प्रामाण्यसंशयस्थले अगृहीतभेदं ज्ञानद्वयं विशिष्टज्ञानं वेति संशयः। प्रामाण्यं चार्थतथात्वनिश्चयरूपम् (३६)। अर्थनिश्चयस्यैव प्रवर्तकत्वात्।

अत्रायमाक्षेपः। प्रामाण्यनिश्चयस्य निष्कम्पप्रवृत्तिहेतुत्वं तावत्सर्वानुभवसिद्धम्। तच्च प्रामाण्यं यद्यर्थतथात्वनिश्चयरूपं तदा सर्वधियां यथार्थत्वेन तस्य असाधारणत्वं दुष्परिहरम्। ततश्च असमानाकारादिदं रजतमिति ज्ञानान्निष्कम्पप्रवृत्तिर्नोपपद्यते किन्तु तद्व्यावृत्ताकारात् (३७)।

किं च अर्थतथात्वनिश्चयरूपप्रामाण्यस्य स्वप्रकाशेन ज्ञानेन स्वाश्रयेन वा ग्रहणे, ज्ञानजनकसामग्रीमात्रजन्यत्वे च तस्य अनभ्यासदशापन्नज्ञाने ज्ञानेन सह युगपदेव ग्रहणमुत्पत्तिश्च भवतीति कथनीयम्। तथा सति निश्चितप्रामाण्यादनभ्यासदशापन्नज्ञानान्निष्कम्पप्रवृत्तिः प्रामाण्यसंशयाभावश्चापद्येते। अथ तत्परिहाराय यद्येवं समाधानमभिधीयते यदनभ्यासदशापन्नज्ञानस्थले न प्रामाण्यसंशयः, किन्तु अगृहीतभेदं ज्ञानद्वयं विशिष्टज्ञानं वेति संशयः। स एव निष्कम्पप्रवृत्तिरिति। तथापि न निस्तारः। यस्य संशयो

---

३५) त चि प्र ख पृ ३८७ ३८८

३६) तत्रैव पृ ३९६,४००   ३७) तत्रैव पृ ४००

व्यतिरेकनिश्चयश्च यत्प्रतिबन्धस्तन्निश्चयस्तद्धेतुरिति व्याप्तेः तादृशसंशयस्य निष्कम्पप्रवृत्तिप्रतिबन्धकत्वे भ्रमव्यावृत्तस्य विशिष्टज्ञानत्वस्य निश्चय एव प्रवृत्तिहेतुर्भवति न त्वर्थतथात्वरूपप्रामाण्यस्य निश्चयः। तादृशसंशयाभावसहितस्यार्थतथात्वनिश्चयस्य प्रवर्तकत्वस्वीकारे तु गौरवम् (३८)। एवं च भ्रमव्यावृत्तत्वात्, निष्कम्पप्रवृत्तिहेतुत्वात्, प्रामाण्यसंशयनिवर्तकत्वाच्च विशिष्टज्ञानत्वमेव प्रामाण्यम् इति' वाच्यम् (३९)। तच्च स्वतो गृहीतुं न शक्यते। तद्घटकीभूतागृहीतसंसर्गादेः प्रागनुपस्थितेः, (४०) तदुत्पत्तिग्रहप्रयोजकसामग्रीविरहात। अनुव्यवसायादेरतथात्वात्। स्वप्रकाशता हि स्वमात्रसाक्षिणी। अतः साऽपि नागृहीतसंसर्गादिग्रहणे क्षमते। यदि स्वेतरसाक्षित्वमपि तस्याः स्वीक्रियते तदा अनभ्यासदशापन्नेऽपि प्रामाण्यस्य स्वतो ग्रहादप्रामाण्यसंशयानुपपत्तिः।

मीमांसकैकदेशिनां नव्यानामपि मतमुपन्यस्य दूषितं गेङ्गेशोपाध्यायेन। तन्मते अविद्यमानभेदस्याग्रहः प्रामाण्यम्। स चात्यन्ताभावरूपत्वात् स्वतः सिद्ध इति प्रामाण्यं स्वतः। विद्यमानभेदस्याग्रहोऽप्रामाण्यम्। अयं च प्रागभावरूपः। अग्रे (बाधकाले) भेदस्य ग्रहात्। स च दोषजन्यत्वेन परत उत्पद्यते। अनभ्यासदशापन्ने प्रामाण्यसंशयेऽपि विद्यमानाविद्यमानभेदाग्रह कोटिद्वयावलम्बी, स एव निष्कम्पप्रवृत्तिप्रतिबन्धक (२४१) इति।

तदेतदरमणीयम्। अविद्यमानभेदाग्रहरूपं प्रामाण्यमपि न स्वतो ज्ञातुं उत्पत्तुं च शक्यते। अविद्यमानभेदग्रहस्य तत्प्रतियोगिनोऽसत्त्वात्, प्रागनुपस्थितेश्च। अनभ्यासदशायां ज्ञाने ज्ञातेऽप्यविद्यमानभेदाग्रहे संशयाच्च (४२)।

एवमेव संसर्गग्रह एव प्रामाण्यम्। असंसर्गाग्रह एवाप्रामाण्यमित्यपि न संभवति। संसर्गग्रहत्वस्य स्वेन ग्रहीतुमशक्यत्वात्। शक्यत्वे वा अनभ्यासदशायामपि तद्ग्रहे प्रामाण्यसंशयो न स्यात्। तस्माद् भ्रमव्यावृत्तं

३८) त चि प्र ख पृ ४०१ ३९) तत्रैव पृ ४०२

४०) तत्रैव पृ ४०३ ४१) त चि प्र ख पृ ४०३,४०४

४२) तत्रैव पृ ४०५

निष्कम्पप्रवृत्तिहेतुः प्रामाण्यं यथाकथञ्चित् निरुच्यमानमपि विशेषदर्शनादि-सापेक्षमेवेति परतः प्रामाण्यमेव स्थिरीकृतं भवति (४३)।

समालोचना—

कियताप्यंशेन प्रामाण्योत्पत्तिविचारः ज्ञप्तिविचारेण गतार्थ एव संपद्यते। तथाप्येतदवधानदानार्हम्।

मूलसिद्धान्तविरोधादेव प्रामाण्योत्पत्तिविषयेऽपि विमतिर्विविधदर्शनकाराणाम्। तथाहि येषां मते ज्ञानस्य प्रामाण्यमौत्सर्गिकं ते प्रामाण्यस्योत्पत्तावपि स्वतस्त्वम् स्वीकुर्वन्ति। अपरे तु परतस्त्वम्।

वेदानामपौरुषेयत्वात्प्रमाणमूर्धन्यत्वं स्वीकुर्वाणा वेदान्तिनो मीमांसकाश्च ज्ञानस्य प्रामाण्यं स्वत एवोत्पद्यत इति स्वीकुर्वन्ति। 'दोषाणामप्रमाकारणत्वेऽपि तदभावस्य गुणानां वा न प्रमाकारणत्वमन्यथासिद्धत्वात्' इति तन्मतम्। किं च यथार्थत्व यथार्थत्वरूपद्वयरहितस्य ज्ञानकार्यस्याभावात्, गुणसहितो, दोषसहितः, तदुभयरहितश्चेति त्रिविधो ज्ञानकारणकलापो न विद्यति इति।

वेदानामपि प्रामाण्यं परत एवेति स्वीकुर्वाणा नैयायिकास्तु, प्रागुपदर्शितदिशा दोषाणां यथा अप्रमाकारणत्वं तथा गुणानां प्रमाकारणत्वमवश्यमभ्युपेयमिति विविधयुक्तिबलेन साधयन्ति। ज्ञानसामान्यजनकसामग्री न खलु कार्यविशेषभूतां प्रमामप्रमां वा जनयितुमीष्टे। न चैवं त्रिविधज्ञानकार्याभावात् त्रिविधा सामग्री कथं संभवदुक्तिकेति शङ्कनीयम्। गुणदोषान्यतररहितस्य कारणकलापस्यैवानभ्युपगमात्। तथाच प्रमाऽप्रमासाधारणः कारणकलापो नियमेनगुणदोषान्यतरघटितः प्रमामप्रमां वा जनयतीति न तृतीयज्ञानकार्याभ्युपगमप्रसक्तिः (४४)। गुणानां प्रमां प्रत्यन्यथासिद्धत्वे दोषाणामप्रमां प्रत्यपि तथात्वं सुवचनम्। इति।

---

४३) तत्रैव पृ ४०७

४४) न्या मं प्र प्र पृ १५७ = निर्दोषं निर्गुणं वाऽपि न भूमस्त्येव कारणम्। अत एव तृतीयस्य न कार्यस्यास्ति संभवः इति।

निर्णयः—

प्रामाण्यस्य ज्ञप्तौ स्वतस्त्वाभ्युपगमे यः अनभ्यासदशापन्ने ज्ञाने प्रामाण्यसंशयानुपपत्तिरूपो दोषः प्रदर्शितः स प्रकृतेऽपि समानः । किं च अप्रमायां दोषस्य कारणत्वस्वीकारात् विगतबहुलभारा नैयायिकास्तदवलम्बेन ता एव युक्तीरूपन्यस्य गुणानामपि प्रमाकारणत्वं समर्थयन्ति । अनुभवबलात् लोकव्यवहाराच्च प्रमायाः गुणजन्यत्वमेव स्वीकरणीयं भवति ।

अप्रमाण्यस्य स्वतस्त्वपरतस्त्वविचारः—

प्रामाण्यस्वतस्त्वपरतस्त्वविचारे तत्र तत्र प्रसंगानुसारं अप्रामाण्यस्योत्पत्तौ ज्ञप्तौ च परतस्त्वमुपपादितमेव । तदनुसारमप्रमायाः विशेषादर्शनादिदोषजन्यत्वादुत्पत्तौ बाधज्ञाननिरूप्यत्वाच्च ज्ञप्तौ ज्ञप्तौ परतस्त्वं सिद्धं भवति ।

बौद्धमतम्—

अप्रामाण्यस्य परतस्त्वे प्रायः सर्वेषामपि शास्त्रकाराणामैकमत्यम् । केवलं बौद्धास्तस्य स्वतस्त्वं स्वीकुर्वन्ति । ततस्तेषां मतमत्र सङ्क्षेपेणोपपाद्य समालोच्यते । तथाहि ज्ञानस्य प्रामाण्यमप्रामाण्यं चेत्युभयमपि स्वतः परतो वा न संभवति । स्वतस्त्वपक्षे परस्परविरुद्धयोः प्रामाण्याप्रामाण्ययोरेकत्राव-स्थानासंभवात्, परतस्त्वपक्षे च तदुभयरहितस्य ज्ञानस्वरूपस्य निरूपयितुमशक्यत्वात् । तस्मात् साङ्ख्यमतं न्यायमतं च न विचारसहम् (४५) । अत एव निर्विवादमिदमभ्युपेयं यद् ज्ञानस्याप्रामाण्यं स्वतः प्रामाण्यं च गुणादिभिरुत्पद्यते इति ।

स्वमतसमर्थनार्थं तथागतैरुपन्यस्यमानाः प्रधानयुक्तयः पुनरिमाः ।

१] अप्रामाण्यं हि अभावरूपत्वादवस्तुभूतं न दोषरूपं कारणमपेक्षते । प्रत्युत प्रामाण्यं भावरूपत्वाद्वस्तुभूतं कारणगुणमपेक्षते । [४६] । तस्मात् अप्रामाण्यस्यौत्सर्गिकत्वात्स्वाभाविकमत एव स्वतः । प्रामाण्यं चापवादरूपं परत इति युक्तं वचः ।

४५) श्लो वा सू १-१-२ श्लो ३५

४६) श्लो वा सू १-१-२ श्लो ३९

२] करणगुणभावो हि द्वेधा व्याख्यायते। क्वचिदिन्द्रियाणां सदोषत्वेन गुणाभावः— यथा कामलादिदोषोपहतचक्षुषा जायमाने पीतः शङ्खः इत्यादि॰ ज्ञानम्। क्वचित्तु इन्द्रियादीनामन्यतमाभावे गुणाभावः- यथा, स्वाप्नप-दार्थज्ञाने इन्द्रियाणामेवाभावः, ततश्चेन्द्रियाधिकरणगुणाभावः। द्विचन्द्र-दर्शनादौ च सत्यपीन्द्रिये गुणानामेवाभावः (४७)।

एवं च दोषकारणकत्वमप्रामाण्यस्येति भ्रान्तिरेव। अविनाभावसंब-न्धेन दोषैर्गुणाभावज्ञानं तेन च अप्रामाण्यमित्यस्यैवोचितत्वात् (४८)।

३] यत्पुनरुच्यते अन्वयाद्यनुविधानात् दोषाणामप्रामाण्यकारणत्वमिति। तन्न व्यभिचारात्। अप्रामाण्यं हि संशयभ्रमयोः ज्ञानाभावरूपे चाज्ञानेऽवतिष्ठते। तत्र संशयविपर्ययस्थले सत्यपि दोषदर्शनावकाशे ज्ञानाभावरूपाज्ञाने न तदुप-लम्भः सम्भवति। तस्मात् ज्ञानाभावरूपाज्ञाने सत्यप्यप्रामाण्ये दोषानुप-लम्भात् व्यभिचारः। ज्ञानोत्पत्तिकारणाभावादेव तत्र ज्ञानाभाव (४९) इति समालोचना निर्णयश्च—

प्रामाण्यं स्वतः अप्रामाण्यं च परतः इति स्वीकुर्वाणा मीमांसकादयो यथा अप्रामाण्यकारणतया दोषान् अभ्युपगम्य गुणाद्यपेक्षां विनैव जायमानं प्रामाण्यं औत्सर्गिकत्वात् ज्ञानसामग्र्यात एव जायत इति स्वीकुर्वन्ति, तथा त द्विपर्यासेन बौद्धाः प्रामाण्यकारणतया गुणानभ्युपेत्य दोषादिनिरपेक्षं जाय-मा मप्रामाण्यमौत्सर्गिकत्वात्स्वाभाविकमिति कथयन्ति (५०)।

यया युक्त्या कुमारिलभट्टाः प्रामाण्यस्य स्वतस्त्वं साधयन्ति तयैव तत्त्वसंग्रहकाराः अप्रामाण्यस्य स्वतस्त्वम्। यथा यतो बोधात्मकत्वेन बुद्धेः प्राप्ताऽप्रमाणता।

४७) भा द मे प्रामाण्यवाद पृ १२५

४८) श्लो वा सू १-१-२ श्लो ४३ ४४

४९) तत्रैव सू १ १-२ श्लो ४५,

५०) त सं कारिका ३ ००, ' तस्मान्तरवतोऽप्रमाणत्वं सर्वत्रौत्सर्गिकं स्थितम्। बाधकारणदुष्टत्वज्ञानाभावादपोद्यते॥

यथ र्थज्ञानहेतुत्वमु श ..दर्शयते ॥ इति ।

गुणैश्च ज्ञा.य.. नत्वान्न प्रामाण्यमपोद्यते ।

अ ादिनसिद्ध व स्वतस्तदपि संस्थितम् ॥ (५१) इति च ।

स्यात् ये अप्रामाण्यस्य दोषजन्यत्वम्, प्रामाण्यस्य च गुणजन्यत्वमन्वयव्यतिरेकाभ्यां सुसिद्धम् । तदभाववति तत्प्रकारकत्वरूपं च प्रामाण्यं भावरूपं प्रामाण विरोधि वस्तुरूपम् । अप्रामाण्यस्य दोषजन्यत्वं पुनः सार्वजनीनानुभवसिद्धम् । असति बाधके न तस्य भ्रान्तित्वं कल्पयितुं शक्यम् । नापि ज्ञानाभावरूपाज्ञाने व्यभिचारः शङ्क्यः । तत्रत्याप्रामाण्ये दोषस्य व्यापारत्वाभावात् । ज्ञानसामान्यकारणाभावेनैव तदुत्पत्त्युपपत्तेः । तस्मान्न बौद्धोक्तयुक्तयो विचारसहाः ।

इदमत्र तु सन्धेयम् । प्रामाण्याप्रामाण्ययोः परतस्त्वपक्षे तदुभयरहितं ज्ञानस्य स्वरूपमभ्युपगन्तव्यं भवति । अन्यथा ज्ञानसामान्यकारणसामग्रीतः कार्योत्पत्त्यनुपपत्तेः । सिद्धे हि ज्ञाने तत्र गुणेभ्यः प्रामाण्यस्य दोषेभ्यश्चाप्रामाण्यस्योत्पत्तिरिति कल्पयितुं शक्यते । न चैतत्संभवति प्रमाऽप्रमाभिन्नस्य ज्ञानस्यासिद्धत्वात् । इति चेदत्रोच्यते ज्ञानसामान्यसामग्री नियमेन गुणैः दोषान्यतरघटित भवति । गुणसहिता सा प्रमां जनयति, दोषसहिता चाप्रमाम् ।

प्रामाण्यस्य स्वकार्यकरणे स्वतस्त्वपरतस्त्वविचारः—

प्रामाण्य इदे विषयोऽयं न तथा प्राधान्येन विचारितो नैयायिकैः । कार्यजननसमर्था कारणसामग्री स्वेतरानपेक्ष्यैव कार्यं जनयतीति नियमो केनाप्यपलपनीयः । सति चैवं प्रकृते प्रमाया प्रमाणपदव्यपदेशो न्यायमते कथं घटते इति चिन्त्यम् । प्रमाकरणत्वलक्षणस्य तस्य फलभूतायां प्रमायामसत्वात् । प्रवृत्तिरूपं फलं प्रति प्रमायाः करणत्वात्तस्याः प्रमाणत्वं भवति इति तु न संमतं जयन्तभट्टप्रभृतीनाम् (५२) ।

विषयोऽयं स्पष्टमुपपादितो मञ्जरीकारेण ; यथा 'यदपि च स्वकार्यकरणे प्रमाणस्य परानपेक्षत्वमुच्यते, तदपि व्याख्येयम्, किं प्रमाणं स्वकार्यकरणे

(५१) तत्त्वसंग्रह कारिका ३०६८, ३०६९, (५२) न्यायमञ्जरी प्र० ९९

निरपेक्षं, सामग्री वा, तदेकदेशो वा, तज्जन्यं वा ज्ञानमिति ? तत्र प्रामण्याः सत्यं स्वकार्यजन्मनि नैरपेक्ष्यमस्ति । न तु तावता स्वतः प्रामाण्यम्, तत्प रिच्छेदस्य परायत्तत्वात् । सामग्र्यन्तर्गतकारकस्य स्वकार्ये परापेक्षत्वमपरिहार्यम् । एकस्मात्कारकात्कार्यनिवृत्त्यभावात । ज्ञानं फलमेव, न प्रमाणमित्युक्तम् । न च फलात्मनस्तस्य स्वकार्यं किञ्चिदस्ति यत्र सापेक्षत्वमनपेक्षत्वं वाऽस्य चिन्त्येत । पुरुषप्रवृत्त्यादौ तु तदिच्छाद्यपेक्षत्वं विद्यत एवेति यत्किञ्चिदेतत्' (५३) इति ।

तदेवं प्रामाण्याप्रामाण्ययोर्ज्ञप्तावुत्पत्तौ स्वकार्ये च परतस्त्वमेवेति न्यायसिद्धान्तः ।

॥ प्रमाणपरीक्षा ॥

प्रमाणसङ्ख्याविचारः= विषयोपक्षेप,

प्रमाणसामान्यलक्षणानन्तरं निरूपिते प्रामाण्यवादे प्रमाणविभागादि प्रतिपादनीयमवशिष्यते । तत्र प्रमाणचातुर्विध्यं गौतमसूत्रे स्पष्टतया निर्दिष्टमुपलभ्यते । मनुस्मृतौ (१) आरण्यकादिग्रन्थेषु (२) च प्रत्यक्षमनुमानं शब्दश्चेति त्रिविधं प्रमाणमुद्दिष्टम् । महाभारतवचन ३ पर्यालोचनया, न्यायभाष्यकारोपदर्शितदिशा (४) च प्रत्यक्षागमाभ्यामन्यतरेण वा ईक्षितस्य पुनरीक्षणमन्वीक्षेति व्याख्यानबलात् अनुमानस्य स्वतन्त्रप्रमाणत्वं न संभवति । तथाप्यनुमिनोमीत्यनुव्यवसायबलात् तस्य पृथक्प्रमाणत्वं सिध्यति । द्वैतवेदान्तिनस्तु श्रुत्यनुकूलस्यैवानुमानस्य प्रमाणत्वात् न स्वतन्त्रप्रमाणत्वं तस्येति वदन्ति। साङ्ख्ययोगमते वेदान्तमते च प्रत्यक्षमनुमानमाप्तवचनमिति त्रीणि प्रमाणानि (५) । प्रत्यक्षानुमानोपमानानि त्रीणि इति नैयायिकैकदेशिन आहुः । प्रत्यक्षानुमानोपमानशब्दाश्चत्वारि प्रमाणानि इति गौतमप्रधाना नैयायिका आहुः। शब्दात्प्रत्येमीति विलक्षणप्रतीतेर्व्याप्तिनिरपेक्षादाकाङ्क्षादिज्ञानादुत्पत्तेः तत्करणतया शब्दस्यातिरिक्तं प्रामाण्यं सिध्यति इति नैयायिकसिद्धान्तः । वैशेषि-

५३) न्या मं प्र प्र पृ १५८

१) मनुस्मृतिः प्रत्यक्षं चानुमानं च शास्त्रं च विविधागमम् । त्रयं सुविदितं कार्यं धर्मशुद्धिमभीप्सता ॥ समुद्धृतं न्यायसुधामंडनं पृ २२१

२) तै आ   ३) महाभारत आदिपर्व अ ७०

४) न्या या १-१-१ ५) न्या को पृ ५५६

कास्तु शब्दमुपमानं चानुमान एवान्तर्भावयन्ति । तन्मते प्रत्यक्षमनुमानं चेति द्विविधमेव प्रमाणम् । बौद्धैनयमतेऽपि द्विविधमेव प्रमाणम् । लोकायतमते प्रत्यक्षमेकमेव प्रमाणमिति प्रवादः । अर्थापत्तिसहिताः प्रत्यक्षानुमानोपमानशब्दाः पञ्च प्रमाणानीति प्राभाकरा आहुः । अनुपलब्धिरूपं प्रमाणान्तरमपि तेषु संयोज्य षट् प्रमाणानीति भाट्टा वेदान्तिभेदाश्चाहुः । चेष्टाप्यतिरिक्त प्रमाणमिति तान्त्रिका अमन्यन्त । केचित्तु शकुनलिप्यादिकमपि प्रमाणान्तरमिच्छन्ति । संभवैतिह्ये अपि प्रमाणे इति पौराणिकाः (६) प्राधान्येन प्रमाणनिरूपणे प्रवृत्तं न्यायशास्त्रं तु प्रत्यक्षानुमानोपमानशब्देति प्रमाणचतुष्टयमभ्युपगच्छत् अर्थापत्त्यादीनामेतेष्वन्यतमे संग्रहं स्वीकरोति ।

प्रमाणसंप्लवव्यवस्थे—

प्रकृते क्रमेण प्रत्यक्षादीनां निरूपणमैतिहासिकदृशा, सैद्धान्तिकदृशा पारिभाषिकदृशा च न्यायशास्त्रे कथं विचकासेति पर्यालोचनीयम् । तत्रादौ

प्रमितिजनने प्रमाणानां प्रवृत्तिः कीदृशीति विचार्यते । प्रमाणप्रवृत्तिर्हि द्विविधा संप्लवरूपा व्यवस्थारूपा च । संप्लवो नामैकस्मिन् विषये ज्ञातव्ये नैकप्रमाणानामुपयोगः । व्यवस्था च प्रमाणविशेषादेव प्रमेयप्रतिपत्तिनियत्ये बोध्या । उभयमप्यभिमतं नैयायिकानाम् । तथाहि प्रमाणतोऽर्थप्रतिपत्तिः इत्यत्र प्रमाणतः इति तसिर्वचनविभक्तिव्याप्तिप्रदर्शनार्थः । वचनव्याप्त्या प्रमाणेन प्रमाणाभ्यां प्रमाणैरिति संप्लवो गम्यते (७) । प्रमाणानि प्रमेयमभिसंप्लवन्ते प्रतिप्रमेयं व्यवतिष्ठन्ते चेत्याह भाष्यकारः (८) । यथा आत्मनि प्रत्यक्षानुमानागमरूपप्रमाणत्रयसंप्लवो दृश्यते अस्त्यात्मेति आप्तोपदेशः, 'इच्छाद्वेषप्रयत्नसुखदुःखज्ञानान्यात्मनो लिङ्गम्' इति सूत्रोपदर्शित-

---

६) न्या को पृ ५५६ द्र वेदान्तकारिका प्रत्यक्षमेकं चार्वाकाः कणादसुगतौ पुनः। अनुमानं च तच्चापि सांख्याः शब्दं च ते उभे ॥ न्यायैकदेशिनोऽप्येवमुपमानं च केवलम्। अर्थापत्त्या सहितानि चत्वार्याहुः प्रभाकरः। अभावषष्ठान्येतानि भाट्टा वेदान्तिनस्तथा। सम्भवैतिह्ययुक्तानि इति पौराणिका जगुः समुद्धृत मागधम् पृ ६९

७) न्या वा पृ ४ ८) न्या भा पृ ५६

मनुमानम्, योगसमाधिजनितेन आत्ममनःसंयोगविशेषेण जायमानमथमात्मेति योगिप्रत्यक्ष च तत्र प्रमाणं भवति। एवमेव बाह्यपदार्थेष्वपि प्रमाणसंप्लवो दृश्यते यथा= अग्निराप्तोपदेशात्प्रतीयते 'अत्राग्निरिति'। प्रत्यासीदता धूमदर्शनेनानुमीयते, प्रत्यासन्नेन च प्रत्यक्षत उपलभ्यते [१०]।

एवमेव प्रमाणव्यवस्थाऽपि क्वचिदवलोक्यते। यथा स्वर्गे 'अग्निहोत्रं जुहुयात्स्वर्गकामः' इत्याद्यागम एव प्रमाणम्। लौकिकस्य स्वर्गे न लिङ्गदर्शनं न प्रत्यक्षं, नागमः। पाणौ प्रत्यक्षत उपलभ्यमाने नानुमानं नागमः इति [११]।

प्रमाणसामर्थ्यविचारः=

अत्रायं विचारः= यस्मिन् प्रमेये प्रमाणानामभिसंप्लवस्तत्र कस्याधिपत्यम्। यत्र तु प्रमाणविशेषाणां प्रवृत्तिस्तत्र सति प्रमाणान्तरविरोधे का गतिः इति। तत्र प्रथमः प्रश्नस्तावत्सम्यक्समाहितो भाष्यकृता। तथा च भाष्यम् 'सा चेयं प्रमितिः प्रत्यक्षपरा। जिज्ञासितमर्थमाप्तोपदेशात् प्रतिपद्यमानो लिङ्गदर्शनेनापि बुभुत्सते, लिङ्गदर्शनानुमितं च प्रत्यक्षतो, उपलब्धेऽर्थे जिज्ञासा निवर्तते' (१२) इति। प्रत्यक्षपरा इत्यनेन सर्वासु प्रमितिषु प्रत्यक्षप्रतिमिरेव प्रमानेत्युक्तं भवति। तदनन्तरमेव जिज्ञासानिवृत्तेर्दर्शनात्। एतावता लोकायतमतानुप्रवेशस्तु न शङ्क्यः। बाह्येन्द्रियभिन्नस्य मनसः आत्मनश्च चक्षुरादिनिरपेक्षं प्रत्यक्षप्रमितिजननसामर्थ्यस्य स्वीकारात्। बाह्यज्ञानेन्द्रियाण्याधारतयोपकल्प्यैव प्रमाणपक्षर इति स्वीकुर्वन्तश्चार्वाकाः चक्षुरादीन्द्रियैरेव प्रमोत्पत्तिर्नान्यथेति कथयन्ति। अत एव ते इन्द्रियाधिपत्यवादिन इति प्रवादः। व्यवहारसिद्धानुमानादिप्रमाणानां तु प्रत्यक्षपरतन्त्रत्वादेव न स्वतन्त्रप्रमाणत्वम्। सति प्रत्यक्षविरोधे तेषामनुपादेयत्वात् सत्येव च प्रत्यक्षसंवादे प्रामाणिकत्वात। नैयायिकास्तु बाह्येन्द्रियनिरपेक्षमात्मनिष्ठसुखादिप्रत्यक्षजनकत्वं मनसो निरूपयन्ति। तथैव परमात्मनः, शरीररहितत्वेन इन्द्रियमनसोरभावात् तस्य नित्यप्रत्यक्षात्मकज्ञानवत्त्वाच्च केवलस्यात्मनः,

९) न्या सू १-१-१० १०) न्या भा पृ ५७

११) तत्रैव १२) न्या भा १-१-३ पृ ५८

इन्द्रियनिरपेक्षं यथार्थज्ञानजननसामर्थ्यलक्षणं प्रत्यक्षप्रमाणत्वमभ्युपगच्छन्ति । आत्मनः इन्द्रियनिरपेक्षनित्य प्रत्यक्षप्रमासप्रवेद्यत्वं तु परमात्मविषय एवेत्यव-गन्तव्यम् । एवं च इन्द्रियानिन्द्रिययोः स्थलभेदेन विषयभेदेन च प्राधा-न्याभ्युपगमात् उभयाधिपत्यवादिनो नैयायिका इत्युल्लिख्यन्ते । साङ्ख्यमीमां-सकादयोऽपि तथैव । शाङ्करवेदान्तसंप्रदायिनो, विज्ञानवादिनो बौद्धाश्च बाह्येन्द्रियाणां यथार्थज्ञानजननासामर्थ्यं, क्वचित्पुनरयथार्थज्ञानकारणत्वं सम-र्थयन्तः तदितराणां चित्तादीनामेव केवलानां यथार्थज्ञानजनकत्वमभ्युपग-च्छन्ति । अत एव तेऽनिन्द्रियाधिपत्यवादित्वेन निर्दिश्यन्ते । व्यवहार इन्द्रियादिभिरुपजायमानं ज्ञानं यदा चैतज्ज्ञानेन विरुध्यति विसंवदति वा तदा तदनुभूयमानमप्यप्रामाणिकमेवेति तेषामाशयः । पूर्वोत्तरमीमांसानुया-यिनस्तु धर्माधर्मादिविषये प्रत्यक्षमप्रवर्तमानं वेदरूपागमस्यैव प्रमाणमूर्धन्यत्वं व्यवस्थापयतीति वदन्तः प्रत्यक्षानुमानान्यतरोपजीव्यमेव । अत एव न तत्स्व-तन्त्रं प्रमाणमिति । एतच्च मतमागमाधिपत्यवादत्वेनोल्लिख्यते (१३) । एवं चोक्तरीत्या प्रमाणसंप्लवे प्रत्यक्षमेव प्रबलमिति न्यायनयः ।

प्रमाणव्यवस्थास्थले तु प्रमाणविशेषस्यैव तत्र प्रवृत्तेः तादृशविषय-विशेषविषयीकरणक्षमस्य प्रमाणान्तरस्य नास्त्यवसरः । सति तु प्रमाणानां परस्परविरोधे प्राबल्यदौर्बल्यनिर्णयमवलम्ब्य बाध्यबाधकविचारः पृथगेव विधेयः ।

श्री

तत्त्वचिन्तामण्यां प्रमाणसिद्धान्तः

शुद्धाशुद्धिपत्रिका

क्र.	पृष्ठे पंक्तिः	अशुद्धम्	शुद्धम्
१.	११–२	हारश्च	हाराश्च
२.	१७–२७	ज्ञांनं	ज्ञानं
३.	२०–१०	दर्षनं	दर्शनं
४.	२०–१९	देशरया	देश्या
५.	२७–१३	द्रष्टध्यम्	द्रष्टव्यम्
६.	३०–१९	वात्स्यान	वात्स्यायन
७.	३०–१९	प्रमणा	प्रमाणा
८.	३४–१२	वार्कि	वार्तिक
९.	३६–१९	संमत्स	संवत्स
१०.	४१–२३	शैल	शैली
११.	४२–२	नश्य	नश्च
१२.	४३–२०	प्रण ण	प्रमाण
१३.	६६–१३	समुल्ससात	समुल्लसति
१४.	६७–३०	Epite	Episte

१५.	८१-१५	विपर्यीतं	विपरीतं
१६.	९१=११	विप्य	विष्य
१७.	९३-२९	भाट्टभी	भाट्टमी
१८.	९४-१६	र्सि	सि
१९.	९५-२०	न्नियर्षा	न्निकर्षा
२०.	९७-२२	यिणौ	यिणी
२१.	१०१-६	प्रत्यज्ञ	प्रत्यक्ष
२२.	१०१-७	अनुमवे	अनुभवे
२३)	१०१-११	विभष	विशेष
२४)	१०१-११	स्फुरणं त तुस	स्फुरणं न तु स
२५)	२१	शिष्य	शिष्टं
२६)	२४	स्मृतौ	स्मृतौ
२७)	२९	त्वेव	त्वेन
२८)	१०५-२	पुनरेष ।	पुनरेष
२९)	५	भिक्षुः प्र	भिक्षुप्र
३०)	६	गृ	[५] गृ
३१)	१०	द्वितीयवस्था	द्वितीयावस्था
३२)	१६	प्रमात्त्र	प्रमात्व
३३)	२०	तत्रा क	तत्त्वाक
३४)	२१	मोडय	मोऽय
३५)	२८	पृ...	पृ. १३८
			७ द्र. त. चिं. प्र. ख. ८
३६)	१०७-१२	सनवायि	समवायि
३७)	१०८-१०	तत्रां	तत्त्वां

१०	१९	तदत्र	तदनूत
	२३	काश्व	काञ्च
	२३	दयः ।	दयः (७) ।
	२४	आठल्ये	आठल्ये पृ. १७७
१०९	१२	रो प	रोत्प
	१९,२०	ततस्त...रूपेण ।	+×+
	२८	च पृ. ३२	च पृ. ३२४
११०	१६	स्मृ.व्य	स्मृतिव्य
	२७	यदा	यथा
	२७	स्मृत्ति	स्मृतिः
१११	२९	भागः	भागः पृ. ४४
११२	२६	पृ. ४३	पृ. १०३
	२७	४२)	२२)
११५	१५	वास्यायन	वात्स्यायनः
११६	२	बिरुक्त	निरुक्त
	२१	५१४ गधीभी	५९४ मन्त्रार्थे
	२२	क्तयाः	क्तव्याः
	२२	मुनुष्यमृषि	मनुष्या
	२२	क्तामस्तु	त्कामस्तु
	२३	प्रा	मृषिंप्रा
	२४	श्लो.३	श्लो.१११
	२४	स्तर्को	स्तर्कौ
११७	९	प्रमाण	तर्कस्योपयोगः= प्रमाण
	२१	श्र	द्र
	२२	धर्वित	धर्षित

२८	हेवं...उपादेवं	हेयं...उपादेयं
११८–२	स्वर्णव	निर्णय
३	भा	स
११	नेतरस्वति	नेतरदिति
१९	चिन्तवि	चिन्तावि
२२	षरवश...र्तव्य	परवश....र्तव्य
२६	न्या वा	न्पा वा
२८	१.०	१६०
११९–१४	प्रयोजनप्र	प्रयोजनक
२८	प्र खद्योतः	द्र. खद्योतः
१२०–१८	निर टङ्कां	निराटङ्कां
१२१–२९	पृ. ८	आ .एल.एम्. पृ.८
१२२–२	श्वेति ।	श्वेति (२८) ।
३	स्वरूपम् ।	स्वरूपम् (२९) ।
७	एव ।	एव (३०) ।
८	प्रयोगः	प्रयोगः (३१)
१५	प्याह ।	प्याह (३२) ।
२२	च्यते ।	च्यते (३३) ।
२८	१३०	१३६
१२३–२	त्यालका	त्यालङ्का
८	नापि	नापि बाधितं
१२४–५	प्रप्राणेनैव	प्रमाणेनैव
८	एव प्रमा	एवाप्रमा
२३	प्रमामिति	प्रमाणमिति
२७	३६	३६९–

DECLARATION

I declare that this thesis has been composed by me. and has not previously formed the basis for the award of any Degree, Associateship, Fellowship, or other similar title of any other University.

sd

Date 25 7 80 A. N. VARKHEDKAR

१४८	२०	कारणमूरी.	कारणत्वेन प्रतिपाद्यन्ते नैयायिकैः (५)। प्रति-बन्धसंसर्गाभावरूपं न द साधारणनिमित्तकारण मूरी-
१४९	७	द्वितीयं	द्वितीयं
		नित्यत्वात्।	
१५०	४	चेति।	चेति (१)।
	८	यार्त	यार्थ
	१९	विश्ले ण णाली	विश्लेषणप्रणाली
१५१	११	युक्तां	युक्तं
	१३	कचसा	वचसा
	१८	प्रत्तिमस्वाच्च	प्रवृत्तिमस्वाच्च।
	२०	आजन्यावात्	अजन्यत्वात्
	२१	मेवोचितम।	मेवोचितम् (५)।
	३०	प्रमात समीक्षा	प्रमाणसमीक्षा
१५२	१०	स्यर्थ	स्वार्थः
	१२	माध्व	माध्य
	१३	ैविध्य	त्रैविध्य
	२४	कन्दलो	कन्दली
	२५	पृठ ११	पृष्ठ २१
	२७	न्य य	न्याय
१५३	२०	स प्रपञ्चमुरत्र	सप्रपञ्चमुत्तरत्र
	२५	तक	तर्क
	२६	रेनद्रि	रेन्द्रि
	२६	वगोस्तु	वर्गास्तु
१५४	१४	सतेव	सदेव

	१६	विंशति	विशति
	१७	तारौ	तारौ (२१)
	१९	अन्या-	×
१५५	१०	इस्त	इत
	१३	भवते ज्ञा	भवतेर्ज्ञा
	१४	प्रभव...रणे	+
१५७	४	यमे विकारंव	प्रमेवयविकारं
१५८	१	८५१	१५८
	२	सिद्धम् । तत्त्व	सिद्धम् , तत्त्वज्ञानेन निवर्तत इति कथितं भवति । तच्च कथमुपपद्यते अनादिसिद्धस्य मिथ्याज्ञानस्य, तत्त्व
	१६	द्द दमूल	दृढमूल
	२८	१ २ पृ. ६४	१–१–२ पृ. ९४
१६१	१५,१६	तदास्य...प्रमाणा	तदाऽयमर्थ इति (७३) । एताऽता प्रमाणा
	२५	तत्रैव... ८	तत्रैव खद्योते १-१-१ पृ. ८
	२७	२–२–२	––
पृ६२	७	हि असत्वे	हि प्रमातृप्रमेययोः असत्त्वे
	२६	२–२–२	१–१–१
	२८	पृष्ठं ५२	पृष्ठं ५१
१६३	१५	नीति	नि
	२५	कारणा	करण
	२५	१–२–३	१–१-३
१६४	८	विषयया	विपर्यया

१६५	२६	पृ ६	पृ. ३०
	२७	पृ १	पृ. ६१
	२८	कॅक्टीक्यू	क्रिटिक
१६६	२	द्धान्त या	द्धान्ततया
१६७	२४	(१०)	(३०)
१६९	१	१६०	१६९
	३	ते	तेन
	२८	प्र	५
१७०	११	स्प द्र	स्पष्ट
	१२	अप्रधि	अनधि
	२७	॥	५
१७१	३	परश्चदि	परश्चादि
	४	समालोचना	मतमतान्तराणि
	२६	षा	वा
१७२	११, १२	अर्था...च्यते ।	+
	१३	पेक्षया च	पेक्षया प्रमाणमित्युच्यते, अर्थाधिगतिरूपत्वापेक्षया च
	२६	॥	५
	२७	३४४	१३-४४
१७३	९	वाम	नाम
	२८	॥	५
१७४	२४	॥	५
	२६	शेध्द्धष्य	शे उद्धृतम्
	२७	प. ६	पृ. ६
१७६	२९	सप्तक	वार्तिक
१७७	४	विज्ञानमिक्षु	विज्ञानभिक्षु

१७९	२२	बृंहितं	बृंहितम्
१८०	२८	८२) ३८	८२) आय.एल.एस्.पी २८
१८१	११	भावो	भावोऽपि,
	१२	स्थापक	स्थाप्यव्यवस्थापक
	१२	जनयदे	जनयदेव
	१५	णं	प्रमाणं
	१६	स्वीका	स्वीकारात्
	१९	तथ	तथाहि
	२०	न	नापि
	२२	सो	सोऽय-
	२३	सोऽप्य न्येनेति	सोऽप्यन्येनेति
१८२	९	अर्मस्य	अर्थस्य
	२४	जकत्व	जनकत्व
१८४	१२	प्रप्रागतं	प्रमागतं
१८५	७	कृष्णादि	कृष्यादि
	९	कृष्णाद्दौ	कृष्यादौ
	२२	सयभवन्ती	सत्यभवन्ती
१८६	११	रण्यवार	रण्यविरुद्धत्वाद्व्याप्तिघटकम्, अतःसाध्यसाधनयोर्वैयधिकरण्य
	२३	व्यवधा	व्यावधा
१८७	३	प्रामा यसं	प्रामाण्यसं
	७	सिद्धे...स्वपणि	सिद्धेति...स्वामणि
	९	ज्ञस्य निष्कम्प	ज्ञस्य प्रामाण्यनिश्चयाभाव-त्वात्' इति वाक्येन प्रमाण्यनियस्य निष्कम्प

१८७	२३	नात्	नात् (१६) ।
	२८	१२, १३	९२, ९३
१८८	१७	स्वत: ग्रहा	स्वत: प्रामाण्यग्रहा
	२०	नाम्न ततो	नाम्न तन्मात्रादर्थनिश्चय: तर्हि प्रामाण्यानुमितेरपि अप्रामाण्यदर्शनान्न ततो
	२५	निश्चिस्य	निश्चित्य
	२७	२११...११	२९९...९९
१९२	३	लीषंस्तव	लीसंस्तव
	१३	ह्येवं	न ह्येवं
	१४	न ह्यसौ	ह्यसौ
	१५	श्चार्थे ि डे नु	श्चार्थेऽनु
१९३	३	इति	(२९) इति
	११	तेदाम	तेषाम
	२०	नुस्तारि	नुसारि
	२५	२–२	१–१
	२५	(भू २–२–३, २–२–४) पृ. ५	(सू. १–१–३, १–१–४) पृ. ५३
	२७	२–२–४..२–२–४..२३३	२–१–४..२–१–४..१३३
	२८	×	न्या.सु.२–१–४पृ.२३९
१९४	९	पर	परां
	२१	भव	भवति
	२४	वि ादय्य	विशदय्य
१९५	२५	यं	मे
१९६	२	प्रामाण्यविचारमपि	

			प्रामाण्यविचारवदप्रामाण्यविचारमपि
	५	अप्रा..त्तिरिति	इति
	२७,२८	२) जायते,	×
१९७	१८	चला	जला
	२६	त्नोद	त्नोयद
	२७	गौ.वृ.सू.	गौ.सू.वृ.
	२८	न्य	न्या.को.पृ. ७३
१९८	२५	लौयक्षि	लौवाक्षि
२००	१८	च्यस्य	व्यस्य
	२७	त्वसं यः	त्वसंशयः
२०१	९	नेतु	हेतु
	२७	न्या. पं.	न्या. मं.
२०३	२४	पदे	पदेन
	२६	भा कृतिः	वा वृत्तिः
	२७	)	६८)
	२७	२५	२५ दुवेटो संस्कृत वर्क सिरीज व्हा १
२०४	४	चाक्षुः..नस्य	+
	५	च्युते	चयते
	१६	बौद्धयते	बौद्धमते
	२४	म सं २१५८	त. सं. २९५८
२०५	५	शात्	शाद् (७४) ।
	१०	तदिष्ट	उपदिष्ट
	२८	अ आ	अ १ आ १
२०६	२७	+	८०) भा.द.मे.प्रा.वा.पृ. ८१) द्र तत्रैव पृ. ८२

२०७	२	सम हितम कलङ्केन	समाहितमकलङ्केन
	६,७	प्रमाण..क्यात्	×
	१७	शास्त्रस्यपरि	शास्त्रीयपारि
	२१	गृह्यते	गृह्यते तथैव तद्गतं प्रमात्वमपि गृह्यते'
२०८	५	घटनामिव	घटज्ञानमिव
	२४	ज्ञप्तिवि	ज्ञानवि
२०९	१८	४)	५)
	२३	अग्निमाश्च	अग्निमाश्च
२१०	२२	गङ्गे ोपाध्याय	+
	२३	रघुनात श ो	रघुनाथशिरो
२११	३	तस्या	तु तस्या
	७	तिप	तिपत्तिप
	१२	न ह्येकदा	न ह्येकदा
	१८	नण	गणा
२१२	१७	कर्मा	कमपि
	२२	प्र ण्या	प्रामाण्या
	२८	×	९०) तत्रैव
२१३	८	पवै	पटवै
	१४	कसा	क ज्ज्ञानग्राहकसा
	२५	पृ ३१	पृ १३१
	२७	शि क च पृ	शि.प.च.पृ. १३६
२१४	१०	द्वितीय	द्वितीयविप्रतिपत्तिविचारः— द्वितीय
	१९	मते	मतेन
	२५	निनमाद्	निजमात

	२७	पृ. ५०	पृ १५०
	२८	प्र व	प्रा.वा.
२१५	१३	श्राह्य	ग्राह्य
	१६	घटत्ववति	+
	१८	प्रांमा	प्रमा
	२५	व.पृ १५१	वा.पृ १५०
	२६	का..का	वा..वा
	२८	१ ४४	१४४
२१६	२	गृह्यान	गृह्यत
	१०	विविधा	विविधान्
	१३	यरणा	करणा
	१९	यज्ञपत्न्यु	३ यज्ञपत्यु
	२०	कणेति	करणेति
		णीवाक्षति	णीयमिति
	२७	वर्त .णि	क्त:..णि:
२१७	३	रुचिमिश्रै:	रुचिदत्तमिश्रै:
	१२	भावरूपजन्य..रूप	भावरूपं
	१४	प्रति	प्रयुक्तव्यतिरेकप्रति
	१५	स्था	स्था
	२०	ग्राह्या	ग्राह्य
	२५	लाण्डवम्	ताण्डवम् भा. १
	२७	ताण्डवम्	ताण्डवम् भा. १
२१८	३	साधमाख्यो	साधनाख्यो
	८	वदन्यस्य	तदन्यस्य
	९	तिभा	त्तिभा
२१९	७	रयावा	श्यत्वा

	११	त्वप्र	त्वप्रकारकः भ्रान्तिरूपम्, । च तत्क्रान्तत्त्विपटत्वप्रति कत्त्वप्र
२२०	२	येन	येन (२०) ।
	१३	द..दा वि	दोषादानवि
	१३	रह । का	रहस्याकारेण
२२१	२८	वैशिकय	वैशिष्ट्य
२२२	४	अ च	अत्र च
	८	वेद्यौ	वेद्यो
	१६	यान्	यन्
	१८	मामग्री	सामग्री
	२१	यात्	यान्
	२४,२५		—
२२३	२०	अनु	किंच अनु
	२०	गृह्यात	गृह्यत
	२२	दीपः	दीपः त. ।.भा. १ पृ ६
	२७	विशेषी	विशेषो
२२४	२	गृह्याते	गृह्यते
	७	त वि	तावि
२२५	३	सच च	स च
	८	यान्	यात्
	१५	मानमान	मान
	१८	यादिरि	यातिरि
	२४	सं ह्येत	संदिह्येत
	२५	२०१	२१०
	२९	न्या प शि म १२५	

२२६	२	स्वपेक्षा	अपेक्षा
	५	र्थत	र्यम्
	७	पस्थिति	पस्थिति
२२७	२	स्व त्व	स्वतस्त्व
	४	मा प्रय प्रवार	मानप्रयोगप्रकारः
	५	तण्ज्ञा	तज्ज्ञान
	१२	भाषात ाह	भावात्पराह
	१८	मनु	मप्यनु
	२४	जाय..स यः	जायः..सायः
२२८	९	निर्वि	निर्वि
	११	ग्र्रहः	ग्यग्रहः
	२०	स्त्वभ्यु	स्त्वाभ्यु
२२९	९	वहित्न..न	×
	१०	वच्छिन्न	वच्छिन्नो
	१२	भास्य	भावस्य
२३०	१८	। अप्रा	अप्रामाण्यशङ्काकलङ्का-भावात् । यत्र तु प्रामाण्य-ज्ञाने अप्रा
२३१	७	रित्तैः	रिक्तैः
	१५	शत्या	शस्या
	१६	मस्य	वस्य
	२२	स्त्वन्	न च न्यायनये तथा । अतो न प्रामाण्यस्य स्वतस्त्वम् ।
२३२	६	सुप्रतामः	सुप्रतीमः
	१९,२०	फल..कर्न् ।	+
	२२	मित्र	मिश्र

२३२	२२	रूप	रूप
२३३	१	प्रामाण मपि	प्रामाण्यमपि
	१	स्वत इति	स्वत एव इति
२३३	३	प्रथ प्रा	प्रथमप्रा
	४	प्रवृ त्त	प्रवृत्ति
	४	नुमनि	नुमाने
	६	विषये य-	विषयेषु जाय-
	७	च	च इदं च
	१०,११	इदं..मास	×
	२४	भावद्वि	भाववद्वि
	२८	क्वाचिद्विघते	क्वचिद्विघते
	२८	स्यान्	स्यात्
२३४	१	स्वत त्वम्	स्वतस्त्वम्
	३	जन	जन्य
	६	भूते	भूते ।
	११	यथाऽनप्र	यथाप्र
	१५	नैय यकमतम्	नैयायिकमतम्
	२७	प्र	प
२३५	२	हेतुक	हेतुको
	८	स्वा	स्या
	१७	न्यया	न्वया
२३६	४	इस्यस्तु	इत्यस्तु
	१९	हेतू थ	हेतुत्थ
	२०	प्रयत्ययोः	प्रयत्नयोः
		योज्यम्	योज्यम् ।
	२१	कार्य कतिपयत्न	कार्यप्रवृत्तिप्रयत्नः

	२२	निवृत्ती	निवृत्ति
		समाधानी	रागाभावो
	२३	द्वेष विना	द्वेषरागाभावाविना
		विचारविषयः	विवाधवनियमः
	२४	तेशहित	दोषसहित
		गुणसदि	गुणसहित
२३७	१०	स्वरू ावस्थ	स्वरूपावस्थि
	१३	कुम्भसि	कुम्भादि
२३८	३	कि प्ये	किमप्ये
	७	मति	मतिः
	८	ताय	ताव
	२६	त्त्व	तत्त्व
	२८		तत्त्वप्रदीपिका (चित्सुखी)
			प्र.प.पृ. २१५
२३९	२	षा भाव	दोषाभाव
	६	त्सर्गो	त्सर्गोऽ
	२७		तत्रैव पृ. ३०९-३१९
२४०	५	जन्यवे	जन्यत्वे
	२३	ज्ञात त्वाच	ज्ञानत्वाच
२४१	१	कारण ा रण	कारणताभिन्नकारण
	१७	ससन	गगन
	२६	वान	+
	२८	विश्वा॰तु	विचारस्तु
२४२	१८	निश्चय प	निश्चयरूप
		व्यवसायेन	अनुव्यवसायेन

	२४	प्रवृत्तिरिति	प्रवृत्तिप्रतिबन्धकोऽपि स्तस्य ज्ञानान्तर निवृत्तौ निष्कम्पप्रवृत्तिरिति ।
२४५	१८	प्रामारंय	प्रामाण्य
२४६	१४	विध्यति	सिध्यति
	२३	सुवचनम्	सुवचम्
	२५	मूम	सूम
२४७	२३	ण्यस्यौ	ण्यमौ
२४८	१८	मा म	मातम
	२०	यथा यतो. .	यथा यतो. ..
	२५	तस्या	तस्मा
२४९	१	गु श द	गुणज्ञानाद्
	४	न्याप ये	न्यायनये
	६	प्रामाणवि	प्रामाण्यवि
२५०	१९	स्यु	स्तु
	२६	गगम ।	गमम् ।
	१६	मत्तिः	पत्तिः
	१८	गम्यते (७) ।	गम्यते, प्रमाणेनैव इति व्यवस्था च । विभक्ति-व्याप्त्या हेतुकरणभाव गम्यते (७)
	२२	दसुम	दसुग
	२५	पमानं	पमानं
		सहितानि	सहैतानि
		प्रभाकरः	प्रभाकराः

	२७	पृ ६२	५ पृ ६९
५ ५२	३	धू	धूम
	७	न प्रत्यक्षं	न प्रत्यक्षम् । स्तनयित्नुश श्रूयमाणे शब्दहेतोरनुमान: तत्र न प्रत्यक्षं
	९	प्रवाण	प्रमाण
	१४	प्रत्यक्षतो,	प्रत्यक्षतो दिदृक्षते,
	२५	वत्वाच्च	वस्त्वाच्च